यथोक्तेनैव विधिना मर्दनं तस्य कारयेत् ।
कुलत्थानाढकीबीजं बदराणि यवांस्तिलान् ॥
पयसा पञ्चमूलं[1] च स्थाल्यामाधाय पाचयेत् ।
ततोऽस्य कारयेत्स्वेदं नाड्यैव सततं भिषक् ॥
स्विन्नस्य च पुनः कार्यं मर्दनं पूर्वकीर्तितम् ।
न चेदनेन विधिना गात्रं गच्छति मार्दवम् ॥
ततोऽस्य विधिवत्कार्यः फालस्वेदो ह्यनन्तरः ।
समीपे तस्य नागस्य कर्म(र्मो)रावेस(श)नं भवेत् ॥
(*ततोऽस्य पातयेत्फालानग्निवर्णान्भिषक्तथा ।
पटावनद्धगात्रस्य तथा स्निग्धस्य दन्तिनः ॥
तिलसर्षपचूर्णैश्च यवैश्चाऽऽलेपनं भवेत्) ।
ततः संचारयेत्फालं यथायोगं विचक्षणः ॥
स्विन्ने च विधिवत्कार्यं मर्दनं तस्य हस्तिनः ।
भवेन्न चेत्प्रकृतिमान्पुनस्तस्य समाचरेत् ॥
विधिव्यस्तस्य गात्राणां स्तनानां च निवर्तनम् ।
स(श)णवीर्या(जा)र्कयोर्मूलमतसीसर्षपानपि ॥
तिलानि बीजनिचये यवान्कृष्णा च मृत्तिका ।
सम्यक्क्षीरेण सिद्धेन सुखोष्णेनाथ सर्वशः ।
कल्केनैतेन नागस्य पिण्डस्वेदं प्रकल्पयेत् ॥
स्विन्नस्य च पुनः कार्यं मुहूर्तमवगाहनम् ।
सलिलेनैव नागानां पुनश्चोत्तार्य कारयेत् ॥
एष एव विधिः कार्यः पिण्डस्वेदे यथाक्रमम् ।
मर्दनं चास्य पूर्वोक्तं नाडीस्वेदं च कारयेत् ॥
अयमन्यो विधिः कार्यः स्तब्धगात्रेषु हस्तिनः ।
प्रसुप्ते[2] येन गात्राणां सर्वतोऽप्युपशाम्यति ॥
देवदारु हरिद्रां च सह दारुहरिद्रया ।
कुष्ठं रास्नां च कालां च सरलं च पुनर्नवा ॥
एवं संभृत्य संभारं पिण्डस्वेदं[3] प्रकल्पयेत् ।
पूर्वोक्तेन विधानेन मर्दनं च विचक्षणः ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ।

---

१ क. °मूलानि स्था° । २ क. °तो यः प्रशा° । ३ क. प्रकल्पयेत् ।

निवातस्थस्य चाभ्यङ्गं मर्दनं तत्र कारयेत् ।
सर्वस्वेदेन नागस्य स्विन्नस्यैव विगाहनम् ॥
त्रिरात्रं पञ्चरात्रं वा सप्तरात्रमथापि वा ।
स्नेहाभ्यङ्गः प्रयोक्तव्यः पृथक्स्विन्नेषु दन्तिनाम् ॥
अथवैतेन कल्पेन विशेषो नोपलभ्यते ।
अथैनं स्नेहयेत्सम्यगेतेन विधिना भिषक् ॥
यवकोलकुलत्थानां निक्काथं साधु कारयेत् ।
प्रक्षिपेदुच्चकैस्तेन निक्काथे पञ्चमूलयोः ॥
तत्र तैलं समाश्रित्य ततो मृद्वग्निना पचेत् ।
पच्यमाने ततस्तस्मिन्निमं गर्भं प्रदापयेत् ॥
अनन्ताचन्दनोशीरमशोकं सारिवा घृतम् ।
तथाच क्षीरकाकोली जीवकर्षभकावुभौ ॥
काकोली मधुकं रास्नां सरलं देवदारु च ।
हरेणुकं छिन्नरुहां बलां चात्र प्रदापयेत् ॥
तं स्नेहं पाययेन्नागं भक्तं वा स्नेहसंमितम् ।
एतेन स्निग्धकोष्ठस्य भवेन्मार्दवलाघवम् ॥
गात्राणामुरसश्चास्य प्रमा(सा)दश्चोपलभ्यते ।

विभ्रान्तगमनं गात्रं हस्तिनः संनिहन्यते ॥
वेदना शूनभावश्च तस्य संधिषु लभ्यते ।
न च तिष्ठति गात्राणां न च वेल्लयति द्विपः ।
एवं तस्य तु लिङ्गानि अत ऊर्ध्वं चिकित्सितम् ॥
सेचनं घृतमिश्रेण पानमस्य महीपते ।

अथो निपिष्टगात्रस्य लक्षणं संप्रचक्षते ।
यतो निमित्तं गात्रेषु गजः स्तम्भमवाप्नुयात् ॥
सहसाऽतिप्रसक्तं च योऽध्वानं नीयते गजः ।
रूपाण्यभिद्रवति वा योऽतिक्रुद्धो मतङ्गजः ॥
संनिपिनष्टि सहसा भूमौ गात्राणि वारणः ॥

---

१ क. °नं च विचक्षणः । स° । २ क. शून्यभा° । ३ क. °थोऽतिपि° । ४ क. °पिष्टति स° ।

तस्य निषेवणाद्गात्रे रुधिरं संप्रदुष्यति ।
श्वयथुस्तस्य गात्रेषु वेदना चोपजायते ॥
प्रोहयोः पादपार्श्वेषु पश्चात्पादतलेषु च ।
प्राहुस्तं विनिपिष्टं तु गात्ररोगं चिकित्सकाः ॥
सेचनं पूर्वगात्राणां सर्पिषा तस्य कारयेत् ।
(*गम्भीरसलीले चैनं नागं तमवगाहयेत् ।
उत्तीर्य च ततस्तस्य घृतमिश्रैश्च सक्तुभिः ।
प्रलेपं सर्वगात्राणां तलानां चैव कारयेत्) ॥
एवं मृत्तिका(क)या चास्य कार्यं शीतलया नृप ।
कुक्कुटीशिशुमाराणामण्डान्याहृत्य शास्त्रवित् ॥
सुरां चिरस्थितां चास्मै दद्यात्फाणितसंयुताम् ।
अपरेद्युः पर्युषितां वारुणीं च महीपते ॥
अतः प्रलेपः शीतोऽयं गात्राणां पूजितो भवेत् ।
कुक्कुटीशिशुमाराणामण्डान्याहृत्य शास्त्रवित् ॥
मञ्जिष्ठां चैव मृद्वीकां पेषयेत्सह सर्पिषा ।
तेनास्य लेपं गात्राणां बहलेन समाचरेत् ॥
पानं चैव यथायोगं पाययेत विचक्षणः ।
विनिपिष्टस्य विज्ञानं चिकित्सा च प्रकीर्तिता ॥

अथ त(य)स्य भवेद्गात्रं [†]चिन्तितं[२] वारणस्य च ।
तस्योत्पत्तिं निदानं च चिकित्सा च प्रवक्ष्यते[३] ॥
स्खलनैर्भ्रंशनैर्वध्यैः(र्वेधैः)पतनैर्लङ्घनैरपि ।
प्रास्तं प्रत्यस्तमत्यस्तं सहसा निघ्नतोऽपि च ॥
क्रोश्चर्यश्चापि(?) सहसा परिणीतस्य दन्तिनः ।
व्यस्तं वा सहसा वध्यं गात्रेणाभिघ्नतस्तथा ॥
तरणाद्वाऽपि सलिले शिरास्नाय्वभिघाततः ।
प्रस्तम्भितं ततो गात्रं सरुजं दन्तिनो भवेत् ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके । † 'विनतां' इति युक्तम् 'विनतस्य' इत्यग्रिमग्रन्थानुरोधात् । 'विहितं' इति तु प्रागुपलभ्यते ।

---

१ ख. °टीसिसुमा° । २ क. विनितं । ३ क. प्रवक्ष्यते ।

प्रस्तब्धं श्वयथुश्चास्य वारणस्याऽऽशु जायते ।
कुल्माषतिलकिण्वानि क्षीरेण सह [2]पेषयेत् ॥
कृतस्वेदे च कर्तव्यः प्रलेपो घृतसंयुतः ।
पाचयेद्घृतसंसृष्टं चक्रतैलं मतङ्गजः ॥
हस्तेन तस्य गात्राणां मर्दनं चापि कारयेत् ।
क्रमव्यायामवृद्धिं च विनतस्य चिकित्सितम् ॥

आहतस्यापि वक्ष्यामि चिकित्सां लक्षणानि च ।
यथानिमित्तं मातङ्गश्चरणस्तम्भमृच्छति ॥
मिथ्या च सहसा चैव यो गजः परिणीयते ।
ततस्तस्य भवेद्गात्रं भ्रमणात्सरुजं भृशम् ॥
स गच्छति समुत्प्लुत्य गात्रमुद्भ्राम्य वा नृप ।
सहसा जायते चास्य श्वयथुर्गात्रसंधिषु ॥
सेचनं सर्वगात्राणां तस्य तैलेन कारयेत् ।
सुखोष्णेन भवेच्चास्य निवृत्तिस्तस्य कर्मणाम् ॥
तर्कार्या उरुबूकाणां शिग्रो रक्तस्य कारयेत् ।
कण्टकारिकयोश्चैव कपित्थस्य तथैव च ॥
पत्रभङ्गान्समादाय निक्काथ्य पञ्चमूलयोः ।
नाडीस्वेदं यथाप्रोक्तं सस्नेहं चैव मर्दनम् ॥
यवचूर्णं च किण्वं च तथा कृष्णां च मृत्तिकाम् ।
अजाकरीषं क्षीरेण सर्पिषा च प्रयोजयेत् ॥
तेन स्विन्नानि गात्राणि बहलेन प्रलेपयेत् ।
तैलयुक्तमजाक्षीरं पानार्थं च प्रदापयेत् ॥
मूत्रं वेणिकया चास्य गात्रयोर्वेष्ट्य बन्धयेत् ।
विसृष्टे च ततः कार्यं सेचनं मर्दनानि च ॥

(*गात्रं यस्य भवेच्छूनमपरा वाऽपि दन्तिनः ॥
तस्य लिङ्गानि वक्ष्यामि चिकित्सां च यथाक्रमम् ॥
बलाबलमविज्ञाय सहसा यः प्रमुह्यति ॥)

---

* धनुश्चिह्नान्तरगतो नास्तिपाठः कपुस्तके ।

---

१ ख. °ल्मालति° । २ ख. पीषयेत् ।

प्ररोधात्तस्य गात्रेषु कफो वा तस्य कुप्यति ॥
तत्र कोपाच्च शुष्यन्ति सिरा गात्रसमाश्रिताः ॥
ततः प्रस्तब्धचरणस्तेन गात्रोऽवतिष्ठते ॥
न च स्थाने न शय्यायां वारणो लभते सुखम् ॥
सुखोष्णेनाथ तैलेन सेचनं तस्य कारयेत् ॥
नाडीस्वेदं यथाप्रोक्तं सुस्विन्नस्यापि मर्दनम् ॥
जलयुक्तमथो तैलं पानार्थे तस्य युज्यते ॥
शिग्रुं वंशपलाशं च निम्बस्य कुटजस्य च ॥
हस्तिकर्णपलाशानि किणिहीं[१] चैव पाययेत् ॥
नाडीस्वेदो यथा[२] प्रोक्तः[३] स्विन्नस्य च विमर्दनम् ॥
त्वग्भिश्चापि तथा कार्यः प्रलेपो घृतसंयुतः ॥
प्रक्षीणबलमांसो वा मदक्षीणो मतङ्गजः ॥
जायते स यदा भूयः स गजो नैव कार्यते ॥
तूर्णमध्वप्रयोगं वा लङ्घनप्लवनानि च ॥
†आयुर्वध्या मत्तकासी[४] गोमूत्रं[५] मण्डलानि च ॥
वंशोत्थापनकल्पं च तोयाद्याहरणानि च ॥

त(य)स्य कुप्यति भूयिष्ठं पवनो गात्रसंधिषु ॥
संकुच्यते तथा गात्रं वातेनाभ्युक्ष्यतेऽपि वा ॥
प्रोहापस्कारदेहेषु पुनरष्ठील्ययोरपि ॥
कुचित्य(त)मुग्रमाहुस्तं गात्ररोगं तु दन्तिनाम् ॥
सेचयेत्तस्य गात्राणि तैलेन वसया तथा ॥
कारयेत सुखोष्णेन सप्तरात्रमतन्द्रितः ॥
आरग्वधं सप्तपर्णमाढकीदीर्घवृन्तकौ ॥
कर्णिकारौत्तरु† .... ॥

....सं स्थाल्यामाधाय पाचयेत् ॥

---

† आकारः खपुस्तके त्रुटितः । † संकुचितग्रन्थस्यान्तिमो ग्रन्थः, भग्नग्रन्थस्याऽऽदिमो ग्रन्थश्चाऽऽदर्शद्वयेऽपि त्रुटित इव प्रतिभाति ।

---

१ क. ख. किणिह्यां । २ क. यथा । ३ क. प्रोक्तः । ४ क. मत्तकासं । ५ क. गोमूत्रं ।

नाडीस्वेदं ततः कुर्याद्यथावच्च विमर्दनम् ॥
तिलसर्षपचूर्णेन लेपनं तस्य कारयेत् ॥
अजावराहवसया सह तैलेन घृतेन च ॥
वेसवारकृतं मांसं *दद्यात्सद्यः [1]सुदाहृतम् ॥
न संहरति गात्राणि न च वेल्लयति द्विपः ॥
प्रलेपं तस्य गात्राणां बहलेन समाचरेत् ॥
अथैनं पाययेत्पानं यथायोगं भिषग्वरः ॥
ततो विरिक्तं विज्ञाय बृंहणीयैरुपाचरेत् ॥
संजातमांसं मातङ्गं क्रमात्कर्माणि कारयेत् ॥
सन्ने गात्रेऽपरायां वा कुर्याद्भग्नचिकित्सितम् ॥

अथ त(य)स्य भवेन्म्लानं गात्रं वा यदिवा परम् ।
तस्योत्पत्तिं प्रवक्ष्यामि सनिदानं चिकित्सितम् ॥
संग्रामे वा प्रहारैस्तु शस्त्रकर्मणि वा तथा ॥
शिरा रक्तवहा भिन्ना बहु मुञ्चति शोणितम् ॥
ततः कुप्यति गात्रेषु पवनः [2]शोणितक्षयात् ॥
स शोषयति गात्राणि सङ्गं चास्य नियच्छति ॥
तस्य कुर्यादिदं कल्पं निखिलं गात्रशोषिणाम् ॥
सेचयेत्तस्य गात्राणि सर्पिषोष्णेन दन्तिनः ॥
निचुलं फलकल्कं च जलजम्बूस्तथैव च ॥
सघृतं पयसा मिश्रं प्रलेपं तस्य कारयेत् ॥
विधिना च यथोक्तेन स्वेदनं तस्य हस्तिनः ॥
अस्थिस्वेदं च निखिलं फालस्वेदं च कारयेत् ॥
मांसनिर्यूहपक्वं च तैलं चास्मै प्रदापयेत् ॥
सर्पिः क्षीरं वसां चैव विधिना संप्रदापयेत् ॥
म्लानं संवत्सरोत्सृष्टं व्याधेश्च न सिध्यति ॥
इत्यब्रवीत्पालकाप्यो †म्लानं गात्रं चिकित्सितम् ॥
यस्तु [3]निर्वेष्टितं कुर्यादावेष्टितमथापि वा ॥

---

* 'दद्यात्सद्यस्तदाऽऽहृतम्' इति भवेत् । † 'म्लानगात्रचिकित्सितम्' इति भवेत् ॥

१ क. मुदाऽऽहृतम् । २ क. °शोणितम् । ३ क. निचेष्टितं ।

गात्रं तस्य समुत्पत्तिर्निदानं च प्रवक्ष्यते ।
कर्दमं वालुकां चापि सेवते यदि वारणः ॥
गात्रान्तरश्च सहसा यदा तु परिणीयते ।
भौमकर्मणि वा राजन्गुरुवंछादिसंयुतम् ॥
यदाऽपनीतः सहसा वारणः परिणीयते ।
अतिमात्रं निबद्धं वा यातारः कर्मणे यदि ॥
नियोजयन्ति सहसा मिथ्यायोगादयं(?) हितम् ।
तस्य कुप्यति गात्रेषु मारुतः संनिरोधनात् ॥
आवेष्ट्यते ततो गात्रं ततो निर्वेष्ट्यतेऽपि वा ।
सेचनं घृततैलाभ्यां सततं तस्य कारयेत् ॥
(*नाडीस्वेदश्च कर्तव्यः कल्पेनैतेन दन्तिनः ।
तुलसीं सुरसां बिल्वमर्कमारग्वधं तथा ॥
श्योनाकं चाग्निमन्थं च स्थाल्यामाधाय पाचयेत् ।)
नाडीस्वेदं ततः कुर्यात्तैलाभ्यक्तस्य दन्तिनः ॥
निर्भुग्नस्य च कर्तव्यं(:)प्रलेपं(:)तस्य हस्तिनः ।
निर्वेष्टितस्य कर्तव्यं सम्यगावेष्टनं भवेत् ॥
निर्वेष्टयेत्तथाऽप्येनमनेन विधिना भिषक् ।
अभ्यक्तं स्वेदयेत्स्विन्नं सम्यगालेपयेद्भिषक् ॥
प्रलिप्तं वेष्टये····यद्(द्वे)ष्टितवेष्टितम् ।
······································लेत्रयेत् ॥
न चेत्प्रकृतिमाप्नोति तथोत्तरमथाऽऽचरेत् ।
ईमं कृत्स्नं विधिं कुर्याद्येन लाघवमाप्नुयात् ॥
यथा च स्विन्नगात्रस्य स्नेहपीतस्य दन्तिनः ।
यत्नेऽवस्थाप्य कुर्याच्च तस्य गात्रोपवेष्टनम् ॥
ततस्तं पलिहस्तस्य मध्ये यत्नेन वेष्टयेत् ।
यथायोगं ततः कुर्यात्तेन यन्त्रेण वारणम् ॥
सर्पिस्तैलं वसां चैव तं द्विपं प्रति पाययेत् ।

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ॥

---

१ क. मिथ्योयोगादयं हि सः । त° । २ ख. अमक्तं । ३ क. न चात्रपेत् । ४ ख. इदं ।

स्निग्धं विर(रि)क्तं विज्ञाय बृंहणीगैरुपाचरेत् ॥

सहसा वाऽपि पतनाद्व्यथनात्प्रतिहस्तिनाम् ।
यदा संभिद्यते गात्रं भिद्यते ममवतिपि (?) ।
वामाङ्कु(?)मोटना ....व्याधिर्नराधिप ॥
वेदना श्वयथुः स्तम्भो गात्रे तीव्रा च वेदना ।
तस्य वक्ष्याम्यशेषेण निखिलं भैषजं विधिम् ॥
भग्नमात्रस्य यत्प्रोक्तं साधनं भक्तसंविधौ ।
तत्कार्यं मोटनस्यापि व्रणवच्च तमाचरेत् ॥

अथ वोन्मथितं गात्रमपरा वाऽपि लक्ष्यते ।
तस्योत्पत्तिर्निदानं च चिकित्सा च प्रवक्ष्यते ॥
सहसा वा प्रसक्तौ वा यदा वाँह्येत वारणः ।
गात्रापरं भ्रामयति सहसा विषमस्थितः ॥
कर्दमे वालुकायां वा संरब्धो वा न सीदति ।
तरतो वा प्रसङ्गेन सलिलेऽत्यर्थयोगतः ॥
अथवा गुरुसंरब्धः सहसा परिधावति ।
वृक्षप्राकारपरिघान्सहसा वा प्रमर्दतः ॥
ततोऽस्य कुपितो वायू रक्तमादाय तिष्ठति ।
करोति गतिवैकल्यं चरणस्तम्भमेव च ॥
श्वयथुं तस्य गात्रेषु मनस्तापं च दन्तिनः ।
इत्येतद्द्विविधं प्रोक्तं लिङ्गमुन्मथितस्य च ॥
सर्पिषा सेचनं तस्य सततं कारयेद्भिषक् ।
प्रलेपं शीतलं तस्य क्षीरवृक्षैः समाचरेत् ॥
वेतसस्य च मूलानि वटस्याथ नलस्य च ।
कसेरुकं समञ्जिष्ठं नलदं तर्पणं तथा ॥
श्लक्ष्णपिष्टैः समैरेभिः प्रलेपं तस्य कारयेत् ।
त्रिरात्रं पञ्चरात्रं वा ततः संपद्यते सुखी ॥

—:○:—

१ क. °वत्यिपि । २ क. °टनां व्याधियदा वाऽपि नरा° । ३ क. प्रसक्तो । ४ क. वाह्येन । ५ क. °रिवान्स° ।

अजाक्षीरं वसां मज्जां घृतेन सह संसृजेत् ।
ततोऽस्य सेचयेद्गात्रमनेन विधिना भिषक् ॥
मूलान्युत्पलजम्बूनां करवीरोत्पलानि च ।
सघृतं मृत्तिकामिश्रं प्रलेपं तस्य कारयेत् ॥
शीतेनानेन कल्केन विहितं चानुलेपनम् ।
यावदूष्मप्रशमनं श्वयथोश्च निवर्तनम् ।
स्वेदनं मर्दनं चैव प्रथमं यत्तु कीर्तितम् ॥
स्तब्धगात्रे हि तदपि निरूष्मण्युपपादयेत् ।
विविक्तं सततं स्थानं व्यायामं च विसर्जयेत् ॥
सर्पिः क्षीरं च पानार्थे यथोक्तं च प्रलेपने ।

—:○:—

सहसा दन्तिनोऽङ्गेषु यदा कुप्यति मारुतः ॥
ततः पित्तादयो दोषा दुष्यन्ति पवनाहताः ।
स्वस्थस्यास्य तु गात्रेषु श्वयथुं जनयन्ति ते ॥
समागच्छति चैतेन विषमं वाऽपि वर्धते ।
न सुखं लभते स्थाने न शय्यामभिनन्दति ॥
तमाहुर्वारणं वैद्याः शूनमेकाङ्गशोषिणम् ।
ग्रासद्वेषो दौर्मनस्यं सस्त(?)श्रवणवालयोः ॥
दन्तिनो मक्षिकाश्चैव पूर्वलिङ्गानि मृत्यवे ।
विपर्यये तु लिङ्गानां भवेत्साध्यस्य लक्षणम् ॥
श्लीपदान्यपि जायन्ते घोररूपाणि दन्तिनाम् ।
तस्य दोषविशेषं तु परीक्ष्य मतिमान्भिषक् ॥
यथोक्तमेव कुर्वीत पूर्वप्रोक्तमुपक्रमम् ।

—:○:—

*भ्रष्टगात्रस्य विज्ञानं चिकित्सा च प्रवक्ष्यते ॥
यदा क्षितोपविद्धो वा पाशबद्धोऽपि वा गजः ।
शुषिरे क्षुपपन्ने वा सहसा च प्रधावति ॥
हस्तिना वाऽप्यभिहतस्तोत्रवित्रासितोऽपि वा ।
आक्षेपाज्जायते तस्य श्वयथुर्वातरक्तजः ॥

* इतः प्रागपृष्टच्छिन्नस्य लक्षणादि त्रुटितमिति प्रतिभाति ।

१ क. प्रलेपनम् । २ ख. °शोकिण° । ३ ख. °म् ॥ श्रीप° । ४ ख. क्षिताप° ।

वेदना गतिवैकल्यं दौर्बल्यं परिमूत्रता ।
गात्रविक्षोभणाद्वाऽपि स्तम्भस्तस्योपजायते ॥
तस्य सर्वाणि गात्राणि सर्पिषा परिषेचयेत् ।
स्निग्धगात्रस्य च †भवेत्सुखं सर्वार्थदेहजम् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने द्वितीये क्षुद्ररोगस्थाने गात्ररोगो नाम द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

इति द्वितीयं क्षुद्ररोगस्थानं समाप्तम् ॥

---

† खपुस्तके तु 'भवे' इत्युत्तरमेव 'इतिश्री'–इति स्थानसमाप्तिलेख उपलभ्यते। कपुस्तके तु 'सुखं सर्वार्थदेहजम्' इत्युत्तरम् । पुस्तकद्वयेऽप्यध्यायसमाप्तिलेखो नोपलभ्यते । अतः प्रतिभाति—'कियान्ग्रन्थभागस्त्रुटितः' इति ॥

अथातस्तृतीयं शल्यस्थानमारभ्यते ।

'अथातो द्विव्रणीयमध्यायं व्याख्यास्यामः' इति ह स्माऽऽह भगवान्पालकाप्यः ॥

तपोभिर्विपुलैः पूतमृषिं वारणबान्धवम् ॥
बान्धवो विदुषामङ्ग इमं प्रश्नमचोदयत् ॥ १ ॥
योनिर्वस्तून्यधिष्ठानं मर्म शल्यसमुद्भवम् ॥
आ(स्रा)वास्त्वाकृतयश्चैव व्रणानां कतिलक्षणाः ॥ २ ॥
व्रणानां सिद्धिजननाः कति चैषामुपक्रमाः ॥
शास्त्रतः कति बोध्यन्ते व्रणोपक्रमयोनयः ॥ ३ ॥
विसर्पन्ति च केनैषां प्रायसो(शो) दन्तिनां व्रणाः ॥
बद्धकोशाश्च जायन्ते स्वल्पमप्यनि(न)धिष्ठिताः ॥ ४ ॥
ये चैषां दुरधिष्ठाना व्रणास्ते केन हेतुना ॥
अचिराच्चोपरोहन्ति दुष्यन्ति च पुनः पुनः ॥ ५ ॥
केन चैषां न जायन्ते वने दोषोद्भवा व्रणाः ॥
रोहन्ति च विना वैद्यैः केन वै हेतुना द्विज ॥ ६ ॥
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
अङ्गराजाय निखिलं विधिं व्रणविधानजम् ॥ ७ ॥
व्रणस्य त्रिविधा योनिरात्मा च त्रिविधः स्मृतः ॥
वस्तून्यष्टावधिष्ठानं द्विविधं शास्त्रनिश्चयात् ॥ ८ ॥
द्विविधा चाऽऽकृतिर्योनिः आ(स्रा)वश्च द्विविधः स्मृतः ॥
शल्यं च द्विविधं ज्ञेयं त्रिविधश्चाप्युपक्रमः ॥ ९ ॥
तस्य च त्रिविधा ज्ञेया योनिः शास्त्रविनिश्चयात् ॥
पञ्चैव पठिता राजन्व्रणोपक्रमयोनयः ॥ १० ॥
दुःखाधिष्ठान्तरा राजन्संल्पपा न(*व हस्तिनः ॥
इत्युद्दिष्टः समुद्देशस्तत्प्रविस्तरलक्षणम् ॥ ११ ॥

* धनुश्चिह्नान्तरगतो भ्रष्टः पाठः कपुस्तके ।

१ ख. °यं स्था° । २ क. °पुष्टैरमृत° । ३ क. °मवोचय° । ४ क. सिद्धजनकाः । ५ क. रुहन्ति । ६ क. त्रिविधं ।

व्रणस्य त्रिविधा योनिर्यस्यां वै जायते व्रणः ॥
उद्गमो †वैकृतं दाहस्तस्यापि त्रिविधः स्मृतः ॥ १२ ॥
तत्रास्य उद्गमो ज्ञेयो द्विविधः शास्त्रनिश्चयात् ॥
देहे दोषसमुत्थश्च यश्च यादृच्छिको भवेत् ॥ १३ ॥
तत्र वातात्कफात्पित्तान्मेदसः शोणितादपि ॥
उद्गमः संनिपाताच्च जायते दोषसंभवः ॥ १४ ॥
यादृच्छिकोऽपि विज्ञेयः स्व(श्व)यथुर्विविधात्मकः ॥
विषाणां चापि संसर्गाद्द्रव्यैश्चैवाभिघाततः ॥ १५ ॥
श्वयथोर्वेदना वातात्पित्तात्पाकः कफाद्गतिः ॥
यस्तत्र बलवान्दोषस्तेन तस्य तदात्मता ॥ १६ ॥
अल्पो वृत्तस्तु कठिनो ग्रन्थिरित्यभिधीयते ॥
पृथुर्यो दीर्घः शोफः स्याद्विद्रधिर्गजकुम्भवत् ॥ १७ ॥
*विकृतानामियं योनिस्तद्विधानं प्रच(व)क्ष्यते ॥
घृष्टं दष्टं क्षतं चैव तस्या भवति लक्षणम् ॥ १८ ॥
तत्र रज्ज्वादिभिर्घृष्टं दष्टं चाऽऽशीविषादिभिः ॥
गजव्रणकरैर्भावैस्तीक्ष्णैर्वैक्षतमुच्यते ॥ १९ ॥
छेदनं व्यधनं चैव द्रव्यैर्नानाविधात्मकैः ॥
अवकृत्तावसृष्टे च पृथगेतच्चतुर्विधम् ॥ २० ॥
ततस्तस्य भवेच्छिन्नं विभागात्पञ्चलक्षणम् ॥
छिन्नं विच्छिन्नमुत्सृष्टमवकृष्टं स (च) दारितम् ॥ २१ ॥
तत्र च्छिन्नमिति ज्ञेयं सर्वशोऽङ्गापवर्तनम् ॥
प्रहारसंनिपातस्तु विच्छिन्नमिति कीर्त्यते ॥ २२ ॥
कर्णलाङ्गूलहस्तानां द्विधाभावस्तु दारितम् ॥
अवकृष्टं तु विज्ञेयमधः †स्यात्वस्थिमांसगम् ॥ २३ ॥
एतदेव विपर्यस्तमुत्कृष्टमिति कीर्त्यते ॥
इति पञ्चविधं छिन्नं विभागात्संप्रकीर्तितम् ॥ २४ ॥
विद्धस्यापि तु विज्ञेयः प्रविभागश्चतुर्विधः ॥
निविद्धमनिविद्धं च विद्धमुत्तुण्डितं च यत् ॥ २५ ॥

---

† 'वैक्षतं, विक्षतं वा स्यादग्रिमग्रन्थानुसारात्। * 'विक्षतानाम्' इति भवेत्, अग्रिमपाठानुसारात्। † 'स्नाय्वस्थिमांसगम्' इति स्यात्।

तत्र मांसार्पितशरं विद्धमित्युपदिश्यते ॥
छिन्द्यात्तु परतो देशे शरेणोत्तुण्डितं भवेत् ॥ २६ ॥
सर्वतो निःसृतशरं निर्विद्धमिति कीर्त्यते ॥
अनिर्विद्धं तु विज्ञेयं किंचिन्निःसृतसायकम् ॥ २७ ॥
†अविकृत्तं तु विज्ञेयं त्रिविधं शास्त्रनिश्चयात् ॥
विरक्तमविरूढं च तथा स्यादवपाटितम् ॥ २८ ॥
तत्र त्वचि विरक्तं स्यात्समांसमवपाटितम् ॥
अवगाढं तु विज्ञेयं भृशमस्थि यदाश्रितम् ॥ २९ ॥
क्लिष्टान्त्रमवच्छिन्नान्त्रमवसृष्टं द्विधा भवेत् ॥
तस्य वक्ष्यामि राजेन्द्र शास्त्रज्ञानेन लक्षणम् ॥ ३० ॥
दौर्मनस्योदराटोपौ सशोणितपुरीषता ॥
मन्दग्रासाभिलाषश्च शोणितस्य च मेहनम् ॥ ३१ ॥
एतद्भवति विज्ञानं छिन्नान्त्रस्येह दन्तिनः ॥
तदेवंलक्षणं नागं प्रत्याचक्षीत शास्त्रवित् ॥ ३२ ॥
अपाटिते त(तान्त्र)मेव स्याच्छ्रमश्चैव सवेपथुः ॥
छिन्नावपाटिताभ्यां तु यत्तद्विन्ने........ ॥ ३३ ॥
भवेज्ज्वरत्रि(स्तृ)षा मूर्छा हिक्का श्वासश्च दारुणः ॥
नाभ्याटोपो दौर्मनस्यं सशोणितपुरीषता ॥ ३४ ॥
नातिवातानुलोम्यं च क्लिष्टान्त्रस्येह लक्षणम् ॥
कृच्छ्रसाध्यो भवत्येष बलवान्ग्रासवांश्च यः ॥ ३५ ॥
अस्त्रघातो भवत्येष साध्यासाध्यश्चतुर्विधः ॥
इति विक्षतजा योनिर्व्रणानां संप्रकीर्तिता ॥ ३६ ॥
इयं दाहात्मिका योनिस्तृतीया संप्रच(व)क्ष्यते ॥
तत्राग्न्यादित्यकुविषैरौषधैर्विद्युताऽपि वा ॥ ३७ ॥
उत्पत्तिर्या व्रणस्य स्यात्सा योनिर्दाहसंभवा ॥
अज्वाल(लो) ज्वालसंयुक्तस्तत्राग्नि(ग्ने)र्द्विविधो व्रणः ॥ ३८ ॥
विद्युद्वारिहवश्चोक्तः सूर्यदाहकृतो व्रणः ॥
शेषैर्यथास्वं जायन्ते दाहैर्व्रणकरैर्व्रणाः ॥ ३९ ॥

† 'अवकृत्तम्' इति तु प्राक्स्थितम् ।

१ क. °ष्टान्तस्ये° । २ क. °द्युतोऽपि ।

इति दाहात्मिका योनिरशेषेण प्रकीर्तिता ॥
इति व्रणानां निर्दिष्टा योनिस्त्रिविधलक्षणा ॥ ४० ॥

—:○:—

अत ऊर्ध्वमधिष्ठानं प्रवक्ष्याम्यष्टलक्षणम् ॥
त्वङ्मांसस्नायुधमनीशिरामज्जास्थिसंधयः ॥ ४१ ॥
अधिष्ठानानि जानीयाद्व्रणानां शास्त्रनिश्चयात् ॥
एतेषां व्रणवस्तूनामष्टानामपि लक्षणम् ॥ ४२ ॥
यैः श्रा(स्रा)वैर्व्यज्यते ज्ञानं तान्वक्ष्याम्यनुपूर्वशः ॥
स्रावस्तु द्विविधो ज्ञेयः शुद्धो दुष्टश्च भूमिप ॥ ४३ ॥
तत्र दोषान्वितो दुष्टः शुद्धो दोषविवर्जितः ॥
स तु वस्तुविशेषेण चतुर्विंशतिलक्षणः ॥ ४४ ॥
पेच्यते तस्य वक्ष्यामि विज्ञानं शास्त्रनिश्चयात् ॥
शुक्लः कृष्णोऽथ हारिद्रः श्यामो माञ्जिष्ठ एव च ॥ ४५ ॥
कषायस्तैलसंकाशो घृताभः फेनसंनिभः ॥
पूयविण्मूत्रमस्तिष्कक्षारशुक्रवसाजलैः ॥ ४६ ॥
मांसधावनयूषाभो यवनिष्क्काथसंनिभः ॥
तिलकल्कसुरामज्जमेदोवर्णोऽथ पिच्छिलः ॥ ४७ ॥
चतुर्विंशतिरित्युक्ताः स्रावा विविधलक्षणाः ॥
पिच्छिलो विशदो वाऽपि स्रावः स्वच्छः प्रवर्तते ॥ ४८ ॥
व्रणाद्यस्मात्स विज्ञेयो दन्तिनां त्वग्गतो व्रणः ॥
मांसधावनयूषाभः स्रावो मांसगतो भवेत् ॥ ४९ ॥
मञ्जिष्ठासृक्कषायाणां स्रावस्तुल्यः सिराश्रयात् ॥
यवनिष्क्काथसदृशः स्रावः स्नाय्वाश्रिताद्व्रणात् ॥ ५० ॥
शुक्लाभः पिच्छिलोऽल्पश्च भवेत्संधिगताद्व्रणात् ॥
धमनीभ्यः प्रस्रवति जलफेनसमप्रभः ॥ ५१ ॥
तुषारहारिद्रनिभः स्रावः स्यादस्थिजाद्व्रणात् ॥
तिलकल्कप्रस[illegible]स्तैलाभो वा सचन्द्रकः ॥ ५२ ॥
मज्जामिश्रः स्रवेच्चापि व्रणान्मज्जसमाश्रयात् ॥
मर्मणो यस्य यत्स्थानं स्रावस्तत्र तदात्मकः ॥ ५३ ॥

---

१ क. तु दोषवि° । २ क. पच्यते । ३ क. °ष्कक्षीर° । ४ क. °मज्जामे° ।
५ ख. °द्यस्य स वि° । ६ क. °य्वाश्रयाद्व्र° । ७ क. °रिद्रानलः स्रा° ।

स्यात्तु वेदनया युक्तो विशेषान्मर्मजो व्रणः ॥
स्रोतांसि यानि यान्भावान्प्रस्रवन्तीह दन्तिनाम् ॥ ५४ ॥
तेषु व्रणविभिन्नेषु स एव स्रवति स्रवः ॥
द्विविधं स्यादधिष्ठानं व्रणानां प्रविभागतः ॥ ५५ ॥
विज्ञेयं दुरधिष्ठानं स्वा(स्व)धिष्ठानं तथैव च ॥
तत्र तावत्प्रवक्ष्यामि दुःस्वाधिष्ठानमादितः ॥ ५६ ॥
हस्ते मर्मसु कोष्ठे च धमनीष्वथ संधिषु ॥
सिरास्नाय्वस्थिषु तथा दुरधिष्ठानजा व्रणाः ॥ ५७ ॥
स्वधिष्ठानास्तु शेषेषु विज्ञेया वस्तुषु व्रणाः ॥
दुःस्वाधिष्ठानहेतूंश्च प्रवक्ष्याम्यत उत्तरम् ॥ ५८ ॥
तत्रोपद्रवबाहुल्याद्दुःस्वो मर्माश्रितो व्रणः ॥
सतताभ्यवहारेण दुःस्वः स्याद्धमनीव्रणः ॥ ५९ ॥
असृक्स्रुतेः शिराजस्तु चलनात्संधिदेशजः ॥
स्वकर्मविक्रियाभावाद्दुःस्वः स्याद्धस्तजो व्रणः ॥ ६० ॥
स्नायुजालाकुलभयाद्दुःस्वः स्नाय्वाश्रयो व्रणः ॥
कोष्ठजो दुश्चिकित्स्यः स्यात्समानानिलदूषणात् ॥ ६१ ॥
अस्थिजः स्नेहमांसाभ्यां रहितो नोपरोहति ॥
मज्जातिस्रवणाद्दुःस्वो भवेन्मज्जाश्रयो व्रणः ॥ ६२ ॥
व्रणस्य त्रिविधस्त्वात्मा शास्त्रतः संप्रवक्ष्यते ॥
सुचिकित्स्योऽचिकित्स्यश्च दुश्चिकित्स्यश्च लक्षणैः ॥ ६३ ॥
तत्र पद्मपलाशाभः स्वाकृतिर्लाजगन्धिकः ॥
सुचिकित्स्यः स्वधिष्ठानो व्रणोपद्रववर्जितः ॥ ६४ ॥
यस्तु वातादिभिर्दोषैर्दूषितः कठिनो महान् ॥
स शल्यविषकोशाग्निसंस्थानः स्थानदोषवान् ॥ ६५ ॥
अतिस्थूलं कृशं वाऽपि यो गजं समुपाश्रितः ॥
परुषः कठिनः कृष्णो दुश्चिकित्स्यः स उच्यते ॥ ६६ ॥
दुश्चिकित्सितरूपस्य यो लिङ्गैरन्वितो व्रणः ॥
अनिष्टैश्चाप्रशस्तैश्च गन्धैर्यश्च समन्वितः ॥ ६७ ॥

१ क. °सि योनिजान्भा° । २ ख. हस्तम° । ३ क. °ष्ठेषु ध° । ४ क. भवेत् । ५ क. °जः स्नायुमां° । ६ क. °प्रचक्षते । ७ क. °तिर्वाज° । ८ क. °न् । शल्यविषमको° ।

बालार्केन्द्रधनुर्वर्णः शिखिकण्ठनिभोऽपि वा ॥
व्रणो यः सोऽचिकित्स्यः स्यात्क्षमेद्यत्र न च क्रिया ॥ ६८ ॥
व्रणे शल्यं तु विज्ञेयं द्विविधं शास्त्रनिश्चयात् ॥
शारीरं चैव बाह्यं च तस्य वक्ष्यामि लक्षणम् ॥ ६९ ॥
तृणकाष्ठायसादीनि बाह्यं शल्यं व्रणाश्रयम् ॥
शारीरं त्वस्थिपूयासृङ्मांसस्नायुशिराश्रयम् ॥ ७० ॥
दोषो यंता भिषक्चैव यदृच्छा च मतङ्गजः ॥
पञ्चैव पठिता राजन्व्रणोपद्रवयोनयः ॥ ७१ ॥
तत्र तावत्प्रवक्ष्यामि प्रथमं क्रमयुक्तितः ॥
गन्धवर्णस्रवाकारैर्वातादिभिरुपद्रुतान् ॥ ७२ ॥
तत्र विण्मूत्रबस्तीनां सगन्धः परुषः कृशः ॥
प्रभूतकृष्णश्रा(स्रा)वश्च स्याद्व्रणः पवनातुरः ॥ ७३ ॥
शुकहारिद्रकाचाभः शिखिकण्ठप्रभोऽपि वा ॥
व्रणस्तद्वर्णनिस्रावः सदोष्णश्चैव यो भवेत् ॥ ७४ ॥
कषायो गैरिकनिभः प्रस्रावो यः सवेदनः ॥
तिक्ताम्लकुणपैर्गन्धैर्युक्तः पित्तातुरो भवेत् ॥ ७५ ॥
सू(शू)नः स्तब्धो गुरुः शीतः सुप्तोऽन्तःपिटकाश्चितः ॥
यश्चाम्बुपिच्छिलस्रावी पूयं वा यः परिस्रवेत् ॥ ७६ ॥
दूयते बहलोष्णश्च कण्डूमान्सपरिग्रहः ॥
कपोतपाण्डुवर्णाभो यश्च स्यात्तुल्यगन्धिकः ॥ ७७ ॥
विपन्नमत्स्यमांसानां स कफेनाऽऽतुरो व्रणः ॥
कुलत्थवर्णं रक्तं वा यः स्रवेद्बहुवेदनः ॥ ७८ ॥
दूयते दह्यते चैव प्रस्रवेद्गैरिकोपमम् ॥
रक्ताभं संस्रवेद्विस्रं स्याद्व्रणः शोणितातुरः ॥ ७९ ॥
दोषाणां दोषयोर्वाऽपि यथास्वं दोषलक्षणैः ॥
विज्ञेयः संनिपातेन दन्तिनां दूषितो व्रणः ॥ ८० ॥
शुक्लः शीतो मृदुश्चैव वसामज्जापरिस्रवः ॥
पक्षिनीडसुगन्धिश्च स्याद्व्रणो मेदसाऽऽतुरः ॥ ८१ ॥

---

१ क. °स्यात्क्रमेद्यत्र च विक्रियाम् ॥ व्र° । २ क. याति । ३ ख. °पमः ॥ । ४ क. शान्तो ।

इति वातादिभिर्दुष्टः षड्विधः कीर्तितो व्रणः ॥
व्रणदोषान्प्रवक्ष्यामि यातृदोषकृतान्नृप ॥ ८२ ॥
यदा युनक्ति मातङ्गं याता कर्मण्यमात्रया ॥
तस्य यातुरविज्ञानाद्यायामादीर्यते व्रणः ॥ ८३ ॥
व्रणदोषास्तु वक्ष्यन्ते हस्तिवैद्यापराधजाः ॥
अयथावत्प्रयुक्तैश्च शस्त्राग्निक्षारभेषजैः ॥ ८४ ॥
अज्ञानाद्वा प्रमादाद्वा व्रणे वैद्योऽपराध्यति ॥
कामक्रोधभयाद्वाऽपि वारणोऽप्यपराध्यति ॥ ८५ ॥
ततः प्रकुरुते दोषान्व्रणेष्वात्मापराधजान् ॥
अथ दोषान्प्रवक्ष्यामि यातृदोषकृतांस्तथा ॥ ८६ ॥
यदा तुहिम(न)या नागं पाता कर्मण्यमात्रया ॥
यस्य यातुरविज्ञानाद्यायामादीर्यते व्रणम् ॥ ८७ ॥
दोषवैद्यमहामात्रैरातुरेण च वर्जितः ॥
यदृच्छयोपपन्नैस्तु दोषैर्यादृच्छिको व्रणः ॥ ८८ ॥
वृत्ता च चतुरस्रा च द्विविधा योनिराकृतेः ॥
व्रणानां शास्त्रनिर्दिष्टा विज्ञेया स्यात्समासतः ॥ ८९ ॥
सा च गात्रप्रदेशानां शस्त्राणां च विभक्तितः ॥
प्रहर्तॄणां च वैशेष्याद्विशेषाँल्लभते बहून् ॥ ९० ॥
यथा रोगा न जायन्ते वनेषु वनचारिणाम् ॥
वनानुचरिताध्याये तदस्माभिः प्रकीर्तितम् ॥ ९१ ॥
निसर्गात्सात्म्यतः पीते जले पांशुप्रमाथतः ॥
विना वैद्यैः प्ररोहन्ति द्विरदानां वने व्रणाः ॥ ९२ ॥
शुषिरं मृदु चैतेषां मांसं मेदःसमन्वितम् ॥
तेनैषामीषदुन्मृष्टा व्रणाः सर्पन्ति सर्वतः ॥ ९३ ॥
कोशवन्तश्च जायन्ते प्रायसो(शो)दन्तिनां व्रणाः ॥
स पुनर्वक्ष्यते हेतुर्दन्तनाडीचिकित्सिते ॥ ९४ ॥

—:○:—

शुद्धश्चैवाऽप्यशुद्धश्च संरूढश्चैव सर्वतः ॥
त्रिविधस्तु व्रणो ज्ञेयो विकृतोद्गमदाहजः ॥ ९५ ॥

---

१ क. अथ याव° । २ क. नागमापातात्कर्ममा° । ३ ख. व्रणः । ४ क. °र्गात्सितः पीतज° । ५ क. °मादतः । ६ क. सर्वशः

तत्र जिह्वातलसमः पद्माभो लाजगन्धिकः ॥
व्रणः शुद्धोऽभिविज्ञेयो व्रणोपद्रववर्जितः ॥ ९६ ॥
व्रणस्त्वशुद्धो विज्ञेयो यः शुद्धस्य गुणोदयैः ॥
गन्धवर्णश्र(स्र)वाकारैर्विपरीतैः समन्वितः ॥ ९७ ॥
व्यायामं चातिमांसं च यः सर्वं सहते व्रणः ॥
रोहमाणं भिषग्विद्यान्नीरुजं निरुपद्रवम् ॥ ९८ ॥
ईषत्संजातरोमाञ्चत्वक्सवर्णश्च यो भवेत् ॥
एतच्छास्त्रविनिर्दिष्टं संरूढस्य हि लक्षणम् ॥ ९९ ॥

—:○:—

व्रणस्योपक्रमो ज्ञेयस्त्रिविधस्त्रिविधात्मनः ॥
शोधनं रोपणं चैव सवर्णकरणं तथा ॥ १०० ॥
तत्राशुद्धो भवेत्साध्यः[२] शुद्धे रोपणमिष्यते ॥
संरूढस्याथ कर्तव्या सवर्णकरणक्रिया ॥ १ ॥

—:○:—

उपक्रमस्यापि भवेद्योनिस्त्रिविधलक्षणा ॥
आयसी चौषधी चैव या च निर्वापणाश्रया ॥ २ ॥
आयसी त्विह या योनिः प्रथमा संप्रकीर्त्यते ॥
शस्त्रयन्त्रैषणीसूच्यस्तस्या भेदश्चतुर्विधः ॥ ३ ॥
तत्र च्छेद्यं च भेद्यं च लेख्यं विस्राव्यमेव च ॥
दालनं चैव विज्ञेयं कर्म शस्त्रस्य पञ्चधा ॥ ४ ॥
एषण्याऽन्वेषणं कर्म व्रणावस्थाविकल्पितम् ॥
याः सूच्यस्त्रिविधाः प्रोक्ताः शस्त्राध्याये तु संस्थिताः ॥ १०५ ॥
नागदन्ताकृतिर्वृत्ता त्रिकोणा चेति निश्चयात् ॥
अस्थ्याश्रितं नागदन्त्या मांसजं च त्रिकोणया ॥ ६ ॥
त्वक्स्नायुधमनीस्थं[३] च शिराजं चैव वृत्तया ॥
आहार्यं सर्वयन्त्राणां सूच्या सीवनमिष्यते ॥ ७ ॥
सूत्रस्नायुशणद्रव्यैरेभिः संसीवनं भवेत् ॥
वृद्धिपत्रेण नागानां कुर्याच्छेदनभेदने ॥ ८ ॥
लेखनं मण्डलाग्रेण कर्तव्यं दन्तिनां भवेत् ॥
श्र(स्र)वणं पाटनं चैव कुर्याद्व्रीहिमुखेन तु ॥ ९ ॥

१ क. °पच्छमाजा° । २ क. °वेच्छोध्यः । ३ क. तु ॥ अस्थिमृ°

स्थिरा मृद्वी च कर्तव्या व्रणानामेषुणी भवेत् ॥
वृत्ता गण्डूपदमुखी प्रमाणे त्रिंशदङ्गुली ॥ ११० ॥
सुवर्णरूप्यताम्राणामायसी शृङ्गजाऽपि वा ॥
दन्तास्थिवेणुदारूणामेषणी दारुणा भवेत् ॥ ११ ॥
एते त्वष्टाविह ज्ञेया व्रणस्योपक्रमाः पृथक् ॥
आयसीं संस्र(श्रि)ता योनिं शृणु चैषामुपक्रमम् ॥ १२ ॥
यो न गच्छेत्प्रशमनं स्व(श्व)यथुः प्रविलायनैः ॥
तस्य विश्रा(स्रा)वणं कार्यं भवेत्पक्वस्य भेदनम् ॥ १३ ॥
दालनं विषमे पाके बहुलौष्ठस्य लेखनम् ॥
उद्गमस्य कटस्थस्य सर्वत्राऽऽच्छेदनं हितम् ॥ १४ ॥
यथायोगं तु कर्तव्यं गतेरन्वेषणं व्रणे ॥
द्विविधस्य तु शल्यस्य यन्त्रैराहरणं भवेत् ॥ ११५ ॥
सूच्या संसीवनं कार्यं तत्र भागेषु दन्तिनाम् ॥
दारितानां व्रणकरैः सद्यः सरुधिरे व्रणे ॥ १६ ॥
शस्त्रं सुतिर्यगूर्ध्वं वा भिषगस्थिगतं तथा ॥
सिरामर्माभिघाताद्वा प्रमादान्न निपातयेत् ॥ १७ ॥
यस्तु यन्त्रशरैर्वाऽपि दन्तैर्वा प्रतिहस्तिनाम् ॥
स्याद्व्रणच्छिद्रपिशितो मर्म वा किंचिदाश्रितः ॥ १८ ॥
तस्मात्प्रच्छन्नपिशिते कार्यं कार्यवशाद्भवेत् ॥
उन्मार्गच्छेदनं वैद्यैर्मर्मसंरक्षणाद्व्रणे ॥ १९ ॥
इत्येते शास्त्रनिर्दिष्टा व्रणसिद्धावुपक्रमाः ॥

—:○:—

आयसीप्रभवा राजन्कार्या नानाविधात्मकाः ॥ १२० ॥
शस्त्रकर्मणि निर्युक्ते बलिहोममयी क्रिया ॥
व्रणशान्तिर्भवेत्कार्या यथोक्ता यज्ञकर्मणि ॥ २१ ॥
औषधीसंश्रिता योनिः पृथक्शोधनरोपणे ॥
इमे विशेषा विज्ञेयास्त्वष्टौ शास्त्रविनिश्चयात् ॥ २२ ॥
वर्तिः कषायः कल्कश्च घृतं तैलं रसक्रिया ॥
चूर्णं धूपनमित्याहुर्विभागादष्टमं पदम् ॥ २३ ॥

---

१ क. मता । २ क. °वेशरछेद° । ३ क. °च्छिन्नपि° । ४ ख. निर्दिष्टे ।
५ क. °पायकल्कस्य घृ° । ६ क. रसक्रिये ।

उपक्रमविधिस्त्वन्यः शास्त्रयोगात्प्रवक्ष्यते ॥

—:०:—

ओषधीसंश्रिता योनिस्त्रयोविंशतिलक्षणा ॥ २४ ॥
विलायनं पाचनं च भेदनं पीडनं तथा ॥
सादनोत्सादने चैव क्रमिघ्नमथ चापरम् ॥ १२५ ॥
लेपः स्वेदोऽगदः क्षारो मृदुदारणयोः क्रिया ॥
बृंहणं चापकर्षश्च संधानं शिशिरक्रिया ॥ २६ ॥
शोणितस्थापनं चैव कण्डूघ्नं धावनं तथा ॥
प्रसादनं च वर्णश्च सवर्णकरणं तथा ॥ २७ ॥
बन्धकल्पश्च विज्ञेयस्त्रयोविंशतिमं पदम् ॥
व्रणावस्थान्तराच्चैषां प्रयोगः संप्रवक्ष्यते ॥ २८ ॥
श्वयथोरविदग्धस्य कार्यं स्यात्प्रविलायनम् ॥
विदह्यमाने कर्तव्यं श्वयथोः पाचनं भवेत् ॥ २९ ॥
पक्वस्य तु भवेद्भेदस्तथा शोधनरोपणम् ॥
छवीसवर्णकठिनं परुषं वाऽपि वर्णतः ॥ १३० ॥
मन्दोष्माणं तथा स्तब्धमाममित्यभिलक्षयेत् ॥
विवर्णं नातिकठिनं सोष्माणं वेदनार्दितम् ॥ ३१ ॥
विदह्यमानं जानीयाच्छ्वयथुं कुशलो भिषक् ॥
सर्वतो मार्दवं शैत्यं पाण्डुता शीर्णरोमता ॥ ३२ ॥
वेदनोपशमश्चैव श्वयथोः पक्वलक्षणम् ॥
दुष्टकृशातिभीरूणां व्रणान्संवृतदेशजान् ॥ ३३ ॥
सूक्ष्मांश्चानतिपक्वांश्च भेदनीयैरुपाचरेत् ॥
वेदनाबहुले दृष्टे शिरामर्मसमाश्रिते ॥ ३४ ॥
संधिजे वाऽपि कर्तव्यं दन्तिनां पीडनं व्रणे ॥
केवलं यस्तु संधानमल्पदोषो न गच्छति ॥ १३५ ॥
संधानं तस्य कर्तव्यं संधानीयैरुपक्रमैः ॥
अस्थिस्नायुगतं दुष्टं तनु स्वल्पमुखं व्रणम् ॥ ३६ ॥
गतिमन्तमजिह्मं च शोधयेद्वर्तिशोधनैः ॥
पिच्छिलं विस्तृतं क्लिन्नं दुर्गन्धं पूतिवद्व्रणम् ॥ ३७ ॥

---

१ क. °त्प्रचक्षते । २ क. प्रमादनं । ३ क. °मिधीयते ॥ वि° । ४ ख. °ल्पसुखं । ५ क. °न्धं स्रोतव° ।

प्रचलं पूतिमांसं च कषायैः शोधयेद्भिषक् ॥
आवृतं पूतिभिर्मांसैः स्नायुजालसमाकुलम् ॥ ३८ ॥
सप्लोतमवदीर्णं च शोधयेत्कल्कशोधनैः ॥
एवमेवातिसंरब्धं गम्भीरमतिवेदनम् ॥ ३९ ॥
संवृतं रुधिरास्रा(स्रा)वं शोधयेद्घृतशोधनैः ॥
सहसा न प्ररोहन्तं तनुदोषमवेदनम् ॥१४०॥
व्रणं मार्दवसंपन्नं शोधयेत्तैलशोधनैः ॥
स्नायुर्वा यत्र मांसं वा प्राग्दुष्टं नापनीयते ॥ ४१ ॥
कषायशोधनैस्तत्र कर्तव्यं चूर्णशोधनम् ॥
सपूतिमांसः सास्रावो यो व्रणो नोपरोहति ॥ ४२ ॥
उत्तीना तत्र कर्तव्या शोधनार्थं रसक्रिया ॥
बहुदुष्टपरिस्रा(स्रा)वे कुर्यात्प्रक्षालनक्रियाम् ॥ ४३ ॥
कण्डूमत्यपि कर्तव्यः कण्डूघ्नः स्यादुपक्रमः ॥
गतिमत्कठिनौष्ठं च कण्डूमन्तं प्रभेदिनम् ॥ ४४ ॥
दुष्टमांसाङ्कुरयुतं क्षारेणोपचरेद्व्रणम् ॥
अतिप्रवृत्ते रुधिरे शोणितस्थापनं भवेत् ॥ १४५ ॥
कृमिभिर्भक्ष्यमाणस्य कृमिघ्नः स्यादुपक्रमः ॥
उत्सन्नस्य भवेत्सादः सन्नस्योत्सादनक्रिया ॥ ४६ ॥
स्थिरत्वं मृदुनः कार्यं मार्दवं कठिनस्य च ॥
उष्णदोषातुरे शैत्यं स्वेदः शीतानिलातुरे ॥ ४७ ॥
नाभिरोहति वातार्ते व्रणे धूपनमिष्यते ॥
मेदसा युतमांसानां पवनः परिकुप्यति ॥ ४८ ॥
स्थूलानां व्रणमांसेषु ततस्तानपकर्षयेत् ॥
क्षीणानां न प्ररोहन्ति व्रणा मांसविवर्जिताः ॥ ४९॥
तस्मात्तेषां भवेत्कार्यं बृंहणं क्रमयुक्तितः ॥
वातादीनां तु ये लिङ्गा दोषैः षड्भिर्विवर्जिताः ॥ १५० ॥
जिह्वातलसमः शुद्धस्तं व्रणं रोपयेद्भिषक् ॥
तत्राल्पदोषप्रस्रावं गतिमन्तमवेदनम् ॥ ५१ ॥

---

१ क. °वेदिन° । २ क. °ग्दुष्टमप° । ३ क. °तिनामा संश्रावो । ४ ख. °त्तानस्तत्र । ५ ख. उष्णो दो° । ६ क. °तुरैः शै° । ७ ख. तु यो लिङ्गं दो° ।

वर्त्या संरोपयेद्वैद्यो हस्तिनां व्रणमुत्थितम् ॥
ईषत्तु विषमं निम्नं मृदुमांसमवेदनम् ॥ ५२ ॥
अशीघ्ररोहिणं चैव कषायेणोपरोहयेत् ॥
व्रणं पाकात्मसर्पन्तमतिस्नेहादरोहणम् ॥ ५३ ॥
मांसे वा त्वचि वा जातं रोपयेत्कल्करोपणैः ॥
निम्नमीषद्विश्र(स्र)वेण किंचित्पित्तसमन्वितम् ॥ ५४ ॥
स्थैर्यादनुपरोहन्तं रोपयेत्सर्पिषा व्रणम् ॥
ईषद्गातातुरं सिद्धं भिषग्व्रणमवेदनम् ॥ ५५ ॥
रोपणीयेन तैलेन शास्त्रदृष्टेन साधयेत् ॥
प्रशान्तोपद्रवं स्निग्धमतिस्नेहाद्विसर्पिणम् ॥ ५६ ॥
रोपयेत्स्थिरमांसं च व्रणं चूर्णेन दन्तिनाम् ॥
मृदुमांसस्त्वतिस्नेहाद्यो व्रणो नोपरोहति ॥ ५७ ॥
स रसक्रियया साध्यो मृदुमांसश्च संधिजः ॥
वातश्लेष्मोच्चयात्क्लिन्नं रोपयेद्गृप योगतः ॥ ५८ ॥
शुद्धाशुद्धे भवेद्यो दन्तिनामगदो व्रणे ॥
यथा स्वमष्टवर्गेण सम्यग्वर्त्यादिना भवेत् ॥ ५९ ॥
सिरास्नाय्वस्थिकोष्ठेषु तथा संधिषु च व्रणाः[३] ॥
गम्भीरा विषमस्थूलास्त्ववगाढा गुरुक्रमाः[४] ॥ १६० ॥
साध्या बन्धादिना[५] त्वेते बन्धस्तु व्रणशोधनः ॥
समो गाढोऽथ शिथिलो व्रणबन्धः प्रकीर्तितः ॥ ६१ ॥
कण्ठे मेण्ढ्रे तथा नाभ्यां पार्ष्णिग्रीवासु पार्श्वयोः ॥
बस्तिशीर्षे च राजेन्द्र समो बन्धस्तथोदरे ॥ ६२ ॥
गाढः शिरसि कर्तव्यः स्फिक्कक्षे च सपिण्डके[६] ॥
हन्वोः पृष्ठे गुदे कण्ठे बाह्वोः स्कन्धे तथा त्रिके ॥ ६३ ॥
व्रणबन्धस्तु कर्तव्यः शिथिलः सर्वसंधिषु ॥
सोष्माणो रक्तपित्ताभ्यां संरब्धाः सविषाश्च ये ॥ ६४ ॥
व्रणा विसर्पिणो ये च बन्धस्तेषां न शस्यते ॥
यो बन्धमवबन्धं च विद्यात्सम्यग्विचक्षणः ॥ १६५ ॥

---

१ क. संगोप° । २ क. °गदे व्र° । ३ क. °णाः । यथा । गम्भीरवि° । ४ क. गुरुक्रमैः । ५ क. बध्यादि° । ६ क. सपिण्डकौ ।

स बध्नीयान्न शिथिलो बन्धः स्तब्धो न वामतः ॥
अपीडया सुखं रोहेन्नापि पित्तहतो भवेत् ॥ ६६ ॥
निवसेदौषधं बन्धाद्वायुः श्लेष्मा च शाम्यति ॥
नाबन्धनाय बन्धं च वातिबन्धं च सारिकम् ॥ ६७ ॥
बद्धाबद्धं न शिथिलं श्वघ्नी(?) जानाति मापतिम्(?) ॥
न रोपयेन्न पीडेत वस्त्रेण बाध्यते च तत् ॥ ६८ ॥
सायाह्ने चौषधेनैन सम्यक्शुद्धस्य वै गुणाः ॥
अशुद्धं साधयेच्चास्य शुद्धं तु रोपयत्यपि ॥ ६९ ॥
संग्रह्नात्यौषधं वाऽपि सम्यग्बद्धस्य लक्षणम् ॥
हेमन्ते शिशिरे चैव वसन्ते च विमोक्षयेत् ॥ १७० ॥
द्व्यहात्र्यहाच्छरद्ग्रीष्मे वर्षास्वपि च बुद्धिमान् ॥
प्लोतैः कार्पासकैः क्षौमैः कौशेयैश्च विचक्षणः ॥ ७१ ॥
पत्रैर्वल्कैश्च ताम्रैश्च तथा स्याल्लोहपट्टकैः ॥
व्रणा बन्ध्या यथालाभमुपनाहैश्च तत्त्वतः ॥ ७२ ॥
येन येन च बन्धेन यो व्रणः सुखबन्धनः ॥
स तेन तेन बन्धेन बन्धितव्यो विजानता ॥ ७३ ॥
इत्येवं बन्धकल्पस्तु व्याख्यातस्ते यथाक्रमम् ॥

व्रणाः शिशिरसात्म्यानां नागानां बन्धनोष्मणा ॥ ७४ ॥
प्रायः शुषिरमांसत्वाद्विसर्पन्ति समन्ततः ॥
तस्माद्ये स्वेदनैः साध्यास्तान्व्रणान्बन्धयेद्भिषक् ॥ १७५ ॥
बन्धयोगवहां बुद्धिं कृत्वैषां प्रविचक्षणः ॥
उपरूढस्तु वैवर्ण्यं यदि वातादिभिर्भवेत् ॥ ७६ ॥
व्रणस्तस्य भवेत्कार्यं वैद्यैर्वर्णप्रसादनम् ॥
सवर्णकरणं कार्यमुपरूढे व्रणे भवेत् ॥ ७७ ॥
इत्येते शास्त्रतः प्रोक्ता व्रणसिद्धावुपक्रमाः ॥

उपक्रमाणामेषां तु यथोक्तानां विभागशः ॥ ७८ ॥

---

१ क. च । २ क. पिण्डेत । ३ क. °धे चैव स° । ४ क. ख. °यः सुखिर° ।
५ क. °दनेऽसा° ।

योगान्वक्ष्यामि यो येन सुप्रयुक्तेन सिध्यति ॥
काकादनी शुकनासा तथाऽपामार्गतण्डुलाः ॥ ७९ ॥
रोहिषार्हिस्रवरणं बिल्वं कुष्ठं पुनर्नवा ॥
शार्ङ्गेष्टारग्वधः कालावृहत्यौ देवदारु च ॥ १८० ॥
कपित्थबाणटिण्डूकतगराश्मन्तकाक्षिका ॥
मेदा च कृष्णगन्धा च हरिद्रा तालपत्रिका ॥ ८१ ॥
त्रिफला नीलपुष्पी च शतपुष्पा त्रिकण्टकम् ॥
कदरः सोमवल्कश्च कुबेराक्ष्यस्थिरोहिणी ॥ ८२ ॥
तालपत्री च कुष्ठं च फलानि निचुलस्य च ॥
एभिः कार्यं यथालाभं श्वयथोः प्रविलायनम् ॥ ८३ ॥

—:○:—

सुपिष्टैश्च सुखोष्णैश्च निरूषैर्वाऽपि कारयेत् ॥
कुलत्थयवगोधूममाषकिण्वातसीतिलाः ॥ ८४ ॥
बीजान्येरण्डशणयोः कर्पास्या मूलकस्य च ॥
सर्षपाश्चेति पिष्टानि प्रलेपः पाचनो भवेत् ॥ १८५ ॥
श्वयथोरुष्णलवणस्निग्धश्चाम्लश्च दन्तिनाम् ॥
किणिही चित्रकश्चैव निकुम्भः सुरदारु च ॥ ८६ ॥
तगरं मातुलुङ्गं च त्रिवृता च समांशतः ॥
गोमूत्रपिष्टैर्योगोऽयं स्व(श्व)यथूनां प्रपाचनः ॥ ८७ ॥
करवीरोश्चटामूलं मूलं धत्तूरकस्य च ॥
लाङ्गली हरितालं च शुक्तगोमूत्रपेषितम् ॥ ८८ ॥
श्वयथोर्विषयुक्तस्य भवेत्पाचनमुत्तमम् ॥

—:○:—

चित्रकश्चिरबिल्वं च कोशातक्याः फलानि च ॥ ८९ ॥
मुष्ककः शृङ्गवेरं च लाङ्गलक्यक्षपीलुकौ ॥
सुवर्णक्षीरिणी चैव स्नुह्यर्कक्षीरमेव च ॥ १९० ॥
सुधा सुवर्चिका चैव तुरङ्गी कटशर्करा ॥
कपोतोन्दुरगृध्राणां विष्ठा पारापतस्य च ॥ ९१ ॥

---

१ क. °धः सारिवाबृ° । २ क. °टिण्टूक° । ३ ख. मातुलिङ्गं । ४ क. समांसतः । ५ क. प्रपाचनम् । ६ क. °ङ्गलीकक्षपी° । ७ क. °टकर्क° । ८ क. कपातोदूर° ।

अग्निको गृहधूमश्च भवेद्भेदनमेकशः ॥
काकनासाक्षिविट्क्षारैर्भेदयेच्छस्त्रवर्जितम् ॥ ९२ ॥

—:○:—

शाल्मली शल्लकी गोजी कर्णिकारोषधन्वनः ॥ ९३ ॥
मधूकोऽश्मन्तकाकोलरोहिषं धातकी तथा ॥
मधुकं मधुपर्णी च जीवकर्षभकावुभौ ॥ ९४ ॥
बला विदारी मञ्जिष्ठा यथालाभं प्रपीडनम् ॥

सूच्या चैवौषधैश्चैव संधानं द्विविधं स्मृतम् ॥ १९५ ॥
तत्र वक्ष्यामि संधानमौषधैर्यत्प्रकीर्तितम् ॥
प्रपौण्डरीकं मधुकं मञ्जिष्ठा रोध्रमञ्जनम् ॥ ९६ ॥
प्रियङ्गवोषपत्तङ्गं व्रणसंधानमिष्यते ॥

दन्ती श्यामा यवक्षारः स्वर्जिका चित्रकः सुधा ॥ ९७ ॥
क्षवकः शङ्खिका[1] किण्वं महावृक्षार्कयोः पयः ॥
लाङ्गलिक्याक्षिकौ चैव पिप्पलीमूलमेव च ॥ ९८ ॥
एतन्मधुसमायुक्तं व्रणशोधनमुत्तमम् ॥
कृष्णमुष्ककपत्राणि महावृक्षत्वगेव च ॥ ९९ ॥
दन्त्यर्कमूले लवणं मकच्छमूत्रपेषितम् ॥
हरितस्मर्कयैर्युक्तं व्रणशोधनमुत्तमम् ॥ २०० ॥
शोभाञ्जनकमूलं च तिलक्षारं तथैव च ॥
भल्लातकं यवक्षारं क्षारमिक्षुरकस्य च ॥ १ ॥
कुष्ठं चातिविषां चैव दन्तीं कटुकरोहिणी ॥
तेजोवती हरिद्रे द्वे श्लक्ष्णकल्कं[2] प्रदापयेत् ॥ २ ॥
सैन्धवेन समायुक्तो नाड्याच(?) व्रणशोधनम् ॥
विदारी करवीरश्च नक्तमालेऽथ मार्कवः ॥ ३ ॥
सुरसाखदिरौ निम्बौ भाण्डी[3] जाती वटस्तथा ॥
तर्कार्यङ्कोल्लशङ्खिन्यः सप्तपर्णो हरीतकी ॥ ४ ॥
हरिद्रा चाश्वगन्धा च कषायः शोधनं भवेत् ॥
चित्रकस्त्रिवृता दन्ती श्यामा लाङ्गलकी तथा ॥ २०५ ॥

---

१ क. शङ्खिनी । २ क. °कचूर्णं च । ३ क. भाङ्गी ।

पटोली काकजङ्घी च द्रवन्ती कृतवेधना ॥
हरिद्रा निम्बपत्राणि तथा कटुकरोहिणी ॥ ६ ॥
अजेशृङ्ग्यश्वपत्राणि घृताक्तं कल्कशोधनम् ॥
तृ(त्रि)वृता शृङ्गवेरं च स्नुह्यर्कक्षीरमेव च ॥ ७ ॥
तेजोवती लाङ्गलकी कुष्ठं हिंस्रा च चित्रकः ॥
रजनी सैन्धवं चैव तथा कटुकरोहिणी ॥ ८ ॥
पिप्पलीमूलनिर्यूहैः शुद्धं सर्पिर्विशोधनम् ॥
बृहती कटुका रोध्रं कोशातक्याः फलानि च ॥ ९ ॥
मदनं त्रपुसी काला सर्षपा रजनी तथा ॥
पिप्पल्यश्चाश्वगन्धा च मूर्वा पोता[३]ऽथ चित्रकः ॥ २१० ॥
दुष्टानामरुजामेतत्तैलं शोधनमिष्यते ॥
त्रिफलातगरोशीरं हरिद्रा तालपत्रिका ॥ ११ ॥
मुस्ता दारुहरिद्रा च (*कर्पासीपत्रमेव च) ॥
तथैव दन्त्याः पत्राणि सुमनःकरवीरयोः ॥ १२ ॥
एतत्कालायसे पात्रे सम्यक्क्काथमधिश्रयेत् ॥
कासीसं मधु गोमूत्रं मरिचं चात्र दापयेत् ॥ १३ ॥
सुसिद्धा तु भवेत्कार्या शोधनीया रसक्रिया ॥
एरण्डपत्रं लवणं तिलास्तृ(त्रि)वृतया सह ॥ १४ ॥
(*शोधनं वातदुष्टेषु व्रणेष्वेतद्विधीयते ॥
हरिद्रा मधुकं चैव तिलास्तृ(त्रि)वृतया सह) ॥ २१५
शोधनं पित्तदुष्टेषु रक्तजेषु प्रशस्यते ॥
सैन्धवं च हरिद्रे द्वे तिलास्तृ(त्रि)वृतया सह ॥ १६ ॥
मधुकं निम्बपत्राणि श्लेष्मदुष्टेषु शोधनम् ॥
हरितालं च किण्वं च स्वर्जिकाऽथ मनःशिला ॥ १७ ॥
रसाञ्जनं च दन्ती च निकुम्भाऽतिविषा तथा ॥
तथैरावणिकामूलं लाङ्गलिक्याश्च चूर्णयेत् ॥ १८ ॥

---

* कपुस्तके त्रुटितम् ॥

---

१ क. काकजङ्घा । २ क. °जमृग्यश्व° । ३ क. °ता च चि° । ४ क. °मवश्र° । ५ क. काशीसं । ६ क. च सर्जि° ।

एतद्व्रणानां विज्ञेयं समास(शं) चूर्णशोधनम् ॥

सैन्धवक्षौमशस्त्राणि लेखनं त्रिविधं स्मृतम् ॥ १९ ॥
तत्र वक्ष्यामि यो येन व्रणो लेखनमर्हति ॥
उत्सन्नं कठिनौष्ठं च व्रणं शस्त्रेण लेखयेत् ॥ २२० ॥
श्यावं नीलावभासं च सैन्धवेनावलेखयेत् ॥
व्रणं क्षौमेण मृदुना सरुजं लेखयेन्मृदु ॥ २१ ॥
इत्येतदभिनिर्दिष्टं त्रिविधं व्रणलेखनम् ॥

सर्षपा लशुनं चैव वार्ताकी सौरसो रसः ॥ २२ ॥
नागरं गृहधूमश्च फणिज्जकरसस्तथा ॥
एतद्गोमूत्रसंयुक्तं सुव्यक्तलवणीकृतम् ॥ २३ ॥
कण्डूविलयनं श्रेष्ठं दन्तिनामरुजां भवेत् ॥
मरिचान्यजशृङ्गी च सर्षपाः सफणिज्जकाः ॥ २४ ॥
सैन्धवं लशुनं चैव कृमिघ्नः स्यादुपक्रमः ॥

—:():—

कषायैर्विधिना लेपैश्चूर्णयोगैश्च कारयेत् ॥ २२५ ॥
व्रणानां मृदुमांसानां निपुणां दारणक्रियाम् ॥
कषायवृक्षचूर्णेन भस्मना गोमयस्य च ॥ २६ ॥

—:():—

भस्मना तु नवानां वा शोणितस्थापनं भवेत् ॥
तत्रासिद्धौ भवेत्कार्यमसृक्स्थापनमग्निना ॥ २७ ॥

—:():—

तोपिकाफालजाम्बवोष्टैस्तप्ततैलेन वा पुनः ॥
तालपत्री विडङ्गानि मञ्जिष्ठा मधुकस्तथा ॥ २८ ॥
रजनी मधुपर्णी च तथाऽपामार्गतण्डुलाः ॥
उत्सादनं भवेदेतद्व्रणानां घृतसंयुतम् ॥ २९ ॥
इमामन्यां प्रवक्ष्यामि पुनरुत्सादनक्रियाम् ॥
काकादनी शुकनासा स्रुवहा तालपत्रिका ॥ २३० ॥

---

१ ख. °मवस्त्रा° । २ क. लेषये° । ३ क. °लेषनम् । ४ ख. कखायै° ।
५ क. गोपयितस्य । ६ क. तालिका° ।

काकोली क्षीरकाकोली जीवकर्षभकावुभौ ॥
माषपर्ण्यश्वगन्धा च मुद्गपर्णी तथैव च ॥ ३१ ॥
एतदप्यभिजानीयाद्घृतमिश्रं प्रलेपनम् ॥

—:○:—

सर्पिर्मांसरसः सर्वे(?)क्षीरं वाऽपि तथौदनः ॥ ३२ ॥
सुखोष्णं कालयोगेन मृदूकरणमिष्यते ॥

—:○:—

एष एव भवेदुष्णः स्वेदः शीतातुरे व्रणे ॥ ३३ ॥
अजाक्षीरेण वा सिद्धः पायसः स्वेदनो भवेत् ॥

—:○:—

वचा विषघ्ना कुष्ठं च तिलकल्कः ससैन्धवः ॥ ३४ ॥
व्रणे तच्छोधनं ज्ञेयं दन्तिनां विषदूषिते ॥
नलवेतसमूलानि चन्दनोशीरसारिवा(:) ॥ २३५ ॥
मृणालोत्पलपत्रं च पद्मिन्याश्चैव कर्दमः ॥
यानि धान्यानि शीतानि तैर्घृताक्तैः प्रलेपयेत् ॥ ३६ ॥

—:():—

गतोष्मणामत ऊर्ध्वं क्षारयोगः प्रवक्ष्यते ॥
पाटला वारिमेदश्च स्फूर्जको धवमुष्ककौ ॥ ३७ ॥
करवीरं कदम्बश्च मधूकः सर्ज एव च ॥
एतेषां भस्मना क्षारः कर्तव्यस्तत्र चाऽऽवपेत् ॥ ३८ ॥
सैन्धवं च विडं चैव क्षारोऽयं व्रणशोधनः ॥

—:():—

खदिरः शिंशपासारो निर्मूलाऽथ प्रियङ्गवः ॥ ३९ ॥
भद्रमुस्ता विडङ्गानि तगरं चन्दनागुरू ॥
अलक्तकं नागपुष्पं तथा चाशोकरोहिणी ॥ २४० ॥
शतपुष्पा शिलापुष्पं पटोलं निम्बमेव च ॥
श्रीवेष्टकः सर्जरसः स्थौणेयं नलदं तथा ॥ ४१ ॥
एष कार्यो यथायोगं धूपः स्याद्व्रणरोपणः ॥
(*विदारमूलचूर्णानि क्षौमं च घृतसंयुतः ॥ ४२ ॥

---

* खपुस्तके त्रुटितः ॥

---

१ क. माखप° । २ क. °प्यवजा° । ३ क. °तारुणे व्र° । ४ क. स्फूर्जवेधचशुष्ककौ । ५ क. वाजयेत् ।

एषोऽपि विहितो धूपो गजानां व्रणरोपणः) ॥

—:○:—

बला चातिबला चैव कुशमूलं तथोत्कटा ॥ ४३ ॥
मधुगन्धाऽश्वगन्धा च वर्तिः स्याद्दुष्टिरोहिणी ॥
जीवन्ती चाश्वकर्णश्च कुम्भी काशीव एव च ॥ ४४ ॥
विदारी चारिमेदश्च पलाशः किणिही धवः ॥
आरग्वधोऽथ टिण्टूको मञ्जिष्ठा मधुकं तथा ॥ ४५ ॥
अश्वगन्धा च गोजी च क्षीरवृक्षत्वचस्तथा ॥
एष कल्को भवेद्देयो रोपणो घृतसंयुतः ॥ ४६ ॥

—:○:—

स(श)ल्लकी क्षीरवृक्षश्च मधूकाश्मन्तकासनाः ॥
जीवन्ती चारिमेदश्च कुम्मी काशीव एव च ॥ ४७ ॥
आदारी चाश्वकर्णश्च पलाशः कुटजस्तथा ॥
व्रणानां रोपणं चैव कषायं क्वथितं भवेत् ॥ ४८ ॥

—:○:—

भार्गी सर्षपगन्धा च मञ्जिष्ठा रजनीद्वयम् ॥
स्वयंगुप्ता च पाठा च घृतं रोपणमिष्यते ॥ ४९ ॥
एतैस्तु कार्षिकैर्भागैर्घृतप्रस्थं विपाचयेत् ॥
जलाढके समावाप्य शनैर्मन्दाग्निना पचेत् ॥ २५० ॥
छिन्नभिन्नेषु विद्धेषु नाडीदुष्टव्रणेषु च ॥
*दिग्धविद्धेषु वाऽप्येतद्घृतं शोधनरोपणम् ॥ ५१ ॥
चन्दनागुरुमञ्जिष्ठाशतपुष्पाप्रियङ्गवः ॥
बला कालानुसारी च शतपुष्पाः हरेणवः ॥ ५२ ॥
तालीपत्रं च तगरं रोध्रं व्याघ्रनखं († तथा ॥
भद्रदारु) तथैला च द्वे हरिद्रे पुनर्नवा ॥ ५३ ॥
कुष्ठं प्रपौण्डरीकं च अञ्जनं मधुकं मधु ॥
मधूच्छिष्टेन संयुक्तं तैलं रोपणमिष्यते ॥ ५४ ॥

* 'दग्ध' इति प्रतिभाति । † कपुस्तके त्रुटितम् ॥

१ क. स्यात्कुष्ठरो° । २ क. °श्वगन्धा च कु° । ३ ख. °चाश्वकर्णश्च । ४ ख. चारिमेदश्च । ५ क. चैतत्कपा° । ६ क. हरीतकी । ७ क. तालीसपत्रं त° । ८ क. °थैचले द्वे ।

निम्बार्करजनीपत्रैर्मृगाक्ष्या मूलसंयुतैः ॥
पचेत्तैलं भिषग्धीरो व्रणरोपणमुत्तमम् ॥ २५५ ॥
एतैरेवौषधैः सर्वैः शिंशपासारमिश्रितैः ॥
दुष्टव्रणेषु राजेन्द्र तैलं रोपणमुत्तमम् ॥ ५६ ॥

—:○:—

प्रियङ्गुका सर्जरसः पुष्पकासीसमञ्जनम् ॥
रोचना मधुकं रोध्रं चूर्णं रोपणमिष्यते ॥ ५७ ॥

—:○:—

तिनिसार्जुनसर्जानां शिंशपासोमवल्कयोः ॥
खदिरस्य च निष्क्वाथो निम्बस्य च समावपेत् ॥ ५८ ॥
रसाञ्जनं रोहिणीं च मातुलुङ्गरसस्तथा ॥
कासीसं हरितालं च रोपणी स्याद्रसक्रिया ॥ ५९ ॥
(†व्रणदोषाविरोधेन यथासात्म्यं यथावयः ॥
यथाग्नि चेति कर्तव्या क्षीणानां बृंहणक्रिया ॥ २६० ॥)
गौरी हरिद्रे मधुकं मञ्जिष्ठा नीलमुत्पलम् ॥
पटोलारिष्टपत्राणि मालतीनक्तमालयोः ॥ ६१ ॥
घोण्टाफलत्वङ्मञ्जिष्ठा फलिनी रोध्रमेव च ॥
एतेनैव विधानेन क्रमयुक्तेन दन्तिनाम् ॥ ६२ ॥
स्थूलानां ह्रासनं कार्यं व्रणिनां भिषजा भवेत् ॥
सोमवल्कप्रवालानि मदयन्ती मनःशिला ॥
मधुकं चेति जानीयाद्व्रणवर्णप्रसादनम् ॥ ६३ ॥
मधुकं मधु मञ्जिष्ठा क्षुद्रैला गोशकृद्घृतम् ॥
सवर्णकरणं ज्ञेयं दूर्वा सकटशर्करा ॥ ६४ ॥
इतीदं पालकाप्येन द्विव्रणीयस्य लक्षणम् ॥
कृत्स्नं भगवता प्रोक्तमङ्गराजाय धीमते ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रचोदितः ॥ २६५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने श्रीपाठे वृद्धोपदेशे तृतीये शल्यस्थाने द्विव्रणीयो नाम प्रथमोऽध्यायः ॥ १ ॥

---

† कपुस्तके त्रुटितम् ।

---

१ ख. °तुलिङ्ग° ।

अथ द्वितीयोऽध्यायः ।

प्रतपन्निव भास्वन्तं मयूरकवचं दिवि ।
ऋषिं ब्रह्मविदां श्रेष्ठमादित्यसमतेजसम् ॥
अङ्गराजो महाबुद्धिः पालकाप्यं स्म पृच्छति ।
द्विविधस्य व्रणस्येह निदानं सचिकित्सितम् ॥
गजानां ब्रूहि तत्त्वेन तत्त्वार्थकुशलो ह्यसि ।
इत्येवमुक्तः शिष्येण ब्रह्मर्षिरखिलं ततः ॥
व्याजहारोत्तरं श्रीमान्वाक्यं वाक्यविदां वरः ॥

अथातः सद्यःक्षतं नामाध्यायं व्याख्यास्यामः। इति ह स्माऽऽह भगवान्पालकाप्यः ।

इह खलु भो(ः) सद्यःक्षतमखिलमादावेव शृणु भद्रमुख, शरशक्त्यृष्टितोमरपरश्वधविषाणाद्यभिहतशरीरा रुधिरेमुद्वमन्त इह गजा दृश्यन्ते व्रणेभ्यः, व्याघ्रसिंहनखदंष्ट्रावलुप्ताश्च । तेषां व्रणाभिघातलक्षणमशेषेण स्थानगतिसंस्थानप्रमाणविशेषांश्च वक्ष्यामः ।

तत्र द्विविधो ह्यात्मा व्रणानाम्—आगन्तुः शरीरसमुत्थश्च। तत्राऽऽगन्तुरेकः। स तु नानाशस्त्राभिघातविशेषादनेकाकृतिविशेषान्पुष्णाति । तत्राऽऽकृष्टशरासनविप्रमुक्तस्येषोश्चतुर्विधो गतिविकारः प्रादुर्भवति—विद्धस्तुण्डितोऽतिविद्धो निर्विद्ध इति । तत्र पञ्चविधसंस्थानगतिविचारमाचष्टे तं कर्णिकानालिकानाराचार्धचन्द्रवत्सदन्तैर्गम्भीरगतिविषयमेकतो गतिभेदमुपगतं विद्धं विद्यात् । (*तुल्यवेगमतिसंस्थानप्रचारमीषत्पतनत्वचो विशेषगतिनिर्भिन्नान्तरत्वचमुत्तुण्डितं विद्यात् । उभयतो निर्भिन्नसायकं त्वङ्मांसशिरास्नायू……द्धमभिविद्धं विद्यात् । एवमेव विद्धोत्तुण्डिताभिविद्धगतिमतीत्य शरीरमपास्य यत्सायको व्रजति तं निर्विद्धम् ।

प्रायस(श)स्तु महाकायत्वाद्वारणानाम्, अल्पप्रमाणत्वाद्यधकानामुत्तुण्डिताभिविद्धनिर्विद्धानि मन्दमुपलभ्यन्ते ॥

उद्भ्रान्तविप्लुतातिविद्धनिसृतां गतिमुपगच्छतां व्रणानां छिन्नविच्छिन्नदारितावनष्टोन्नष्टानामित्यत्र पञ्चविधो व्रणविच्छेदविशेषोऽभिवर्तते । तत्र यदङ्ग

* कपुस्तकत्रुटितोऽयं पाठः ॥

१ क. °धिस्तं ततः पुनः ॥ व्या° । २ क. °रमन्तर्देहा ग° । ३ क. °तोऽभिवि° । ४ क. °नालीकाकारावर्भ° ।

परशुपट्टिशकरपत्रैरशेषं निवर्त्यते तच्छिन्नमिति विद्यात् । तत्र तत्रैवानेकशोऽङ्गे तिर्यगुपगतः प्रहारसंनिपातो यत्र दृश्यते तद्विच्छिन्नमिति विद्यात् । अङ्गुल्यग्राभ्यन्तरे हस्ते लाङ्गूले नखे शिरसि कर्णयोर्वा यत्र द्विधा भेदमभिवर्तते तं दारितं विद्यात् । यदनुलोमं यावदस्थि कृत्यते मांसमेदःशिरास्नायूपगतं तदवनष्टं विद्यात् । अवनष्टादविशेषेण केवलं प्रतिलोममुन्नष्टं विद्यात् ।) तत्र तदवच्छिन्नं विच्छिन्नं दारितमवनष्टमुन्नष्टमतिविद्धावकृत्तसंभवानि (?) ।

अवमृष्टं द्विविधम्—गम्भीरान्तरगतत्वाद्विपुलमुखत्वाच्च । व्रणस्यावक्रन्तनात्सहसाऽन्त्राण्यवसरन्ति तदा छिन्नान्त्रं क्लिष्टान्त्रं वा विद्यात् । छिन्नान्त्रस्य रुधिरं मेहनात्प्रवर्तते, सर्वशस्त्रादभीक्ष्णमुद्विजति, अस्रं चोष्णमुद्गमति, उन्नद्धकुक्षिः क्षितितलमभिगम्य पतति भूमाविति, मुहुर्मुहुर्हस्तं गृह्णाति । अस्य विपर्यये क्लिष्टान्त्रम् । क्लिष्टान्त्रे तु क्रियां प्रयुञ्जीत ।

तत्र तावदवकृत्तमाचार्यास्त्रिविधमुपदिशन्ति—विरक्तावपाटितावगाढम् । तत्रान्तर्लोहितमुपगतमांसश्वेतमीषत्संचयोपगतं विरक्तं विद्यात् । अण्डकोशबस्त्युदरगुदेषु पार्श्वयोर्मूर्ध्नि गात्रापरे हस्ते वा यावदामांसमवगतमवपाटितं विद्यात् । परशुपट्टिशकरपत्रादिघातैरङ्गप्रत्यङ्गेषु यावदस्थ्न्युपगतमवगाढं विद्यात् ।

गात्रापरग्रैवेयरज्जुभिर्गाढबन्धननिमित्तैः.................रास्या भागोपगतैश्चातिकर्कशैर्निघृष्टं भवति ।

तत्राशनिपतनजतुमधूच्छिष्टगुडामेध्यपाचककाकाशीर्वि(वि)षाङ्गारैर्दग्धमुत्पद्यते । तत्र ज्वालाङ्गारपरंपराबाष्पसंतापात्मकं पञ्चविधं दग्धं ब्रुवन्त्याचार्याः । तत्र पञ्चविधस्याग्नि(पि)दग्धस्य पिपासा त्वक्शोषो वेपथुः श्वयथुरिति सामान्यवेदनात्मकानि लिङ्गानि भवन्ति ।

अथ त्वग्गतोष्मण्यभ्यन्तरगतेऽग्नौ नात्यर्थदाहस्फोटाः संभवन्ति त्वग्गताः ।

मांसगते त्वनले प्रकुथितमांसेताऽसृगतिगमनं च भवति ।

यदा त्वङ्मांसमभिभूय शिरास्नायूपगतो भवत्यनलः, तदा मूर्छति, अत्यर्थं कालपर्ययाच्च व्रणेषु संरोहत्सु सिरास्नायूनां संकुचनं भवति ॥

त्वङ्मांसशिरास्नायुमार्गमतीत्य यदा हुतभुगभिभवत्यनेकपम्, तदा दाहमूर्छाभ्रमकम्पप्रमोहा यथोक्तानि च त्वङ्मांसशिरास्नायुलिङ्गानि भवन्ति ।

---

१ क. °न्त्रेषु क्रि° । २ क. °तमिषत्संच° । ३ °ररागैरेयं र° । ख. °रग्रैवेयं र° । ४ क. रास्योप° । ५ क.° त्यर्थं कालपर्याया° । ६ क. संहरत्सु ।

मर्मगते यथोक्तानां मर्मणां लिङ्गानि भवन्ति । प्राणवियोगश्चात्यर्थदग्धस्य वारणस्य ॥

यदा तु गोपुराट्टालकाद्यभिभवतो वारणस्योल्काज्वालावलीढं भवति शरीरम्, तदा रोमत्वंग्ज्वलनं भवति । अङ्गारामेध्यगुडमधूच्छिष्टस्य जतुभिरवलीढगात्रस्य भूयो भूयः श्यावता भवति । तत्र द्विविधमेव परंपरादाहमिच्छन्ति—द्रवेण वा स्थिरेण वा । तयोस्तु लिङ्गसामान्य......भिहतदेहानां विद्युद्विस्फोटनाद्भैरवं स्वरमभिशृण्वतां हृदयमवदीर्यते द्विरदानां केषांचित् । घोरघोषत्वात्केचिद्बाधिर्यमेवाऽऽप्नुवन्ति । केचित्त्वभिहतदेहा गतासवो भवन्ति । अत्यर्थाध्वगमनाद्दिवसकरकराभिहतदेहस्य संतापाद्रुक्षेभ्यो रुधिरागमः, पिपासात्वक्संकोचोरुस्तम्भाः, श्र(स्र)स्तकरचरणकर्णवालमेहनत्वं च भवति । स दिवसकरकरदग्धतनुर्यदा ग्रहणमुपगतो भवति द्विरदपतिः, ततोऽस्य मनस्तापः, यवसकवलकुवलानामुपयुक्तानां स विदाहमुपजनयति । स विदग्धो धातुत्वङ्मांसधमनीसिरास्नायूनां भूयो भूयो विदाहमभिनिवर्तयति । तस्य संतापदग्धोत्पन्नास्तीक्ष्णवेदनाः शरीरे कृष्णपर्यन्ताः सिताः स्फोटाः शोषरुग्दाहप्राया भवन्ति । इत्येतत्संतापदग्धस्य लक्षणम् ॥

अभ्यासादाशीर्वि(वि)षाणां निःश्वासघ्राणनयनैः संमूर्छितकोपानां संनिपाताद्विरदपतिगात्रेषु रक्तमण्डलानि प्रादुर्भवन्ति । प्रियङ्गुतण्डुलवर्णैः स्फोटैरुपचयोऽप्रतिकारोऽस्य मांससादः पिपासा वेपथुर्वमथुरभीक्ष्णं संभवति । इत्येतदाशीर्वि(वि)षदग्धलक्षणं भवति । इति सद्यःक्षतदग्धमशेषेणोक्तमस्माभिः ॥

व्रणस्तु सर्व एव किंचित्कालमागन्तुर्भूत्वा दोषाणामन्यतमसंसर्गमुपगम्य सदोषो भवति । तस्याऽऽकृतिविशेषाद्व्रणकरणविशेषाणामन्यतमेनाऽऽहतस्य तच्चिकित्सितमुपदेक्ष्यामः—

अथ सद्यःक्षतं मधुघृताभ्यक्तं कृत्वा विमलशिशिरसलिलं द्विरदमवगाहयेत्त्रिरात्रम् । एवं क्रमेणानुबध्नीयात् । ततः क्लिन्नोत्थितव्रणमपि विक्लेपपूतिमांसावनद्धमुत्सङ्गयुक्तं गत्या वा ततः शस्त्रेण पूतिमांसं विशोध्यैषण्याऽन्वेषणमसंमूढः कृत्वा, यत्रैषण्या गतिर्नावरुध्यते ततो व्रणं निरुत्सङ्गं सलिलानवस्थायिनं कुर्यात् । सलिलं हि रक्तमूर्छितं वायुनोच्छ्रितत्वं पूयत्वं च व्रजति । पूयः स दोषमूर्छितो गतिमापादयति । तं घृतेनावसिच्य गजशकृतेन किण्वलवण-

१ क. °त्वक्चल° । २ क. °र्यमुपलभन्ते । के° । ३ क. °टाश्चोषशोष° । ४ क. °भ्यासन्नैर्दाशी° । ५ क. °रास्पद° । ६ क. °कित्सामु° । ७ क °स्रेणात्यमां° ।

संयुक्तेन पूरयेत् । उपचरति मासार्धवया(?) येष्वपि पूरणं दद्यात् । तृतीये चाहनि यथोक्तेन प्रक्षालनेन प्रक्षाल्य व्रणं घृतेन परिषेचयेत् । अनेनैव विधिना व्रणमुपाचरेदाक्लेदात् । ततः शोधनादिकल्कैरुपक्रमेत्, घृतपानं च दद्यात् । घृतसंयुक्तं शाल्योदनं मुद्गयूषेण संसृष्टं दद्यात् ॥

अथ सिंहव्याघ्रनखदंष्ट्रावलुप्तमभिविज्ञाय शतधौतेन घृतेनाभ्यज्य पञ्चकषायेण विमलशिशिरसलिलेन परिषेचयेत् । शीतैस्तु प्रदेहैर्घृतसंयुक्तैश्च प्रदेहयेत् । व्रणांश्च व्रणोपक्रमैरुपक्रमेत् ॥

अग्निदग्धं तु शतधौतेन घृतेनाभ्यज्य निर्वापयेत्पयःसुराभ्योऽन्यतरेण वा शीतैश्च प्रदेहैः, मञ्जिष्ठायष्टीमधुकचन्दनोशीरपद्मकनलवञ्जुलशालिमूलसारिवार्जुनोदुम्बरप्लक्षैः, वटनालिकाजलजबिशमृणालोत्पलपद्मिनीकर्दमभद्रमुस्तातृणशूल्यैश्च सुरादधिघृतयुक्तैः प्रदेहं कुर्यात् । कषायोदकपिष्टैः परिषेकांश्च कुर्यात् । व्यपगताग्निमभिज्ञाय विमलशिशिरसलिलेऽवगाहयेत् । निवृत्तमवगाहाद्घृतेन परिषेचयेत् । व्रणं च पूर्वोक्तैरुपक्रमैरुपक्रमेत् । गुडजतुमधूच्छिष्टामेध्यदग्ध-(*ग्नलदग्धसमानक्रियं तस्योपक्रमं कुर्यात् ।) घृतेनाभ्यज्य शीतैः प्रदेहैरुपक्रमेत् ॥

अर्कविद्युत्संतापदग्धस्य.................समानमुपक्रमं कुर्यात् । संतापदग्धं तु विशेषेणाऽऽहारैः सात्म्यकालाविरुद्धैरुपाचरेत् । घृतयुक्तं च शालीनामोदनं मुद्गयूषरसयुक्तं दद्यात् ॥

क्षारदग्धं च द्विव्रणीयेन क्षारकर्मण्युपदिष्टेनोपक्रमेत । घृष्टमधुघृतेनाभ्यज्य शीतैः प्रदेहैरुपक्रमेत ॥

विषदग्धं च शस्त्रकर्मादिभिरुपक्रमेत् । दग्धं चाऽऽशीविषनिःश्वासैः शतधौतेन घृतेनाभ्यज्य विषजग्धोद्दिष्टैः प्रदेहैरुपक्रमेत् । घृतपानं च दद्यात्, शीतपरिषेकं च कुर्यात् । भोजनं विषजग्धोद्दिष्टं दद्यात् ॥

तत्र श्लोकः—

क्षतं दग्धं च यो नागे(गं) विधिना समुपाचरेत् ।
पूज्यः स नियतं राज्ञा दानमानपरिग्रहैः ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यरोगस्थाने
सद्यःक्षतलव(क्ष)णं नाम द्वितीयोऽध्यायः ॥ २ ॥

---

* खपुस्तके त्रुटितः ।

१ क. °दिभिः क° । २ क. °गाहये° । ३ क. °दग्धं ।

अथ तृतीयोऽध्यायः ।

नन्दनोपवने पुण्ये नानाद्विजसमाकुले ॥
आश्रमे स्वर्गसोपाने महर्षिगणसेविते ॥ १ ॥
हुताग्निहोत्रमासीनं ज्वलन्तमिव पावकम् ॥
पालकाप्यं महातेजा अङ्गराजो महायशाः ॥ २ ॥
प्रणम्य शिरसा तस्मै संशयं परिपृष्टवान् ॥
सद्यःक्षतविधानं तु भगवन्वक्तुमर्हसि ॥ ३ ॥
छिन्नविच्छिन्ननिर्विद्धं सावनष्टाविदारिते ॥
उत्तुण्डितेऽतिविद्धे च तथा विद्धावमृष्टयोः ॥ ४ ॥
दग्धे दूषीविषे चैव क्षतेषु विविधेषु च ॥
विध्यं(धिं) सद्यःक्षते नागे कृपया वक्तुमर्हसि ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
शृणु भद्रमुख स्वस्थो यत्त्वं पृच्छसि संशयम् ॥ ६ ॥
अतिदीर्णव्रणानां तु विधिरन्यः प्रवक्ष्यते ॥
पतङ्गं मधुसर्पिर्भ्यां संयुक्तं मनुजाधिप ॥ ७ ॥
सद्यःक्षतेषु नागानां संधानं हितमुत्तमम् ॥
गम्भीराणां तु सर्वेषामेषण्या निर्दहेदसृक् ॥ ८ ॥
श्वेताभासो व्रणो यस्तु तस्मिन्नक्तं न निःस्रवेत् ॥
वृक्षोत्तङ्गी[1] व्रणो यस्तु तस्मिन्नक्तमतिश्रु(स्रु)तम् ॥ ९ ॥
दूषयेत्तु प्रदुष्टं[2] तत्स्व(च्छ्व)यथुं च नियच्छति ॥
संतापयति तिष्ठन्तं पाकं चाऽऽशु नियच्छति ॥ १० ॥
तस्माद्व्रणं शोधयित्वा घृतेन परिषेचयेत् ॥
संसृष्टां[3] मधुसर्पिर्भ्यां वर्तिं चात्र प्रवेशयेत् ॥ ११ ॥
अथ निष्कृष्य तां वर्तिमिमं विधिमुपाचरेत् ॥
कुमुदोत्पलपत्राणि ह्रीवेरं च कुटंनटम् ॥ १२ ॥
करवीरस्य पत्राणि क्षीरवृक्षत्वचस्तिलान् ॥
कृष्णमृत्तिकया सार्धं दृषदि प्रतिपेषयेत् ॥ १३ ॥
घृतेन शतधौतेन संयोज्याथ प्रलेपनम् ॥
शीतांक्रियामिमां वाऽन्यां यथावत्समुपाचरेत् ॥ १४ ॥

---

१ क. वृत्तोत्सङ्गी । २ क. प्रदिष्टं । ३ क. संसृष्टं ।

कन्दैर्बिशमृणालानां क्षीरवृक्षत्वचाऽन्वितैः ॥
छायायां परिषेकं हि कारयेद्विधिवद्भिषक् ॥ १५ ॥
अभ्यङ्गैः परिषेकैश्च शीतैः पानैर्घृतस्य च ॥
सुखमस्य भवेत्तेन न च दोषः प्रबाधते ॥ १६ ॥
अभिघाताद्विषाद्वाऽपि द्विपस्य श्वयथुर्यदा ॥
उत्पद्यते भिषग्धीरस्तदेनं कारयेद्विधिम् ॥ १७ ॥
चन्दनं पद्मकं पत्रं शैवलं सुनिषण्णकम् ॥
क्षीरपिष्टानि सर्वाणि घृतेनैतत्प्रलेपनम् ॥ १८ ॥
सर्पिषाऽभ्यञ्जनं कार्यं प्रदेहो वा न संशयः ॥
अथवैतेन कल्पेन विशेषो नोपलभ्यते ॥ १९ ॥
कुठाराकृतिशस्त्रेण ततस्तं प्रच्छयेद्भिषक् ॥
नातिगाढं न च लघुं न घनं विरलं न च ॥ २० ॥
पदे पदं न दद्याच्च शिरासंधींश्च वर्जयेत् ॥
जम्बूक्षीरपलाशैश्च पद्मिन्याश्चैव कर्दमैः ॥ २१ ॥
लेपयेद्घृतसंयुक्तैस्ततः संपद्यते सुखी ॥
ईषत्कषायमधुराः कषायास्तु रसास्तिलाः ॥ २२ ॥
रक्तपित्तानिलहरास्तेषां कल्कः प्रशस्यते ॥
कषायात्तु रसाच्छ्लेष्मा माधुर्यात्पित्तमेव च ॥ २३ ॥
स्नेहाच्च शमयेद्वातं तस्मात्कल्कोऽयमिष्यते ॥
घृष्टदष्टविदग्धानां क्षीरवृक्षत्वचाऽन्वितः ॥ २४ ॥
हितो गजानामत्यर्थं लेपः सद्यःक्षतेषु च ॥
उद्गमो द्विविधो राजन्यदि मर्माश्रितो भवेत् ॥ २५ ॥
सुपक्वं छेदयेदाशु नापक्वं तु कदाचन ॥
मर्मसंरक्षणार्थं च यत्नं कृत्वा तु दन्तिनाम् ॥ २६ ॥
दोषमन्तरतः कृत्वा ततः शस्त्रं निपातयेत् ॥
मर्मण्यभिहतो यस्माद्द्विपो मरणमृच्छति ॥ २७ ॥
मर्मेति मारणादुक्तं नैरुक्तेनैव हेतुना ॥
निमित्तैर्विविधैर्देहं गजानां विवृणोति यत् ॥ २८ ॥
तस्माद्धि वारणेन्द्राणां व्रण इत्यभिधीयते ॥
रूढेऽपि हि व्रणे यस्माद्व्रणवस्तु न नश्यति ॥ २९ ॥

---

१ क. शैलेयं । २ क. °स्तं पृच्छ° । ३ क °ष्टदष्ट° ।

आ देहधारणादेव व्रण इत्यभिशब्दितः ॥
अर्बुदा गलगण्डाश्च ये च संधिगता व्रणाः ॥ ३० ॥
एतान्क्षारैरुपक्रामेन्नैताञ्शस्त्रैरुपाचरेत् ॥
संनिपातैस्तु दन्तानां (*दारितानां) द्विपादिभिः ॥ ३१ ॥
भिण्डिमालैः[1] सकणयैरसिशक्त्यृष्टितोमरैः ॥
भिन्नमर्मशिरा गाढं वहन्ति यदि शोणितम् ॥ ३२ ॥
अतिप्रवृत्ते रुधिरे लभेयुरपतानकाम् ॥
मूर्छां वा दारुणां नागाः क्षयं मरणमेव वा ॥ ३३ ॥
तेष्वसृक्स्थापनं कार्यमेभिः सर्वैरुपक्रमैः ॥
कषायवृक्षचूर्णैर्वा भस्मना गोमयस्य च ॥ ३४ ॥
भस्मना तान्तवानां वा शोणितस्थापनं भवेत् ॥
(†शीतैः पानैश्च सेकैश्च शोणितस्थापनं भवेत्) ॥ ३५ ॥
अथवैतेन[2] कल्पेन शोणितं नैव तिष्ठति ॥
अग्निकर्म ततः कुर्यात्क्षारं चात्र प्रदापयेत् ॥ ३६ ॥
न चातिक्रामयेद्वेलां समुद्रः समये स्थितः ॥
न चातिक्रमितुं शक्तमग्निक्षारादसृग्बलात् ॥ ३७ ॥
अत्यम्ललवणादुष्णादत्याशात्यम्बुसेवनात् ॥
असृक्स्थितं चिरमपि वारणस्य प्रवर्तते ॥ ३८ ॥
नात्यम्लं नातिलवणं नात्युष्णं नातिभोजनम् ॥
नात्यर्थमम्बुपानं च तस्मान्नागाय दापयेत् ॥ ३९ ॥
अभिघातात्प्रकुप्येत वायुः पित्तं च दन्तिनः ॥
तस्मात्सद्यःक्षते नागे घृतमेव हितं भवेत् ॥ ४० ॥
पञ्चाहं सप्तरात्रं वा व्रणं स्नेहेन सेचयेत् ॥
दोषातिरिक्तं विज्ञाय व्रणं प्रकृतिसात्म्यतः ॥ ४१ ॥
क्रियापथं प्रयुञ्जीत पंपश्चास्मै[3] प्रदापयेत् ॥
ततोऽङ्गराजः पप्रच्छ विनयात्पुनरुत्थितः ॥ ४२ ॥
किमर्थं दीयते क्षीरं व्रणितेभ्यो महामुने ॥
इत्येवमुक्तः शिष्येण[4] पालकाप्यस्ततोऽब्रवीत् ॥ ४३ ॥

---

* कपुस्तके त्रुटितः । † खपुस्तके नोपलभ्यते ।

---

१ क. भिण्डिपालैः । २ क. अथास्यैते° । ३ क. पथ्यं चास्मै । ४ क. ख. शेषेण ।

शृणुष्व मे महाराज यदर्थं दीयते पयः ॥
(*इमे च सर्वे ऋषयः) सहितास्तु त्वयाऽनघ ॥ ४४ ॥
अत्यर्थं शोणितं यस्य निःसृतं वारणस्य वै ॥
तस्मै क्षीरं प्रदेयं स्याद्घृतयुक्तं महीपते ॥ ४५ ॥
जातिसात्म्यात्तु नागानां श्रेष्ठं कायाग्निदीपनम् ॥
क्षीरं सर्वत्र मधुरं बल्यं रक्तप्रसादनम् ॥ ४६ ॥
जीवनं वातरोगघ्नं बलवृद्धिकरं च तत् ॥
रसायनं च पथ्यं च हृद्यं वृष्यं गदापहम् ॥ ४७ ॥
अतिप्रवृत्ते रुधिरे धातूनां जायते क्षयः ॥
†तन्मूला धातवः सर्वे क्षयाच्च मरणं ध्रुवम् ॥ ४८ ॥
तस्मात्क्षीरं भवेद्देयं सर्वैर्मधुरकैः सृ(शृ)तम् ॥
एतदर्थं महाराज क्षीरपानं विधीयते ॥ ४९ ॥

—:():—

अतः परं प्रवक्ष्यन्ते व्रणोपक्रमहेतवः ॥
प्रहारविगतोष्माणं स्थितं च रुधिरं यदा ॥ ५० ॥
द्विव्रणीयोपचारेण साधयेच्छोधनादिना ॥
यवसैः प्रतिपानैश्च स्नेहयुक्तैश्च भोजनैः ॥ ५१ ॥
संजातप्राणमांसस्य प्रतिपूर्णेषु धातुषु ॥
स्नेहपानोपचारेण स्नेहमच्छं प्रयोजयेत् ॥ ५२ ॥
स्नेहेन च विर(रि)क्तस्य बस्तिकर्म प्रशस्यते ॥
सुविरिक्तं च विज्ञाय स्नेहपानं प्रवर्तयेत् ॥ ५३ ॥
अविरिक्तस्य तैलेन शृणु दोषं नराधिप ॥
आक्षेपं वा विलभते अतीसारमरोचकम् ॥ ५४ ॥
अथवा पाकलं घोरं मरणं वा नियच्छति ॥
एते चान्ये च बहवो दोषाः स्युर्दुर्विरिक्ततः ॥ ५५ ॥
सुविरिक्तस्य वै राजन् बलं तेजश्च वर्धते ॥
स्नेहपानविधिश्चैव बस्तिदानविधिस्तथा ॥ ५६ ॥
तस्मिंस्तस्मिन्प्रकरणे पुरस्तादेव कीर्त्यते ॥
एतत्ते सर्वमाख्यातं यन्मां पृच्छसि पार्थिव ॥ ५७ ॥

*कपुस्तके नोपलभ्यते । †धातूनां क्षये हेतुप्रदर्शनपरोऽयं पादः ॥

१ क. तस्य । २ ख. यत् । ३ ख. निवर्तयेत् । ४ क. °न्प्रकारेण पु° ।

भूयः किमन्यदिच्छेत्त्वं(स्त्वं) वरदोऽस्मि तवानघ ॥

—:○:—

ततोऽङ्गपतिरक्षुद्रो विनयात्पुनरुत्थितः ॥ ५८ ॥
अकल्पानां च नागानां कल्पानां च तपोधन ॥
अरिष्टं ज्ञातुमिच्छामि दूतानां चैव लक्षणम् ॥ ५९ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शृणु मे सर्वमेवैतदविक्षिप्तेन चेतसा ॥ ६० ॥
अत्यर्थं दुर्मना यस्तु स्तब्धकर्णशिरोधरः ॥
न च वेदयते संज्ञां यथा प्रेतस्तथैव सः ॥ ६१ ॥
अत्यर्थं तु यदा नागो मक्षिकाभिरुपास्यते ॥
अकस्मादेव राजेन्द्र नायमस्तीति निर्दिशेत् ॥ ६२ ॥
(* छायायां गच्छतो यस्य शिरो यस्य न दृश्यते ॥
वारणस्य नरव्याघ्र तं प्रेतमभिनिर्दिशेत् ॥) ६३ ॥
क्रिया सम्यक्प्रयुक्ताऽपि यदा नागस्य हीयते ॥
रोगेषु साध्यमानेषु तदरिष्टस्य लक्षणम् ॥ ६४ ॥

—:○:—

अतः परं प्रवक्ष्यामि दूतानामपि लक्षणम् ॥
चित्रमाल्याम्बरधरान्स्पृशतश्च नखांस्तथा ॥ ६५ ॥
मुक्तकेशैकवस्त्रांश्च दीनां व्याहरतो गिरम् ॥
पृच्छकांस्तादृशो दृष्ट्वा न गन्तव्यं भिषग्वरैः ॥ ६६ ॥
आमं मांसं सवत्सां गां ब्राह्मणाञ्शुक्लवाससः ॥
उद्धृतां च महीं दृष्ट्वा वाराहं चक्रमुत्थितम् ॥ ६७ ॥
श्वेतं छत्रं पताकां च श्वेतं च वृषभं तथा ॥
दधि प्रभिन्नं च गजं पूर्णं च कलशं तथा ॥ ६८ ॥
एतानि च निमित्तानि शुभानि च शिवानि तु ॥
प्रस्थितैर्यदि दृश्यन्ते सद्यः सिद्धिर्ध्रुवा भवेत् ॥ ६९ ॥
शुभशब्दे च गन्धे च सानुलोमे च मारुते ॥
प्रस्थिते सर्वकार्याणां सद्यःसिद्धिर्ध्रुवा भवेत् ॥
क्रिया सम्यक्प्रयुक्ताऽपि भिषग्भिः कालसंभृतैः ॥ ७० ॥

---

* धनुश्चिह्नमध्यगतो नोपलभ्यते कपुस्तके ॥

या न सिध्यति विप्रेन्द्र तन्मे शंसितुमर्हसि ॥
इत्यङ्गपतिना पृष्टः पालकाप्यस्ततोऽब्रवीत् ॥ ७१ ॥
तिथिष्वशस्तपूर्वेषु पक्षच्छिद्रेषु हस्तिनाम् ॥
आर्द्रासु त्रिषु पूर्वासु भरणीषु मघासु च ॥ ७२ ॥
रोगस्याऽऽगमनेऽन्यां वा क्रियां सर्वां विवर्जयेत् ॥
कृत्तिकाश्लेषयोश्चैव मूले वरुणदैवते ॥ ७३ ॥
वारणास्त्वभिभूयेरन्हृतास्त्वेतेषु राक्षसैः ॥
तस्मात्सर्वप्रयत्नेन तिथीनेतान्विवर्जयेत् ॥ ७४ ॥
क्रिया सम्यक्प्रयुक्ताऽपि गजानां शास्त्रकोविदैः ॥
न सिध्यति महाराज तस्मादेतान्विवर्जयेत् ॥ ७५ ॥

—:():—

आमच्छेदे तु ये दोषास्तान्सर्वाञ्शृणु पार्थिव ॥
आमच्छेदे तु रुधिरं दावाग्निरिव कुप्यति ॥ ७६ ॥
कुपितं कोपयेत्पित्तं त्वङ्मांसं चापि दूषयेत् ॥
वायुना सह संगम्य श्वयथुं जनयेद्भृशम् ॥ ७७ ॥
ततोऽस्य वेदना घोरा दाहश्चैव प्रवर्तते ॥
अतिप्रवृत्ते[२] दाहे च विसर्पस्तस्य जायते ॥ ७८ ॥
नीलपीतारुणनिभैः स्फोटैः समुपचीयते ॥
न तिष्ठत्यथवा रक्तं स्नायुच्छेदोऽपि वा भवेत् ॥ ७९ ॥
स्नायुच्छेदेन खञ्जत्वं गद्गदत्वं च जायते ॥
स्कन्दरोगं च लभते शोणितस्य प्रवर्तनात् ॥ ८० ॥
एतदर्थं न कुर्वीत आमच्छेदं तु कुञ्जरे ॥
तस्मात्सुपक्वं श्वयथुं छेदयेत्क्रमशो भिषक् ॥ ८१ ॥
चतुर्दंष्ट्राहिदष्टस्य यथा नास्ति चिकित्सितम् ॥
एवं तु कुपिते रक्ते नेत्त्रैम्रे(?)रस्ति भेषजम् ॥ ८२ ॥

—:():—

अत ऊर्ध्वं प्रवक्ष्यामि वह्निर्यत्रावतिष्ठति ॥
जाठरः पृथिवीपाल नाभावग्निः प्रतिष्ठितः ॥ ८३ ॥
सम्यक्पचति तत्रस्थमाहारं तु चतुर्विधम् ॥
यथाऽग्निर्विपचेद्भाण्डो जलं स्थालीमदूषयन् ॥ ८४ ॥

१ क. °गमागतमन्यां । २ क. °त्ते रुधिरे वि° ।

दीप्तः सम्यक्परिक्लिन्नांस्तण्डुलानेवमेव तु ॥[1]
आमाशयविभागार्थं नाभ्यामग्निः प्रतिष्ठितः ॥८५॥[2]
कायेऽन्नं प्रपचेत्सर्वं सम्यग्वातसमीरितः ॥[3]
यथा संप्रतिपूर्णस्य शुद्धकोष्ठस्य हस्तिनः ॥ ८६ ॥
सम्यग्विपच्येताऽऽहारो बलवर्णकरस्तथा ॥
दोषधातुसमत्वं च करोतीति विनिश्चयः ॥ ८७ ॥
असम्यक्पच्यमानश्च व्यापन्नस्तु यदा भवेत् ॥[4]
एतदेव विपर्यस्तं करोतीति विनिश्चयः ॥ ८८ ॥
यवसं परिपूर्णाय पीतायाम्बु सचेतसे ॥
या विधा दीयते राजन्सा विधाऽर्थाय कल्पते ॥ ८९ ॥
यवसानि विचित्राणि कुवलं पल्लवानि च ॥
यवसार्थे प्रदेयानि निग्रहाच्च निवारयेत् ॥ ९० ॥
व्याप्य तिष्ठति यावत्तु शरीरं शुक्रमेव तु ॥
आप्यो धातुर्द्रवो रक्ततेजसा स तु रज्यते ॥ ९१ ॥
मूर्तिमच्चैव भूस्तत्र स्वधातुर्विवरं स्मृतम् ॥
स्पर्शनं चैव वायव्यमेवं पञ्च गुणाः स्मृताः ॥ ९२ ॥
ईषत्क्षारस्य यः क्षारः स क्षारः क्षार एव तु ॥
स निर्दहति भूतानि स्थावराणि चराणि च ॥ ९३ ॥
शीतलस्तीक्ष्णवीर्यश्च तेजो दहति द्विपान् ॥[5]
ये व्रणाः संधिदेशस्था येषां चासृङ्न तिष्ठति ॥ ९४ ॥
उष्णताकृतभीरूणां दाहो येषु प्रयुज्यते ॥
ये व्रणा दूषिता नित्यं येषां चासृङ्न तिष्ठति ॥ ९५ ॥
तेषां प्रयोजयेत्क्षारं ये च दाहेऽतिशङ्किताः ॥
अत एव विनिश्चित्य ऋषिभिः ससुरैर्नृप ॥ ९६ ॥
तुषारक्षारयोगोऽयं निर्मितो ब्रह्मणा स्वयम् ॥ ९७ ॥[6]
क्षारोऽग्निकर्म कुरुते न च त्रासयते द्विपम् ॥
मृगा ह्येते प्रकृत्या च वनवासाध्वभीरवः ॥ ९८ ॥[7]
इत्यर्थं कल्प्यते क्षारो गजानां मनुजाधिप ॥
शीतलोऽग्निर्भगवता कृतो लोकहितेप्सया ॥ ९९ ॥

१ ख. °क्लिश्यंस्त° । २ क. °विधानार्थं । ३ क. °ये न प्र° । ४ क. °श्च मामान्न° । ५ क. °क्षणवायुश्च तेजसा तुदति । ६ क. °गोऽपि नि° । ७ क. गजा ।

भस्म कृत्वा रसान्षट्च क्षरणात्क्षारसंज्ञितः ॥
संयोगात्तु रसस्त्वेष रसः प्रकृतिसंभवः ॥ १०० ॥
तुषाराग्निर्यथा नागान्निर्दहेच्छिरसः पुनः ॥
विद्युन्मालिविनिर्दिष्टा तथा तस्य प्र॰॰क्रिया ॥ १ ॥
वर्जयित्वाऽवगाहं च परिषेकं च शीतलम् ॥
पलाशशय्या नागस्य निर्वाते पूजिता भवेत् ॥ २ ॥
आमये पूर्वमुत्पन्ने यश्च मिथ्योपचारतः ॥
उपद्रवति यत्पश्चात्तेन स स्यादुपद्रवः ॥ ३ ॥
कायसंरक्षणार्थं च वर्णज्ञानार्थमेव च ॥
एकामेव च्छविं विद्याद्यत्र रोम प्रतिष्ठितम् ॥ १०४ ॥
एतत्ते सर्वमाख्यातं यन्मां पृच्छसि पार्थिव ॥
सद्यःक्षतविधानं तु कृत्स्नकल्पमरिंदम ॥ १०५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने सद्यःक्षतचिकित्सितं नाम तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

अथाङ्गराजो मतिमानभिवाद्य मुनिं स्थितम् ॥
पालकाप्यमृषिश्रेष्ठं पुनरेवेदमब्रवीत् ॥ १ ॥
शिरास्नाय्वस्थिसंध्यानां छेदे तिर्यक्तथैव च ॥
(*पक्वस्यापाटने चैव) तन्मे ब्रूहि षेडत्ययान् ॥ २ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
हीनं तत्रातिरिक्तं च द्विविधं शास्त्रनिश्चयात् ॥ ३ ॥
वैद्योपचारान्नागानां शस्त्रकर्म विगर्हितम् ॥
गम्भीरानुगतं दोषं शस्त्रेणाप्राप्य वारणे ॥ ४ ॥
अदृष्टकर्मा तु भिषक्पाटयित्वाऽवसीदति ॥
रुजाः शस्त्रकृतास्तस्य यथा पूयसमुद्भवाः ॥ ५ ॥
दन्तिनो दाहबहुलाः हीने स्याच्छ(स्युः श)स्त्रकर्मणि ॥
व्रणे त्वल्पाश्रये शस्त्रमवगाढं यदा बलात् ॥ ६ ॥

---

* कपुस्तके त्रुटितः पाठः ।

---

१ क. गडत्परान् ।

पातयेत्सहसा वैद्यस्तदा हिंस्यादनेकपम् ॥
वेपथुं श्वयथुं चैव शोषं सहृदयामयम् ॥ ७ ॥
एषामन्यतमं ह्याशु व्याधिमाप्नोत्यनेकपः ॥
स्नायुच्छेदेन सञ्जत्वं गद्गदत्वं च जायते ॥ ८ ॥
मृणालमुखसंस्थानो व्रणश्चास्योपजायते ॥
चिरकालश्रु(स्रु)तश्चापि संधानं नैव गच्छति ॥ ९ ॥
तिर्यक्प्रणिहिते शस्त्रे शृणु दोषानतः परम् ॥
दाहदोषान्वितः स्तब्धः सरागः सपरिश्र(स्र)वः ॥ १० ॥
न रोहति व्रणश्चास्य क्रियमाणेऽपि भेषजे ॥
आमच्छेदे तु रुधिरं दावाग्निरिव कुप्यति ॥ ११ ॥
कुपितं कोपयेत्पित्तं त्वङ्मांसं चापि दूषयेत् ॥
वायुना सह संगम्य श्वयथुं जनयेद्भृशम् ॥ १२ ॥
ततोऽस्य वेदना घोरा वायुश्चैव प्रवर्तते ॥
अतिप्रवृत्ते दाहे तु विसर्पस्तस्य जायते ॥ १३ ॥
पीतनीलारुणनिभैः स्फोटैः समुपचीयते ॥
न तिष्ठत्यथवा रक्तं स्नायुच्छेदो यथा भवेत् ॥ १४ ॥
संधिच्छेदे त्वसंख्येया दोषा दृष्टा नराधिप ॥
निर्हरेत्संधिदेशे तु जलौकोभिस्तु शोणितम् ॥ १५ ॥
दुष्टं न मुक्तं रुधिरं घनी भवति वायुना ॥
तेजसा पित्तवातौ च पाकं चैव नियच्छतः ॥ १६ ॥
एते दोषाः प्रदुष्टस्य रुधिरस्याप्रवर्तनात् ॥
अप्रदुष्टस्य निश्रा(स्रा)वे दोषान्वक्ष्याम्यतः परम् ॥ १७ ॥
केवलं दृष्टकर्माणो ह्यशास्त्रज्ञाश्चिकित्सकाः ॥
भागाभागमजानन्तः शिरा हिंसन्त्यबुद्धयः ॥ १८ ॥
ततः श्र(स्र)वति नागस्य शोणितं जलयन्त्रवत् ॥
न च तिष्ठति दाहेन पदुर्वर्णमथो ह्यतः ॥ १९ ॥
गजानां मांसशोषैर्यद्भूयिष्ठं संप्रवर्तते ॥
ततो रक्तक्षयान्नागे वायुर्मर्माणि कृन्तति ॥ २० ॥

---

१ क. °ह्वेषा° । २ क. °षादपि न° । ३ क. °शेषु ज° । ४ क. °वाते मामान्न° । ५ क. °क्ष्णवा° । ६ ख. °वर्धते ।

वाताभिभूता नीरक्ताः स्फुटन्त्यस्य शिरास्ततः ॥
हृदयं पीड्यते चास्य तृष्णा चैवोपजायते ॥ २१ ॥
स पाण्डुवर्णो विमना म्रियते शोणितक्षयात् ॥
तस्माच्छिराव्यधो नित्यं वारणानां निगर्हितः ॥ २२ ॥
अपाटने च पंकस्य प्रवृद्धो[1] दोषसंचयः ॥
दहत्यग्निरिवोदीर्णः सदोषोऽन्तर्गतो गजम्[2] ॥ २३ ॥
तस्य मांसानि मेदश्च सिरा स्नाय(यू)नवाप्यथ ॥
*शतार्यत्यतिवृद्धस्तु[3] चिरकालमुपेक्षितः ॥ २४ ॥ †
इत्येते प्राप्तकालस्य दोषा दृष्टास्त्वपाटनम् ॥
इत्येष पालकाप्येन शस्त्रकर्मणि हस्तिनाम् ॥ २५ ॥
षडत्ययोपचारस्तु यथावत्समुदाहृतः ॥
न तिर्यक्पातयेच्छस्त्रं सर्वेष्वङ्गेषु पार्थिव ॥ २६ ॥
शिरास्थिमर्मसंधीनामन्तरेषु निपातयेत् ॥
यथा[4] शिरास्तथा शस्त्रं सर्वगात्रेषु वा हरेत् ॥ २७ ॥
एषण्याऽन्वेष्य विधिवदनुलोमं प्रपाटयेत् ॥
आसनेऽथ कलाभागे क्षये वंशे कटे तथा ॥ २८ ॥
भागेष्वेतेषु नागानां वृत्तच्छेद्यानि कारयेत्[5] ॥
शेषेष्वेतेषु भोगेषु[6] वृत्तच्छेद्यं न कारयेत् ॥ २९ ॥
न काकपदकं कुर्यान्न चातिबहुपादकम् ॥
तत्र शस्त्रपदं कुर्याद्द्व्यङ्गुलत्र्यङ्गुलान्तरे ॥ ३० ॥
पञ्चाङ्गुलान्तरे वा स्यादथवा चतुरङ्गुलम् ॥
नवाङ्गुलं वा नागस्य शस्त्रकर्म विधीयते ॥ ३१ ॥
यदृच्छया सिद्धिरपि पण्डितानामसंगता ॥
नयेन क्रियमाणेन विपत्तिरपि शोभना ॥ ३२ ॥
नैवातिशीतो नात्युष्णः शीर्णरोमाऽथ पिण्डितः ॥
पक्वोदुम्बरसंकाशः श्वयथुः पाकमागतः ॥ ३३ ॥
शस्त्रेण वृद्धिपत्रेण वाऽसि(शि)तेन सि(शि)तेन वा ॥
शस्त्रकर्मणि निष्णातः सुपक्वं पाटयेद्भिषक् ॥ ३४ ॥

---

* 'स तावत्प्रति' इति भवेत् । † इतः परं कियत्त्रुटितं प्रतिभाति ।

---

१ ख. पक्वश्च । २ क. °षोऽवगतो । ३ क. °यत्प्रति° । ४ ख. °था शरास्तथा शस्त्रं स° । ५ ख. वारयेत् । ६ क. भोगेषु ।

स्नेहपानं च सेकं च सर्पिः स्निग्धं च भोजनम् ॥
नित्यमेव हितं तस्य कारयेत्स सुखी भवेत् ॥ ३५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने षडत्ययोपचारो नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

अथ भगवन्तं पालकाप्यं रोमपादः पुनरेवापृच्छत्—' भगवन्निरवशेषाणामामन्तुकानां लक्षणमभिहितम्, ये त्विमे व्रणा आसन्नमत्ययाः, तेषां प्रयोगसामर्थ्यं योनिदोषं पृथक्त्वेनाऽऽकृतिविशेषानुपक्रमविशेषांश्च (?) कति च व्रणोपक्रमाः, किं साध्यासाध्यलक्षणम्, अन्वयप्रकृतिसात्म्यम्, इत्येतद्यथोपदिश्यमानमिच्छामि वेदितुम् ' इति ॥

एवं महर्षिभिरभिहितः, शुश्रूषा च (?) रोमपादाय संस्कृतपदविचित्रं हेतूपनयननिगमयुक्तमुवाच वाक्यम्—'वत्स, एतेषु चतुर्षु कर्मस्कन्धेषु द्विरदपतयो व्याख्याताः । तेषां यथास्थानोपगतानां व्रणानां लक्षणविशेषमनुव्याख्यास्यामः । तद्यथा—अल्पवयसः कवलकुवलभोजना महान्तमध्वानं च यदा वाह्यन्ते (*दिवसकरकराभिसंतप्तशरीरा वह्निपगूढैरिव च पवनबलप्रवेगैरभिहन्यमानाः क्षितितलमभिपतन्ति पांशुप्रमाथान्निषेवमाणाश्च न सलिलमवगाहन्ते ।) शुष्कौष्ठकण्ठवदनाः केचित्, केचित्सुदूराध्वानमुपगताः पांशुकर्दमशैवालपर्णकृमिजुष्टं सलिलमुपसेवन्ते । तेषां वायुरतिबलः खरपरुषः शीतो ध्मानात्मकः संघातवियोगकारी प्रकोपमुपगच्छति द्विरदपतीनां देहेषु । तेषां त्वक्चरणहस्तकुक्षिवदननखकर्णेष्वेवमादिषु चाङ्गप्रदेशेषु व्रणाः संभवन्ति खराः स्फोटवन्तः परुषाः फेनानुविद्धाः पिच्छिलाः स्राविणः प्रायशश्च गम्भीरानुगतभावा भवन्ति, अस्थिविवरभागाश्रयाश्च मांसमभि विगाह्यन्ते, तद्वातव्रणलक्षणं भवति ॥

अथ सलिलधरविसर्गकाले वीरुद्वनस्पतिवानस्पत्यानामोषधीनामुपपाकतवीर्यत्वादम्लरसभूयिष्ठत्वम(मु)पगतानां सेवनात्पित्तसंजननं भवति ।

भूयश्च शरदि दिवसकरकराभिहतदेहानां सुजातयवसकवलकुवलानां वीर्य-

* धनुश्चिह्नान्तरगतो नास्ति पाठः खपुस्तके ।

१ ख. रोमपादीयं । २ क. °मिजुष्टं । ३ ख. °नामप° । ४ क. °त्वमग° । ५ क. °तवयसः क° ।

वतां भक्षणादतिप्रचुरसलिलपानादिभिः पित्तसंजननैराहारप्रचारैः पित्तं प्रकोपमुपगच्छति तेनैषां देहेष्वरूंषि प्रादुर्भवन्ति क्षिप्रपाकक्लेदीन्यतीव कुणपगन्धिबहुपरिश्रा(स्रा)वीणि हारिद्रवत्कपोतवर्णानि प्रकोपमुपगतानि त्वङ्मांसशिरास्नायूनां शान्तेनातिमात्रं प्रवर्तन्ते । दाहदोषाश्च व्रणानां परिव्यापनं(णं) कुर्वन्ति पित्तसमुत्थेष्विति ॥

अथ शिशिरकालमुपगतानामसात्म्यरससेवनात्प्रचुरपानभक्षणादल्पपादसंचारणादतिव्यायामानुपसेवनाद्विशेषतो दिवा निद्रोपसेवनाच्च श्लेष्मा संचयमुपगच्छति ।

नित्यमेकरसोपसेवनाद्वसन्तकालेऽपि शीतः पिच्छिलो घनः स्वयोनित्वान्माधुर्यभूयिष्ठत्वाच्च कफः प्रकोपमुपगच्छति करचरणगुल्फसंधिपर्वस्वतिमात्रम् ।

अथ श्लेष्मणा महामूलपर्यन्तानि कण्डूभूयिष्ठमध्यभागानि निरुजस्कतयाऽग्रगात्राणामरूंष्यभिनिवर्तयन्ति ॥

ततः क्षितिरुहोपलक्षिततलेषु कण्डूयनाद्रतिमुपगच्छन्ति । यावाञ्शोणितपरिश्रा(स्रा)वः, तन्निमित्तं च भूयः कण्डूयते । एष श्लैष्मिको व्रणः ॥

इत्येवमेतैरेव त्रिभिर्दोषैः समन्वितं त्रिदोषसमुत्थं व्रणं विद्यात् ॥

एषां दोषान्वयानामाकृतिविशेषान्वक्ष्यामः । तद्यथा—ऋजूर्ध्वमधस्त्रिपुटश्चतुरस्रः कुटिलो मण्डलो दीर्घोऽर्धचन्द्ररूपस्रस्तिरश्चीनगतिरेखागतो बाणाकृतिर्वल्मीकशरावाकृतिर्निम्न उन्नतमण्डलः पिपीलिकागृहसंस्थानः पणवमध्यो भगसंस्थान आडम्बरमुखश्चेत्येता एकोनविंशतिर्व्रणाकृतयो भवन्ति । तासां व्रणाकृतीनां व्रणवस्तुविशेषास्त्रयो भवन्ति—त्वक्, संधिः, मर्म चेति ।

त्वगाश्रयो द्विविधः—तनुः, स्थूलश्च ॥

मर्मभागाश्रितस्त्रिविधः—मर्मजः, मर्मसंधिजः, मर्मातिगश्चेति । तत्र मर्मभागाश्रितौ द्वौ व्रणौ ॥

मर्मनिर्देशभागान्व्याख्यास्यामः—अथाऽऽहाराचारव्यवायव्यायामसंभवानामपक्वपच्यमानपक्वानां त्रैकाल्योपगतानां च प्रत्येकशो लक्षणमुपदेक्ष्यामः ॥

एवमेतेषां वातपित्तश्लेष्मणां युगपत्संनिपतितानां दोषसमुच्छ्रायो ग्रन्थिः पाकमुपगच्छति । श्लेष्मशोणितयोर्यत्तु(?) स्वैराहारप्रचारैः संघातो भवति । करचरणसंधिवङ्क्षणबालगात्रपृष्ठवंशाक्षिकूटकुम्भासनकर्णाण्डकोशमेण्ढ्रबस्तिगुदरन्ध्रकोष्ठानामन्यतमे प्रदेशे शुषिरमार्गप्रचारो वायुरतिबलत्वाद्ग्रन्थिभागमाध्मा-

१ क. श्लेष्मांशमु° । २ क. °तो वीणा° । ३ क. °भावान्व्या° । ४ क. °निपाता° ।

पयति । स परिणाहविवृद्धेर्भवत्युपल इव घनच्छविः, सवर्णः परुषोऽल्पवेदनः । इत्येवमपक्वस्य ग्रन्थेर्लक्षणम् ॥

तस्यैव विदह्यमानस्य तोददाहभेदाकुञ्चताडनादयो वेदनाविशेषाः प्रादुर्भवन्ति । स तैर्वेदनाविशेषैरभिद्रुतः सन्विशेषेण करं पिनष्टि । तदङ्गं प्रत्यङ्गं वाऽवमृश्योद्विजते पर्यश्रुः परिम्लानमुखः, तथाऽभीक्ष्णं क्रौञ्चवन्नदति, तुदति । इत्येतद्विदह्यमानस्य (*ग्रन्थेर्लक्षणं भवति ॥

श्वयथुवद्ग्रन्थेः पक्वलिङ्गानि लक्षयेत् । अथ लक्षणम्—विदह्यमानस्य पूर्वोक्तैर्वेदनादिभिः, तथैवानुबद्धः श्यावतां रक्ततां वा पुष्णाति । स कतिपयाहाद्वैवर्ण्येन महताऽभिभूयते, स विवर्णतनुः स्पर्शमात्रं न सहते, तथा वा लेपप्रदेहैरनुव्यथमानः परिशुष्यति, घृतेनाभ्यक्तस्य शीतोष्णाभिभूतत्वाद्घृतं विस्यन्दते । न च यवसकवलकुवलानुपसेवते । तथा व्याददाति विष्टम्भते विनमति पिपासुरतिमात्रं भवति, परिवमति वमथुना, हस्तिजीविभिः स्प्रष्टुं नेच्छति, स्पन्दनं घट्टनं वा । तस्मिन्नस्पृश्यमाने स्तम्भं पर्येति, नदत्यूर्ध्वशिरा भूत्वा, न स्तम्भस्थानशय्यासनेषु शर्म लभते । इत्येतत्पच्यमानस्य श्वयथोर्लक्षणं भवति ॥

पक्वे तु श्वयथौ वेदनोपशमः, परिपच्यते चास्य च्छविः, मन्दमन्दं चास्य श्वयथुरुपशाम्यति । शीर्यन्ते चास्य रोमाणि, गतोष्मा नाति शैत्यमुपगच्छति, श्वेतः पाण्डुश्च पू(†यसंचाराद्भवति, पीड्यमानश्च विनमति । इत्येतत्पक्वस्य श्वयथोर्लक्षणं भवति ॥

त्वङ्मांसमेदोमर्मशिरास्नाय्वस्थिसंधय इति व्रणवस्तूनि भवन्ति ।) निर्देशमेतेषां पुरस्ताद्वक्ष्यामः ॥

अथ विम्लापनावसाधनरक्तापकर्षणपाचनभेदनसंधानपीडनसीवनशोषणैषणरक्षणक्षाराग्निकर्मकृमिहरणोत्सादनशीतीकरणाश्वस्थापनक्षीरपानमृदुकरणच्छेदनधूपनरोपणवेधनापकर्षणक्रियाबृंहणास्थिरीकरणस्वेदनलेखनकण्डूष्मास्थापनबन्धविधिवर्तितैलचूर्णकषायलेपनस्नेहपानानुवासनरसक्रियासवर्णकरणवर्णप्रसादनयन्त्रविधिरित्येते चतुश्चत्वारिंशद्व्रणोपक्रमा भवन्ति ॥

तत्र श्लोकौ—

---

*धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके । †धनुराकारमध्यस्थो नास्ति पाठः खपुस्तके ॥

---

१ क. ख. °शिरो भू° । २ ख. °यथोर्वेद° । ३ क. °णरक्षाग्नि° ।

दारणानां यथाशास्त्रं क्रियां कुर्यादतन्द्रितः ।
विज्ञाय तु यथावर्त्तां यथाकालं प्रयोजयेत् ॥
प्रयोगकुशलो यस्मादसंमूढो जितेन्द्रियः ।
स कर्मसु परां सिद्धिं प्राप्नोति भिषगुत्तमः ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने तृतीये शल्यस्थाने व्रणोपक्रमलक्षणोपक्रमो नाम पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

अथ खलु रोमपादोऽङ्गपतिरपृच्छद्भगवन्तं पालकाप्यम्—'भगवन्, किं ज्ञात्वा वैद्यो भवति । एतन्मे व्याख्यातुमर्हसि ' ॥

ततः प्रोवाच भगवान्पालकाप्यः—'इह खलु भोः पञ्च, सप्त, त्रीन्, द्वौ, चतुरो, नव, चतुर्दश, चतुरश्च ज्ञात्वा भवेद्भिषक् ' इति ॥

तत्र 'पञ्च' इति यदवोचत्, तदनुव्याख्यास्यामः ॥ तत्र 'पृथिव्यापस्तेजो[1] वायुराकाशम्' इति ॥

तत्र पञ्चगुणा पृथिवी । चतुर्गुणा आपः । त्रिगुणं तेजः । द्विगुणो वायुः । एकगुणमाकाशम् ॥

शब्दस्पर्शरसरूपगन्धवती पृथिवी । शब्दस्पर्शरसरूपवत्य आपः । शब्दस्पर्शरूपवत्तेजः । शब्दस्पर्शवान्वायुः[2] । शब्दवदाकाशम् ॥

तत्र पृथिवी धारणे । आपः क्लेदने । तेजः पाचने । वायुर्व्यूहने । आकाशमवकाशदाने ॥

तस्मात्पञ्चवर्गोऽयं प्रधानः, ततोऽभिप्रणीतं[3] सर्वं दन्तिनाम् ॥

तत्र खमित्याकाशः । आकाशाच्छब्दः शौषिर्यं च । अनिलात्स्पर्शः प्राणादयश्च । दृष्टिः पाकः प्रकाश ऊष्मा पित्तं च तेजसः । स्नेहः क्लेदः शैत्यं रसो रसनं चोदकात् । घ्राणवान्गन्धः संघातश्च भूमेरिति ॥

—:○:—

सप्तैते शरीरे धातवः—रसो रुधिरं मांसं मेदोऽस्थि मज्जा शुक्रम् । इति ॥

त्रीनिति वातपित्तश्लेष्माणः । तैर्हि शरीरं धार्यते । समैः साम्यम्[4], वैषम्यं

---

१ ख. °थिव्यप्तेजो । २ ख. °र्शवद्वायुः । ३ क. °भिप्राणान्तं स° । ४ क. सात्म्यम् ।

विपरीतैः। तत्र बलतृप्त्युपचयकरः श्लेष्मा। पित्तमाहारं पचति। वायुश्चेष्टाप्रवर्तकः पञ्चधा प्रविभक्तः॥

—:():—

द्वावित्याहारोपचारौ। ताभ्यामिष्टदेशकालोपपन्नाभ्यां वातादयः समीभवन्ति॥

चतुर इति चतुर्विधो भूतग्रामः स्वेदजाण्डजोद्भिजजरायुजाख्याः। तदधीना चिकित्सा। तत्रापि द्विविधा योनिः—चरा स्थावरा च। तत्र कृमिकीटपतङ्गपिपीलिकादंशमशकनागचतुष्पदाश्चराः। ओषधिर्वनस्पतिर्वानस्पत्यो वीरुधः स्थावराः। तत्र स्तम्भवत्यः फलपाकान्ता ओषध्यः। पुष्पफलवत्यो वानस्पत्यः। अपुष्पाः फलवत्यो वनस्पतयः। गुल्मलतावल्लीप्रतानवत्यो वीरुधः। इत्येष चतुर्विधो भूतग्रामोऽन्योन्यानुग्रहे प्रवर्तते। ततो रसाः प्रजायन्ते, इति॥

—:○:—

नव इति। प्राणापानव्यानोदानसमाना मानसचेतना (*धातु)बुद्धयः। तत्रोर्ध्वः प्राणः। स ऊर्ध्वगोऽभिन्यस्तनिःश्वासक्षवथुकर्मा शरीरं श्रेयसे[२] नियुनक्ति। अपानोऽधस्तात्पक्वं पक्वं मूत्रपरीषमुत्सृजति। समानः पुनर्मध्ये चाभ्यवहृतं पचति धारयति। व्यानोऽभिवहति शरीरं धातुष्वाहारमनुपक्वम्। उदानस्त्वाहारमनुपक्वमुपनयत्यामाशयादूर्ध्वम्। एवमेते योगवाहाः प्रविभक्ताः पञ्च धातुषु प्रतिपद्यन्ते॥

विप्रतिपन्नास्ते मध्येऽधस्तिर्यगूर्ध्वबहिरन्तरवस्थिता भ्रमन्तो वा विविधा[१]न्रोगानुत्पादयन्ति। तत्र प्राणविप्रतिपत्तौ दुःखोच्छ्वासमहोच्छ्वासानुच्छ्वासचित्तविभ्रमक्षवथुवमथूच्छ्वासाः प्रादुर्भवन्ति।अपानविप्रतिपत्तौ गृध्रसीश्वासजघनशूलकण्डूवर्तेन्द्रियोपरोधाश्मरीबस्तिमुष्कगुददेशोपसृष्टमूत्रपुरीषविकाराः प्रादुर्भवन्ति।[३] समानविप्रतिपत्तौ चाग्निदौर्बल्यारोचकहृदयोत्क्लेदापसरणानाहोपद्रवदाहज्वर[४]जठरशूलगुल्महृद्रोगदर्भ्(र्व)ः संभवन्ति। व्यानविप्रतिपत्तौ धातुवैषम्यव्यतिकरश्च, तेषां वैषम्यव्यतिकरेभ्यो गदास्त्वग्दोषश्वयथुरेकाङ्गगलरोगनिर्भोगमन्थनतोदनभेदनवेपथुश्वासरोमहर्षग्रन्थिहृदयप्रसेकोन्मथनोदावर्ताः संभवन्ति। उदनाविप्रतिपत्तावन्तःप्रतीघाततृष्णाश्लेष्माभिषण्णशिरोरोगमन्याग्रहकण्ठस्वरश्रोतो[५]क्षिविकारा घुरघुरावसेकोत्कर्णकाः संभवन्ति। इत्येष प्राणादिपञ्चवायुप्रकोपतो रोगसमुद्देशः॥

* धातुपदं प्रक्षिप्तमग्रिमग्रन्थानुरोधात्।

१ ख. °विधाभू°। २ क. श्रेयसा। ३ क. °ण्डूतावर्तेन्द्रि°। ४ क. °होयत्प्रवदा°। ५ क. °ण्ठश्रवसोतो°।

भेदास्त्वेत एव निवृत्ताः—श्लेष्मप्रकोपाद्गुरुश्वेतस्तनकचहृदयोत्क्लेदप्रसेकाभक्तच्छन्दाभिषण्णाविपाकारोचकक्रमिकोष्ठकण्डूवैवर्ण्यानि क्षपश्चेति । पित्तप्रकोपात्पित्तरोगमृदुशीताभिलाषाभितापदाहमदमूर्छोच्छ्वासा भवन्ति । एत एव शोणितप्रकोपेऽपि भवेयू रोगाः । वातादुदावर्तानाहशूलदन्तग्रहपार्श्वपृष्ठोदरकटीग्रीवाशिरोग्रहशिराध्मानस्नायुपीडनानि चेति । संनिपातेऽप्येतान्येव सर्वाणि वातपित्तश्लेष्मसु विप्रतिपन्नेषु प्राणादिषु च लक्ष्यन्ते । इत्येतदधिष्ठानं चेति ॥

पञ्चभूतात्मको रसः । प्रायो रसाः पुनः षट्—मधुराम्ललवणकटुतिक्तकषायाः । मूलं चैतदधिष्ठानस्य भवति । रसा ह्यस्य सात्मीभूता गुणवत्त्वेऽपि भवन्ति । अगुणवत्त्वेऽपि विपरीताः । आहारोऽप्यस्य चतुर्विधः । द्विधा विपाकः षडास्वादो भवति । तत्राग्नेयाः कट्वम्ललवणाः, ते लघु पच्यन्ते कटुविपाका इति । (*मधुरतिक्तकषायाः सौम्याः, ते गुरु पच्यन्ते मधुरविपाका इति ॥)

तत्र श्लेष्मा सोमात्मकः स्निग्धः शीतो मृदुर्मधुरो गुरुर्लवणानुबन्धी श्वेतः पिच्छिलश्चेति ।

पित्तं पुनराग्नेयमुष्णं तीक्ष्णं रूक्षं लघु कट्वम्ललवणानुबन्धि विशदं पीतं रक्तं विदाहि कृष्णं चेति ॥

वायोः पुनरयं स्वभावः शीतो रूक्षः सूक्ष्मो व्यवाय्याशुकारी, अदृश्यो बली वेगवान्स्पर्शवांश्च लघुरनास्वाद्यः, तस्य नोपलभ्यते रसः, इति प्रतीत्यनीकेभ्योऽस्यानुमेयो रसः ॥

एवंस्वभावा वातपित्तश्लेष्माणः, तेषां वैकृत्यमन्योन्यसंसर्गात् ॥

शोणितमपि पित्तसमानमपि ग्रहणं चेति ।

रसः पुनर्मधुरः स्निग्धः शीतलो मृदुर्गुरुर्दीर्घविपाक्यविदाही पिच्छिलश्चेति ॥

कषायस्तु रसो रूक्षः शीतलो लघुर्विष्टम्भ्यविदाही चेति ॥

तिक्तस्तु रसः कषायरसस्वभावात्कषायसमगुणः, तीक्ष्णो विशेषेणेति ॥

कटुस्तु रसस्तीक्ष्णोष्णलघुरूक्षः क्षिप्रकारी विदाही चेति ॥

अम्लस्तूष्णोऽभ्यन्तरे विदाही बहिः शीतः श्लेष्मस्थाने च तीक्ष्णः सद्यःप्रसेकी क्षिप्रपाकी स्निग्धश्चेति ॥

लवणः पुनस्तीक्ष्णोष्णः स्निग्धो लघुर्विदाही चेति ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ॥

---

१ क. °दास्त्वत । २ क. °रोरोगेप्र° । ३ क. चैतेऽधि° ।

तत्र दोषरसविशेषा व्याख्याताः ॥

इदानीं येन यथा दोषो हीयते वर्धते वा, तद्वक्ष्यामः ॥

मधुरो रसः समानरसत्वाच्छ्लेष्माणं वर्धयति, शैत्याच्छैत्यम्, गौरवाद्गौरवम्, एकयोनित्वात् (योनिरिति)। अम्लः पुनः प्रसेकित्वात्प्रसिञ्चति। तत्प्रत्यक्षमुपलभामहे। यथा दाडिमाम्रातकमातुलिङ्गदर्शनादन्तोरास्यात्कफः प्रसिच्यते। तेन हि सिद्धं श्लेष्मलवणत्वं च। तेन चास्योनिबन्ध इति। लवणः पुनः संधिमर्मप्रसक्तमेकान्तमाश्रितं विस्यन्दयति श्लेष्माणम्, फेनाकुलां गङ्गामिव महामेघः। स वातपित्ते अभिभूय सर्वं शरीरमवाप्नोति, विकुरुते च विकारम्, स्नेहाच्चैनमभिवर्धयते, बलेनेवानुबलम्, स्पर्शाच्च विधीयमानः कोपाय कल्पते। इति मधुराम्ललवणास्त्रयः श्लेष्माणं वर्धयन्ति ॥

तिक्तस्तं विरोधित्वात्प्रशमयति। माधुर्यं चास्य बलाद्विनिहन्ति, लाघवेन गौरवमभिभूय शमयति। कषायोऽपि रूक्षादेनमुपशोषयति। स हि रूक्षाभिभूतोऽपि शोषमापद्यते, इति। कटुकस्त्वौष्ण्याच्छ्लेष्मणो विलयनमानयति। शोषं चोपजनयति। लाघवेन गौरवमभिभूय शमयति। इति तिक्तकटुकषाया रसास्त्रयः श्लेष्माणं शमयन्ति ॥

कटुको रसः समानरसत्वात्पित्तं वर्धयेत्। तैक्ष्ण्यात्तैक्ष्ण्यम्, औष्ण्यादौष्ण्यम्, रौक्ष्याद्रौक्ष्यम्, लाघवाल्लाघवमेकयोनिरिति। अम्लः पुनः समानगुणत्वात्पित्तं वर्धयति। विदाहित्वाद्विदाहं वर्धयेत्[1]। तैक्ष्ण्यात्तैक्ष्ण्यं कोपयति। बलेनास्य बलमनुविधीयमानं प्रकोपाय कल्पत इति। लवणस्तैक्ष्ण्यादौष्ण्याच्चाभिवर्धयते पित्तम्, विस्यन्दित्वाद्द्रवी करोति। इति कटुकाम्ललवणास्त्रयः पित्तमभिवर्धयन्ति ॥

तिक्तः पुनः पित्तं प्रशमयति, शीतवीर्यत्वादौष्ण्यम्, मार्दवेन चास्य तैक्ष्ण्यमभिभवति। कषायस्तैक्ष्ण्यं मृदूकरोति, शैत्यादौष्ण्यम्, मधुरानुबन्धित्वाद्बलमुपहन्ति, इति। मधुरः पुनर्माधुर्यात्कटुत्वमभिभवति, शैत्यादौष्ण्यम्, स्नेहाद्रौक्ष्यम्, अविदाहित्वं गौरवेणाप्यभिभवति। इति तिक्तकषायमधुरास्त्रयः पित्तं शमयन्ति ॥

कषायः पुनर्वातं वर्धयति, रौक्ष्यात्परिशोषित्वान्माधुर्याच्छैत्यादभिस्यन्दित्वाच्च कोपयति। तिक्तस्तु रसः कषायरसस्वभावत्वात्कषायसमानगुणः समुद्दिष्टः, इति वातं वर्धयेत्। कटुकोऽप्येनमुदीरयति। रौक्ष्याल्लाघवाच्चैनम्। कषायतिक्तकटुकास्त्रयो वातं वर्धयन्ते, इति ॥

---

१ क. वर्धयते। २ क. °दाहं च व°।

अम्लो रसो वातमनुलोमयति । क्षिप्रपाकित्वात्तैक्ष्ण्यात्प्रक्लेदित्वात्स्नेहादौष्ण्याच्च शोषित्वशैत्यरौक्ष्यमार्दवान्यभिभवतीति ॥ लवणोऽप्येनमौष्ण्यात्प्रशमयति । तैक्ष्ण्यात्प्रणुदति । स्नेहाज्जयति परिशोषभग्नं चास्य विस्यन्दित्वाद्द्रवीकरोति । लवणो हि रसो वातप्रत्यनीकत्वाद्रसानामतिवीर्यत्वाद्वातमतिबलमपि दोषाणां बहुगुणत्वादतिरसबाहुल्याद्वा हन्ति ॥ मधुरोऽप्यस्य रसः स्नेहाद्रौक्ष्यमभिभवति । गौरवेण लाघवम्, अतिवीर्यत्वाद्विदाहित्वाद्बलेन चैनमभिभूय जयति, इति । अम्ललवणमधुरा रसास्त्रयो वातं शमयन्ति ।

इत्येतै रसैः प्राणादिषु विप्रतिपन्नेषूक्तो यो रोमसमुद्देशः, स शाम्यति ॥

वर्धते च यथारोगं—तदशान्तौ मनसो (विप्रतिपत्तिः । मनसो) विप्रतिपत्तौ मानसौ द्वौ रोगौ—पूर्वाबद्धहृदयस्फालिनौ ॥ तदशान्तौ व्यापद्यते चेतना बुद्धिः । ततो नागानामभावः ॥ एवमेते प्राणादयः पञ्च, द्वौ च मानसौ चेतना बुद्धिश्चेति नव ॥

तत्र श्लोकाः—

गजानां देहजा नित्यं वातपित्तकफास्त्रयः ।
व्याधयस्तु गुणाश्चैव तेषां रसनिमित्तजाः ॥
त्रिषु दोषेषु ये दृष्टा गुणा गुर्वादयो दश ।
रसेष्वपि त एव स्युर्विज्ञातव्या विचक्षणैः ॥
शीतोष्णौ स्निग्धरूक्षौ च तथा विशदपिच्छिलौ ।
मृदुतीक्ष्णौ गुरुलघू विज्ञेयास्तु गुणा दश ।
बुद्ध्वा सम्यग्गुणानेतान्रसदोषेषु बुद्धिमान् ॥
प्रतिहन्यादुदीर्णत्वैः प्रत्यनीकैर्गुणैर्गुणान् ।

एतेषां प्रतीकाराभ्युत्थितेन भिषजा चतुर्दशेमानि ज्ञातव्यानि भवन्ति—निमित्तम्, आयुः, बलम्, सत्त्वम्, सात्म्यम्, प्रकृतिः, व्याधिः, शरीरम्, कालः, वयः, देशः, ग्रहणी, अभिचारः, आशास्तकम्, इत्येतानि सम्यगुपलक्षयितव्यानि । यस्मादेतेषु चिकित्साऽऽयत्ता ॥

अथैषां निर्देशमनुव्याख्यास्यामः । तत्र निमित्तं दूतागम आतुरस्य पूर्वाख्याने प्रस्थाने प्रवेशे च परिप्रश्ने परिग्रहौषधसंस्कारारम्भेषु च भिषजा परीक्ष्यम् ॥

तत्र श्लोकः—

प्रस्थाने च प्रवेशे च निमित्तान्युपधारयेत् ।
ततः क्रियां प्रयुञ्जीत यदीच्छेद्भूतिमात्मनः ॥

आयुरपि क्रियापथेषु परीक्ष्यम् । तत्राऽऽयुर्नामासक्तसंधिबन्धनो रोमशायत-च्छविर्दीर्घरोमैशाष्टो महाविट्ठुः परिपूर्णाण्डकोशो महाकुम्भो महाश्रवणो मृदु-दीर्घकुञ्चितस्निग्धकेशो युग्मजैकरोमा पृथ्वायतमुखो महाग्रीवो धनुष्परिणत-वंशः सुनिष्क्रान्तविषाणो दीर्घाङ्गुलिकरो व्यूढोरस्को मृदुदीर्घवालोऽवरुद्धजघ-नापर ऋजुवृत्तगात्रः सुविभक्तशिराः सूक्ष्मबिन्दुभिर्विभक्तावग्रहो व्यूहविच्छन्तरम-स्तको महास्रोताः सुगन्धिः सुचारुनेत्रः सस्वनो महामेण्ढ्रः सूपचितांसो नित्य-मास्फोटनादिकर्णः स्निग्धस्फटिकार्धचन्द्रपरिपूर्णविंशतिनखः सुगतिः पुर-स्तादुदग्र इत्येतान्यायुष्मतो लक्षणानि व्याख्यातानि ॥

तत्र श्लोकाः—

सहस्रेष्वपि नागानां कश्चिदेतैः समन्वितः ।
समस्तलिङ्गो न गजो भवतीति विनिश्चयः ॥
त्रीणि षट् सप्त पञ्चाष्टौ लिङ्गान्येतानि यस्य तु ।
आयुः स लभते दीर्घमिति मे निश्चिता मतिः ॥
त्रीणि यस्य तु लिङ्गानि दृश्यन्ते मनुजाधिप ।
तृतीयां वा चतुर्थीं वा दशां संप्राप्य नश्यति ।
पञ्च यस्य तु लिङ्गानि दृश्यन्ते नयकोविद ॥
स दशां पञ्चमीं प्राप्य षष्ठीं वाऽपि विनश्यति ।
षडेव यस्य लिङ्गानि दृश्यन्ते नृपसत्तम ।
सप्तमीं तु दशां प्राप्य सोऽष्टमीं वा विनश्यति ।
सप्त यस्य तु लिङ्गानि दृश्यन्ते मनुजाधिप ।
नवमीं दशमीं वाऽपि दशां प्राप्य विनश्यति ।
अष्टौ यस्य तु लिङ्गानि दृश्यन्ते शास्त्रनिश्चयात् ॥
एकादशीं दशां प्राप्य द्वादशीं वाऽपि नश्यति ।

बलमपि नागानां क्रियापथेषु विज्ञेयम् । (*क्रियया प्रविचारेषु नागानां द्विविधं बलं) धीरास्त्वाचक्षते प्रायोगिकम्, वैरपरामर्शिकं च । तत्र प्रायोगिकं नाम दशयोजनाद्यध्वगमने च तत्परीक्ष्यते । वैरपरामर्शिकमपि चतुर्हस्तनिखा-ताष्टहस्तोच्चचतुष्पार्[४]घपारणाहादिस्तम्भप्रमर्दन लक्ष्यम् । तत्र सुशरीराल्पशरी-रयोर्बलपरीक्षा पिपीलिकाभारहरणेन व्याख्याता । पिपीलिका ह्यल्पशरीराऽपि

*पद्यगन्धीदम् ।

१ क. °मसाय° । २ क. °मशेष्टो । ३ ख. °तांशो नि° । ४ क. °रिचयप° ।

सत्यात्मशरीराद्दशगुणं भारमुद्वहति । तत्पुनर्द्विविधम्—सहजम्, आहारजं च । तत्र सहजं सर्वभूतातिशयवद्धस्तिजन्मनान्तरीयकम् । तत्पुनः सत्त्वशरीरप्रमाणवीर्यमदप्रभावैरुपचीयते । आहार(ज)बलमपि चतुर्विधेनाऽऽहारेण विवर्धते शरीरोपचयमा(ना)न्तरीयकम् । शरीरोपचयोऽपि सप्तविध(ः)शोफाध्यायादवगन्तव्यः । सामर्थ्यबलमपि पुनरेकैकं त्रिविधम्—ज्येष्ठं मध्यममधमं चेति । तत्रोत्तमबलः शीतोष्णक्षुत्तृष्णातपदुर्दिनशस्त्रघातभारप्रमर्दनजलतरणवधबन्धेषु शस्त्राग्निक्षारकर्मादिषु च प्रयुज्यमानेषु नोद्विजते, स्नेहपानादींश्च विषहते । यथाऽयम्, तथा मध्यमाधमबलौ, इति । एवं बलमभिसमीक्ष्य क्रियापथं प्रयुञ्जीत । दोषोऽन्यथा भवति । तत्र यदा दुर्बलोऽयमिति मत्वा बलवत एव गजस्याल्पमौषधं दीयते, तद्धीनमात्रमसमर्थमानकं क्षपणाय भवति । यथाऽल्पोऽग्निरिन्धनावष्टब्धः पवनोदीरितोऽपि न वृद्धिमुपगच्छति, एवमल्पौषधमसम्यक्प्रयुज्यमानम् । प्रत्युत व्याधिनिमित्तमेव भवति । तथा च क्रियाप्रविचारनिमित्तभूताश्चत्वारो दुर्बलाः—प्रकृतिदुर्बलः, व्याधिदुर्बलः, वयोदुर्बलः, औषधदुर्बलश्च । ततो भेषज्यं तीक्ष्णं मृदु मध्यं च यथाबलं विभज्य प्रमाणतो दद्यादिति ॥

तत्र श्लोकः—

बलं विज्ञाय नागानां मात्रामात्रेति तत्त्वतः ।
यथास्वमौषधं दद्यादिति शास्त्रविनिश्चयः ॥

सत्त्वमपि नागानां क्रियापथेषु विज्ञेयम् । तच्च त्रिविधमेव—तामसं राजसं सात्त्विकमिति । तत्र तामससत्त्वा नित्योद्विग्नशीलत्वाच्छेदनलेखनदहनसीवनविस्रावणोद्धारणानि न विषहन्ते वारणाः, तेषां विलायनपाचनभेदनशोधनावसादनकृमिहरणान्यौषधैरेव प्रयोज्यानि, शस्त्रकर्माग्निक्षारकर्माणि च ॥ राजसास्तु द्विरदपतयो वाक्यादिभिरुदकपांशुकवलैः समाश्वासिताश्छेदनभेदनानि विषहन्ते,सुमहत्यपि चाग्निकर्मणि क्रियमाणे । सात्त्विकास्तु प्रधानकर्मस्ववक्रियमाणेषु सत्त्वबलसमुच्छ्रयान्न विक्रियामुपगच्छन्ति । इत्येवं त्रिविधं सत्त्वमनुव्याख्यातं भवति ॥

तत्र श्लोकौ—

इति सत्त्वसमुद्देशस्त्रिविधः परिकीर्तितः ।
पारंपर्येण तेषां तु विहितः समुपक्रमः ॥

---

१ क. °बलाबला भवन्ति, इ° । २ क. क्रियां प्र° । ३ क. °थाऽल्पोपचयो भ° । ४ क. °धिविवृद्धिनि° । ५ क. °साधन° । ६ क. °मेसु च क्रि° ।

पूर्वं कर्म तु कर्तव्यं तामसेषु विशेषतः ।
राजसेषु प्रलोभार्थं सात्त्विके नित्यमुत्तमे । इति ॥

सात्म्यमपि वारणानां क्रियापथेषु परीक्ष्यम् । तच्च त्रिविधम्—जातिसात्म्यम्, प्रकृतिसात्म्यम्, रससात्म्यम्, इति । तत्र जातिसात्म्यं नाम जन्मनः प्रभृति हस्ती क्षीरमुपसेवते क्षीरपानाच्च धातुविवृद्धिर्भवति । एवमेव जातिसात्म्यं विद्यात् । प्रकृतिसात्म्यं नाम त्वङ्मूलपत्रसकवलकुवलपल्लवानि सततमुपसेवमानाः पांशुप्रमाथं सलिलावगाहं स्वैराहारं च सेवमानाः शीतसात्म्या भवन्ति । इत्येतत्प्रकृतिसात्म्यं विद्यात् । रससात्म्यं नाम मधुराम्ललवणकटुतिक्तकषायाणां रसानामन्यतमो ह्युपयुक्तो रसो धातुविवृद्धिमुपजनयति । एवमेतद्रससात्म्यं विद्यात् ॥

तत्र श्लोकः—

यथासात्म्यं प्रयुञ्जीत क्रियाविधिमशेषतः ।
(†न व्यापदं समासाद्य विषादी स्याच्चिकित्सकः ॥

प्रकृतिमप्यशेषेण नागानां परीक्ष्य क्रियां प्रयुञ्जीत) तत्र त्रिविधा प्रकृतिरिह वातपित्तश्लेष्मसंभवा । तां प्रकृत्यध्याये वक्ष्यामः ॥

तत्र श्लोकः—

तिस्रः प्रकृतयो ज्ञेया वातपित्तकफात्मिकाः ।
विज्ञाय तु यथावत्तां क्रियां सम्यक्प्रयोजयेत् ॥

व्याधिरपि वारणानां क्रियापथेषु परीक्ष्यो भवति । तत्र चतुर्विधो व्याधिः—साध्यः कृच्छ्रसाध्यः, याप्यः, प्रत्याख्येयः, इति । तत्र साध्यः सुखसाध्य इत्यर्थः । सुखसाध्यो नाम प्रत्येकदोषान्वितो विकारो दीप्ताग्नेरचिरसमुत्थितो दोषोऽक्षीणमांसरुधिराद्यपरिणतवयसाश्रितपरिचारकोपकरणः स्वेदस्नेहविरेचनस्थापनकल्ककषायचूर्णारिष्टाद्यशेषसंभारोपपन्नः साध्यः । कृच्छ्रसाध्यो नाम यो दोषसमवायोत्थितो मन्दाग्निश्चिरसमुत्थितदोषः स्थिरगूढजातमूलः प्रक्षीणमांसशोणितः सुचिरातिबलाश्रयो बहुतीक्ष्णोऽनुषक्तोपद्रवस्तु परिचारकोपकरणोऽश्रद्दधानः श्वासी स कृच्छ्रसाध्यः । याप्यो नाम यस्तु दोषो वैषम्याद्दीप्ताग्निर्बलवान्क्षीणमांसमेदा दीर्घायुर्लक्षणो व्याधिमवाप्नोति, न स तेन रोगेण मुच्यते, न म्रियते क्रियया धार्यमाणः, स रोगो याप्यः । प्रत्याख्येयो नाम—यः सर्वदोषलिङ्गान्वितो विकारः क्षोभितधात्विन्द्रियब-

† धनुश्चिह्नान्तरगतो भ्रष्टः पाठः कपुस्तके ।

१ क. °प्ताग्निर° । २ क. °द्यवशे° । ३ क. °तः स्थाविरा°

लोऽपि विविधान्धातूनुपद्रवानुत्पादयति—अपस्मारोत्कर्णकश्वासारोचकश्वयथून-तिपिपासिनं शूनगात्रोदरमेढ्रमतिकृशं शोणितच्छर्दनमल्पमूत्रपुरीषमल्पानुपानं सर्वावस्थान्तरगतं विपन्नबलेन्द्रियमुपगतसंज्ञं वा म्रियते, इति ॥

तत्र श्लोकः—

चतुर्विधं तु यो व्याधिं तत्त्वतो लक्षयेद्भिषक् ।
स शक्नोति क्रियां कर्तुं नागानां भिषगुत्तमः ॥

शरीरमपि नागानां क्रियापथेषु परीक्ष्यम् ।

तत्रोत्सेधायामपरिणाहसंस्थान[1]तः स्थूलकृशावनतप्रदेशा ऋजुवक्रश्लक्ष्णबहुलकर्कशादयो गजानां बाह्याभ्यन्तराः शरीरप्रविभागा भवन्ति ॥

तत्राऽऽभ्यन्तराः—सप्त त्वचः । सप्त पेशीशतानि । सप्तैव शिराशतानि । पञ्च स्नायुसहस्राणि । पञ्चैव शतान्यशीतिः स्नायुकूर्चाः । पञ्चविंशतिर्धमन्यः । षण्णवति(ती) रोमकूप[2]सहस्राणि, असंख्येयानीत्यपरे । विंशोत्तराणि त्रीण्यस्थिशतानि । तेषामस्थ्नामाकृतिविशेषाः षडुद्दिष्टाः कपालरुजकप्रतरनलकवलयफलकाख्याः । शुषिरमृदुस्थिरमृदूनि शुषिरात्मविशेषाः ।

अथ शरीरावयवानां सविंशशतानि । संधीनां त्रीणि षट्षष्ट्यानि । तेषामष्टौ संध्याकृतयो भवन्ति । तद्यथा—प्रतरकोश[3]मण्डलसामुद्गोलूखलवायसतुण्डशङ्खावर्ततूणसीवनवदिति । एते संधयो येषु शरीरावयवेषु भवन्ति, तान्यनुव्याख्यास्यामः । तत्र कूर्मपलिपादसंदानभागप्रोहापस्करेषु कोशसंधयः । अंसफलकबाहुसकुदिकाग्रन्थ्यष्ठीव्यमण्डूकशङ्खचक्रसक्थ्यवकूष्ट इत्येवमादिषु सामुद्रसंधयः । पृष्ठवंशककाटिकास्तेनकूर्मपर्यन्तशिरोमस्तावग्रहनिर्याणकर्णविद्रधि[4]वितानश्रवणेषीकाकुम्भान्तरकुम्भकटगण्डेषु (*तूणसीवनवत् । शङ्खहनुकपोलसगदामृक्षण्योष्ठ इत्येतेषूभयतो वायसतुण्डसंधयः ।) कटाक्षिकूटप्रस्तावापाङ्गवर्त्मनेत्रक्लोमहृदयनाभिषु मण्डलसंधयः । वाहित्थप्रतिमानशम्बूकदन्तवेष्टस्थानेषु शङ्खावर्तसंधयः । श्रोतःशृङ्गाटकेष्वि*त्येते संधयो व्याख्याताः ॥

अथ मर्मणां सप्तोत्तरं शतम् । पञ्चदश श्रो(स्रो)तांसि । षट्चत्वारिंशदधिकानि चत्वारि प्रदेशशतानि । संध्यस्थिभागाश्रिताः षोडश कण्डुराः । इत्युद्देशः ॥

*धनुराकारमध्यस्थः पाठो भ्रष्टः कपुस्तके । *'शृङ्गाटकेषु' इत्युत्तरं किंचित्त्रुटितं भवेत् ।

[1] क. °नतो मूल° । [2] क. °पशतस° । [3] क. °कोडाम° । [4] क. °लूप्यल° । [5] ख. °स्तनाकू° ।

तत्र श्लोकः—

शरीरमेवं विज्ञाय प्रदेशैर्बहुभिर्वृतम् ।
शस्त्रकर्म प्रयुञ्जानो नाऽऽबाधां प्राप्नुयाद्भिषक् ॥

काल इति ख्यातः । यस्मात्स्नेहनस्वेदनानुवासननस्तकर्मपीडनप्रधमनधूपनाभ्यङ्गपरिषेकावगाहतर्पणाग्निशस्त्रक्षारकर्मभक्ष्यभोज्यपेयलेह्याद्याः क्रियाः प्रयुज्यन्ते । वातादीनामुपद्रवाणां प्रशमनार्थम् । तेषु प्रकृतिस्थेषु धातुवर्द्धना भवन्ति, अप्रकृतिस्थेषु विषमाः । तस्मात्कालं परीक्ष्य क्रियां प्रयुञ्जीतेति । तदेतच्छरीरं पुनर्द्विधाऽवतिष्ठते कल्पम्, अकल्पं च । तत्र कल्पशरीरं समदोषधातुः । प्रशमनैरिन्द्रियैरिन्द्रियार्थान्य(न)वबुध्यते । समाग्निरुत्थानोपवेशनप्रचारादिषु न दीनचेष्टः, मुखोच्छ्वासनिमेषणोन्मेषानिलमूत्रपुरीषोत्सर्गादिप्रचारेषु प्रकृतिस्थः कल्पशरीरो भवति । विपरीतमकल्पशरीरं विद्यात् । काल इति व्याध्यातुरयोरप्यवस्था यस्मात्स्नेहनस्वेदनोत्थापनानुवासननस्यपीडनधूपनप्रधमनाभ्यङ्गपरिषेकावगाहतर्पणाग्निशस्त्रक्षारकर्मभक्ष्यभोज्यपेयलेह्याद्याः क्रियाः प्रयुज्यन्ते वातादीनामुपद्रवाणां प्रशमनार्थम् । तेषु प्रकृतिस्थेषु समाः । तस्मात्कालं परीक्ष्य क्रियापथं प्रयुञ्जीत ॥

स च हेमन्तशिशिरवसन्तग्रीष्मप्रावृट्शरदाख्याः षडृतवः कालः । स एव पुनस्त्रिधा विभज्यते शीतोष्णसाधारणलक्षणः ॥

तत्र हेमन्ते शिशिरे च समत्वागतवीर्या भवन्त्योषधयः । प्रायसो(शो) मधुरा मधुरविपाकाः समत्वागतवीर्यत्वात् । तेन तदा पित्तस्य वायोस्तनुत्वमभिनिर्वर्तते । श्लेष्मणः प्रबलता भवति ।

दिवास्वप्नाजीर्णादभिश्च वसन्ते श्लेष्मा प्रकोपमापद्यते संनिरुद्धमार्गप्रचारः ॥

ग्रीष्मे त्वौषध्यो दिवसकरकराभिहतशरीरा निःसृतवीर्या भवन्ति । तदा वायुः प्रबलीभवति । श्लेष्मणः क्षयः ॥

प्रावृषि शीतवातोष्माभिहतशरीराणां मातरिश्वा भूयो भूयः प्रकोपमुपगच्छति । वर्षास्वौषध्यो भवन्त्यसमत्वागतवीर्याः, न ग्रीष्मगुणयुक्ताः, न शिशिरगुणोपगताः । ततोऽस्मिन्नृतौ विशेषेण पित्तमुपचीयते, श्लेष्मणश्च क्षयो भवति ॥

भूयश्च शरदि दिवसकरकराभिहतानां पित्तप्रबलता भवत्यजीर्णादिभिरुपार्जनैः । असमागतवीर्यत्वाद्भवत्यम्लभूयिष्ठत्वमोषधीनाम् । ततः पित्तबाहुल्याद्वातश्लेष्मणोः क्षयो भवति ॥

---

१ ख. व्याख्यातः । २ क. °वतन्त्यो° । ३ क. वायुर्बली° । ४ क. °त्वाद्यात्य° ।

तत्र श्लोकः—

विज्ञाय दोषोपचयं यथावद्दतावृत्तौ कालविभक्तरूपम् ।
रोगोपशान्तिं प्रयतेत कर्तुं दोषः प्रवृद्धो हि निहन्ति नागान् ॥

वयस्त्रिविधम्—बालं मध्यं वृद्धमिति । तदशेषतः परीक्ष्य पश्चात्क्रियापथं प्रयुञ्जीत ।

तत्र ताम्रनखनयनतनुरोमा[1] ताम्रोष्ठतालुजिह्वो मन्दगतिरव्यक्तकृष्णोष्ठोऽव्यक्तपलिहस्तः[2] श्लक्ष्णपादतनुशिरस्[†]……………बालः ।

तेजोबलजवसंपन्नो ग्रहणधारणोपपन्नः समोपचितस्थिरमांसः प्रोहसंदानाष्ठीव्यापास्त्रावापस्करपक्षक्षयभागायामकाण्डकटीबलानां के[‡](?)चाविलबहलता भवति मध्यमे वयसि, नागानाम्, विवर्णपरुषत्वं च ॥

तनुकायवलीचितदेहमजवं स्तब्धपालीकमल्पपित्तत्वान्मन्दज्योतिः संभ्रश्यमानग्रीवं प्रबलवातश्लेष्माणमविदग्धपुरीषं लङ्घनापसरणगमनतरणादिष्वसमर्थं निरुत्साहतयाऽल्पवीर्यत्वाच्च नागमकामवन्तं वृद्धं विद्यात्, इति ॥

अत्र श्लोकः—

वयस्त्रिविधमालोक्य ततः कुर्यात्क्रियापथम् ।
बालमध्यमवृद्धानामिति मे निश्चिता मतिः ॥

देशोऽपि नागानां क्रियापथेष्ववश्यं परीक्ष्यः ॥

कस्मिंश्च खल्वयं देशे जातः, कतरद्वा वनमधिश्रयति, कस्मिन्वा कीदृशे देशे वारणाः संभवन्ति ॥ अत्रोच्यते त्रिविधो देशः—जाङ्गलो ह्यनूपः साधारणश्चेति ॥

तत्र जाङ्गलो देशः पर्यवकाशभूयिष्ठस्तरूपचितः खदिराश्वकर्णतिलकतिनिशधवशल्लकीसालसोमवल्क[3]बदरीकिंशुकाश्वत्थवटामलकीवनगहनो ह्यनेकशमीशिंशपासनश्रीपर्णीककुभपीलुकरीरधन्व[4]प्रायः, स्थिरदग्धशुष्कतरुर्बलवत्पवनविधूयमानतरुविटपोऽल्पसलिलो मृगतृष्णिकोपगूढोऽग्निदग्ध इव खरपरुषशर्करासिकताबहुलश्चकोरशतपत्रवञ्जुलारिष्टभासचाषगोमायुजीवंजीवकोलूकलावकतित्तिर्यनुगीतचरितभूमिभागः पृषततरक्षुलोहितखरकरभशार्दूलगवयजम्बुद्वीपिशशरुरुचमरीचितः ।

तस्मिन्वातपित्तशोणितात्मका विकाराः प्रादुर्भवन्ति । स्थिरकठिनतनुदी-

† अत्र किंचित्त्रुटितं प्रतिभाति । ‡ 'केषांचित्' इति भवेत् ॥

१ क. °त्र न° । २ क. °लितह° । ३ क. °ल्कलब° । ४ ख. °न्वनःप्रा° । ५ क. °रागसीक° । ६ क. °सभाष° ।

र्घविक्रमशरीराः क्षुत्पिपासासहा बलवन्तः क्रोधनाश्च द्विरदपतयो भवन्ति यत्र तं देशं जाङ्गलमिति विद्यात् ॥

अथानूपः—तालतालीनालिकेरार्जुनखर्जूरीचूताम्रातकनिम्बजम्बुकोशाम्र-पियाललंबुसकदम्बोदुम्बराशोकतिलकवञ्जुलशालकदलीबकुलसप्तपर्णकर्णिकार-प्रभृतितरुगणख(ष)ण्डमण्डितो देशः । कुररहंससारसक्रौञ्चचक्रवाकशुकसारि-काकदम्बपरपुष्टक(का)रण्डवप्रभृति(भिः)खगरावैरुपगतिभः(गतः), बहुकुसुमव-द्भिश्च पादपैरुपशोभिततटाभिः सिंहव्याघ्रमहिषवराहगजगवयवानरविक्षोभितस-लिलाभिर्गिरिवरविवरकंदरोदरविनिःसृताभिर्विमलशीतलशुचिसुरभिसलिलाभिः स्रवन्तीभिरुपशोभितः, सरिद्भिः समुद्रपर्यन्तोपचितभूमिभागः, कोकनदकुमुद-कुवलयकमलोत्पलतामरसकह्लारादिभिर्जलरुहैः कुसुमैरुपशोभितसलिलाशयः, पद्मवननलिनविविधशकुनिगणविक्षोभितोपशोभितसलिलोपचितः संभ्रान्तसम-न्तात्सुखशीतलसुगन्धेन मारुतेन नृत्यमानतरुवरगणशिखरः ।

तस्मिन्विपुलबलशरीरा वेर्णवन्त आचार्याः पृथ्वायतकरचरणपृष्ठाण्डकोशो-दरशिरसः सुकुमाराश्च द्विरदपतयो भवन्ति यत्र, तं देशं व्याधिप्रायं श्लेष्मल-मा(म)नूपं विद्यात् ॥

एतयोरेव च देशयोर्वीरुद्वनस्पतिगुल्मवातस्पो(?)षधिमृगशकुनिगणयुतं, क्वचित्तडागोदकपानपल्वलसरःशोभितं च, सहजपङ्कप्रवालबहुलावनतशोभित-तीराभिः सरिद्भिरुपशोभितभूमिभागम्, स्थिरसुकुमारैर्हस्तिभिरुपेतं साधारण-मिति तं देशं विद्यात् ।

तस्मिन्व्यामिश्रविकारा व्याधयः प्रकोपं समुपगच्छन्ति ॥

तत्र श्लोकः—

> एवमालोक्यदेशं तु ततः कुर्यात्क्रियापथम् ।
> गजानामौषधैः सार्धं यथादेशं विभागवित् ॥

ग्रहण्यपि क्रियापथेषु परीक्ष्या विशेषतो नागानाम् ।

कस्मात्, यतस्तामविज्ञाय न क्रियापथः सम्यगनुविधातुं शक्यः । सा खलु चतुर्विधा—तीक्ष्णा मन्दा समा विषमा चेति । तत्र—तीक्ष्णा पित्तात्, मन्दा श्लेष्मणः, समा त्रिभ्यो वातपित्तकफेभ्यः समेभ्यः, विषमा वायोश्च भवति । इत्येता ग्रहण्यश्चतस्रः ॥

ततस्तीक्ष्णज्योतिः—यवसकवलकुवललवणतण्डुलरसभोजनप्रायमाहारयतः

---

१ क. °यः-पाता° । २ क. °शाम्राजया° । ३ ख. °दरीब° । ४ ख. °तटीभिः । ५ क. वर्णयन्तः ।

समभारातीतमपि तृणमुपयुञ्जानस्य विक्रियां नाऽऽपद्यतेऽग्निः, सुसंहितस्थिरलिण्डश्च भवति, स तीक्ष्णज्योतिर्वारणो विज्ञेयः ॥

मन्दज्योतिः—यथोक्तस्याऽऽहारस्यार्धमपि नोपयुङ्क्ते श्लेष्मभूयिष्ठत्वाद्भिन्नविवर्णदुर्गन्धिपुरीषश्च भवति स मन्दज्योतिर्वारणो विज्ञेयः ॥

यस्तु यथोक्ततैललवणगृततण्डुलरसभोजनयवसकवलकुवलादीन्युपयुङ्क्ते सुमनाः स्निग्धघनलिण्डश्च भवति स समज्योतिस्त्रयाणां साम्याद्भवति ॥

विषमज्योतिः—यथोक्तानि यवसरसभोजनादीनि कदाचिदतिप्रमाणेन ग्रहणं कार्यमाणो वा यत्नेनाधिष्ठितमुपयुङ्क्ते स्वरनिर्भिन्नदुर्गन्धपुरीषश्च भवति स विषमज्योतिर्वातसंसर्जना(*द्भवति ॥

तत्र तीक्ष्णज्योतिरपरिमितगुरुस्निग्धाहारमतिभुञ्जानो न तृप्यति । बह्व्भ्यवहरणा)द्विपुलमांसो भवति । तस्यात्याहारोपचितमांसस्य विवृतसुचिरत्वान्मांसपेशीमार्गगतो वायुः प्रायसः(शः) प्रकोपमुपगच्छति ॥

मन्दज्योतिस्तु यदा हस्तिजीविभिर्ग्रहणीबलमविज्ञाय मन्दबुद्धिभिरकामं भोज्यते स मन्दज्योतिरलसोऽस्थिरमांसमेदा न सुखमवाप्नोति हस्ती ॥

समज्योतिः समुदितबलजवसंपन्न उत्साहवांश्च वारणो भवति ॥

विषमज्योतिर्विषमत्वादनिलस्य नित्यं विषमं भजमानः । स कदाचित्स्वस्थः कदाचिदस्वस्थः कुञ्जरो भवति ॥

अग्निरपि चतुर्विधः—समो मन्दस्तीक्ष्णो विषमश्चेति । तत्र समपाकी समः । मन्दपाकी मन्दः । विषमपाकी विषमः । सर्वभुक्तपाकी तीक्ष्णः ॥

तत्र तीक्ष्णविषमावपरिमितविषमपाकित्वादशस्तौ । तेषां सममन्दौ प्रशस्तौ । तत्र मन्दं दीपयेत् । समं रक्षयेत । इति ॥

तत्र श्लोकः—

चतुर्विधं तु विज्ञाय ग्रहणीनां बलाबलम् ।
ततः प्रयुञ्जीत गजे यथायोगं क्रियापथम् ॥

अभिचारोऽपि नागानां क्रियापथे परीक्ष्यः ॥

अभिचारसमुत्थं दोषसमुत्थं च द्विविधं व्याधिमुपलक्षयेद्वैद्यः ॥

तत्र दोषसमुत्थो व्याधिः, यो यथोक्तक्रियोपशमो वातपित्तश्लेष्मणामसंकीर्णलिङ्गः । न चास्य नानाव्याधिलिङ्गता ॥

---

* धनुराकारमध्यस्थो नास्ति पाठः कपुस्तके ।

---

१ क. °संहत° । २ क. °ज्योतिः सतिसं° । ३ क. आभिचारोत्थितं

अभिचारसमुत्थश्चानेकव्याधिलिङ्गः। क्रियासु सम्यक्क्रियमाणास्वपि नोपशममुपैति ॥

एवं दोषसमुत्थम्, अभिचारसमुत्थं च व्याधिं समुपलक्ष्य प्रतिकुर्वीत। तस्माज्जपहोममङ्गलप्रायश्चित्तशान्तिनियतात्मना भिषजा भवितव्यमिति ॥

तत्र श्लोकः—

दोषाभिचारजान्व्याधीन्सम्यग्विज्ञाय तत्त्वतः ॥
यथायोगं क्रियां कुर्यान्मन्त्राणां नास्ति दुस्तरम् ॥

आशास्तकोऽपि नागानां (†क्रियापथे परीक्ष्यः।

यदा हस्तिजीविनो व्याध्यभिभूतं द्विरदमभिविज्ञाय कदाचिदाशंसन्ति देवताः।) ताश्चाऽऽशस्ताः प्रसादमभिनिव(र्व)र्तयन्ति, न च प्रागप्यशंस्तकं[1] बल्यं तमुपहरन्ति हस्तिजीविनः, ततो देवानां(वाता) यथोक्तां पूजामलभमाना भूयो व्याधिमुपजनयन्ति। तस्मादाशस्तकं भिषजा परीक्ष्यम् ॥

तत्र श्लोकः—

इज्यां यथोक्तां कुर्वीत देवतानामतन्द्रितः।
अन्यथा देवतानां हि क्रोधो भवति दारुणः ॥

—:○:—

चतुर[2] इति चतुष्पादा चिकित्सा—आतुरः, परिकर्मी, भिषक्, भेषजम्, इति ॥

तत्राऽऽतुरः—सत्त्वसंपन्नः सम्यक्शस्त्रभेषजाग्निक्षारकर्मणां सहिष्णुः, उपदिष्टकारी[3], दीर्घायुर्लक्षणश्चेति ॥

परिचारकः—प्रतिपत्तिमान्, अलोलुपः, यथाज्ञप्तकारी, उपकरणसंगोपनपरः, शौचाचारयुक्तः, अभिनयप्रतिनयस्थानेऽभियुक्तः, निपुणः स्वपरिकर्मणि, इति ॥

भिषक्—अवस्थितः शास्त्रार्थव्यवसायप्रयोगविज्ञानबुद्धिसंपन्नः' इति ॥

भैषज्यम्—यदनुपहतमनुपदिग्धमनुपतप्तमपुराणम्। इति विज्ञेयं प्रशस्तभैरेषां चतुर्णां पादानां समुदायात्सिद्धिर्भवति ॥

तत्र श्लोकाः—

एवं पञ्चादिकं सम्यग्यो विद्यान्मतिमान्भिषक् ॥

---

† 'धनुराकारमध्यस्थो नास्ति पाठः कपुस्तके।

---

१ क. °शस्त्रकं। २ क. चतुष्पदा। ३ क. °दिष्टः करी।

अवसानचतुष्कं वै सोऽधिकस्तु चिकित्सकः ।
आमूढः सर्वरोगेषु योजयेद्यो भिषक्क्रियाम् ॥
प्रजासु च सदा मानं महत्त्वं च नियच्छति ।
पञ्च सप्त तथा त्रींश्च द्वावेव चतुरस्तथा ॥
नव चतुर्दश द्वौ च [1]द्विकौ ज्ञात्वा भवेद्भिषक्, इति ॥
इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
द्वादशोपक्रमो नाम षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

अथाङ्गराजोऽभिवाद्य पप्रच्छ पालकाप्यम्—'भगवन्कथमुत्पन्नानि पृथिव्यादीनि, के चैषां गुणाश्चोपगुणाश्च । किं च शरीरम् । कश्चाङ्गमभिवर्तते । कश्च गर्भः । कथं चाभिवर्धते । कथं च त्रिविधा शरीराकृतिः समा विषमा समं विषमं चाभिनिवर्तते, भद्रमन्दमृगसंकीर्णाश्च कथं निवर्तन्ते । कथं च कुब्जवामनहीनाधिकविकृताद्यान्यन्यानि च निवर्तन्ते, कथं वा कृष्णश्वेतरक्तरूक्षा निष्पद्यन्ते, मिश्रवर्णा वा हस्तिनः । कथं वा विषमविषाणा मोटादयः समुत्पद्यन्ते, नयनघ्राणत्वक्श्रोत्रजिह्वेन्द्रियाणां किमध्यात्मम्, किमधिदैवि(व)कम्, किमधिभूतम् । स्त्रीपुंनपुंसकविशेषाश्च केन जीवविशेषेणोत्पद्यन्ते । कथं च गर्भस्थो नोत्सृजति मूत्रपुरीषम्, न चापि बृंहति । किं मातृजम्, पितृजम्, आत्मजम् । रजस्तमःसत्त्वजानि कानि । गर्भस्य वाङ्मनोबुद्धिरहंकारः सत्त्वरजस्तमसामात्मा कथमुत्पद्यते, तन्मयानि शब्दस्पर्शरसरूपगन्धाश्चेति । गर्भस्य किं वा पूर्वं संभवति । करचरणनयनमुखशिरोग्रीवागात्रापरसंधिवङ्क्षणनाभिदेशगुदमेण्ढ्राणि कथं विभज्यन्ते' इति ॥

ततः प्रोवाच भगवान्पालकाप्यः—'इह खलु भोः परं सूक्ष्मभावार्थमप्यव्यक्तमोष्ठस्पन्दनमात्रं त्रुटिः । सर्षपमात्रमोष्ठभेदो लवः । द्वे त्रुटी लघ्वक्षरः । द्वे लघ्वक्षरे अक्षिनिपातसंनिभं निमेषः । निमेषास्तु दश पञ्च च काष्ठा । ता दश विंशतिः(च) कला । त्रिंशत्कलो मुहूर्तः । ते त्रिंशदहःक्षपे लोके सूर्यो विभजते । तत्र कर्मणां चेष्टार्थं दिवसः, शर्वरी स्वापार्य । त्रिंशदहोरात्राणि मासः । द्वाद-

१ क. द्विकोशौ । २ क. °शोऽध्या° । ३ क. कथं वाऽङ्गमभिनिव° । ४ क. °मं च नि° । ५ क. °नि चाङ्गका° । ६ क. °संमितं नि° । ७ क. विंशतिकलो । ८ क. °य । यत्तु त्रिं° ।

शमासो वर्षम् । लौकिके मासेन रात्राहं मै(पै)त्रमानम् । तेषु कृष्णपक्षः शर्वरी, शुक्लो दिवा । अयने द्वे यद्युक्तं दैवमानम् । तत्रोत्तरायनं(णं) दिवा, दक्षिणायनं निशा । तेन पक्षः, मासः, संवत्सरश्च ।

तेन चत्वारि वर्षसहस्राणि कृतयुगम्, तस्य चतुःशती संध्या, तावदेव संध्यांशः । ततश्चतुर्भागहीनस्त्रेता । द्वापरमर्धम् । चतुर्थोऽशः कलिः । इत्येतेषां युगानां कालेन शतानि सहस्राणि चासंख्येयानि वर्तन्ते । तानि चत्वारि युगानि परिनिवृत्तानि पुनश्चतुर्युगमित्युच्यते । द्वादशवर्षसहस्रं चतुर्युगमित्युच्यते । तान्येकसप्ततिरिन्द्रपर्यायः । चतुर्दशेन्द्रपर्याया ब्रह्मदिनम्, तावत्येव रात्रिः ।

तदादौ कृत्स्नमिदमीश्वरः संक्षिप्य कृत्वाऽध्यात्मं सुप्तो विबुध्यते । प्रतिबुद्धोऽथ ब्रह्मा व्यक्तिमचिन्त्यमध्यायमहर्मुखे बुद्धिमव्यक्तमसृजत् । बुद्धेर्मनः । मनसोऽहंकारः । अहंकारात्कालः । कालाद्दिशः । दिग्भ्य आकाशम् । आकाशाद्वायुः । वायोस्तेजः । तेजस आपः । अद्भ्यः पृथिवी ॥

ताभ्यः (?) शब्दवदाकाशम् । शब्दस्पर्शगुणो वायुः । वायो रूपगुणं तेजः । तेजसो रसगुणा आपः । अभ्द्यो गन्धगुणा पृथिवी । पूर्वानुपूर्व्याच्चे गुणानुत्तरानपि प्राप्नुवन्ति यावदिह गुणाः, यावन्तश्चोपगुणाः । सर्वे ते भूतगुणाः पृथिव्यां लक्ष्यन्ते । तत्समुत्थानि भूतानि स्थावरजङ्गमानि च । एतत्पञ्चगतिवत्सामान्येनान्योन्योपजीवीनि सपरिणामानि भूतान्युत्पद्यन्ते ॥

तत्रोद्भिजानि वृक्षगुल्मवल्लीतृणानि चतुर्विधानि स्थावराणि । अत्र भोगार्थे चतुर्दशौषधयः । तद्यथा—श्यामाकवेणुनीवारतिलमर्कटगवेधुकावरकाश्चेति सप्त वन्याः । प्रियङ्गुगोधूमयवमाषशालिषष्टिककुलत्थाः सप्त ग्राम्याः ॥

सरीसृपादिकादिक्चरैश्चराः (?) श्वापदपक्षिहस्तिवानराः सप्ताऽऽरण्याः । पुरुषाजाविगोश्वागर्दभोष्ट्राः सप्त ग्राम्याः । तेषामेव भूतानां पुरुषः श्रेष्ठः, पशूनां गजः । तयोरायुरुत्कर्षः शरीरबलाधानदोषोत्क(र्षापक)र्षेषु प्रयत्नः कर्तव्य इति । तत्र सात्म्यवयोबलप्रकृतिदेशकालाहारोपसेविनो मनुष्याः, परवशानुवर्तिनस्तु नित्यानुबन्धकर्मव्यायामबहुनियताहारसेविनो वारणाः । तस्माद्द्विपानां शरीरबलाधानदोषापकर्षणेषु प्रयत्नः कर्तव्यः । तत्र वक्ष्यते ॥

---

१ क. मासोनवात्रा° । २ क. ते तु कृ° । ३ क. °वा । आयद्वौ य° । ख. °वा आयतद्वौ य° । ४ क. प्रतिबुद्ध्वाऽथ । ५ क. °णि च भो° । ६ क. °दिक्कारैश्चराः । ७ क. हस्ती ।

शरीरं खलु नामाहंकारात् । पृथिव्यापस्तेजो वायुराकाशमिति कर्णत्वग्जिह्वानयनघ्राणैः पञ्चभिरिन्द्रियैः शब्दस्पर्शरसरूपगन्धैश्च पञ्चभिरिन्द्रियार्थैः स्वभावेन चेतनया मनसा प्राणापानादिभिर्जीवितेन चेति पञ्चविंशतिभिर्गुणैर्युक्तं न्विदमव्यक्तं व्यज्यमानं शोणितरेतस्युत्पन्नं मातुर्योनिनाड्यां गत्वा विशद्देवगुणा भूतगुणा आत्मगुणाश्चेत्येतदनुपतन्ति । निवेश्यमानमनुनिवसन्ति । तद्यथा—भ्रमरमधुकरसंघाः पुष्पजं रजः प्रद्रवत्प्रद्रवन्ति, निवसमान(?)मनुनिवसन्ते । एवं खल्विदमेतत्परमाङ्गलिङ्गमात्मानमव्यक्तं वक्ष्यमाणं शोणितरेतस्युपपन्नं मातुर्याति कटिसंधौ विसन्ने(शन्तमे)व स्वगुणाः स्वात्मगुणाश्चात्यन्तं तमनुपतन्ति । तैस्तस्य षट्कोशस्थानानि भवन्ति । तत्रामगर्भदोषा वेदना व्याप्तिर्भवति ॥

पितृजमपि खल्वस्य शुक्रं मातृशोणितेन सह संप्रयुज्यमानं मारुतेन पूरितमीश्वरभावसंयुक्तं मूर्तिमापद्यते । दक्षिणं कुक्षिभागं पुमान्समाश्रयति, वामं स्त्री, मध्यमितरत् । संवृतात्पिण्डायामात्पुमान्संभवति, स्त्री पेश्याः, अर्बुदान्नपुंसकम् ॥

परिपच्यमानस्तु खलु मासेन स्थिरी भवति गर्भः । द्वितीये मास्यर्बुदं पेशी वा, तयोर्युगपदिन्द्रियाण्यभिनिव(र्व)र्तन्ते । शिरोक्षिकूटबाहुपृष्ठपार्श्वोदररोमकूपाश्च तृतीये मासि । चतुर्थे व्यक्ती भवति गर्भः । पञ्चमे मासि चेतनाऽस्योपजायते । षष्ठे मनः । सप्तमे बुद्धिः । अष्टमे मासि स्थैर्यम् । नवमदशमैकादशेषु सर्वाङ्गसंपूर्णः सप्तभिः शिराशतैः सर्वैः सान्वयसमन्वितः स्थिरीभूतो नाभिनिबद्धया नाड्या मातुराहारजं रसं भुञ्जानः संवत्सराद्वै वै जायते । सहदेवगुणैर्भूतगुणैरात्मगुणैश्च ॥

तस्येमे देवगुणा भवन्ति—विक्रान्तौ विष्णुः । गले शक्रः । कोष्ठेऽग्निः । उपस्थे प्रजापतिः । प्राणापानयोर्वायुः । कर्णयोर्दिशः । खेष्वाकाशम् । जिह्वायां सरस्वती । पदेषु मित्रावरुणौ । चक्षुष्यादित्यः । कर्माणि विश्वकर्मा । भूमिरस्य देहे । शब्दे रुद्रः । त्वचि विद्यात् (?) वाच्यग्निः । क्षान्तौ ब्रह्मा । पर्जन्यो हृदये । भुजयोरश्विनौ । त्रिके मरुतः । इति देवगुणाः ॥

अथ भूतगुणाः—कर्णवदनगुदमेण्ढ्र*श्रोतः शब्द इत्याकाशयोनीनि (†रसो

* अत्र किंचित्त्रुटितं प्रतिभाति । † धनुराकारमध्यस्थः पाठो नास्ति कपुस्तके ।

१ क. विपन्नमेव । २ ख. °कोणस्था° । ३ क. °रिपाच्य° । ४ क. व्यक्तानि भवन्ति ग° । ५ क. °द्वावेव जा° । ६ क. बले ।

रसना""""" । सर्वाणि च द्रव्याण्याकाशयोनिरिति । चक्षुरूष्मा कायाग्निरिति तेजोयोनीनि) घ्राणं घ्रेयं संघात इति पृथिवीयोनीनि । स्पर्शः स्प्रष्टव्यं प्राणापानसमानव्यानोदाना वायुयोनयः ॥

अथाऽऽत्मगुणाः—सर्वेन्द्रियबुद्धिपरिद्रष्टा क्षेत्रज्ञः, संशयोत्पादनमभिमार्थनात्मकं मनः । आत्मेन्द्रियमनोर्थसंनिकर्षोत्पन्नव्यवसायात्मिका बुद्धिः, इति ॥

मनो बुद्धिरन्तरात्मा इत्यव्यक्तानि । कर्णत्वग्जिह्वाघ्राणनयनश्रोत्राणीन्द्रियाणि । शब्दस्पर्शरसरूपगन्धा इन्द्रियार्थाः ॥

समुत्पन्नै(†रिन्द्रियार्थै(?)) रिन्द्रियार्थान्गृह्णाति जितेन्द्रियेणोपक्रुष्टान्¹ । सर्वसत्त्वानामिष्टानिष्टानामल्पमनल्पं² शब्दं श्रवणेन्द्रियेण गृह्णाति । शीतोष्णश्लक्ष्णखरमृदुकठिनघनविकीर्णस्निग्धविशदपिच्छिलरूक्षतीक्ष्णानां च स्पर्शविशेषाणामुपलब्धिः स्पर्शेन्द्रियेण । मधुराम्ललवणकटुतिक्तकषायाणां रसानामुपलब्धिः(³ब्धी) रसनेन्द्रियेण गृह्णाति । ह्रस्वचतुरस्रनिम्नोन्नतपृथुवृत्तसमविषमाकाराणि श्वेतताम्रपीतविमिश्रात्मकानि जङ्गमाजङ्गमानि द्रव्याण्यक्षीन्द्रियेण गृह्णाति । इष्टानिष्टानां व्यस्तपिण्डितनिर्हारिणां गन्धानामुपलब्धिर्घ्राणेन्द्रियेण, इति ॥

तत्र ये चाऽऽत्मशरीरायत्ता वातपित्तश्लेष्माणः तेषां त्रीणि स्थानानि—पक्वाशयामाशयमलाशयाः ॥

अथ सात्त्विका भावाः—प्रहर्षः प्रीतिः सुखमानन्दकर्मासंतापश्चेति । तैक्ष्ण्यमधैर्यं धार्ष्ट्यं भयं संतापो रोषः सङ्गः क्षुत्पिपासेति राजसाः । अज्ञानं लोभो मोहः कामः क्रोधः स्वप्नो दैन्यमिति तामसाः ॥

अथ वायवः—प्राणापानसमानोदानव्यानाः । तेषां⁴ कर्माणि । तत्र प्राणो घ्राणनयनवदनगुदमेण्ढ्रश्रोतसामानन्दकर्मात्मकः,प्रवर्तको निवर्तकश्चेष्टानाम्,नेता मनः सर्वेन्द्रियार्थस्य,विज्ञानकरः प्रकृतिस्पर्शयोः, मूलं योनिर्हृदयस्योत्साहस्य († योनिर्हर्षस्योत्साहस्य)स हि भगवान्प्रभवश्चाव्ययश्च, भूतानां भावाभावकरः सुखासुखस्य विधाता, मृत्युर्यमो नियन्ता प्रजापतिरिति । विश्वकर्मा विश्वरूपः सर्वाङ्गेषु सर्वस्य विधाता भावनो मत्तविभुर्विष्णुः क्रान्ता लोकस्य, वायुरेष भगवान्पञ्चधाऽऽत्मानं योजयित्वा शरीरं धारयति । तेषां विसर्गात्मकोऽपानः। उत्क्षेपणाकुञ्चनप्रसारणगमनकर्मात्मको व्यानः । भक्ष्यभोज्यपेयलेह्यानामशित-

† धनुश्चिह्नमध्यगतो नोपलभ्यते कपुस्तके ॥

१. क. °पकृष्टा°। २ क. °मल्पानल्पश°। ३ क. °लब्धर°। ४ क. एषां ।

पीतलीढस्वादितानामभिवोढा समानः । प्राणापानसमानव्यानानामन्तकालेऽभ्युद्धर्ता चोदानः ॥

अथ तेजःस्थानानि—प्रदर्शनं चक्षुरूष्मा कायाग्निर्हृदयं त्वक्पर्यन्तमिति । तत्र चक्षुर्गतं रूपाणि गृह्णाति । कायाग्निरामाशयपक्वाशययोरन्तरस्थो धातूनां चान्तरेषु प्रयोगान्पाचयति । हृदि संश्रयात्क्रोधयति । त्वक्पर्यन्तगतश्चाभ्यङ्गपरिषेकादीन्पाचयति ॥

तत्र श्लेष्मा संधीन्संश्लेषयति, मृदुकरश्च ॥

सप्त चास्य धातवो रसरुधिरमांसमेदोस्थिमज्जाशुक्रमिति ॥

दश चास्य प्राणायतनानि भवन्ति शिरोहृदयनाभिगुदवस्तिवातपित्तश्लेष्ममूत्रपुरीषाणीति ॥

प्राणयात्रार्थं चास्य षड्रसाश्च मधुराम्ललवणकटुतिक्तकषायाः । तैरुपपन्नो गर्भस्तिष्ठति ॥

तत्र त्रयाणां समवायाद्गर्भाधानं भवति मातुः पितुः, जीवस्य चेति ॥

मैथुनसंयोगात्पतिं यदाऽभिकाङ्क्षति धेनुका, तां समुत्पन्नर्तुकां (*तस्मादृतुस्नातां) हस्तिनीं विद्यात् । आर्तवस्य द्वादशरात्रं भवति । तस्माद्दिवा रात्रौ वा हस्तिनो हस्तिन्याश्चसंयोगे प्रादुर्भावो भवति । यदा हस्तिन्यामृतुमत्यां मतङ्गजः संयोगेषु शुक्रमुत्सृजति तद्वायुः कोष्ठे प्रविभजते । मातुराहारात्संवर्धते । तस्मात्कवलरसपल्लवाहारासविना(?)क्षोभव्यायामतीक्ष्णोष्णाहाराविवर्जनात्स्यात्करेणुः । तत्र बहुशुक्रे पुमान्संभवति, स्त्री शोणितबाहुल्यात्, समे नपुंसकम्, शुक्रे तु वायुना द्विधाकृते यमलावुत्पद्येते । यद्रूपा(द्)गर्भं विभर्ति धेनुका. तदाकारं भवति । तत्र ग्राम्यधर्मे निवृत्ते यदा योनिमुखगतं शुक्रं भवति । तच्च रुधिरसंसर्गात्कललं भवति । ततो जीवः संक्रामति गर्भम् । पृथिव्यापस्तेजो वायुराकाशं ज्ञानमिति षट्शरीरकारणानि भवन्ति । तत्समवायात्ततो योन्यां कललसंज्ञो भवति परिणामात्कललः खरत्वं भवति । स्वतेजसा विदाहे तत्खरी भवति परिणामात् । खरस्यार्बुदस्य पेशी भवति ॥

तत्र मज्जा च शुक्रं च नागानां गर्भस्थानां भवति । स्नाय्वस्थीनि *पितृ-

---

* 'केशश्मश्रुलोमास्थिनखदन्तसिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि, मांसशोणितमेदोमज्जाहृन्नाभियकृत्प्लीहान्त्रगुदप्रभृतीनि मृदूनि मातृजानि' इति सुश्रुतात् 'दृढानि पितृजानि, मृदूनि मातृजानि' इति पर्यवसितम् ॥

---

१ क. तेजसः स्था° । २ क. तस्मादनुस्थानां । ३ क. °हारः संव° । ४ ख. °णुः । ततश्च करेणुस्तत्र । ५ क. यच्च ।

जानि शुक्रान्तानि । जरायुमांसमेदोऽन्त्रगुदं धमन्यश्चेति मातृजम् । अन्नपातोत्पन्नः संवक्ष्यमाणः ॥

मातृपित्रोरशनविशेषात्कफपित्तानलप्रभृतीनामन्यत(म)माशुक्रनिषे(कं) प्राणिनमाश्रयति, स प्रकृतिमापद्यते ॥

वर्णाः कृष्णश्वेतरक्तरूक्षा वातपित्तकफशोणितात्मकाः, वर्णभेदाश्च तेषामन्योन्यसंयोगात्मकाः ॥

कुब्जवामनहीनाधिकवैकृत्ययमलभावाश्च वातात्मकाः ॥

विषाणानां वैषम्यं वातात्मकं भवति । संजायमानयोर्दन्तयोर्यदा समुपहरति वायुः, तदा दोषा उत्पद्यन्ते ॥

तत्र श्लोकौ—

यदा शिशुर्विचरति जीवमात्रो गर्भाशयाद्गर्भनिरोधमुक्तः ।
तदाऽङ्गचेष्टां विविधां शरीरे प्रवर्तते वायुबलेन कर्तुम् ॥
प्रवर्तते मूत्रपुरीषमस्य निमेषणोन्मेषणरोदनं च ॥
तदाऽभिलाषाङ्गविचारणं च वातादि सर्वा विविधाः क्रियाश्च ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने गर्भसंभवो नाम सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
अजातशृङ्गं विधिवन्निर्गतं हस्तिनं भगात् ॥ १ ॥
प्रवृत्तेऽस्मिन्यथाकाले यूथानि समवेक्ष्य च ॥
यथावदनुपूर्वेण कृताञ्जलिपुटस्तथा ॥ २ ॥
इति प्रश्नं महाराजो व्याजहार यथातथम् ॥
महान्मे संशयो विद्वन्दृष्ट्वा वै कुञ्जरान्वने ॥ ३ ॥
गर्भः कथं संभवति संभूतः केन जीवति ॥
अस्थिस्नायु च मांसं च कतमे मासि जायते ॥ ४ ॥

---

१ क. °न्त्रयुगं ध° । २ क. °धयुक्तः । ३ क. °तशुक्रं वि° ।

छविश्च कतमे मासि त्वग्वंशः प्रविभज्यते ॥
†[1]बृंकौ नखानि रोमाणि यकृदन्त्राणि [2]पुप्फसम् ॥ ५ ॥
हृदयं कतमे मासि गर्भे जायेत दन्तिनः ॥
पोतः कथं संभवति पोतकी जायते कथम् ॥ ६ ॥
पोती पोतोऽथ यमकं मिथुनं जायते कथम् ॥
उभौ वा पोतकौ केन उभे वा पोतिके कथम् ॥ ७ ॥
कथं वन्ध्या च शण्ढश्च कोशमेही च जायते ॥
कथं मृगः संभवति मन्दो वा केन जायते ॥ ८ ॥
भद्रश्चापि कथं नागः संकीर्णश्च कथं भवेत् ॥
मन्दो मृगमनाः केन मृगो मन्दमनाः कथम् ॥ ९ ॥
भवेत्तु जवनः केन जायतेऽल्पबलः कथम् ॥
कथं भीरुः प्रकृत्या च प्रकृत्या शूर एव च ॥ १० ॥
कथं भवति दुर्मेधा मेधावी च कथं भवेत् ॥
मन्दमेधश्च मातङ्गश्चैतदिच्छामि वेदितुम् ॥ ११ ॥
कालः कथं च भवति श्यामो वा केन जायते ॥
हरिद्वर्णो भवेत्केन रूक्षाभः केन वारणः ॥ १२ ॥
स्निग्धच्छविर्वा मातङ्गः कथं स्याल्लोहितच्छविः ॥
स लोहितच्छविः केन वर्णेषु भवति त्रिषु ॥ १३ ॥
गजश्चोलूकवर्णाभः कथं भवति जातितः ॥
केन वर्णेषु भवति त्रिषु चोलूकवर्णभाक् ॥ १४ ॥
बहुवर्णश्च मातङ्गः कथं भवति जातितः ॥
मुद्गवर्णश्च मातङ्गोऽप्युपदिग्धश्च तत्र यः ॥ १५ ॥
श्वेताभो जायते केन एतदिच्छामि वेदितुम् ॥
नखानि केन कालानि राजिमन्त्यपि वा कथम् ॥ १६ ॥
कथं श्यामानि जायन्ते श्वेतान्यपि च हस्तिनः ॥
केनास्य तालुकं कृष्णं केन कल्माषतालुकम् ॥ १७ ॥
केन पद्मपलाशाभं तालु नागस्य जायते ॥
कालजिह्वः कथं नागस्ताम्रजिह्वोऽथवा कथम् ॥ १८ ॥

---

† 'वृक्का' इति भवेत् ॥

---

१ क. वृष्कौ । २ क. पुष्पसम् ।

कथं कल्माषजिह्वो वा गजो भवति जातितः ॥
पिङ्गलः केन भवति मध्वक्षः केन जायते ॥ १९ ॥
हर्यक्षः केन नागः स्यात्काकाक्षः केन जायते ॥
अक्षिणी केन शुक्ले तु कालतारे पुनः कथम् ॥ २० ॥
गजः पारापताक्षो वा कथं भवति जातितः ॥
विकृताक्षो विरूपाक्षो जातान्धो वाऽपि वारणः ॥ २१ ॥
केन जायते वै नागः कालः पिङ्गललोचनः ॥
केन मुखाच्च हस्ताच्च स्वेदो भवति दन्तिनः ॥ २२ ॥
कस्मिन्देशे च वृषणावदृश्यौ केन वा पुनः ॥
म्लानशीर्षो म्लानमुखो विकटो बधिरस्तथा ॥ २३ ॥
ह्रस्ववालश्च मातङ्गो दीर्घवालः कथं भवेत् ॥
विषमाभ्यां च कर्णाभ्यां पुटकर्णश्च वारणः ॥ २४ ॥
नष्टकर्णश्च मातङ्गः कथं भवति जातितः ॥ २५ ॥
कुष्ठी किलासी विततः काणो हीनोऽथवा पुनः ॥
कुब्जः किलासमेढ्रश्च कथं भवति वारणः ॥ २६ ॥
अतिश्वेताश्च ये दन्ता ये च दन्ताः सुलोहिताः ॥
यथा भवन्ति तद्ब्रूहि मधुवर्णाश्च दन्तिनः ॥ २७ ॥
म्लानवक्त्रः कथं नागो ग्रन्थिदन्तस्तथैव च ॥
मुक्ता विषाणेषु कथं नागानां संभवन्ति च ॥ २८ ॥
म्लानगात्रो भवेत्केन स्तब्धगात्रस्तथैव च ॥
मृदुगात्रश्च मातङ्गः कथं भवति जातितः ॥ २९ ॥
सममूर्धा भवेत्केन तथा प्राप्तविदुर्गजः ॥
उदङ्मूर्धा स च कथं गजो भवति जातितः ॥ ३० ॥
मदं गृह्णाति मातङ्गः केन प्रथमयौवने ॥
अमदो वा भवेत्केन यावदायुर्मतङ्गजः ॥ ३१ ॥
मूढः कथं संभवति समदन्तश्च वारणः ॥
मत्कुणश्चैकदन्तश्च कथं स्यातां मतङ्गजौ ॥ ३२ ॥
करेणुः केन भवति त्रिविषाणः कथं भवेत् ॥
गजश्चतुर्विषाणो वा कथं भवति जातितः ॥ ३३ ॥

१ क. मुख्याच्च । २ क. गच्छति । ३ क. मोटः ।

वामोन्नतः कथं वा स्यात्कथं वा दक्षिणोन्नतः ॥
मूढेकदन्तो मातङ्गो जायते केन हेतुना ॥ ३४ ॥
उत्तमा हस्तिनो ये च प्रादक्षिण्या द्विजोत्तम ॥
तथैव नागा मोल्पार्हाः श्वेतच्छत्रस्य च द्विपाः ॥ ३५ ॥
गजाश्च मधुपर्कार्हा मानार्हाश्चैव हस्तिनः ॥
संभवन्ति यथा विप्र तथा मे वक्तुमर्हसि ॥३६॥
स पृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
अदृश्यमार्तवं विद्धि हस्तिन्या हर्षकारि तत् ॥ ३७ ॥
यानाचरत्यसौ भावांस्तान्मे कीर्तयतः शृणु ॥
प्रहृष्टकर्णलाङ्गूला ध्यानशीला विवर्तिका ॥ ३८ ॥
योनिश्च विवृता शुष्का मन्दं मन्दं च गच्छति ॥
यूथस्यान्ते विचरति पांशुपङ्कजलप्रिया ॥ ३९ ॥
पतितं हस्तिनीनां स्यादन्तरेणाऽऽर्तवं रजः ॥
एतैराकारसंस्थानैर्ज्ञेया ऋतुमती भवेत् ॥ ४० ॥

—:():—

अतः परं प्रवक्ष्यामि ऋतुमत्याश्च लक्षणम् ॥
प्रसन्नमुखवर्णा च योन्याश्च विवृतं मुखम् ॥ ४१ ॥
पुनः पुनः प्रस्रवति प्रहृष्यति पुनः पुनः ॥
समीपस्था न सहते हस्तिनश्चान्यहस्तिनीम् ॥ ४२ ॥
किञ्चिदुत्पुच्छकर्णी च योन्या प्रक्लिन्नपीनया ॥
समुत्थितकरग्रीवा विनता विकटस्थिता ॥ ४३ ॥
यतो गजश्च व्रजति ततोऽस्याग्रेऽवतिष्ठते ॥
हस्तिना च कृतं मूत्रं पुरीषं चापि हस्तिनी ॥ ४४ ॥
पुनः पुनः समाघ्राय हस्तमास्यं नयत्यसौ ॥
संप्रहृष्टाग्रवालेन मुहुराहन्ति तं द्विपम् ॥ ४५ ॥
रागान्मुहुः परिक्रम्य प्लवते वारणं वशा ॥
गुह्यदेशं समाघ्राय हस्तमास्यं नयत्यसौ ॥ ४६ ॥
इमांश्च कुरुते भूयो भावान्हर्षकरान्गजे ॥
यदा देशे मनोज्ञे तु पुरस्तिष्ठति वारणः ॥ ४७ ॥

१ क. °तः ॥ मोटैक° । २ क. मल्पार्हाः । ३ क. °र्हास्तथा ये नाम ह° ।
४ क. तद्धि ।

तदा प्रहृष्टा नागस्य दन्तमालिङ्ग्य तिष्ठति ॥
करवक्त्रोष्ठमेण्ढ्राणि परिजिघ्रति सर्वतः ॥
संघ्राय चास्य गात्राणि गुह्यानि च विशेषतः ॥ ४८ ॥
वृक्षादाकृष्य शाखां च फुल्लबीजानि वारणम् ॥
कुमुदोत्पलपत्रैश्च सरःसु सलिलेन च ॥ ४९ ॥
कर्दमेन च शीतेन स्थले सिञ्चति पांशुना ॥
पक्षेण पक्षं चाऽऽहत्य मुखं जिघ्रति दन्तिनः ॥ ५० ॥
न चातिमात्रमादत्ते भक्ष्यं कुञ्जरसंनिधौ ॥
नैवाऽऽसीनं शयानं वा साऽपीष्टं निशि वाहनि ॥ ५१ ॥
हस्तिन्यृतुमती नागं न मुञ्चति कदाचन ॥
तत्तदेव करोत्यस्य येन येनै प्रहृष्यति ॥ ५२ ॥
फलमादाय रुचिरं मृणालं चापि शैवलम् ॥
गजस्य वक्त्रेऽर्पयति हस्तिनी मदनातुरा ॥ ५३ ॥
यदा देशे मनोज्ञे तु पुनस्तिष्ठति वारणः ॥
तदा विषाणमालिङ्ग्य हृष्टा नागस्य तिष्ठति ॥ ५४ ॥
एभिर्विद्यादृतुमतीं लिङ्गैर्गजवशां बुधः ॥
भूवनस्पतितोयेषु स्त्रीषु च श्रुतिरीदृशी ॥ ५५ ॥
ब्रह्महत्या महेन्द्रेण कृत्वा संक्रामिता पुरा ॥
स्त्रियस्त्रिरात्र(?)गम्याहुस्त्रिलोकेशं शतक्रतुम् ॥ ५६ ॥
तस्माद्धारयितुं शक्ता ब्रह्महत्या शचीपतिः ॥
प्रायश्चित्तं ततस्तासामादिदेश *कुशास्तरे ॥ ५७ ॥
वासोभिर्मलिनैर्भूमौ ब्रह्मचर्यसमन्विता ॥
स्थाने च शयने चैव रजः प्रस्रवतु त्र्यहम् ॥ ५८ ॥
मासि मासि करिष्यन्ति प्रायश्चित्तमिमं स्त्रियः ॥
ब्रह्महत्याविमुक्तास्ता गमिष्यन्ति शुभां गतिम् ॥ ५९ ॥
प्रायश्चितोपदेशाद्धि मानुषीणां रजः श्र(स्र)वेत् ॥
पुष्पं यत्र स्थितं शुद्धं हस्तिनीनां निसर्गतः ॥ ६० ॥

* 'कुशोत्तरे' इति स्यात् ।

१ क. °दावृक्षशा° । २ क. °न प्रकारेण प्र° । ३ क. मनोऽन्ये । ४ क. कुशान्तरे ।

रजो न स्रवते यासां तिर्यग्योनिस्वभावतः ॥
अदृश्यमार्तवं विद्धि हस्तिन्या हर्षसंभवम् ॥ ६१ ॥
उत्पन्नपुष्पा विज्ञेया कामलीलाविचेष्टितैः ॥
समुत्पन्नार्तवा राजन्नृतुस्नातेति तां विदुः ॥ ६२ ॥
अहानि द्वादश भवेदृतुस्तस्या नराधिप ॥
तत्र रात्रौ दिवा वाऽपि स्वभावाच्च प्रजापते ॥ ६३ ॥
ऋतुकाले तु संप्राप्ते धेनुकां प्लवते गजः ॥
कल्पः कल्पां महीपाल मुदितो मुदितामपि ॥ ६४ ॥
ततः पुरुषकारे तु निवृत्ते तस्य दन्तिनः ॥
तच्छुक्रं भजते योनिमच्युतं तस्य मेहनात् ॥ ६५ ॥
योन्या मुखं प्रविष्टं तु गर्भाशयमवाप्य च ॥
ततः [2]संयुज्यते तत्र रक्तेन सह पार्थिव ॥ ६६ ॥
योनिं रुधिरसंसृष्टां यदा शुक्रं प्रपद्यते ॥
शुक्रशोणितसंयोगात्कललं संभवेत्ततः ॥ ६७ ॥
[3]जीवः संक्रामति ततो गर्भमित्येष निश्चयः ॥
[4]लब्धबीजा ततो मुक्ता प्रहर्षेण श्रमेण च ॥ ६८ ॥
हस्तिनी दन्तिनं दृष्ट्वा शनैर्विष्टभ्य गच्छति ॥
विनमत्याकम्पयति यथोक्ते कर्णचूलिके ॥ ६९ ॥
कण्डूयते तथा देहं तरुमाश्रित्य [5]सर्वतः ॥
अवगाहं च पङ्कं च शीतां छायां च सेवते ॥ ७० ॥
गच्छन्तमुपसर्पन्तं द्वेष्टि चैव मतङ्गजम् ॥
लिङ्गैरेतैर्विजानीयाज्जातगर्भां तु हस्तिनीम् ॥ ७१ ॥

—:○:—

अतःपरं प्रवक्ष्यामि गर्भिण्या लक्षणं नृप ॥
कषायमधुराहारा द्विरदं द्वेष्टि भावतः ॥ ७२ ॥
संजातगर्भा प्रथमे मासे भवति हस्तिनी ॥
मृदुत्वग्जृम्भणपरा द्वितीये कललोद्वहात् ॥ ७३ ॥
योन्या प्रभूतोदकया तृतीये मासि वारणी ॥
[6]करेणुरलसा च स्यान्मृदुशीताभिनन्दिनी ॥ ७४ ॥

---

१ क. °तुकालमपि शृणु ॥ अ°। २ क. संयुध्यते । ३ क. संक्रामति ततो गर्भमित्येष निश्चयः कृतः । ४ क. लब्धबीजं ततो मुक्त्वा प्र°। ५ क. सर्वशः । ६ क. °रमल्लास्या स्या°।

चतुर्थे मन्दगमना मन्दमन्दोपसेविनी ॥
पञ्चमे पूर्णजठरा पांशुपङ्कजलप्रिया ॥ ७५ ॥
यूथप्रान्तं मृदुसमं देशं षष्ठे निषेवते ॥
अत्यर्थं जृम्भणपरा मन्दवेगा च सप्तमे ॥ ७६ ॥
द्विजान्दशति गम्भीरतोयप्लवनतत्परा ॥
अष्टमे नवमे मासि जलं विष्टभ्य तिष्ठति ॥ ७७ ॥
म्लानानना शीर्णकेशी दशमे क्लान्तलोचना ॥
निम्नमेकादशे द्वेष्टि संवेशोत्थानविक्लवा ॥ ७८ ॥
उन्नद्धनाभिरलसा गुरुगर्भतया च सा ॥
करिणी द्वादशे मासीत्युक्तं गर्भस्य लक्षणम् ॥ ७९ ॥

—:○:—

अतः शृणु महाराज गर्भाधानं विशेषतः ॥
मुनयो नयकारा ये शृण्वन्तु सुविचक्षणाः ॥ ८० ॥
ग्रन्थान्महार्थान्वक्ष्यामि यथावदनुपूर्वशः ॥
रसो रक्तमथो मांसं मेदोऽस्थीनि च धातवः ॥ ८१ ॥
मज्जा शुक्रं तु सप्तैते शरीरेषु शरीरिणाम् ॥
मधुरः कटुकश्चैव तथाऽम्लश्च रसा नृप ॥ ८२ ॥
तिक्तः कषायो लवणस्तेषामुपरसास्त्रयः ॥
एतेषां वीर्यनिर्वृत्तौ रसधातुर्नराधिप ॥ ८३ ॥
अव्यक्तः प्राणिनां प्राणान्प्रीणयत्यतिसौख्यतः ॥
स पूर्वं शोणितं प्राप्य मांसं भवति पार्थिव ॥ ८४ ॥
पारंपर्येण तेषां तु धातून्प्रीणाति दन्तिनाम् ॥
ततो हर्षो भवेज्जन्तोः प्रीणितेष्वथ धातुषु ॥ ८५ ॥
ततो हर्षात्प्रयत्नेन शुक्रं तस्य प्रजायते ॥
यथा ह्यरण्यां ज्वलनः सूक्ष्मो यत्नेन दृश्यते ॥ ८६ ॥
एवं मैथुनयत्नेन जन्तोः शुक्रं हि दृश्यते ॥
यस्मिन्समे हि प्रकृतिः पुंसंज्ञा क्रियते नृप ॥ ८७ ॥
प्रादुर्भावश्च तत्रैव परिणामश्च लक्ष्यते ॥
त्रयाणां समवाये तु गर्भाधानं भवेदिति ॥ ८८ ॥
मातापित्रोर्नृ(र्नर)पते जीवस्य च न संशयः ॥
पृथिव्यापश्च तेजश्च वायुराकाशमेव च ॥ ८९ ॥

१ क. °त्रोश्च नृप° ।

भूतान्येतानि कथ्यन्ते पञ्चैव खलु देहिनाम् ॥
समवायः पुनस्तेषां योन्यां कललसंज्ञितः ॥ ९० ॥
कललस्य परीणामात्खरत्वमुपजायते ॥
खरीभवति तद्राजन्विदाहेन स्वतेजसा ॥ ९१ ॥
खरस्य च परीणामादर्बुदं नाम जायते ॥
अर्बुदस्य परीणामात्पेशी स्यादिति निश्चयः ॥ ९२ ॥
ततोऽस्य शाखा जायन्ते तथा विद्धि नराधिप ॥
गर्भस्येहानुपूर्वेण सर्वभूतेषु पार्थिव ॥ ९३ ॥
यथा मधूच्छिष्टकृतं रूपमन्वेति विग्रहः ॥
स्त्रीपुंनपुंसकं तद्वज्जीवः समधिगच्छति ॥ ९४ ॥
*पर्वभिस्तु यथा सर्वैर्वेणुरुत्पद्यते नृप ॥
सर्वैरङ्गैस्तथा सूक्ष्मैर्जातैर्गर्भो विवर्धते ॥ ९५ ॥
शुक्रं रजो मलश्चैव गर्भस्थस्य न जायते ॥
चतुर्थे मासि जायन्ते स्नाय्वस्थीनि सिरास्तथा ॥ ९६ ॥
जायते तस्य निर्वृत्तिरङ्गानां तु महीपते ॥
निर्वृत्तिरनुपूर्वेण यथावच्छ्रोतुमर्हसि ॥ ९७ ॥
शिरो ग्रीवा च पृष्ठं च कर्णौ चाऽऽस्यं करस्तथा ॥
गात्रापरमथो बालस्तथा निष्कोश एव च ॥ ९८ ॥
उरस्तथाऽऽयामकाण्डमानुपूर्व्यान्नराधिप ॥
छवी च पञ्चमे मासि यथावत्प्रविभज्य च ॥ ९९ ॥
चक्षुः श्रोत्रमथो जिह्वा प्राणोऽपानस्तथैव च ॥
वृष्कौ नखानि रोमाणि पक्ष्मदन्त्राणि पुष्फसम् ॥ १०० ॥
व्यज्यते हृदयं चैव षष्ठे मासि नराधिप ॥
संभवन्ति महीपाल गर्भस्थस्येह दन्तिनः ॥ १०१ ॥

---

* 'गर्भस्य हि संभवतः पूर्वं शिरः संभवतीत्याह शौनकः शिरोमूलत्वाद्देहेन्द्रियाणाम् । हृदयमिति कृतवीर्यो बुद्धेर्मनसश्च स्थानत्वात् । नाभिरिति पाराशर्यः, ततो हि वर्धते देहो देहिनः । पाणिपादमिति मार्कण्डेयस्तन्मूलत्वाच्चेष्टाया गर्भस्य । मध्यशरीरमिति सुभूतिर्गौतमस्तन्निबन्धनत्वात्सर्वगात्रसंभवस्य । तत्तु न सम्यक् । सर्वाङ्गप्रत्यङ्गानि संभवन्तीत्याह धन्वन्तरिः । गर्भस्य सूक्ष्मत्वान्नोपलभ्यन्ते वंशाङ्कुरवच्चूतफलवच्च । तद्यथा—चूतफले परिपक्के केशरमांसास्थिमज्जानः पृथग्दृश्यन्ते । कालप्रकर्षात्तान्येव तरुणे नोपलभ्यन्ते सूक्ष्मत्वात् । तेषां सूक्ष्माणां केशरादीनां कालः प्रव्यक्ततां करोति । एतेनैव वंशाङ्कुरोऽपि व्याख्यातः' इति सुश्रुते धन्वन्तरेरप्यत्रैव संवादो दर्शितः ॥

जीवोपजीवमाश्रित्य गर्भो भवति कालतः ॥
रसेन प्रीणितो जीवो गर्भस्थः किं न रोदिति ॥ २ ॥
जरायुणा मुखे च्छन्ने कण्ठे च कफवेष्टिते ॥
वायोर्गतिनिरोधाच्च गर्भस्थो न प्ररोदिति ॥ ३ ॥
मलाल्पत्वादयोगाच्च वायोः पक्वाशयस्य च ॥
वातमूत्रपुरीषाणि गर्भस्थो न करोति हि ॥ ४ ॥
सूक्ष्मत्वाद्विशदत्वाच्च नात्र किट्टं प्रशस्यते ॥
नाभ्यां प्रतिष्ठिता नाडी अन्तरे हृदयस्य च ॥ १०५ ॥
मात्रोपयुक्तान्देहस्थो गर्भो वहति वै रसान् ॥
चतुर्भागेन चांशेन गर्भं प्रीणाति हस्तिनी ॥ ६ ॥
†नाडी रसवहा ज्ञेया तया गर्भः स जीवति ॥
ततः समानसंज्ञानं व्यक्तं भवति पार्थिव ॥ ७ ॥
ज्ञानं च रसवीर्याभ्यां संभूयाऽऽशु विवर्धते ॥
बुद्धिः संजायते चास्य सप्तमे मासि पार्थिव ॥ ८ ॥
अष्टमे स्थिरसर्वाङ्गः संधिस्नायुसमन्वितः ॥
त्वगस्थिमांसमेदोभिः संयुक्तः संविवर्धते ॥ ९ ॥
नवमे दशमे चैव भवेदेकादशेऽपि वा ॥
द्वादशे वा गजो राजञ्जायते नात्र संशयः ॥ ११० ॥
नृप या द्वादशे मासि गर्भिणी न प्रसूयते ॥
इदं तु कारणं तस्या विज्ञेयं नरसत्तम ॥ ११ ॥
क्षीणशोणितमांसाया रूक्षशुष्काशनाद्भवेत् ॥
अध्वनो गमनाद्भाराद्बन्धनाच्च श्रमाद्भयात् ॥ १२ ॥
गर्भो मुह्यति हस्तिन्या वायुना परिशोषितः ॥
न स्पन्दते न स्फुरते चातुर्यं च न गच्छति ॥ १३ ॥
न गच्छति विनाशं च न च काले प्रसूयते ॥
अल्पप्राणा निरुत्साहा गर्भशय्यां न मुञ्चति ॥ १४
सा लीनगर्भा करिणी प्रसूतेऽतिचिरादपि ॥
धेनुर्वन्ध्याकनी चैव तथा नागोलिकाऽपि च ॥ ११५ ॥

---

†'अयमर्धश्लोकः 'नाभ्यां'–इत्यर्धतः परं पाठ्यः' इति प्रतिभाति ॥

---

१ क. °भागो नवांशे° । २ क. °नं सर° । ३ क. °भ्यां स भूयासुर्विव° । ४ क. राजसत्तम ।

एकद्वित्रिसमा गर्भं धारयन्ति यथाक्रमम् ॥ १६ ॥
हस्तिनी गर्भिणी या तु बह्वश्नात्यहितं यदा ॥
आहारं तरुणे गर्भे तेन दोषः प्रवर्तते ॥ १७ ॥
ततो दोषपरिस्पन्दो गर्भनाडीं प्रपद्यते ॥
स गर्भे जनयत्याशु व्याधीन्बहुविधान्बहून् ॥ १८ ॥
यदा त्वाहारगुणतो गर्भो भवति तर्पितः ॥
मातुर्गुणबलोत्साहसत्त्वतेजःसमन्वितः ॥
गर्भशय्यां परित्यज्य विमथ्य परिवर्तते ॥ १९ ॥
योनिद्वारं समासाद्य तदा क्षिप्रं विजायते ॥
इत्येतेदभिनिर्दिष्टं गर्भस्योत्पत्तिलक्षणम् ॥ १२० ॥

—:():—

अथ देवगुणानां तु विस्तरः संप्रवक्ष्यते ॥
ब्रह्मा मूर्ध्नि गले शक्रः स्कन्धे विष्णुरवस्थितः ॥ २१ ॥
नाभ्यामग्नी रविर्दंष्ट्रयोर्मित्रः पादेषु दन्तिनाम् ॥
धाता विधाता कुक्ष्योस्तु मेण्ढ्रे वाऽपि प्रजापतिः ॥ २२ ॥
अन्त्रेषु नागास्तिष्ठन्ति सर्वलोकधुरंधराः ॥
वारणेषु प्रधानात्मा तिष्ठति ह्यजरोऽक्षयः ॥ २३ ॥
गात्रयोरश्विनौ श्रोत्रे दिशो मनसि चन्द्रमाः ॥
पर्जन्यो हृदि नागानामिति देवगुणाः स्मृताः ॥ २४ ॥

—:():—

आकाशाच्छ्रोत्रनिर्वृत्तिः शब्दः खानि च दन्तिनाम् ॥ २५ ॥
गर्भस्तस्याथ विज्ञानं सर्वाश्चेष्टाश्च मारुतात् ॥
दृष्टिरूष्मा च पित्तं च रूपज्ञानं च तैजसम् ॥ २६ ॥
सलिलात्तु रसज्ञानं स्नेहः क्लेदः कफस्तथा ॥
गन्धज्ञानं च गन्धश्च संघातश्च महीगुणाः ॥ २७ ॥
इति भूतगुणाः प्रोक्ता वक्ष्यन्ते पितृजा गुणाः ॥
भवन्ति पितृजा दन्ताः शुक्रमस्थि च दन्तिनाम् ॥ २८ ॥
केशा रोमाणि मज्जा च स्नायूनि च नखानि च ॥
सत्त्वं चक्षुर्बलं बुद्धिः स्मृतिर्मेधा श्रुतिर्जवः ॥ २९ ॥
पितृजं सर्वमेवैतन्मातृजं संप्रवक्ष्यते ॥
त्वक्पेशी शोणितं चैव मेदोऽन्त्राणि गुदस्तथा ॥ १३० ॥

---

१ ख. परित्याज्य । २ क. °तादिति नि°। ३ क. °ष्ट्योरिन्द्राः पा° । ४ क. अङ्गेषु । ५ क. °ष्टिः सूक्ष्मा च । ६ क. पितृतो ।

धमन्यश्चेति नागानां विज्ञेया मातृजा गुणाः ॥
आत्मजानि निर्वृतिश्च स्वकर्मफललक्षणाः ॥ ३१ ॥
शरीरं बलवृद्धिस्तु गर्भस्य रसजाः स्मृताः ॥
रसस्य प्रीणनं कर्म जीवनं शोणितस्य च ॥ ३२ ॥
प्रलेपनं च मांसस्य क्लेदो वर्ष्म च मेदसः ॥
देहधारणमस्थ्नां च मज्ज्ञश्चैवास्थिपूरणम् ॥ ३३ ॥
संभूतमथ गर्भस्थं वायुर्जीवयति द्विपम् ॥
शरीरे चान्तरिक्षे च दिव्यो राजन् महाबलः ॥ ३४ ॥
भगवाञ्जीव इत्येष सर्वप्राणभृदीश्वरः ॥
शरीरस्थोऽप्यदृश्यश्च वायुरित्युच्यते बुधैः ॥ १३५ ॥
(*यदा शिशुर्विचरति जातमात्रो गर्भाशयाद्गर्भनिरोधमुक्तः ॥
तदाऽङ्गचेष्टां विविधां शरीरे प्रवर्तते वायुबलेन कर्तुम् ॥ ३६ ॥
प्रवर्तते मूत्रपुरीषमस्य निमेषणोन्मेषणरोदनं च ॥
तदाऽभिलाषाङ्गविचारणं च वातो हि सर्वस्य भवेद्धि कर्ता) ॥३७॥

—:○:—

पूर्वं तु यदि मातङ्गः शुक्रमाक्रम्य तिष्ठति ॥
जनयेत्तत्र मातङ्गमत्र मे नास्ति संशयः ॥ ३८ ॥
संगमे तु यदा राजन्रक्तं मुञ्चति धेनुका[2] ॥
जनयेद्धस्तिनीं तत्र क्षिप्रमेव महीपते ॥ ३९ ॥
ऋतौ नित्यं यदा राजन्धेनुकां प्लवते गजः ॥
ततः शुक्रं प्रथमतो वारणस्य प्रसिच्यते ॥ ४० ॥
तच्चेत्प्रणिहितं शुक्रं करोति पवनो द्विधा ॥
जायेते यमकौ पोतौ तत्र मे नास्ति संशयः ॥ ४१ ॥
ऋतौ यदि समुत्पन्ने धेनुकां प्लवते गजः ॥
धेनुकायाः प्रथमतस्तत्र रक्तं प्रसिच्यते ॥ ४२ ॥
द्विधा करोति तद्वायुर्मुञ्चेत्प्रणिहितं यदि ॥
भवतः पोतिके तत्र अत्र नास्ति विचारणा ॥ ४३ ॥

* धनुराकारमध्यस्थौ श्लोकौ पूर्वाध्यायस्य गर्भसंभवाख्यस्य चरमलिखितौ केवलं खपुस्तके पुनरुक्तौ। कपुस्तके तु प्रकृताध्यायप्रारम्भे कृतप्रश्नानामेतदुत्तरकानुयोगाभावेन व्यर्थत्वावगमेन न लिखितौ ॥

१ ख. प्रीणनं। २ ख. धेनुकम्। ३ क. °मकोपेतौ। ४ क. चात्र।

यदा तु प्लवते नागो वशामृतुमतीं नृप ॥
ततस्तु युगपच्छुक्रं प्रसिच्येत यदृच्छया ॥ ४४ ॥
करोति मारुतस्तच्चेच्छुक्रं प्रणिहितं द्विधा ॥
यमके मिथुनं तत्र जायते नात्र संशयः ॥ १४५ ॥
रसं तीक्ष्णं यदाऽभीक्ष्णं निषेवेत मतङ्गजः ॥
कटुकं च कषायं च रूक्षं चैव महीपते ॥ ४६ ॥
मृदा समुपदिग्धं च प्रावृट्काले च वारणः ॥
असंजातरसं खादेदगर्भं यवसं यदा ॥ ४७ ॥
यथेष्टं हस्तिनी वाऽपि रसानेतान्निषेवते ॥
यदा भवति संयोगस्तस्मिन्काले यदृच्छया ॥ ४८ ॥
नागे संजायमाने तु हस्तिनी व्यतिरिच्यते ॥
शुक्ररक्तसमायोगाद्योन्यां कुप्यति मारुतः ॥ ४९ ॥
दौर्बल्याच्चापि शुक्रस्य रसहीनतयाऽथवा ॥
यदि प्रादुर्भवेद्गर्भस्तस्मिन्काले यदृच्छया ॥ १५० ॥
षण्ढः संजायते तेन वातोपहतपौरुषः ॥
षण्ढा वाऽपि महीपाल हस्तिनी नात्र संशयः ॥ ५१ ॥

—:○:—

वलीसंतानभक्षाणां पित्तधातुर्विवर्धते ॥
कट्वम्ललवणप्राये काले कफविघातने ॥ ५२ ॥
रक्तमांसक्षयकरैर्मनोदेहाभिपातनैः ॥
वृष्टेरुपरमाद्वाऽपि शुक्लोदकबलाहके ॥ ५३ ॥
शरत्काले निदाघे वा तत्समानगुणे ऋतौ ॥
मध्याह्ने मध्यरात्रे वा ऋतौ तुल्ये तयोर्द्वयोः ॥ ५४ ॥
वशोपनीतप्रकृतिः पित्तेनाधिककर्मणा ॥
शुद्धः संजायते जात्या मृगनामा मतङ्गजः ॥ १५५ ॥
तस्यैव संप्रवक्ष्यामि सत्त्वाकारमसंशयम् ॥
वनचर्याक्रियाणां च लक्षणं प्रविभज्यते ॥ ५६ ॥
तनुत्वक्कर्णपादो यस्तन्वास्यस्तनुमेहनः ॥
तनुवंशोदरश्चैव तनुव्यक्ततनूरुहः ॥ ५७ ॥

---

१ क. मृदु । २ ख. समुपदग्धं । ३ क. खादेद्गर्भं यवसकं य° । ४ क. ख. °सान्नेता° । ५ क. °यः ॥ बली° । ६ ख. °फनिघातनैः ॥ र° । ७ क. °नैः ॥ दृष्टेरुपरमे वाऽपि । ८ क. °दरब° ।

तनुगात्रापरनखस्तनुग्रीवस्तथैव च ॥
दीर्घजिह्वाविषाणश्च दीर्घगात्रस्तथा च यः ॥ ५८ ॥
स ह्रस्वहनुहस्तास्यवालवालधिपुष्करः ॥
ह्रस्वाल्पमस्तकश्चैव ह्रस्वरोमाऽणुमेहनः ॥ ५९ ॥
निम्नश्लक्ष्णनिर्याणकक्षांसंसगदान्तरः ॥
प्रस्तब्धरोमकर्णत्वक्पुरस्ताच्चापि संनतः ॥ १६१ ॥
करालो वृतकर्णश्च जलौकावर्णसप्रभः ॥
स्थूलोत्कृष्टावकृष्टैश्च संयुतः सर्वसंधिभिः ॥ ६१ ॥
उन्नद्धनाभिरन्ध्रश्च निर्मांसाष्ठीव्यपिण्डकः ॥
स्थूलो निर्मीलिताक्षश्च कुब्जवंशश्च वारणः ॥ ६२ ॥
उच्चश्चाप्यल्पपार्श्वश्च तथा चाप्यल्पपेचकः ॥
ग्रीवया चाप्यपेतोऽसावुच्चैर्वद्धापचद्धयः ॥ ६३ ॥
एतद्वनगजस्यास्य शारीरं लक्षणं भवेत् ॥
वनस्थस्यैव वक्ष्यामि तस्य सत्त्वाश्रयं पुनः ॥ ६४ ॥
निपाने गोचरस्थाने शय्यायां चाप्यनिर्वृतः ॥
रूपादिभयशङ्की च नित्यमेवानवस्थितः ॥ १६५ ॥
इत्युक्तं वनवासस्य चर्यामपि तु वक्ष्यते ॥
सत्त्वस्य लक्षणं तस्य निश्चयेन विनिश्चितम् ॥ ६६ ॥
चर्यां वनमनुचरन्निपिनष्टि करं भुवि ॥
हस्तश्रवणलाङ्गूलो दीर्घं विश्रमते क्रमैः ॥ ६७ ॥
भिन्नमूत्रपुरीषः सन्नुद्विग्नः संप्रधावति ॥
पुनः पुनश्च विनदन्स्थाने हस्तं विनिक्षिपेत् ॥ ६८ ॥
समुन्नम्य शिरो याति यूथान्तं चोपदेशते ॥
चर्यां निर्गन्तुकामस्य द्वारमेप्राप्य तिष्ठति ॥ ६९ ॥
कर्मण्युत्तानवेदी तु चण्डो दुर्विनयश्च यः ॥
शोकालुश्चाप्यसोढुश्च दुर्मना गुरुमक्षिकः ॥ १७० ॥
बह्वाशी बहुलापश्चेद्विशीलो विषमाशनः ॥
रभसो दुर्भगश्चैव दन्तपातेषु चाक्षमः ॥ ७१ ॥

---

१ क. °समगादान्तुरः । २ क. संवृतः । ३ क. स्थूलकृष्णोविकृ° । ४ क. निर्मिलि°। ५ क. °प्यवपा°। ६ क. वनसंस्थस्य । ७ क. त्वस्य । ८ ख. विक्रमते । ९ क. °मप्यवति° । १० क. दुर्विर्जयश्च । ११ क. नभसो ।

पुरोधिसंपराये च विपरामर्शदुर्बलः ॥
जवे प्रकृष्टवेगश्च भारं प्राप्यावसीदति ॥ ७२ ॥
रजोवृत्तिविधेयश्च दुर्मेधश्च मृगो गजः ॥
प्रकृत्या पैत्तिको ह्येष जात्या वाऽपि मृगो मतः ॥ ७३ ॥
कृच्छ्राच्चाऽऽप्यायते नागः क्षिप्रं च परिहीयते ॥
विधाः स्नेहाश्च तद्योगास्तृणानि विविधानि च ॥ ७४ ॥
लवणं प्रतिपानं च कवलान्कुवलानि च ॥
नित्यमस्मै विचित्राणि दातव्यानि बलार्थिना ॥ १७५ ॥
विशिष्टबलयोगो हि तस्य तज्ज्ञैः प्रशस्यते ॥
तिक्तैः कषायमधुरैः स्निग्धैश्चाऽऽप्यायते हि सः ॥ ७६ ॥
कट्वम्ललवणैश्चैव रूक्षैश्चाऽऽतुरतां व्रजेत् ॥
तस्माद्योगविभागज्ञो भिषक्शास्त्रविशारदः ॥ ७७ ॥
प्रकृतेरविरोधेन बल्यमाहारमादिशेत् ॥
बलं ज्ञात्वा च तद्योग्यं भिषक्कर्म समादिशेत् ॥ ७८ ॥
नित्यं च सान्त्वयेदेनं न चैनमभितापयेत् ॥
सोढुं स हि न शक्नोति तीक्ष्णदण्डावचारणम् ॥ ७९ ॥
तस्मात्कर्मान्तरं तस्य सदा तीक्ष्णं विवर्जितम् ॥
पिण्डोदकप्रदानं तु सान्त्वपूर्वं प्रशस्यते ॥ १८० ॥
तृणकूर्चोपचारेण ततश्चैनमुपाचरेत् ॥
कर्णमध्ये तु संरक्षा मृदा संपरिलेपयेत् ॥ ८१ ॥
अङ्कुशप्राजनैश्चैनं विशुद्धमवमार्जयेत् ॥
असंतापक्षमं चैनं वाचं न कटुकां वदेत् ॥ ८२ ॥
एवं हि सान्त्वतः कर्म सुखेन प्रतिपद्यते ॥
कर्मार्थश्चायमारम्भः कर्म चैवं प्रसिध्यते ॥ ८३ ॥

—:o:—

अथ मन्दस्तु हेमन्ते मासयोः पौषमाघयोः ॥
नागानां शीतसात्म्यानां मांसं मेदश्च वर्धते ॥ ८४ ॥
तुषारवातपरुषे प्रभूतयवसोदके ॥
स्वाद्वम्ललवणानां च रसानामुद्भवात्मके ॥ १८५ ॥
इन्द्रियोद्रेकजनने मेदो मांसं विवर्धते ॥
अम्ला मधुरवीर्याश्च भवन्त्योषधयस्तदा ॥ ८६ ॥

१ क. जीवे । २ क. मृगोत्तमः । ३ क. सान्त्वितः । ४ क. °नके मे° ।

ततस्तासां विपाकेन श्लेष्मा समुपचीयते ॥
भवन्ति च विचित्राणि धान्यानि वसुधातले ॥ ८७ ॥
वर्ष्म पुष्णन्ति परमं शुक्रं चैषां विवर्धते ॥
संजातमांसा हेमन्ते भवन्ति बलिनो गजाः ॥ ८८ ॥
तदा हर्षेण संपन्नाः समर्था मैथुने नृप ॥
रात्रौ निवाते गच्छन्ति सायं ते वाऽऽतपं दिवा ॥ ८९ ॥
न च दूरं विधावन्ति ग्रासनिर्वाणकारणात् ॥
तस्मिन्काले यदा राजन्धेनुकां प्लवते गजः ॥ १९० ॥
सा चाथ लभते गर्भं हस्तिनं प्राप्य हस्तिनी ॥
संजायते महाराज यादृशं तादृशं शृणु ॥ १९१ ॥
महामुखो महाग्रीवो महाश्रोता महोदरः ॥
महोरःकुम्भसगदाप्रतिमानासनैर्युतः ॥ ९२ ॥
महापस्कारनिष्कोशो वलिमान्स्थूलपेचकः ॥
निःसृष्टकूटभागश्च दीर्घस्थूलतनूरुहः ॥ ९३ ॥
चीनानुवंशः सान्द्रत्वक्सुविभक्तमहाशिराः ॥
उत्पार्श्वः सूक्ष्मनाभिश्च दीर्घवालधिमेहनः ॥ ९४ ॥
पुरस्तादुच्छ्रितश्चापि पश्चादवनतोऽपि च ॥
अच्छिद्रदेहबन्धश्च तथा च परिमण्डलः ॥ १९५ ॥
ह्रस्वास्यः पृथुजिह्वश्च ज्ञेयो ह्रस्वशिरोधरः ॥
मृदुसंभोगभागश्च दृढपर्वा तथैव च ॥ ९६ ॥
महाण्डकोशः पक्षाभ्यां स्तनाभ्यां चोपलक्षितः ॥
बहलैर्मृदुभिश्चैव युक्तः स्निग्धैस्तनूरुहैः ॥ ९७ ॥
स्थिरैः स्थिराकृतितलैः पादैश्च पृथुभिः समैः ॥
अल्पोत्सेधश्च विज्ञेयो गूढोत्कृष्टः समाहितः ॥ ९८ ॥
दीर्घेण दीर्घाङ्गुलिना दीर्घपुष्करशोभिना ॥
युक्तो हस्तेन हर्यक्षः प्रभूतमृदुना च यः ॥ ९९ ॥
स्थिरे स्निग्धे विशाले च पीने चापि प्रकीर्त्यते ॥
विषाणे तस्य विद्वद्भिरोष्ठो दीर्घश्च रोमशः ॥ २००॥

---

१ क. चाद्य । २ क. °ष्कोऽसौ व° । ३ क. दृष्टप° । ४ क. °कोशप° ।
५ ख. पक्ष्माभ्यां । ६ क. °नाभ्यामभिल° । ७ क. °शः ॥ सप्तवृ° ।

स्वयंवृत्तो मृदुस्निग्धो महाकर्णस्वनश्च यः ॥
पश्चादधश्च बद्धौ च कर्णौ जात्युपलक्षणौ ॥ १ ॥
संदानभागौ प्रोहौ च पलिहस्तौ तथैव च ॥
पलिपादश्च पादश्च ज्ञेयस्तस्य कचाविलाः ॥ २ ॥
रन्ध्रौ कक्षौ च कुक्षी च विशेषज्ञैर्विनिश्चिते ॥
प्रलम्बौ चोपदिग्धौ च श्रवणौ तस्य तद्धि च ॥ ३ ॥
शिथिलैर्बहुलैश्चैव मांसैः संलिप्तविग्रहः ॥
गूढो नीचैः प्रवृद्धश्च बलवांश्चापि वारणः ॥ ४ ॥
कूर्मसंस्थानगमनो मन्दो मन्दगतिक्रमः ॥
चिह्नैरेतैः शरीरस्थैर्विज्ञेयो वनसंस्थितः ॥ २०५ ॥
वनस्थ एव च सदा विहरन्विविधाशनः ॥
अनवेक्ष्य चरत्येव शब्दादिभयकारणम् ॥ २०६ ॥
यूथमार्गानुसारी च स्थले वाऽप्यथवा जले ॥
संमील्य लोचने नित्यं निद्रान्ध इव गच्छति ॥ २०७ ॥
हस्तिन्यां हस्तमासज्ज्य प्रायेण मदनातुरः ॥
पृष्ठे च जघने वाऽपि वीर्यामथ स तिष्ठति ॥ २०८ ॥
पार्थिवाज्ञाप्रयुक्तेषु मोहशङ्कादिहेतुषु ॥
वादित्रोद्भटशब्देषु न मुह्यति न शङ्कते ॥ २०९ ॥
*पादपाशिकविक्षिप्तैस्तथैवापरया पुनः ॥
पाशैरुद्वेजनैर्बद्धोऽप्युद्वेगं नाधिगच्छति ॥ २१० ॥
इत्युक्तं लक्षणं तस्य वनचर्या तु सात्त्विकम् ॥
अतः परमिदं कृत्स्नं सत्त्वकर्मणि कीर्त्यते ॥ २११ ॥
अल्पश्रमः क्लेशसहो मृदुकोपोऽथ निर्जवः ॥
दंशस्पर्शक्षमश्चापि गम्भीरस्य च वेदिता ॥ २१२ ॥
मन्दाशनोऽथ मन्दाग्निरल्पाशी बलवांश्च सः ॥
महाधृतिरसंवीयी स्तिमितः सुभरोऽपि वा ॥ २१३ ॥
आकूजनश्च प्रायेण मेधया चापि मध्यमः ॥
पित्तोत्सन्नं पुरीषं च मूत्रं च विसृजत्यसौ ॥ २१४ ॥

---

*'पदे' इति भवेत् ।

---

१ क. °कर्णश्च निश्च° । २ क. रन्ध्रे । ३ क. °मासाद्य प्रा° । ४ क. °प्युद्योगं । ५ ख. दंशे स्प° । ६ क. °वापि स्ति° । ७ क. °त्तोच्छन्नं ।

आसितो वधबन्धैश्च नातिश्रासं स गच्छति ॥
प्रकृत्या श्लेष्मलैस्त्वेष मन्दस्तामस एव च ॥ २१५ ॥
पूर्वोक्त एवास्याऽऽहारो विशेषोऽयं ततो भवेत् ॥
स्निग्धैः कषायकटुकैस्तिक्तैश्चाऽऽप्यायते हि सः ॥ २१६ ॥
आसदंशवदातीक्ष्णैस्तस्येष्टं प्राजनाङ्कुशैः ॥
दृष्टप्रवद्धकर्मा स्याद्गुरुगम्भीरवेदिता ॥ २१७ ॥
मृगस्याधैर्यमाधेयं मन्दस्यापि च लाघवम् ॥
श्लेष्मप्रकृतिरेवं च मन्दो लाघवमाप्नुयात् ॥ २१८ ॥

—:○:—

समशीतोष्णसुभगे प्रकामयवसोदके ॥
ऋतौ वसन्तस्य मुखे मन्मथादेशनक्षमे ॥ २१९ ॥
तत्समानमुखे वाऽपि पूर्वाह्ले पूर्वजन्मनः ॥
ये चाप्याहारजा दोषा मातापित्रोः कफादयः ॥ २२० ॥
सात्म्यत्वाद्देहबीजत्वान्न ते दोषकराः स्मृताः ॥
विषजन्मा यथा जन्तुर्विषदोषैर्न हन्यते ॥ २२१ ॥
त्रिदोषवशगो नागो न दोषप्रकृतिर्भवेत् ॥
रसाधिक्योपयोगेण(न) दोषाः स्युः स्वगुणाधिकाः ॥ २२२ ॥
शुक्रार्तवसमायोगस्तैश्चाऽऽदावनुभाव्यते ॥
पित्तादीनां त्रयाणां च कार्यं यत्र हि च द्विपे ॥ २२३ ॥
दृश्यते तद्विशेषाग्रेः स तद्योनिरिति स्मृतः ॥
दोषसात्म्यात्त्वसौ भद्रः समधातुः प्रकीर्तितः ॥ २२४ ॥
सर्वजात्याधिकैस्त्वेदस्तस्य लक्षणसंपदः ॥
भद्रश्च राज्ञो भूत्यर्थमिति तज्ज्ञाः प्रचक्षते ॥ २२५ ॥
प्रतिमाने सुविपुलश्चारुपृष्ठायताननः ॥
मुखे सुरभिनिश्वासस्ताम्रजिह्वोष्ठतालुकः ॥ २२६ ॥
पीनाण्डकोशः सुश्रोताः सुदीर्घाङ्गुलिपुष्करः ॥
स्वायतेनानुवृत्तेन करेण च करी पुनः ॥ २२७ ॥
सुप्रभूतान्तरमणिर्व्यस्तपीनस्तनान्तरः ॥
तथा व्यूढमहोरस्को महांसो विपुलासनः ॥ २२८ ॥

१ क. °लश्चैष । २ क. °तीक्ष्णोस्तस्येष्टं प्रा° । ३ क. च शब्दला° । ४ क. °जस्था न ते । ५ क. °कस्नेहस्त° । ६ क. °नः ॥ ऋजुभिश्च सुनिर्वृत्तैर्यु° ।

शिराभिर्वलिभिर्मुक्तैर्युक्तो गात्रैः समाहितैः ॥
इषीके चाक्षिकूटे च कुम्भश्चावग्रहेऽपि च ॥ २२९ ॥
कटौ च सगदौ वाऽपि दन्तवेष्टौ तथैव च ॥
अनुत्सन्ना अनिम्नाश्च प्रदेशास्तस्य कीर्तिताः ॥ २३० ॥
तथैषां तुल्यसंस्थानौ दन्तौ चापि विशेषतः ॥
मधुपिङ्गलनेत्रश्च मधुदन्तश्च दन्तिनः ॥ २३१ ॥
स्निग्धौ च परिनिम्नौ च समौ चापि प्रमाणतः ॥
कर्णौ सूक्ष्माण्डरोमाणौ ज्ञेयौ तस्य विपश्चिता ॥ २३२ ॥
समानवर्णैर्मृदुभिः सूक्ष्मैः स्निग्धैस्तनूरुहैः ॥
एकजाश्रितरोमा च स्वायतव्यायतच्छविः ॥ २३३ ॥
मांसैः स्थिरैः समग्रैश्च यथाभागैः प्रतिष्ठितैः ॥
तनुभिर्बहुभिश्चैव सर्वतः स विभूषितः ॥ २३४ ॥
मोहौ च पलिहस्तौ च पलिपादौ च यस्य तु ॥
श्लक्ष्णाश्चानुपदिग्धाश्च तथा चैककचाविलाः ॥ २३५ ॥
महाशिरोधरांसश्च संलक्ष्येत च यस्य तु ॥
अपस्कारप्रदेशौ च नाहायामसमन्वितौ ॥ ३६ ॥
ताम्रपल्लवसंकाशमेहनः स्थिरविक्षपात् ॥
दीर्घवालधिबालश्च समपार्श्वस्तथा च यः ॥ ३७ ॥
गूढोत्कृष्टोऽल्पनिष्कोशः पुरस्तादुत्सृ(च्छ्रि)तस्तथा ॥
धनुर्विनतवंशश्च समसद्गन्धनोऽपि च ॥ ३८ ॥
अविक्षिप्तान्तरैः स्निग्धैः स्थिरैरपि खरैरपि ॥
समुद्धृतार्धचन्द्रैश्च वर्णसंस्थानयोगिभिः ॥ ३९ ॥
विंशत्या च नखैर्युक्तो योऽष्टादशभिरेव वा ॥
यो नोपदिग्धो न तनुस्तनुरन्ध्रस्तनूदरः ॥ २४० ॥
समसंस्थानबन्धश्च सप्तधातुष्ववस्थितः ॥
तं नागं वनसंस्थं हि नाम्ना जात्युपलक्षितम् ॥ ४१ ॥
भद्रमित्येव जानीयाच्चिह्नैरेतैः शरीरजैः ॥
स शीतातपवातानां सोढा संवेगकारिणाम् ॥ ४२ ॥
द्रुमाद्रिशिखराणां च कूलानां पततामपि ॥
अशनेर्वातवृष्टीनां स्तनयित्नोश्च चिन्तनम् ॥ ४३ ॥

---

१ क. °प्रदर्शौ च ।

आवेगमदनाविघ्नः श्रुत्वा हर्षं स गच्छति ॥
वृद्धान्हरति कामार्तः संजिघ्रति समन्ततः ॥ ४४ ॥
शब्दानप्यतिवृद्धश्च हृष्टः संपरिजीवति ॥
अथ दीप्ता दिशो घोराः प्रसृताश्चै दवाग्नयः ॥ २४५ ॥
ज्वलिताश्चाग्निसंघाताः क्षिप्रभ्रान्तांश्च विद्युतः ॥
तथैवान्यानि रूपाणि दृष्टानि सुबहून्यपि ॥ ४६ ॥
भीषयन्तीह नैवैतं भमान्युद्वेजनानि च ॥
वनस्थ एव स गजः स्वयूथमनुपालयेत् ॥ ४७ ॥
अनेन खलु विज्ञेयो वने सत्त्वेन सात्त्विकः ॥
चर्यायां चाग्रतः स्थित्वा यूथमेकोऽभिरक्षति ॥ ४८ ॥
ईरितः कोपमादत्ते क्षिप्रं चैवोपशाम्यति ॥
आरक्ष(क्ष्य)माणः पुरुषैर्भक्ष्यं खादेदनाकुलः ॥ ४९ ॥
इति चर्यासमुद्दिष्टं तस्येदं सत्त्वलक्षणम् ॥
जातियूथांवसाहार्यं(?) पुनः कर्मणि कीर्त्यते ॥ २५० ॥
अन्वर्थवेदी शूरश्च क्षमावान्न च कर्कशः ॥
कल्याणमेधा ते(स्ते)जस्वी सदासंतापवर्जितः ॥ ५१ ॥
समज्योतिः समाहारः सात्त्विकः शीलवांश्च यः ॥
तथा मशकदंशस्य संतापानां च स क्षमः ॥ ५२ ॥
तोत्राङ्कुशनिमित्तानामन्येषां च पृथक् पृथक् ॥
सोढा स तीक्ष्णस्पर्शानामिति ज्ञेयः क्रियागतः ॥ ५३ ॥
एवं वने चै चर्यायां क्रियायां चापि कीर्तितम् ॥
यथागमं मया सम्यक्संपूर्णं भद्रलक्षणम् ॥ ५४ ॥
समधातुशरीरस्य तस्यायमशनाश्रयः ॥
प्राप्तसामान्यभोज्यस्य विशेषोऽत्र विवक्षितः ॥ २५५ ॥
कफपित्तानिलानां हि समृद्ध्या वर्धते द्विपः ॥
एषामेव समेतानां हान्यां च परिहीयते ॥ ५६ ॥
तस्माद्रससमायोगो यस्त्रिदोषाभिवृद्धये ॥
तत्तस्मै कुशलो युक्त्या नित्यमेव प्रदापयेत् ॥ ५७ ॥
प्रवृद्धबलसत्त्वं च ततस्तं कर्मणि क्षिपेत् ॥
लघुना साधयेच्चैनं न कर्म गुरु कारयेत् ॥ ५८ ॥

---

१ क. °तिवन्धश्च । २ क. °अन्दनाग्न° । ३ क. °थाचसा° । ४ क. न ।

सहसैवाहितं तस्य तीक्ष्णदण्डावधारणम् ॥
क्रमेण चानुबध्नीयात्तस्माद्यत्रैः पृथग्विधैः ॥ ५९ ॥
अङ्कुशैः प्राजनैश्चापि यथार्थं प्रहरन्बुधः ॥
क्रिया साफल्यमाप्नोति प्रोक्ता विदितवेदिता ॥ २६० ॥
ऋजुरेव तथा शीघ्रो मुक्तोऽथ लघुरेव च ॥
भद्रः प्रसिद्धिमाप्नोति क्रियया नान्यथा नृप ॥ ६१ ॥
ऋजुः समाहितमनाः शीघ्रो दक्षस्तु वर्ण्यते ॥
मुक्तो विशदचेष्टस्तु लघुपूर्वानुगः स्मृतः ॥ ६२ ॥

—:():—

यस्मिंस्तेषां त्रयाणां च सत्त्वलक्षणसंकरम् ॥
पश्येत्संकीर्ण इति तं विद्वान्वारणमादिशेत् ॥ ६३ ॥
मारुतव्यपदेशिन्याः प्रकृत्या व्यपदेशतः ॥
प्रसिद्धलक्षणश्चैवं भूयो लक्षणमुच्यते ॥ ६४ ॥
स्तब्धरोमप्रच्छविः सत्त्वे शरीरे वाऽनवस्थितः ॥
पुरुषस्य च नागस्य सरूक्षदशनेक्षणः ॥ २६५ ॥
बहुवर्णो विरूपाक्षः स्थूलपादनखस्तथा ॥
चपलस्तीव्रकामश्च धेनुकासु विशेषतः ॥ ६६ ॥
अशुच्याचारयुक्तश्च तूर्णगः सततोत्थितः ॥
अल्परोमनखः सर्वैः स्थूलैश्चापि प्रभेदिभिः ॥ ६७ ॥
विद्धाङ्गः कोपनो भीरुर्विवृतैः संधिभिर्युतः ॥
स्नायुभिश्च शिराभिश्च तनुगात्रापरान्वितः ॥ ६८ ॥
नित्यमुत्थापितश्रोता विशेषाग्निर्महाशनः ॥
शकृन्मूत्रं ततो भिन्नमल्पाल्पं परिमुञ्चति ॥ ६९ ॥
विषमः कर्मसु सदा स्थाने वाऽप्यनवस्थितः ॥
नम्रमुखश्चलचित्तश्च भाराध्वगमने क्षमः ॥ २७० ॥
लघुचेष्टोऽल्पमेधश्च बले चापि विगर्हित ः॥
चिरग्राही क्रियायां तु विस्मर्ता चापि वारणः ॥ ७१ ॥
मृगपादसमाः पादा मुखं भद्रमुखाकृति ॥
तथा पृष्ठोदरं चास्य मन्दपृष्ठोदरोपमम् ॥ ७२ ॥

---

१ क. °स्माद्योत्रैः पृ° । २ क. विदितवेदितौ । ३ क. यथा तेषां । ४ क. ख. सकृन्मूत्रं ।

चतुर्भिरेव लिङ्गैस्तु लिङ्गितं जातितो गजम् ॥
तं संकरज्ञः संकीर्णं याज्ञवल्क्योऽभिमन्यते ॥ ७३ ॥
स एवाभ्यवहारोऽस्य त्रिषु शुद्धेषु यः स्मृतः ॥
संकीर्णलक्षणापेक्षो विशेषस्तत्र कीर्त्यते ॥ ७४ ॥
(*स्वाद्वम्ललवणैः स्निग्धैः क्षिप्रमाप्यायते रसैः ॥
कटुतीक्ष्णकषायैस्तु रोगमाशु प्रपद्यते ॥ २७५ ॥
तस्मादेवं विभागज्ञो बलमाधाय योगवित् ॥)
सर्वंव्यञ्जनसंकीर्णं भिषक्कर्म समादिशेत् ॥ ७६ ॥
वेदनार्तमसंमूढो विविधैः प्राजनाङ्कुशैः ॥
यथाजाति प्रदेशांस्तान्कर्ता कर्मसु संस्पृशेत् ॥ ७७ ॥
येन योऽभ्यधिकः स्यात्तु तस्मिल्लँक्षणसंकरे ॥
तन्मना इति तेनासौ चिह्नेन व्यपदिश्यते ॥ ७८ ॥
एवंवादिषु चैकेषु पूर्वाचार्येषु बुद्धिमान् ॥
अष्टादशैव संकीर्णा जातीर्जानाति काश्यपः ॥ ७९ ॥
एकद्विरूपास्तस्याग्रे नवान्यमनसो द्विपाः ॥
द्वित्रिरूपाः सुमनसो नवैवेति विनिश्चयः ॥ २८० ॥
*भद्रो मन्दमनास्तत्र भद्रो मृगमनाश्च यः ॥
भद्रो भद्रमना नागो मृगो मन्दमनास्तथा ॥ ८१ ॥
इत्येकरूपयोगेन षडन्यमनसो गजाः ॥
द्विरूपसमवायेन वक्ष्यन्तेऽत्र त्रयः पुनः ॥ ८२ ॥
भद्रमन्दशरीरेण ज्ञेयो मृगमना गजः ॥
तथा भद्रमृगश्चापि †मन्दत्वमनसा गजः ॥ ८३ ॥
चेतसाऽभिप्रपन्नश्च मृगमन्दोऽपि भद्रताम् ॥
भद्रो मन्दमनास्तत्र भद्रो मन्दगतिस्तथा ॥ ८४ ॥

---

* धनुराकारमध्यस्थो नास्ति पाठः कपुस्तके ॥ *'मन्दो भद्रमना नागो मन्दो मृगमनास्तथा। मृगो भद्रमना नागो मृगो मन्दमनास्तथा' इत्येव पाठो भवितुमर्हति वक्ष्यमाणषट्संख्यानुरोधात्। † 'मन्दत्वम्' इति पाठो भवेत् ॥

---

१ ख. लिङ्गिनं। २ ख. °ल्क्यो विम°। ३ ख. °र्जानीहि पार्थिव ॥ ए°। ४ ख. °र॰। ५ क. °त्येष रू°। ६ क. ° न्ते तत्र यः। ७ क. गतः। ८ क. ९ क. °।

मृगस्वरूपसंपन्नो मन्दश्चे(चे)ष्टश्च वारणः ॥
इत्येकरूपयोगेन त्रयोऽन्यमनसो गजाः ॥ २८५ ॥
तथा मन्दमृगश्चापि मृगत्वं मनसा गतः ॥
मृगमन्दश्च भद्रश्च मनसाऽपि गतः सदा ॥ ८६ ॥
सर्वभद्रस्तथा चैव भवेद्भद्रमना गजः ॥
एवं त्रयश्च षट् द्वौ च नवान्यमनसो गजाः ॥ ८७ ॥
वक्ष्यन्ते द्वित्रिरूपाश्च तथा स्वमनसो नव ॥
द्विरूपसंकरे यच्च नाम पूर्वं निपात्यते ॥ ८८ ॥
तस्मिन्करोति तत्सत्त्वमिति सर्वेषु निश्चयः ॥
भद्रमन्दोऽपि यस्तत्र स भद्रो मनसा भवेत् ॥ ८९ ॥
तथा भद्रमृगो यश्च सोऽपि भद्रमना गजः ॥
मन्दभद्रश्च मन्दत्वं चेतसाऽपि प्रभिद्यते ॥ २९० ॥
मृगता मृगभद्रस्य व्यतिक्रमणचेतसः ॥
मृगमन्दो मृगत्वं च मनसा संप्रकाशयेत् ॥ ९१ ॥
तथा मन्दमृगो यश्च मन्दत्वं मनसा गतः ॥
मृगतां मृगभद्रश्च संप्राप्तश्चेतसा गजः ॥ ९२ ॥
मृगमन्दो मृगस्यैव मनसा संप्रकाश्यते ॥
इति द्विरूपयोगेन षडेते परिकीर्तिताः ॥ ९३ ॥
त्रिरूपाश्च त्रयोऽन्ये तु स्वमनोभिः समन्विताः ॥
त्रिरूपसंकरे चास्मिन्समनस्त्वः स्थितिर्भवेत् ॥ ९४ ॥
इत्येष बुद्धिप्रसरश्चिन्ताविचेन पठ्यते ॥
एवं नव नवैवोक्ताः पुरस्तात्परिसंख्यया ॥ २९५ ॥
अष्टादशैव संकीर्णाः काश्यपेनोपपादिताः ॥
मृगो भद्रश्च मन्दश्च मन्दो मृगमनास्तथा ॥ ९६ ॥
मृगो मन्दमनाश्चान्ये व्यतिकीर्णश्च वारणः ॥ ९७ ॥
इति जाताः षडेवात्र जातितन्त्रोपदेशवित् ॥
निश्चित्य बुद्धो भगवान्गजानामाह गौतमः ॥ ९८ ॥
मृगो भद्रश्च मन्दश्च मन्दो मृगमनास्तथा ॥
चतस्रो जातयस्त्वेवं राजपुत्रमते स्मृताः ॥ ९९ ॥

१ क. °तसा । मृ° । २ क. यथा । ३ क. °गश्चैव । ४ क °नस्त्वास्थिभिर्भ° । ५ ख. जाती । ६ क. °देशिवत् ।

मृगः शुद्धोऽथ मन्दश्च मृगमन्द्रस्तथाऽपरः ॥
भद्रभावे मृगस्येह तन्मयत्वं कथं भवेत् ॥ १०० ॥
अधिकत्वेऽपि तस्यैवेमरिमेदिनं मृष्यते ॥
एवं च ब्रुवतस्तस्य चतस्रो जातयो मताः ॥ १ ॥
मृगो भद्रश्च मन्दश्च संकीर्णश्चेति तन्मनाः ॥
एवं विप्रतिपन्नेषु पूर्वाचार्येषु बुद्धिमान् ॥ २ ॥
हस्तिचारी तु भगवाञ्जातीः षोडश मन्यते ॥
सर्वव्यञ्जनपूर्णास्तु शुद्धा भद्रादयस्त्रयः ॥ ३ ॥
भद्रो मन्दमनाश्चान्यो भद्रो मृगमनास्तथा ॥
संकीर्णो मनसा भद्र इत्येताः सप्त जातयः ॥ ४ ॥
मन्दो भद्रमना ज्ञेयो मन्दो मृगमनाः पुनः ॥
मन्दः संकीर्णचेताश्च देश संख्याः समर्थिताः ॥१०५ ॥
मृगो भद्रमना दृष्टो मन्दश्च मनसा मृगः ॥
मृगः संकीर्णचेताश्च संख्या एतास्त्रयोदश ॥ ६ ॥
भद्रमन्दशरीरेण मृगस्य मनसा युतः ।
तथा भद्रमृगश्चापि मन्दचेता मतङ्गजः ॥ ७ ॥
यश्च मन्दमृगो योन्या दृष्टो भद्रमतिर्गजः ॥
तेन सार्धमिमास्तस्य जाताः षोडश जातयः ॥ ८ ॥
संकीर्णाः सुलभाः शुद्धा दुर्लभास्तु मृगादयः ॥
हेतुभिर्बहुधिष्ठानैर्यैरेता गजजातयः ॥ ९ ॥
प्राप्नुवन्ति बहून्दोषान्वक्ष्यन्ते ते मयाऽधुना ॥
प्रकृत्या हीयते कश्चित्कश्चिद्वा विनयाद्गजः ॥ ११० ॥
अप्रभावात्तथाऽन्यश्च मिथ्याविनयतोऽपरः ॥
अनानुपूर्व्या संतापात्तीक्ष्णदण्डैश्च घातनात् ॥ ११ ॥
स मिथ्याविनयाद्धोरांश्छेद्गात्रे व्यथान्तरः ॥
एवं विवर्णो विमनाः कृशः पर्यश्रुलोचनः ॥ १२ ॥
मोहाद्दण्डविचारेण मूढो भवति वारणः ॥
गुरुणाऽतिप्रवृद्धेन बन्धेनात्यायतेन वा ॥ १३ ॥

---

१ क. गजस्येह । २ क. °व परिमर्दिनमृ° । ३ क. °यश्च ये ॥ भ° । ४ क. °श्चान्ये भ° । ५ क. देशसंख्या । ६ क. °गोऽन्यो यो द्द° । ७ क. °रान्मृच्छोभाद्धियतां गतः ॥ ए° ।

मोहाद्रन्धप्रमादाद्वा बन्धाद्दुद्विजते द्विपः ॥
दन्तिनां तु विशेषेण तत्प्रमाणाधिको हि यः ॥ १४ ॥
संवन्धो बन्धकुशलैर्गुरुरित्यभिशब्दितः ॥
उच्छ्वासमुपरुन्ध्याद्यो गात्रसंचारमेव वा ॥ ३१५ ॥
संबन्धसंज्ञया तज्ज्ञैरत्यायत इति स्मृतः ॥
भूपश्चोपरिविक्षेपादेलकाकृक्षा(?) च योगतः ॥ १६ ॥
सोऽतिप्रबन्धो विज्ञेयो बन्धो यो दुष्प्रमादतः ॥
एवं दोषं व्यवस्यन्ति तस्मादभ्यधिको हि यः ॥ १७ ॥
परिक्षेपातिबाहुल्याद्दन्तिनां हस्तिनां परे ॥
एवं बन्धोद्भवैर्दोषैः प्राप्नुवन्त्यत्र कुञ्जराः ॥ १८ ॥
रोगांश्च दोषैर्गात्राणां हानिं च बलतेजसाम् ॥
कर्मणाऽतिप्रवृद्धेन योक्तुरज्ञानजेन वा ॥ १९ ॥
तथा च क्रियमाणेन [1]नित्यं दुष्यन्ति वारणाः ॥ ३२० ॥
यो हि जातिविभागं तु सत्त्वानूकं च तत्त्वतः ॥
अबुद्ध्वा योजयेत्कर्म स भद्रानपि दूषयेत् ॥ २१ ॥
यस्तु लक्षणनिर्देशं विदित्वा कर्म योजयेत् ॥
असंशयं स मतिमान्संकीर्णानपि साधयेत् ॥ २२ ॥
अन्योन्यकर्मव्यत्यासात्तेषु सिद्धिर्न विद्यते ॥
यथोपदेशयोगाद्धि सर्वाः सिध्यन्ति जातयः ॥ २३ ॥

पित्तं गर्भे शयानस्य त्वचं चेत्प्रतिपद्यते ॥
कालो भवति मातङ्गो श्लक्ष्णस्निग्धदर्शनः ॥ २४ ॥
श्लेष्मा मारुतसंसृष्टस्त्वचं यद्यनुगच्छति ॥
(*श्यामो भवति मातङ्गो श्लक्ष्णः स्निग्धदर्शनः ॥ ३२५ ॥
श्लेष्मा गर्भे शयानस्य त्वचं चेत्प्रतिपद्यते ॥
हरिर्भवति मातङ्गो श्लक्ष्णः स्निग्धदर्शनः ॥ २६ ॥
पित्तं मारुतसंसृष्टं त्वचं यद्यनुगच्छति ॥)
कालः परुषवर्णाभो निःस्नेहस्तेन जायते ॥ २७ ॥

---

* धनुराकारमध्यस्थो नास्ति पाठः खपुस्तके ।

---

१ क. °कायापि यो° । २ क. ध्वनिं । ३ क. दुष्यति वारणः । ४ क. °संश्लिष्ट° ।

(*पित्तं श्लेष्मा च वातश्च प्रपद्यन्ते यदि त्वचम् ॥
श्यामः परुषवर्णाभो निःस्नेहस्तेन जायते ॥ २८ ॥
कफस्त्वनिलसंसृष्टस्त्वचं यद्यनुगच्छति ॥
हरितारुणवर्णाभो निःस्नेहस्तेन जायते ॥ २९ ॥)
असृग्गर्भे शयानस्य (†त्वचं चेदनुधावति ॥
हरिः श्यामोऽथ रक्तो वा स तु रक्तच्छविर्भवेत् ॥ ३० ॥
वायुः पित्तं च रक्तं च त्वचं ह्यनुविधावति ॥
ततोलूकसवर्णाभा छविर्नागस्य जायते ॥ ३१ ॥
पित्तं गर्भे शयानस्य नखेषु यदि लीयते ॥
संभवेयुर्नखाः काला वारणस्य महीपते ॥ ३२ ॥
श्लेष्मा पित्तेन संसृष्टो नखेषु यदि लीयते ॥
श्यामान्येव नखानि स्युरत्र मे नास्ति संशयः ॥ ३३ ॥
श्लेष्मा गर्भे शयानस्य) नखेष्वालीयते यदि ॥
श्वेतान्येवं नखानि स्युरत्र मे नास्ति संशयः ॥ ३४ ॥

पित्तं गर्भे शयानस्य तालुके यदि जायते ॥
तेनास्य तालुकं कृष्णं जायते नात्र संशयः ॥ ३३५ ॥
कफः पित्तं च वातश्च तालुके लीयते यदि ॥
कल्माषतालुर्मातङ्गः संभवेन्नात्र संशयः ॥ ३६ ॥
असृग्गर्भे शयानस्य तालुके यदि लीयते ॥
तेन पद्मपलाशाभं तालु नागस्य जायते ॥ ३७ ॥
तालुके चैव व्याख्यातं जिह्वौष्ठं दन्तिनां शृणु ॥
रक्तं नीलं तु कल्माषं वातपित्तकफादिभिः ॥ ३८ ॥

—:○:—

पित्तं रुधिरसंसृष्टं चक्षुष्याधीयते यदि ॥
[1]पिङ्गाक्षस्तेन मातङ्गो जायते नात्र संशयः ॥ ३९ ॥
कफोऽनिलेन संसृष्टश्चक्षुश्चेत्प्रतिपद्यते ॥
हर्यक्षस्तेन मातङ्गो जायते नात्र संशयः ॥ ३४० ॥

* धनुराकारमध्यस्थौ श्लोकौ न स्तः खपुस्तके । † धनुराकारमध्यस्थाः श्लोका भ्रष्टाः खपुस्तके ॥

१ क. पिशङ्गास्तेन मातङ्गा जायन्ते ना° ।

वातः पित्तं च श्लेष्मा च चक्षुष्याधीयते यदि ॥
सत्पक्षासनमातङ्गो जायते नात्र संशयः ॥ ४१ ॥
पित्तं रुधिरसंसृष्टं चक्षुषी तु व्रजेद्यदि ॥
काकाक्षस्तेन मातङ्गो जायते नात्र संशयः ॥ ४२ ॥
संश्लिष्टं श्लेष्मणा पित्तं चक्षुषी यदि गच्छति ॥
श्वेताक्षस्तेन मातङ्गः कालवारक एव च ॥ ४३ ॥
असृग्गर्भे शयानस्य यदि चक्षुषि लीयते ॥
पारापताक्षः स गजो जायते नात्र संशयः ॥ ४४ ॥
रक्तं श्लेष्मा च पित्तं च यदि चक्षुषि लीयते ॥
मध्वक्षस्तेन मातङ्गो जायते नात्र संशयः ॥ ३४५ ॥
विषमाक्षश्च वातेन विरूपाक्षश्च जायते ॥
नानानिमेषो मातङ्गः पित्तश्लेष्मगतिर्हि सः ॥ ४६ ॥
विषमेष्वतिभारेण हस्तिनी यदि पीडिता ॥
मिथ्याकर्मणि आयासादूष्मा संजायते भृशम् ॥ ४७ ॥
सा चेद्यदूष्मसहिता तोयं समवगाहते ॥
नेत्रे तेनोपहन्येते गर्भस्थस्योष्मणा नृप ॥ ४८ ॥
ऊष्मणा पच्यमानस्य चक्षुर्हन्येत हस्तिनः ॥
जात्यन्धस्तेन मातङ्गो जायते नात्र संशयः ॥ ४९ ॥

गर्भे यदा शयानस्य जानुनी प्रतिपद्यते ॥
उभयोर्गात्रयोरन्तर्मारुतः संचरेन्नृप ॥ ३५० ॥
निर्भुज्यते स गात्रेषु विकटस्तेन जायते ॥
वारणः पृथिवीपाल नास्ति तत्र विचारणा ॥ ५१ ॥

पृथुत्वाच्चानु नागानां रोमकूपैर्न गच्छति ॥
प्रस्वेदः पृथिवीपाल शीतसात्म्या ह्यतः स्मृता ॥ ५२ ॥
स्नायुबद्धा छविश्लेषा गाढरोमा च जायते ॥
अन्तःस्वेदा बलाधिक्यात्तस्मान्नागो नृपोत्तम ॥ ५३ ॥

---

१ क. च चक्षुषी यदि ली° । २ क. सा । ३ क. °पु कीक° । ४ क. °गान्नृपो° ।

निर्वेदा मातृका यस्माद्धस्ते चैव मुखे तथा ॥
तस्मान्मुखाच हस्ताच स्वेदो गच्छति दन्तिनाम् ॥ ५४ ॥

—

इमे महान्तो बलिनो जातकामा मनस्विनः ॥
प्रशस्तव्यञ्जना नागा वृषणैश्चाप्रलम्बिभिः ॥ ३५५ ॥
वोढव्यं तु भविष्यन्ति मनुष्याणामनेकपाः ॥
तस्मात्करीषप्रस्तावे वृषणौ संप्रवेष्टितौ ॥ ५६ ॥

—:○:—

म्लानशिरा म्लानमुखो *विषमो बधिरश्च यः ॥
पुटकर्णो वक्रवालः पक्षहीनस्तथैव च ॥ ५७ ॥
कुष्ठी किलासी विनतः कोणः षण्ढोऽथ वामनः ॥
कुब्जः किलासिमेण्ढ्रश्च हीनाङ्गो यश्च वारणः ॥ ५८ ॥
पश्चाङ्गैर्विषमैर्नागो दृश्यते मनुजाधिप ॥
वातपित्तोपघातेन जायते नात्र संशयः ॥ ५९ ॥

—

बाह्यान्तेरविषाणाभ्यामन्तरे दन्तवेष्टयोः ॥
वायुः कुप्यति नागस्य विशालस्तेन जायते ॥ ३६० ॥
दन्तयोरुपरिष्टाच्चेदधस्तादपि वेष्टयोः ॥
वायुः कुप्यति नागस्य तदा वा कालसंभवः ॥ ३६१ ॥
दन्तवेष्टान्तयोश्चैव दन्ताभ्यां बाह्यतस्तथा ॥
वायुः कुप्यति नागस्य सदन्तस्तेन जायते ॥ ६२ ॥
विषाणादन्तरे यच्च अन्तरे दन्तवेष्टयोः ॥
एकश्च वायुश्चरति साधुस्तेनोपजायते ॥ ६३ ॥
अन्तरे च विषाणस्य दन्तवेष्टस्य चान्तरे ॥
वायुः कुप्यति नागस्य जायतेऽतस्त्वपाहलः ॥ ६४ ॥
श्लेष्मा मारुतसंश्लिष्टो दन्तवेष्टौ निषेवते ॥
विषाणे तेन जायेते $अस्थिश्वेते तु दन्तिनाम् ॥ ३६५ ॥

---

* 'विकटो' इति प्राक्प्रश्नोद्देशे । † 'ह्रस्ववालः' इति प्राक् । $ 'अतिश्वेता' इति प्रश्नोद्देशे ।

---

१ क. °बद्धमा° । २ क. वाहनत्वं । ३ ख. वक्रपवा° । ४ क. परिक्षीणस्त° । ५ क. काण° ऽथ । ६ क. °न्तोरे वि° । ७ क. एकस्य ।

असृग्गर्भे शयानस्य यस्य वेष्टौ निषेवते ॥
विषाणे तस्य जायेते वारणस्य मधुप्रभे ॥ ६६ ॥
मन्दीभूतो यदा वायुर्दन्तवेष्टौ निषेवते ॥
म्लाने विषाणे तेनास्य जायेते ग्रन्थयोऽपि वा ॥ ६७ ॥
दन्तयोर्मारुतो यस्य मूलयोर्नावतिष्ठति(ते) ॥
समदन्तस्ततो नागो जायते नात्र संशयः ॥ ६८ ॥
संजातदन्तवेष्टस्य मुखे कुप्यति मारुतः ॥
विषाणावुपहन्येते मूढस्तेनोपजायते ॥ ६९ ॥
नवमे दशमे वाऽपि हस्तिनी यदि पीडिता ॥
निःस्नेहायां खरीभूतो भृशं कोपमुपागतः ॥ ३७० ॥
यश्चूष्मसहितो वायुर्दन्तमूले निषेवते ॥
विषाणावुपहन्येते मत्कुणस्तेन जायते ॥ ७१ ॥
वायुर्गर्भे शयानस्य दन्तमूले निषेवते ॥
न तत्र दन्तौ जायेते यत्र कुप्यति मारुतः ॥ ७२ ॥
यस्यैकदन्तवेष्टं तु मारुतः संनिषेवते ॥
एकदन्तः स मातङ्गो जायते नात्र संशयः ॥ ७३ ॥
यस्य पोतस्य जातस्य मूर्तौ कुप्यति मारुतः ॥
संजातदन्तवेष्टस्य एकमात्रोपहन्यते ॥ ७४ ॥
(*एकभावस्तु संपूर्णं यत्र वातो न कुप्यति ॥
वामोन्नतो वा भवति त्वथवा दक्षिणोन्नतः ॥ ३७५ ॥
एकः संजायते तत्र एकश्चैवोपहन्यते ॥)

—:():—

वायुर्गर्भे शयानस्य कुप्यत्येकाङ्गसंधिषु ॥ ७६ ॥
म्लानगात्रः स मातङ्गो जायते नात्र संशयः ॥
असृग्गर्भे शयानस्य वारणस्योपहन्यते ॥ ७७ ॥
मारुतेन यदा राजन्स्तब्धस्तेन नियच्छति ॥
हस्तिन्यां तु प्रहृष्टायां प्रभिन्नेनाथ जायते ॥ ७८ ॥

---

* अयं सार्धश्लोकः 'वायुर्गर्भे'—इत्यर्धोत्तरं कपुस्तके ॥

---

१ क. जायन्ते । २ क. निस्नेहानां । ३ क. ख. °धूष्मास° । ४ क. °स्तेनोपजायते ॥ ह° ।

सम्यग्गर्भेऽपरिक्लिष्टो ह्यक्लिष्टायामदुर्लभः ॥
एष नागो महाराज यावदायुर्मदोत्कटः ॥ ७९ ॥
न च दोषाः [1]प्रधावन्ति शब्दाद्यास्तमनेकपम् ॥
भवक्षीणेन यो जातः क्षीणायां चैव मातरि ॥ ३८० ॥
जनितश्चाप्यहृष्टाभ्यां यः [2]क्लिष्टश्चोदरे भृशम् ॥
एष मत्तो न भवति यावदायुर्मतङ्गजः ॥ ८१ ॥
स च नित्यं महाराज भवेत्प्रकृतिदुर्बलः ॥
[3]आहाराचारवैगुण्यादभिघाताच्छ्रमाद्भयात् ॥ ८२ ॥
गर्भिण्याः कुपिता दोषा गर्भा(र्भ)जीवितनाशनाः ॥
ऋतुमैथुनशुक्राणां वैगुण्याच्छोणितस्य च ॥ ८३ ॥
[4]इष्टासात्म्योपभोगाच्च दोहृदस्य विमाननात् ॥
अशुभात्कर्मणोऽल्पायुर्दीर्घायुश्च [5]शुभाद्भवेत् ॥ ८४ ॥
मुहूर्ततिथिनक्षत्रैः करणैः शोभनैर्गजः ॥
सुलक्षणः सुरूपेण यथावत्प्रतिपादितः ॥ ३८५ ॥
देवब्राह्मणगन्धर्वगुणैरन्यतमैर्वृतः ॥
पथ्यैः शुचिभिराहारै रसैश्च परिबृंहितः ॥ ८६ ॥
स च वीर्यविपाकेन तथा गर्भबलेन च ॥
धन्य एव भवेन्नागो विपरीतस्ततोऽन्यथा ॥ ८७ ॥
भूतानां व्यतिरेकाच्च मातृजैः पितृजात्मजैः ॥
एभिर्भावैस्तु निष्पत्तिर्यथा भूतेषु षड्रसान् ॥ ८८ ॥
तेजस्वी तेज उद्रेकात्सत्त्वाच्चैव भवेद्गजः ॥
तेजःसत्त्वक्षितीनां स्यादुद्रेकाद्बलवान्गजः ॥ ८९ ॥
अग्निर्वायुर्म[6]चुरत्वाद्गर्भे पुष्टो भवेद्बलात् ॥
[7]शुद्धात्मा भावैः स्यात्सर्वैरुद्रिक्तैः सात्त्विको गजः ॥ ३९० ॥
तेजोधरित्रीपितृजैरुद्रिक्ते रूपवान्भवेत् ॥
तेजोनभोनिलोद्रेकाच्छुद्धश्चाऽऽहारजाद्रसात् ॥ ९१ ॥
आरोग्यमेव भवति शुद्धसत्त्वानलानिलैः ॥
पञ्चभूतसमत्वे तु समुद्रेकादभीरुता ॥ ९२ ॥

---

१ क. प्रबाधन्ते । २ क. क्लिष्टो वोद° । ३ क. °हारे चैव वै° । ४ क. इच्छासा° । ५ क. शुभो भवे° । ६ क. °प्रचार° । ७ क. °द्धात्म्यभा° ।

सत्त्ववायुबलोद्रेकाद्भवेयुर्जवसंपदः ॥
मनसस्तद्गुणानां च पित्तप्रकृतिसत्त्वयोः ॥ ९३ ॥
समुद्रेकाद्भवेन्मेधा त्वष्टाङ्गा बुद्धिरेव च ॥
अन्वर्थोत्तानगम्भीरप्रत्यर्थात्यर्थवेदिता ॥ ९४ ॥
भद्रमन्दमृगत्वं च तथा च प्रकृतित्रयम् ॥
सर्वं जातिविभागेन प्रकृतौ च प्रवक्ष्यते ॥ ३९५ ॥
भक्ष्यं भोज्यं च पेयं च तथा लेह्यं च हस्तिनी ॥
अभीक्ष्णं यत्समादत्ते सेवते चापि गर्भिणी ॥ ९६ ॥
दौहृदं तं विजानीयात्तच्चैवास्यै प्रदापयेत् ॥
अनुकूले भवेद्गर्भो मातुस्तत्रोदरे रसान् ॥ ९७ ॥
एवमेके व्यवस्यन्ति मुनयो गर्भसंभवम् ॥
इति गर्भसमुत्पत्तिर्बुद्धिभेदः प्रवक्ष्यते ॥ ९८ ॥
क्रुद्धो भीतः प्रहृष्टो वा दुर्बलो बलवानपि ॥
शब्दैश्च जलदादीनां वने वित्रासितो भृशम् ॥ ९९ ॥
यादृशं भावमाश्रित्य गजो गर्भं निषिञ्चति ॥
यादृशो धेनुकां याति जनयेत्तादृशं सुतम् ॥ ४०० ॥
प्रकृतिः प्रकृतिज्ञाने वक्ष्यते ते त्रिधात्मिका ॥
तमःसत्त्वरजोयुक्ता या च दोषसमाश्रया ॥ १ ॥
शुक्रशोणितयोर्गर्भे गर्भनाशविचेष्टितम् ॥
दन्तिनां मानुषैस्तुल्यो दोषो दूष्येन्द्रियाणि च ॥ २ ॥
व्याधयश्च भवन्त्येषां प्रायशस्तुल्यलक्षणाः ॥
मातुर्या सात्म्यतश्चैव विशेषः प्रकृतेस्तथा ॥ ३ ॥
चेतना च मनो बुद्धिराकृतिश्च स्वभावतः ॥
आरोग्यं दौहृदं चापि सात्म्यजान्यायुरेव च ॥ ४ ॥
विज्ञानमिन्द्रियस्थानं सुखदुःखे प्रियाप्रिये ॥
तमो रजश्च सत्त्वं च गर्भस्याऽऽत्मजमिष्यते ॥ ४०५ ॥
क्षुत्पिपासासहिष्णुत्वं तृप्तिश्चैव तु सत्त्वजाः ॥
श्रोत्रं शब्दाश्च मूर्तिश्च विवेकश्चैव खानि च ॥ ६ ॥

---

१ क. °गे च प्र° । २ क. °माधत्ते । ३ क. °त्पत्तिबुद्धि° । ४ क. वक्ष्येते ते त्रिधात्मिके ॥ त° । ५ क. °योर्जन्म ग° । ६ क. °स्तुल्या दोषा दू° । ७ क. विशेषाः । ८ क. सत्त्वजाः ।

अन्तरिक्षात्मकानि स्युर्गर्भस्येह महीपते ॥
स्पर्शो ज्ञानं तथा हर्षो रौक्ष्यं चेष्टा च लाघवम् ॥ ७ ॥
प्राणापानौ समानश्च व्यानोदानौ च वायवः ॥
रूपं दृष्टिः पिपासा च पित्तमूष्मा च केवलम् ॥ ८ ॥
रागः पक्तिः प्रकाशश्च तैजसानीति निश्चयः ॥
रसज्ञानं रसाश्चैव स्नेहः क्लेदः कफस्तथा ॥ ९ ॥
अब्जान्येतानि गर्भस्य वेदितव्यानि तत्त्वतः ॥
(*घ्राणो गन्धश्च मूर्तिश्च स्थैर्यं गौरवमेव च ॥ ४१० ॥
पार्थिवानाह गर्भस्य वदन्ति नयकोविदाः ॥
तस्माद्गर्भस्तु पितृजो मातृजस्तत्स्वभावतः) ॥ ११ ॥
रससात्म्यात्मकश्चैव पञ्चभूतात्मकस्तथा ॥
जिह्वा नासाऽक्षिणी कर्णौ शिरोऽथ हृदयं गलः ॥ १२ ॥
नाभिर्बस्तिर्गुदश्चैव जीवस्याऽऽयतनानि वै ॥
परोक्षत्वादनिष्टं हि मन्यन्ते भूतसंभवम् ॥ १३ ॥
विचिन्त्य बहुशो बुद्ध्या विप्रो गौतमवाङ्गली ॥
कुमुदस्य समुत्पन्ना वामनस्याञ्जनस्य च ॥ १४ ॥
पुण्डरीकस्य च कुले सर्वव्यञ्जनपूजिताः ॥
ते(ये)षां मुक्ता विषाणेषु पुरीषेषु च रोचना ॥ ४१५ ॥
यस्य स्युस्ते च नृपतेः स राजा स्यादनिर्जितः ॥
वायुर्गर्भे शयानस्य यस्य सक्थि निषेवते ॥ १६ ॥
स नीचजघनः स्यात्तु पुरस्ताच्च समुच्छ्रितः ॥
वायुर्गर्भे शयानस्य मन्यासंधिषु कुप्यति ॥ १७ ॥
सोऽस्य नामयति ग्रीवां तेन मात्रविद्गजः ॥
शरत्काले तु संप्राप्ते प्रभूतयवसोदके ॥ १८ ॥
निर्दंशमशकेऽरण्ये मृगनेत्रासु रात्रिषु ॥
दिशो गजाश्च यूथानि समवेक्षन्ति पार्थिव ॥ १९ ॥
लीलया क्रीडमाना वै वनेषूपवनेषु च ॥
जनयन्ति च ते तत्र त्रिविषाणाननेकपान् ॥ ४२० ॥

* धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ॥

१ क. रागपक्तिप्रकाशाश्च । २ क. अत्यन्येतानि । ३ क. °त्मकाश्चै° । ४ क. °त्मकास्त° । ५ क. लोचना । ६ क. °भयेत्सति पा° ।

चतुर्विषाणांश्च गजान्द्विविषाणांस्तथैव च ॥
हस्तिनीनां प्रभावेण जायन्ते ते दिशां गजैः ॥ २१ ॥
प्रदक्षिणाश्च जायन्ते वारणाः पृथिवीपते ॥
द्विविषाणास्तु ये तत्र ग्रहणं यान्ति ते नृप ॥ २२ ॥
ते भवन्त्युत्तमा नागाः पूजिताः पृथिवीपते ॥
योगार्हास्ते महाराज च्छत्रार्हाश्चैव वारणाः ॥ २३ ॥
वारणा मधुपर्कार्हा मानार्हास्ते भवन्ति च ॥
ईदृशा यस्य मातङ्गाः सेवन्ते विषयान्नृप ॥ २४ ॥
पूजिता लक्षणैरेभिः स राजा त्वभिनन्दति ॥ ४२५ ॥
समुद्रवसनां कृत्स्नां सशैलवनकाननाम् ॥
चिरं च वसुधां या(पा)ति शत्रूंश्चाप्यधिगच्छति ॥ २६ ॥
बीजान्युप्तानि रोहन्ति सुभिक्षं चैव जायते ॥
अनावृष्टिर्न भवति मनोहानिर्न चैव हि ॥ २७ ॥
नोपद्रवाः प्रधावन्ति व्याधयश्च महीपते ॥
यस्य राज्ञः पुरे देशे वाहनेष्वात्मजेषु च ॥ २८ ॥
आप्नुयाद्विपुलां लक्ष्मीं स राजा यत्र वारणः ॥
सर्वकामसमृद्धिश्च जायते नात्र संशयः ॥ ४२९ ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने गर्भावक्रान्तिर्नामाष्टमोऽध्यायः ॥ ८ ॥

अथ नवमोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
गर्भः कथं संभवति संभूतः केन जीवति ॥ १ ॥
किं च प्रथमतस्त्वङ्गं गर्भस्थस्योपजायते ॥
किं मातृजं शरीरे च पितृजं वारणस्य किम् ॥ २ ॥
कति दन्ताः कति नखाः कति मर्माणि हस्तिनाम् ॥
कियन्मात्रं च रुधिरं पित्तं श्लेष्मा च मारुतः ॥ ३ ॥
वायुः कस्मिन्स्थितो देशे कस्मिन्पेशी च तिष्ठति ॥
क स्थितं रुधिरं चास्य पित्तं श्लेष्मा च दन्तिनः ॥ ४ ॥

---

१ क. °न्त्युपमा । २ क. ये च । ३ क. गर्भविक्रा° । ४ क. मातृकं ।

अन्नप्रमाणं किं चास्य किंमात्रश्चान्दुको गजे ॥
किंमात्रं क्लोम हृदये किंमात्रं फुप्फुसं मुने ॥ ५ ॥
अन्नं किंमात्मकं विद्यात्क स्थितश्चोदको गजे ॥
क स्थितं क्लोम हृदयं प्लीहा वृक्को यकृत्तथा ॥ ६ ॥
क नु बस्तिप्रबद्धश्च परिमाणं च किं भवेत् ॥
भुङ्क्ते गर्भोदरस्थो वा न वा भुङ्क्तेऽथ भोजनम् ॥ ७ ॥
संधयः कति चास्थीनि केन मोचति हेतुना ॥
केन पश्यति रूपाणि परिक्रामति तिष्ठति ॥ ८ ॥
केन स्तनति वै नागो लिण्डं सृजति मेहति ॥
उत्तिष्ठति निषीदेच्च निषण्णश्चानुवर्तते ॥ ९ ॥
विपद्यते तथा केन मैथुनं केन गच्छति ॥
के बालाः कानि रोमाणि केशाः पक्ष्म च किं भवेत् ॥ १० ॥
कियन्मात्राणि श्रो(स्रो)तांसि च्छछ्वः कति च दन्तिनाम् ॥
केन जीर्येत भुक्तं च जीर्णे केन निरूहति ॥ ११ ॥
केन निद्रामुपादत्ते केन निद्रा न जायते ॥
ग्रहणी केन दीप्ता स्यादविपाकः कथं भवेत् ॥ १२ ॥
वातपित्तवहाः काश्च शुक्रवाहाश्च काः स्मृताः ॥
मेदोवहा रसवहाः शिरा रक्तवहाश्च काः ॥ १३ ॥
मांसास्थिमेदोमज्ज्ञानां वाहिन्यश्च शिराः कति ॥
प्रसारणाकुञ्चनाद्याश्चेष्टाः काभिश्च चेष्टते ॥ १४ ॥
केन वा स्याद्विपन्नेन बस्तौ मूत्रं प्रवर्तते ॥
अजस्रं मत्तनागानां मदो वाऽपि किमात्मकः ॥ १५ ॥
गजानां रोमकूपेभ्यः कस्मात्स्वेदो न वर्तते ॥
मुखतः केवलं स्वेदः क्लान्तानां संप्रवर्तते ॥ १६ ॥
एवं मे पृच्छतो ब्रूहि सर्वमेव महामुने ॥
वारणानां च नामानि यस्तावद्वक्तुमर्हसि ॥ १७ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
सौम्याऽऽग्नेयमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ १८ ॥

---

१ क. किंमात्रकं। २ ख. °श्चोन्दुको। ३ क. वृष्कौ। ४ क. बस्तिः प्रवृद्ध°। ५ क. हेच्छति। ६ क. च यानि स्युस्ता°।

सोमजं शीतमार्द्रं च शुष्कमुष्णं च तैजसम् ॥
अपाणां स्थावराणां च संभवश्च चतुर्विधः ॥ १९ ॥
पुरुषो गौरजोऽश्वोऽव्यो गर्दभोऽश्वतरोऽपि च ॥
सप्तैते जङ्गमा ग्राम्या वन्यान्सप्त निबोध मे ॥ २० ॥
कपिर्गजो वराहश्च शार्दूलो महिषो मृगः ॥
खड्गश्चेति समाख्याताः सप्त वन्याश्च जङ्गमाः ॥ २१ ॥
वृक्षो वनस्पतिर्गुल्मो लतौषधितृणानि च ॥
प्रतानो वीरुधो गुच्छः स्थावरा नव कीर्तिताः ॥ २२ ॥
स्थावराणां च निर्देशो रसवीर्यविपाकतः ॥
कीर्तितो पवसाध्याये विस्तरेण महीपते ॥ २३ ॥
समागतो हस्तिनीं तु नागो मैथुनमाचरेत् ॥
योन्यां करेण्वाः संघर्षात्सौम्यं शुक्रं विमुञ्चति ॥ २४ ॥
निषिच्यमाने शुक्रे तु महात्मा प्रतिपद्यते ॥
जीवः सूक्ष्मपरो धातुरचिन्त्यः प्रभुरीश्वरः ॥ २५ ॥
संसृष्टं रजसा शुक्रं तिष्ठद्योन्यां विवर्धते ॥
सप्तरात्रोषितं तत्र कललं जायते ततः ॥ २६ ॥
दशाहादर्बुदं तत्र जायते राजसत्तम ॥
मासाच्च पेशी भवति हृदयं तदनन्तरम् ॥ २७ ॥
केचित्संभवमिच्छन्ति पूर्वं संजायते शिरः ॥
पूर्वं हृदयमित्येके युगपत्त्वपरेऽब्रुवन् ॥ २८ ॥
हृदयं मनसः स्थानं मनश्चाऽऽह्नः प्रजापतिः ॥
तस्माद्गर्भेण जातस्य हृदयं जायतेऽग्रतः ॥ २९ ॥
ततः संजायते क्लोम यकृद्वृक्कौ त्रयं तथा ॥
ततः शिराः संभवन्ति तिर्यगूर्ध्वमधस्तथा ॥ ३० ॥
ततः शिराभिः सहितं स्थूलान्त्रमुपजायते ॥
पृष्ठवंशोऽथ जघनं वक्षो गात्रापरोदरम् ॥ ३१ ॥
क्रमेण सर्वाण्यङ्गानि केशरोमनखानि च ॥
भवन्त्यत्र शिराभागे मातुर्गर्भोदरे वसन् ॥ ३२ ॥
ततः स दशमे मासे द्वादशे वाऽपि जायते ॥
एवं हि जायते हस्ती जातश्चापि पिबेत्पयः ॥ ३३ ॥

---

१ क. °रोऽधिकः ॥ स° । २ क. °द्वृद्धौ त्र° ।

द्विमासजातश्चपलो लिण्डवापि(?)मतङ्गजः ॥
तृतीये च चतुर्थे च पानीयं मासि सेवते ॥ ३४ ॥
ऊर्ध्वं चतुर्णां मासानां तृणं मृदु च पल्लवम् ॥
शल्लकीमरिमेदं च कर्णिकारं च खादति ॥ ३५ ॥
भुञ्जानस्य प्रवर्धन्ते दोषाः प्रायेण दन्तिनः ॥
वातपित्तकफाश्चैव तेषां कर्म पृथक् पृथक् ॥ ३६ ॥
रक्तमांसास्थिमज्जानो वर्धन्ते धातवो रसैः ॥
मेदः शुक्रं बलं तेजो जवो वर्ष्म च पार्थिव ॥ ३७ ॥
रसेन पित्तं चाम्लेन मधुरेण कफः सदा ॥
कषायकटुकाभ्यां तु वर्धते दन्तिनोऽनिलः ॥ ३८ ॥
कण्ठे श्लेष्मा विहरति भुञ्जतो विविधान्रसान् ॥
पित्तेन पच्यते भुक्तं कफान्निद्राऽस्य जायते ॥ ३९ ॥
वातात्प्राणस्य चेष्टा च जीर्णस्य च निरूहन(ण)म् ॥
समधातुस्त्वरोगः स्याद्विषमैर्व्याधितो भवेत् ॥ ४० ॥
जरायुरक्तं मांसं तु मातृजान्विद्धि हस्तिनः ॥
शुक्रं मज्जास्थिमेदांसि शिरारोमनखाः पितुः ॥ ४१ ॥
यथाविभक्तान्यस्थीनि संधयो ये च कीर्तिताः ॥
दन्ता नागस्य यावन्तो मर्माणि च निबोध मे ॥ ४२ ॥
शिरस्यस्थिद्वयं राजन्कपाले च तथाऽपरे ॥
अष्टावस्थीनि ग्रीवायां नव चैवात्र संधयः ॥ ४३ ॥
एकमेवास्थि सगदे द्वौ संधी सव्यदक्षिणौ ॥
द्वे च सक्कास्थिनी ज्ञेये चत्वारश्चात्र संधयः ॥ ४४ ॥
अधस्तादुपरिष्टाच्च दन्ताः षोडश सागदाः ॥
प्रहारिणौ च द्वौ दन्तौ करिणोऽष्टादश स्मृताः ॥ ४५ ॥
अष्टादशानां दन्तानां संधयोऽष्टादशैव च ॥
अधस्ताच्चोपरिष्टाच्च विद्यान्नागस्य पार्थिव ॥ ४६ ॥
गलनाड्यां चतुःषष्टिस्तरुणास्थीनि दन्तिनः ॥
वलयाकृतिकल्पानि सप्तषष्टिश्च संधयः ॥ ४७ ॥

---

१ क. पिण्डद्वापि । २ क. कफस्तदा । ३ ख. शिरो रो°। ४ ख. संधयोः । ५ क. गलानां च । ६ क. °नः ॥ प्रल° ।

प्रतरास्थि तलप्रोहे विद्यादेकं विचक्षणः ॥
तलकर्षे च विज्ञेयं प्रतरास्थ्येकमेव तु ॥ ४८ ॥
अष्टावेव हि पादेषु प्रतरास्थीनि निर्दिशेत् ॥
चतुर्थे च महीपाल संधयश्चात्र षोडश ॥ ४९ ॥
पलिपादेषु कर्णेषु प्रोहयोः प्रोहसंधिषु ॥
एतेष्वङ्गप्रदेशेषु गुलिकास्थीनि विंशतिः ॥ ५० ॥
अशीतिरेव पादेषु चतुर्ष्वपि च पार्थिव ॥
विंशतिश्च नखानि स्युः संधीनां द्व्यधिकं शतम् ॥ ५१ ॥
विशेषास्थ्येकबाह्वस्थि वंशास्थीनि च गात्रयोः ॥
पूर्वयोस्तु षडस्थीनि ह्येवं षट्चैव संधयः ॥ ५२ ॥
अस्थीनि संधयश्च स्युः षडेवापरयोरपि ॥
कपालास्थ्येकमेवाऽऽहुः सर्वतो जघनाश्रितम् ॥ ५३ ॥
चतुर्दशाऽऽहुरस्थीनि नागस्योरसि संख्यया ॥
संधयस्त्वपि चास्थ्नां तु दश पञ्च च निश्चिताः ॥ ५४ ॥
अस्थीनि विंशतिः पृष्ठो(ष्ठे) संधयश्चैकविंशतिः ॥
पक्षयोरुभयोर्विद्याच्चत्वारिंशच्च पार्श्वकाः ॥ ५५ ॥
द्विचत्वारिंशदेवाऽऽसां पार्श्वकानां तु संधयः ॥
ऊर्ध्वास्थीन्येकविंशत्स्युः संधयश्चैकविंशतिः ॥ ५६ ॥
लाङ्गूलवंशलाङ्गूले गुलिकास्थीनि विंशतिः ॥
त्रिंशत्तु संधयश्चात्र संख्यया विद्धि पार्थिव ॥ ५७ ॥
त्रीण्यस्थ्नां तु शतान्येवं विंशतिश्चैव संख्यया ॥
शतानि त्रीणि संधीनां षट्षष्टिं चापि निर्दिशेत् ॥ ५८ ॥

—:○:—

हस्ते च तालुनि द्वे द्वे मुखे नेत्रे कटिद्वये ॥
द्वे कर्णयोश्च प्रत्येकमेवमेकादशैव तु ॥ ५९ ॥
स्तनयोश्चैव मेण्ढ्रे च नागस्य तु गुदे तथा ॥
विद्यात्पञ्चदशैतानि श्रो(स्रो)तांसि वदतां वर ॥ ६० ॥

—:○:—

१ क. प्रान्तरास्थि । २ क. °यं प्रान्तरा° । ३ क. प्रान्तरास्थीनि । ४ क. °तो यजना° । ५ क. °शदासां तु पा° । ६ क. तालुके ।

नेत्रयोश्चापि पक्ष्माणि केशाञ्शिरसि निर्दिशेत् ॥
देहे रोमाण्यसंख्यानि वालाः पुच्छे च दन्तिनाम् ॥ ६१ ॥

—:():—

सिराः शतानि सप्तैव सर्वपिण्डेन दन्तिनाम् ॥
पञ्च स्नायुसहस्राणि पञ्च स्नायुशतानि च ॥ ६२ ॥
एतेषां विस्तरो राजन्सिराव्यूहे प्रवक्ष्यते ॥
मर्माण्यपि प्रवक्ष्यामि भेदतो मर्मसंग्रहे ॥ ६३ ॥
गुदोऽण्डकोशो हृदयं मेण्ढ्रं नाभ्युदरं करः ॥
प्रत्यङ्गं सौप्रतीकाशौ प्रतिमानं गुदे स्तनौ ॥ ६४ ॥
प्रोहसंदानभागौ च ग्रन्थिः सैकुटिकेतलाः ॥
पलिहस्तौ च विष्के च रन्ध्रौ द्वे चापरान्तरे ॥ ६५ ॥
कुक्षिः कटी च प्रस्तावश्रो(स्रो)तांसि दश पञ्च च ॥
कक्षाभागौ सनिष्कासौ मन्ये च मनुजाधिप ॥ ६६ ॥
अन्तर्बाहू पणवको बिम्बकः कुम्भ एव च ॥
अपस्कारौ तथाऽष्ठीव्यौ मृदुकुक्षिस्तथैव च ॥ ६७ ॥
गलपृष्ठं यवस्थाने ग्रीवामन्ये च तालुकम् ॥
वाहित्थं शम्बुकौ जिह्वा बलाङ्गे वक्षणौ तथा ॥ ६८ ॥
विक्षोभौ चूचुकौ मुष्कौ कूर्मांसतलसंधयः ॥
अस्थिक्षयौ कुलाभागावुरःसंधिरुरस्तथा ॥ ६९ ॥
उभावंसौ च विज्ञेयाविति सप्तोत्तरं शतम् ॥
मर्मणामिति व्याख्यातं वारणानां नराधिप ॥ ७० ॥

—:():—

अतश्च कथ्यमानानि दोषस्थानानि मे शृणु ॥
पर्वाण्यामाशयश्चैव उरः कण्ठं शिरस्तथा ॥ ७१ ॥
स्थानान्येतानि सर्वाणि श्लेष्मणो विद्धि दन्तिनाम् ॥
ऊर्ध्वं नाभेरधः पित्तं हृदयं समुपाश्रितम् ॥ ७२ ॥
पक्वामाशयगो वायुर्जघने सगुदे तथा ॥
स सर्वदेहव्यापी तु सर्वतः कर्म चेष्टते ॥ ७३ ॥

---

१ क. °ण्डेषु द° । २ क. सकलकुन्तलाः । ३ क. रन्ध्रे द्वौ चा° । ४ क. कुक्षी । ५ ख. यतस्थाने । ६ क. °क्षोभोभौ च तुष्कौ च कू° । ७ ख. सगुदे ।

रक्तस्थाने स्थितो वायुर्व्यानो नाम्ना तु वीर्यवान् ॥
मेदःस्थाने स्थितः प्राणो वसास्थान उदीरणः ॥ ७४ ॥
समानो मांसमध्यस्थो ह्यपानश्चास्थिसंस्थितः ॥
व्यानोदानौ समानश्च प्राणापानौ च पञ्चधा ॥ ७५ ॥
भूयो वायुः शरीराणि बिभर्ति भगवान्प्रभुः ॥
व्यानाद्भवति चेष्टा च निमीलोन्मीलने नृप ॥ ७६ ॥
उदानेन बलोन्मादौ समानाद्रागमादिशेत् ॥
वायुच्छ्वासानुपानानां प्रवृत्तिः प्राणजा स्मृता ॥ ७७ ॥
वातमूत्रपुरीषाणि ह्यपाने विद्धि पार्थिव ॥
हस्तस्थं तिष्ठति सदा चक्षुर्मध्ये च दन्तिनाम् ॥ ७८ ॥
सौरं तेजश्च नेत्रे तु प्रविभक्तं शरीरिणाम् ॥
तथा प्राप्तोऽथ हर्षादींस्तेन रूपं च पश्यति ॥ ७९ ॥
श्लेष्मस्थाने स्थितं सत्त्वं रजो वाय्वनुसंस्थितम् ॥
तमः पित्तानुगं चैव तिष्ठत्येव मतङ्गजः ॥ ८० ॥
प्रहर्षानन्दभावाभ्यां सौम्यं शुक्रं प्रमुञ्चति ॥
क्रमेण रसवीर्याणां सौम्यं शुक्रं प्रवर्तते ॥ ८१ ॥
अदृश्यमार्तवं विद्धि हस्तिन्या हर्षसंभवम् ॥
गृह्णीते साऽद्भुतं गर्भं गर्भिणी द्वेष्टि चोद्धतम् ॥ ८२ ॥
सप्त पेशीशतान्याहुः सर्वेष्वङ्गेषु हस्तिनाम् ॥
अस्थ्याश्रिताश्च ताः सर्वाः स्नायुबद्धास्त्वचा वृताः ॥ ८३ ॥
अल्पं वा बहु वा ह्रस्वं दीर्घं वाऽप्यथवा पृथक् ॥
एकसंस्थं हितं मांसं यत्स्यात्पेशीति तद्विदुः ॥ ८४ ॥
तृष्णा मर्मसु सर्वेषु निद्रा कफमुपाश्रिता ॥
व्यवसायश्च नागानां स्कन्धदेशमुपाश्रितः ॥ ८५ ॥
वपुः श्रीः कीर्तिराशा च त्वचमाश्रित्य तिष्ठति ॥
अस्थीनि पर्वतो मेरुस्तेजो देहे व्यवस्थितम् ॥ ८६ ॥
बुद्धिर्मेधा च नागानां स्नायुबन्धेष्ववस्थिता ॥
वसामाश्रित्य बलवान्दर्पस्तिष्ठति नित्यशः ॥ ८७ ॥

---

१ ख. नामा तु । २ क. ख. उदीरिणः । ३ क. ततः । ४ क. साऽद्भुतम् ।

मदश्चैव महातेजाः शुक्रस्थानं समाश्रितः ॥
शिरासंधीन्समाश्रित्य लोमस्तिष्ठति वै सदा ॥ ८८ ॥
अन्त्रेषु कर्म नागानामालस्यं यकृति स्थितम् ॥
कालेयं मदो(?) क्रमते विषादो नृपसत्तम ॥ ८९ ॥
गजस्य पुंप्फुसे चैव भयं तिष्ठति नित्यशः ॥
वक्षसेत्रच्छु(?) हृदयं सव्यं स्तनमुपाश्रितम् ॥ ९० ॥
यकृद्धृदयपार्श्वं च क्लोम वक्षःस्थितं विदुः ॥
यकृत्प्लीहे च संबद्धे (*स्थूलान्त्रं हृदयादधः ॥) ९१ ॥
आमाशयं विभजते तिष्ठेत्पक्वाशयं च तत् ॥
आमाशयस्य मध्यस्था व्याधयः सर्व एव तु ॥ ९२ ॥
व्याधयो ये च संख्यातास्तेषां पक्वाशयो गतिः ॥
ईषत्तु शुषिरा वृत्ता दीर्घा बलवती सिरा ॥ ९३ ॥
स्नायुर्वल्कावनद्धा च घना पृथ्वी च कण्डुरा ॥
वातपित्तकफानां च तथैव रसशुक्रयोः ॥ ९४ ॥
मेदोसृङ्मज्जमांसानां तथा मूत्रपुरीषयोः ॥
ह्रासवृद्धी यतो ह्येषां प्रमाणेनोच्येते त्वतः ॥ ९५ ॥
मूत्रं बस्तिश्च मुष्कौ च वङ्क्षणोद्देशमाश्रितौ ॥
मांसमस्थ्याश्रितं विद्यादसृङ्मांसमुपाश्रितम् ॥ ९६ ॥
मज्जाभ्यन्तरतोऽस्थ्नां तु शुक्रं मज्जाश्रितं विदुः ॥
मेदो मांसाश्रयं प्राहुः शिरा मांससमाश्रिताः ॥ ९७ ॥
रोमाणि त्वचि जातानि मांसस्यापि त्वगावृतिः ॥
छव्यः षडेता व्याख्याता द्विपानां द्विपदां वर ॥ ९८ ॥
छवीनां विस्तरश्चापि मर्माध्याये प्रवक्ष्यते ॥
शिरास्नाय्वात्मकं विद्यान्नखानां संभवं नृप ॥ ९९ ॥
नखानां किणभावं च निसर्गादीश्वरं विदुः ॥

—:○:—

इमा महाप्रकृतयस्तिस्रः कीर्तयतः शृणु ॥ १०० ॥

---

*कपुस्तके त्रुटितम् ।

---

१ क. °संधि समा° । २ क. पुष्फसे । ३ क. सबद्धः । ४ क. °यस्यम° । ५ क. °च्यतत्व° । ६ क. प्रचक्षते ।

रजस्तमश्च सत्त्वं च प्राहुरध्यात्मकोविदाः ॥
मेधावी चपलश्चण्डस्तेजस्वी लघुविक्रमः ॥ १ ॥
कौतूहलप्रकामी च क्रीडनो हर्षणश्च यः ॥
शीघ्रं कृतं नाशयति शीघ्रं कर्माभिपद्यते ॥ २ ॥
दुर्भगश्च तथा नागः सततं धेनुकाप्रियः ॥
अशिता दुर्भरः शूरो निःशङ्कोत्तानवेदिता ॥ ३ ॥
एवंविधस्तु यो नागः स राजभ्राजसः स्मृतः ॥
कृच्छ्रेण किंचिज्जानीते कर्म चास्य प्रणश्यति ॥ ४ ॥
निद्रालुर्गूढसंज्ञश्च तामसो नाग उच्यते ॥
अन्वर्थवेदी सुभगः स्मृतिमाञ्शुभयोगजः ॥ १०५ ॥
कर्म शीघ्रं विजानाति न च तत्तस्य नश्यति ॥
आयुष्मान्बलवाञ्शूरो नीरोगः सुप्रजो लघुः ॥ ६ ॥
धन्यो यशस्वी दीप्ताग्निः सुसत्त्वः प्रियदर्शनः ॥
स्निग्धगम्भीरघोषश्च सात्त्विको नाग उच्यते ॥ ७ ॥
इति तिस्रः समाख्याता महाप्रकृतियोनयः ॥

—:():—

एवं शरीरं व्याख्यातं प्रविभागेन(ण) मे शृणु ॥ ८ ॥
प्रसारणं च गात्राणां तथा संकुचनं च यत् ॥
चत्वारिंशत्सिरास्तस्य विनियुक्ता हि धारणे ॥ ९ ॥
उत्तिष्ठति शिराभिश्च चत्वारिंशद्भिरेव हि ॥
उपवेशं च कुरुते चत्वारिंशद्भिरीश्वरः ॥ ११० ॥
षट्शतेन विजानीयाद्गमनं परिवर्तते ॥
हस्तशीलेन कुरुते षट्शतेन तु वारणः ॥ ११ ॥
जृम्भणं कुरुते नागः स चत्वारिंशता तथा ॥
दशभिर्हन्ति हस्तेन ग्रासं दशभिरेव च ॥ १२ ॥
दशभिश्चालयेत्सृक्कौ दशभिश्चैव खादति ॥
भक्षयित्वा निगिरति शिराभिर्दशभिस्तथा ॥ १३ ॥
दशभिर्दशभिश्चैव पच्यमाने च वारणः ॥
शिरसो धारणे दृष्टाः सिरा ह्यूर्ध्वं तु विंशतिः ॥ १४ ॥

१ क. °प्रतापी च । २ क. अशीता । ३ क. ग्रासं च दशभिस्तथा ।

ग्रीवायां पार्श्वयोर्दृष्टास्तिस्रस्तिस्रः पुनः शिराः ॥
शिरसश्चालने दृष्टा दश स्कन्धगताः शिराः ॥ ११५ ॥
आददाति शिराभिश्च पानीयं दशभिर्द्विपः ॥
*दशभिर्निर्वमेच्चैव शिराभिः सलिलं गजः ॥ १६ ॥
दशभिर्निमिषेन्नाग उन्मिषेद्दशभिः पुनः ॥
दशभिर्गन्धमाप्नोति शृणोति दशभिस्तथा ॥ १७ ॥
षट्त्रिंशत्तु शिरा दृष्टा दृष्टिसंचारणेऽपि च ॥
कटयोर्दश विज्ञेया शिरा मदवहा नृप ॥ १८ ॥
दशभिर्दशभिश्चैव कर्णौ चालयति द्विपः ॥
निश्वासं कुरुते याभिस्ताः शिरास्त्रिंशदेव तु ॥ १९ ॥
दशभिर्बृंहति गजो व्याहरेद्दशभिः पुनः ॥
पुच्छं चालयति श्रीमान्सिराभिर्दशभिर्गजः ॥ १२० ॥
निर्हरेद्दशभिर्मेण्ढ्रे दशभिश्चैव सं(मे)हति ॥
मैथुनं याति दशभि(र्भी)रेतो दशभिरावपेत् ॥ २१ ॥
अभितप्तस्तु मातङ्गो वमथुं याभिरुत्सृजेत् ॥
षट्त्रिंशत्तु शतं विद्यात्सिराः स्वेदवहास्तु ताः ॥ २२ ॥
शिरा गुदनिबद्धास्तु हृदयं चापि संश्रिताः ॥
धारणे तु पुरीषस्य तथैवोत्सर्जने पुनः ॥ २३ ॥
तासां दशशतं दृष्टं मूत्रस्योत्सर्जने दश ॥
ततो वातवहा दृष्टा ग्रहणीदीपनाः शिराः ॥ २४ ॥
पक्वाशयनिबद्धास्तु ज्ञेयास्तास्तु चतुर्दश ॥
शिरा दश समाख्याता यास्तु पित्तवहाः स्मृताः ॥ १२५ ॥
दशैव तु शिरा दृष्टाः श्लेष्माणं या वहन्ति वै ॥
शिरा यास्तु शरीरेऽस्मिन्सर्वसंधिसमाश्रिताः ॥ २६ ॥
नदीं तरति सर्वाभिस्ताभिश्चैव तु लङ्घयेत् ॥
ताश्च गात्रैश्चतुर्भिश्च पृथक्त्वे विंशतिः स्मृताः ॥ २७ ॥
सिरा रसवहा दृष्टा जिह्वायां हृदयाश्रिताः ॥
दशैव ताः सुसूक्ष्मास्तु याभिर्वेदयते रसान् ॥ २८ ॥

* अयमर्धश्लोकः ' शिरसश्चालने'— इत्यतः प्राक्पुस्तके ॥

१ क. °स्तासु च° ।

अपानेन यदा वायुं वारणः प्रविमुञ्चति[1] ॥
पक्वाशयनिबद्धास्तु ज्ञेयास्तांस्तु[2] चतुर्दश ॥ २९ ॥
एकादश शतान्येवं सप्ततिश्च पुनः सिराः ॥
(*वारणस्य प्रदेशेऽस्मिन्व्याख्यातास्ताः प्रदेशगाः ॥ १३० ॥
शतानि त्रीणि शेषाणि त्रिंशदन्याः पुनः शिराः ॥)
एता रक्तवहा दृष्टाः शरीरं सर्वमेव हि ॥ ३१ ॥
सिराभिः संवृतं याभिर्वल्लीभिरिव पादपः ॥
अत्र प्रतिविशेषं तु हस्तिन्यामुपलक्षयेत् ॥ ३२ ॥
एकैकस्मिन्स्तने दृष्टाः सिराः क्षीरवहा दश ॥
हृदयंगमाः सुसूक्ष्माश्चेति प्रोक्तः सिराविधिः ॥ ३३ ॥
शतानि पञ्च (*नागस्य सहस्रं च) विशेषतः ॥
रेतोत्सर्गकरा यास्तु वारणानां सिरा दश ॥ ३४ ॥
मैथुनार्थं च या दृष्टास्ता एव विंशतिः स्मृताः ॥
नव संधिशतान्येवं वारणेष्ववधारयेत् ॥ १३५ ॥

—:○:—

अतः परं प्रवक्ष्यन्ते संधयो वारणस्य तु ॥
द्वाविंशतिः संधयस्तु पादे पादे विनिश्चिताः ॥ ३६ ॥
प्रोहसंधानभागे च परिहस्ते च दन्तिनः ॥
एतेष्वङ्गप्रदेशेषु संधयश्च चतुर्दश ॥ ३७ ॥
एवं भागे त्वपस्कारे पादे विक्षोभयोरपि ॥
प्रतिमाने च विज्ञेयाः संधयस्तु चतुर्दश ॥ ३८ ॥
गुच्छे सगुटिकायां च स्युस्तथाऽन्तरसक्थनि ॥
संधयोऽत्र महाराज विज्ञेयास्तु चतुर्दश ॥ ३९ ॥
मण्डूक्यन्तरसंधौ तु अक्षीव्ये तु विशेषतः ॥
संधयस्तत्र विज्ञेया वारणस्य तु विंशतिः ॥ १४० ॥
आयासकाण्डे रन्ध्रे च स्तनानुसार[3] एव च ॥
मेण्ढ्रे चैवाण्डकोशे च नवतिः संधयः स्मृताः ॥ ४१ ॥
अंसे च प्रत्यगंशे च तथांऽसफलकेऽपि च ॥
संधयस्तत्र विज्ञेया वारणस्य तु विंशतिः ॥ ४२ ॥

* 'धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

१ क. प्रतिमुञ्चति । २ क. °स्तासु च° । ३ क. °नुरस ए° ।

आयासकाण्डे रम्भे च स्तनानुसार एव च ॥
मेण्ढ्रे वैवाण्डकोशे च नवतिः संधयः स्मृताः ॥ ४३ ॥
अंसे च प्रत्यगंशे च तथांऽसफलकेऽपि च ॥
संधयस्तत्र विज्ञेया वारणस्य तु विंशतिः ॥ ४४ ॥
ग्रीवाबिन्दुवितानेषु पिण्डिकावग्रहे तथा ॥
आसने शयने स्थाने विद्यात्संधिशतानि षट् ॥ १४५ ॥
पुरस्कारावग्रहे च निर्याणे श्रवणे तथा ॥
ईषिकान्तरयोश्चैव वातकुम्भे च दन्तिनः ॥ ४६ ॥
द्वे च संधिशते प्राहुः संधींश्चापि चतुर्दश ॥
ख(क)टे च खलु नेत्रान्ते एकैके संधयः स्मृताः ॥ ४७ ॥
विषाणयोर्द्वयोश्चापि हस्ते द्वात्रिंशदीरिताः ॥
उरसि द्वादश ज्ञेया मुखे त्रिंशति(?)रेव च ॥ ४८ ॥
दशनासगदाये तु संधयस्तत्र षोडश ॥
जिह्वायां तु त्रयः प्रोक्ताः कण्ठे ज्ञेयास्त्रयोदश ॥ ४९ ॥
आसने वंशदेशे च तत्पिले पश्चिमासने ॥
तथा त्वपरवंशे च द्वात्रिंशत्संधयः स्मृताः ॥ १५० ॥
अस्थिभागे च जघन उत्कृष्टकलयोरपि ॥
भागेष्वेतेषु नागस्य द्वात्रिंशत्संधयः स्मृताः ॥ ५१ ॥
(*लाङ्गूलवंशे लाङ्गूले द्वात्रिंशत्संधयः स्मृताः ॥)
करीषभागे प्रस्रावे गुदभागे च दन्तिनः ॥ ५२ ॥
संधयो विंशतिर्ज्ञेया भागेष्वेतेषु निश्चिताः ॥
पलिहस्ते ततः कर्मप्रोहसंदानयोरपि ॥ ५३ ॥
अपस्कारे च नागस्य क्रोशसंधिं विनिर्दिशेत् ॥
बाह्वोरथांसफलके पाद्याभागे तथैव च ॥ ५४ ॥
ग्रन्थिष्वपि तथाऽष्ठीव्ये ज्ञेयासु कटिकासु च ॥
उत्कृष्टेऽप्यथ मण्डूक्यां भागेष्वेतेषु दन्तिनः ॥ १५५ ॥
समुद्रसंधिः सर्वेषु यथावदिति निश्चयः ॥
लाङ्गूलवंशे लाङ्गूले जघनस्यपस्थिदेशयोः ॥ ५६ ॥

---

* धनुश्चिह्नद्वयान्तःस्थः पाठो नास्ति कपुस्तके ॥

---

१ क. °नुरस ए° । २ क. °स्य संधयः षोडश स्मृ° ।

उलूखलाख्यः संधिस्तु कलाभागे च दन्तिनः ॥
विताने श्रवणे चैव बिम्बोः कुम्भान्तरे तथा ॥ ५७ ॥
निर्याणे कटिसंधौ च शिरोमस्तकपिण्डयोः ॥
इषीकाग्रे च कुम्भे च वारणस्य महीपते ॥ ५८ ॥
तूणसीवनवत्संधिर्विज्ञेयस्तु कपालतः ॥
हनुग्रह्ककपालेषु सगदेष्वेव दन्तिनः ॥ ५९ ॥
संधिर्वायसतुण्डः स्याद्भागेष्वेतेषु दन्तिनः ॥
नेत्रे वर्त्मन्यपाङ्गे च करीषाश्रा(स्रा)व एव च ॥ १६० ॥
हृदये चाक्षिकूटे च कण्ठे क्लोम्नि गुदे तथा ॥
ज्ञेयो मण्डलसंधिस्तु भागेष्वेतेषु दन्तिनः ॥ ६१ ॥
शम्बुके प्रतिमाने च वाहित्रे दन्तवेष्टयोः ॥
शङ्खावर्ते भवेत्संधिः शृङ्गाटः श्रो(स्रो)तसि स्थितः ॥ ६२ ॥
इत्येव संधयः प्रोक्ताः स्नायून्यपि निबोध मे ॥
अष्टौ वक्षःप्रदेशे च चतस्रो वालपुष्करे ॥ ६३ ॥
एकैकस्मिंस्तु पादे वै स्नायूनां विंशतिः स्मृता ॥
मुष्के मेण्ढ्रोदरगुदे त्वष्टौ विंशतिरेव च ॥ ६४ ॥
महास्नायूनि वै पञ्च दश चापि द्विपस्य वै ॥
ऊर्ध्वभागानि सप्तैव षडधोभागकानि च ॥ १६५ ॥
द्वे तिर्यग्भागिके दृष्टे एवं पञ्चदशैव हि ॥
एभिर्वै सर्वतो देहः प्राणालीभिरिवाऽऽवृतः ॥ ६६ ॥
कफपित्तानिलैर्दुष्टैर्यदा कायोऽभिपूर्यते ॥
तदा व्याधिमवाप्नोति वारणो नात्र संशयः ॥ ६७ ॥
सप्तोत्तरं मर्मशतं वारणस्यावधारयेत् ॥
प्रदेशसंग्रहे तानि कीर्तितानि यथागमम् ॥ ६८ ॥
चतुर्विधानि ज्ञेयानि यथावेदभिनिश्चयः ॥
येषु दष्टाश्च विद्धाश्च ताडिता वा मतङ्गजाः ॥ ६९ ॥
विनाशं प्राप्नुवन्तीह क्षिप्रं वा यदि वा चिरात् ॥
कालान्तरविनाशीनि सद्यःप्राणहराणि च ॥ १७० ॥

---

१ क. °न्तरेषु च ॥ नि°। २ क. कटसं°। ३ क. देहे । ४ क. °णालाभि°। ५ क. दृष्टाश्च । ६ क. °द्धा वा ता° ।

वैगुण्यकरणानि स्युः सशल्यानि तथैव च ॥
अस्थिस्नायुसिरासंधिधमनीप्रविभागशः ॥ ७१ ॥
विनाशः संनिपाताद्यस्तन्मर्म परिकीर्तितम् ॥
वायव्याग्नेयसौम्यत्वात्प्रविभागश्चतुर्विधः ॥ ७२ ॥
मर्मणां तुल्ययोनित्वं भूतानां चापि लक्षयेत् ॥
आशुकारी भवेदग्निरस्य येत्राभिसंप्लवः ॥ ७३ ॥
विशेषात्तत्र विद्धस्तु क्षिप्रमेव विनश्यति ॥
सौम्याग्नेयगुणत्वात्तु कालान्तरहरं स्मृतम् ॥ ७४ ॥
सशल्यमाणघातित्वं स्मृतं वाय्वात्मकं बुधैः ॥
निरुद्धगतिमार्गत्वाद्वायोर्जीवति कुञ्जरः ॥ १७५ ॥
भिन्ने चैवोद्धृते शल्ये विगते मर्मसंश्रये ॥
अनिले म्रियते नागः स शल्यो म्रियते तथा ॥ ७६ ॥
सौम्याग्नेयं तु कालेन क्षीणं सौम्यगुणैर्यदा ॥
एकीभावंगतः शल्यं नश्येत्कालान्तराद्गजः ॥ ७७ ॥
तस्मात्सौम्याग्निवायूनां वैशेष्यं यत्र लक्ष्यते ॥
तद्भूतगुणयोनित्वान्मर्म तत्तादृशं स्मृतम् ॥ ७८ ॥
कुम्भकर्मतले पेश्यः मोहे चैतस्य पञ्च तु ॥
बाह्वन्तरमपस्कारमंशांशाफलकान्तरम् ॥ ७९ ॥
छादयन्त्यपरां पेश्यस्तिस्रः षट्चैकसंख्यया ॥
शतानि त्रीणि पेशीनां चतुःषष्ट्यधिकानि च ॥ १८० ॥
गात्रापरेषु नागस्य यथावदुपधारयेत् ॥
एकपृष्ठे भवेत्पेशी सीवनीमाश्रिताः पराः ॥ ८१ ॥
अण्डकोशीश्रितास्तिस्रस्त्रिषष्टिर्जङ्घमाश्रिताः ॥
पञ्चाशत्पार्श्वयोः पेश्यः स्युर्विंशत्युरसि स्मृताः ॥ ८२ ॥
एका नाभिसमापन्ना पञ्च लाङ्गूलमाश्रिताः ॥
हन्वोरष्टौ विजानीयाद्ग्रीवास्कन्धगता दश ॥ ८३ ॥
त्रिंशत्कक्षे च वंशे च पृष्ठे चैकां विनिर्दिशेत् ॥
कर्णयोरुभयोर्द्वे च गण्डयोरुभयोर्दश ॥ ८४ ॥

---

१ क. सौम्यं वा प्रवि° । २ क. यत्राभि° । ३ क. °षास्तत्र । ४ ख. °ववतः । ५ क. प्रेश्यः । ६ क. °मंशास्थिशकलान्त° । ७ क. °कोशास्थिता° ।

शिरा मस्तकनिर्याणवितानविदुसंश्रिताः ॥
†यत्तावद्ग्रहयोश्चापि चतुःषष्टिं विनिर्दिशेत् ॥ १८५ ॥
विद्याज्जिह्वाश्रितामेकां द्वे च तालुनि निर्दिशेत् ॥
तथा पाकलके चापि पेशीमेकां विनिर्दिशेत् ॥ ८६ ॥
करेण्वामधिकास्त्रिंशत्तासां वक्ष्यामि लक्षणम् ॥
स्तनयोर्दश विज्ञेया दश विद्याद्भगाश्रिताः ॥ ८७ ॥
द्वे वृत्ते मुखमाश्रित्य प्रसूतेऽथ भगोत्तरे ॥
गर्भच्छिद्रान्तरे तिस्रस्तिस्रो गर्भोपजन्मनि ॥ ८८ ॥
तासां द्वे त्वचले विद्याद्गच्छत्येका च बाह्यतः ॥
चतुरस्रा च वृत्ता च त्र्यरूपावपि हि दृश्यते ॥ ८९ ॥
त्रिविधा मांसपेश्यस्तु परस्परमुपाश्रिताः ॥
बहिरभ्यन्तरे काये परिमाणमिदं पुनः ॥ १९० ॥
जिह्वायां गोरनालेन गलेनैव च वारणः ॥
सर्वमेतत्तथाऽऽहारं गोरनालेन चाऽऽहरेत् ॥ ९१ ॥
आमाशयात्तु नागस्य पक्वाशयगताः पुनः ॥
स्थूलान्त्रमभिसंपूर्य पुरीषमवतिष्ठति(ते) ॥ ९२ ॥
अन्त्रमात्रपरीणामं विद्याद्व्यामानि विंशति(म्) ॥
स्थूलान्त्राण्युदकं चैव धमन्योऽन्योन्यमाश्रिताः ॥ ९३ ॥
कालेयं तु प्लिहा चैव यकृदन्तं सफुप्फुसम् ॥
सर्वं निबद्धं हृदये वृक्कौ चैव नराधिप ॥ ९४ ॥
मेढ्रं हस्तश्च नागस्य सर्वं स्नायुसमुद्भवम् ॥
कर्णयोः कटयोर्द्वे द्वे श्रो(स्रो)तसी द्वे च तालुनि ॥ १९५ ॥
हस्ते द्वे नेत्रयोर्द्वे च द्वे चैव स्तनचूचुके ॥
मेढ्रे मुखे गुदे चैव च्छिद्राणि दश पञ्च च ॥ १९६ ॥

—:○:—

आद्या छविर्यत्र रोम द्वितीया चर्म एव च ॥
तृतीया शोणितं ज्ञेया चतुर्थी मांसमुच्यते ॥ ९७ ॥

---

† 'जत्ववग्रहयोः' इति भवेत् ।

---

१ क. शिरो म° । २ क. यत्त्वावग्रह° । ३ क. °लुविनि° । ४ क. °मपि संपूज्य पु° । ५ क. °मात्रे परिमाणं विद्यादध्यामविं° । ६ क. श्रोतसि । ७ क. शोणिते ।

मेदस्तु पञ्चमी ज्ञेया ह्यस्थि षष्ठी विधीयते ॥
मज्जा च सप्तमी ज्ञेया एवं सप्तविधा छविः ॥ ९८ ॥

—:0:—

असंख्येयानि रोमाणि केचिच्छास्त्रविदो विदुः ॥
आयुर्वेदविधानज्ञाः (†केचित्संख्यां विदुर्बुधाः) ॥ ९९ ॥
संपूर्णे सर्वगात्रस्य प्रमाणं परिकीर्तितम् ॥
अम्बुतेजोमयी दृष्टिः सा सप्तपटला भवेत् ॥ २०० ॥
सप्तधातुसमुत्थं तु शरीरमिह पठ्यते ॥
चतुर्विधाहारमयस्त्वोषधीनां तु यो रसः ॥ १ ॥
पक्वाशयमनुप्राप्तः पूर्वमामाशये स्थितः ॥
प(पा)चितस्तेजसा कोष्ठे वायुना समुदीरितः ॥ २ ॥
अदृष्टः स रसः पृथ्वीः सिराः समनुपद्यते ॥
या वै रसवहाः काये वारणानां विशेषतः ॥ ३ ॥
स रसः शोणितीभूतो मांसत्वमुपगच्छति ॥
मांसं मेदस्त्वमागच्छेन्मेदोऽस्थित्वं च दन्तिनाम् ॥ ४ ॥
अस्थिभ्यो जायते मज्जा शुक्रं मज्जा च पुष्यति ॥ २०५ ॥
स्थानानि षडनुप्राप्तो वीर्यं समनुलभ्यते ॥
ओषधीरसवीर्यं तु शरीरे सर्वगं स्मृतम् ॥ ६ ॥
यस्तत्र किट्टनिःसारः शकृत्स उपपद्यते ॥
मूत्रं चास्य त्वधोभागे वारणस्य शरीरजः ॥ ७ ॥
कक्ष्यां मूत्रधरो बस्तिरेकद्वारो ह्यधोमुखः ॥
अपां श्रो(स्रो)त्रैः सुसूक्ष्मैः स निर्झरैरिव पूर्यते ॥ ८ ॥
प्रतिपूर्णस्ततो बस्तिरपानं प्रतिपद्यते ॥
अपाने शिथिलीभूते वेदना तु ततो भवेत् ॥ ९ ॥
एवं विसृजते मूत्रं समानेन समीरितम् ॥
इति शारीरमुद्दिष्टं वारणानां यथाक्रमम् ॥ २१० ॥
मृत्काष्ठवल्कैर्हि यथा कुशलैः क्रियते गृहम् ॥
एवं शरीरबन्धस्तु मांसस्नाय्वस्थिभिः कृतः ॥ ११ ॥

† ग्रन्थमध्यस्थः कपुस्तके त्रुटितः ।

१ ख. अस्थि । २ क. सर्वजं । ३ क. श्रोत्रे । ४ क. भृशम् ।

शौर्यादभिज्ञनाद्धर्षात्परिणामान्निसर्गतः ॥
संतापात्पुष्टितो व्याधिरुपधानाच्च माद्यति ॥ १२ ॥
कफं पित्तमसृङ्मांसं मेदश्चान्योन्यमूर्छितम् ॥
सुगन्धे दीपनं स्याच्च कटिच्छिद्रमुपस्थितम् ॥ १३ ॥
तस्य तद्धर्षजं वीर्यं सौम्याग्नेयमुदीरितम् ॥
वायुना कण्ठमेढ्रेभ्यः खेभ्यश्चास्य प्रसिच्यते ॥ १४ ॥
अतः शिलाभ्यः संभूतं यथा शैलाच्छ्रु(स्र)वेज्जलम् ॥
एवं गजमुखं प्राप्य स्वेदः श्र(स्र)वति पार्थिव ॥ २१५ ॥
समागता गजमुखे सर्वाः स्वेदवहाः सिराः ॥
भुक्तान्त(न्न)स्य हि प्रस्वेदात्ताः श्र(स्र)वन्ति निसर्गतः ॥ १६ ॥
अन्येषां रोमकूपेभ्यः प्रविष्टमपराः सिराः ॥
वहन्ति कायजान्धातून्निर्दिशेत्सर्वदेहिनाम् ॥ २७ ॥
हस्ती दन्ती गजो नागो मतङ्गः कुञ्जरः करी ॥
इभो मतङ्गजश्चैव वारणो द्विरदो द्विपः ॥ १८ ॥
मृगोऽथ सामजश्चैव तथा चानेकपः स्मृतः ॥
इति पञ्चदशैतानि नामान्युक्तानि पण्डितैः ॥ १९ ॥
यथा गोमहिषाश्वानामुष्ट्राणां वा समा तनुः ॥
एवमभ्यन्तरस्वेदा हस्तिनस्तु निसर्गतः ॥ २२० ॥
एकपादा द्विपादाश्च बहुपादाश्च देहिनः ॥
नानाकृतिजवज्ञानानसमानान्निसर्गतः ॥ २१ ॥
एवं मतङ्गजा ज्ञेया न समानाः परैर्मृगैः ॥
अन्तःस्वेदा मूढमुष्का मुखशृङ्गप्रहारिणः ॥ २२ ॥
ऐश्वर्येण निसर्गेण न समाना मृगैर्गजाः ॥
ब्रह्मा तद्वेद भूतानां निसर्गे कारणं विभुः ॥ २३ ॥
(*अनन्तानां च लोकानां भूतानां च महीपते ॥
न शक्यं कारणं ज्ञातुं देवं गुह्यं प्रजापते ॥ २४ ॥
उत्पत्तिकर्म विज्ञानं शरीरं विषयो बलम् ॥
आयुरारोग्यता वर्ष्म वयो ज्ञानं च तत्त्वतः ॥ २२५ ॥

---

* धनुश्चिह्नान्तरगतत्रिचतुराध्यायात्मकपाठः कपुस्तके नास्ति ॥

---

१ क. तद्वीर्यजं । २ ख. कठमे° । ३ क. प्रसिध्यते । ४ क. शुक्रन्तस्य
५ क. एवमेव गजा । ६ क. °मुखा मु° ।

अधिकारं सदा ब्रूयादचिन्त्यं परिवर्जयेत् ॥
मतिमान्कुशलो वैद्यः शास्त्रमाश्रित्य युक्तितः ॥ २२६ ॥
इतीह पृष्टो भगवानङ्गराजेन धीमता ॥
प्राह शास्त्रविदं प्राज्ञः पालकाप्यो यथातथम् ॥ २२७ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने शरीरविचयो नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

शस्त्राग्निप्रणिधानं तु पालकाप्यो महामुनिः ॥
गजानां वदतां श्रेष्ठः प्रोवाचाङ्गेन चोदितः ॥ १ ॥
प्रत्यासन्नोदके देशे समे सुखपरिक्रमे ॥
विश्वासयन्दृढे स्तम्भे यन्त्रयित्वाऽथ वारणम् ॥ २ ॥
विन्यस्योदककुम्भं च समिध्याग्निं चिकित्सकः ॥
वांशीकुठारपरशुं विमोक्षार्थमुपार्जयेत् ॥ ३ ॥
आधारांस्तापिकां दर्वीं शस्त्राणि विविधानि च ॥
शोणितस्थापनार्थं च यथोक्तान्यौषधान्यपि ॥ ४ ॥
समङ्गा(ङ्गा)गदरोम्बष्ठाक्षीरिणां च त्वचः समाः ॥
आमलक्यश्वकर्णस्य मधूकस्य धवस्य च ॥ ५ ॥
त्वचः प्रियङ्गवो रोध्रं पतङ्गं गैरिकं तथा ॥
शुष्कचूर्णानि सूक्ष्माणि भूतिवरुणकस्य च ॥ ६ ॥
गवां च शकृतश्चूर्णं पांशूनञ्जनमेव च ॥
श्रीवेष्टकं सर्जरसं पृथ्वीकाशोकमुष्ककान् ॥ ७ ॥
अरिमेदपलाशानां निर्यासं गुग्गुलुं तथा ॥
चूर्णानि यवमुद्गानां मृदं दग्धा(ग्ध्वा) कपालिनाम् ॥ ८ ॥
जीवाङ्गारान्सह क्षौमांस्तथा निर्वापणानि च ॥
शस्त्राणि वासयित्वाऽग्निं हुत्वा वाच्य द्विजानपि ॥ ९ ॥
प्रोक्ष्याद्भिराज्यशेषेण समालभ्य गजं ततः ॥
सम्यङ्निधापयेच्छस्त्रं देशेषु मतिमान्भिषक् ॥ १० ॥
स्व(श्व)पथुस्त्वग्गतो ज्ञेयो गम्भीरो मर्मजश्च यः ॥
दोषलिङ्गैश्च विज्ञेयाः संसृष्टागन्तवश्च ये ॥ ११ ॥

तनुप्रदेशे बहुलो बहुले च तनूद्गतः ॥
तिर्यगायतगम्भीरो विसर्पोत्सङ्गवानपि ॥ १२ ॥
सर्वानेतान्विदित्वाऽथ प्रदेशा ये च मर्मजाः ॥
अविचक्षुरसंभ्रान्तः सुस्थानः सुस्थितो लघुः ॥ १३ ॥
स्नायुसंधिसिरामर्म रक्षञ्शस्त्रमथो नयेत् ॥
अङ्गुलं वा यवार्धं वा शिरा भिन्ना न दुष्यति ॥ १४ ॥
अभिन्नश्वयथोरेतद्राजन्व्यञ्जनमिष्यते ॥
अशेषतो न विश्रा(स्रा)व्येत्तिर्यगूर्ध्वमथापि वा ॥ १५ ॥
वहेच्च दोषः संस्थायी निरुत्सङ्गं ततश्च तम् ॥
सुकरालं व्रणं छिन्द्यादनुलोमं समं गतो ॥ १६ ॥
नासृक्पादप्रकारं च त्रिपादं छेदयेद्व्रणम् ॥
पादप्रमाणं कुर्यात्तु व्रणस्य चतुरङ्गुलम् ॥ १७ ॥
कुर्याद्यथोद्गमं चापि सुभिषग्गुणदोषतः ॥
भैषज्योत्तरपूर्वाणि कारयेत्तु ऋजूनि च ॥ १८ ॥
आयते चतुरस्रे वा वृत्तेऽथापि परिग्रहे ॥
दोषनिर्हरणार्थाय सर्वान्कुर्यादधोमुखान् ॥ १९ ॥
यथौषधानि च वहेत्तं दोषं परिशोधयेत् ॥
अंगतिर्यत्र चाङ्गुल्यास्तनुगम्भीरमर्मसु ॥ २० ॥
एषण्या श्वयथोर्यत्र तत्र शस्त्रं न पातयेत् ॥
पित्तदुष्टं तु यत्कालं हरितं पीतकं तथा ॥ २१ ॥
उष्णं चाशु श्र(स्र)वति यत्स्कन्दयत्यपि तेजसा ॥
बहुलं पिच्छिलं पाण्डु चिराच्छ्र(त्स्र)वति स्कन्दति ॥ २२ ॥
श्लेष्मदोषान्वितं रक्तं विद्यादेतद्विचक्षणः ॥
तनुकं फेनिलं श्यावं रक्तं वातान्वितं भवेत् ॥ २३ ॥
संनिपातान्वितं रक्तं सर्वदोषैः समन्वितम् ॥
पाटने लेखने वेध्ये प्रच्छन्ने वाऽपि सीवने ॥ २४ ॥
सदोषरुधिरं यावत्तावन्न प्रतिषेधयेत् ॥
इंद्रगोपकवर्णं यत्तद्वै प्रकृतिशोणितम् ॥ २५ ॥
अदोषलिङ्गं शुद्धं यद्वहेत्तत्प्रतिषेधयेत् ॥
दुष्टं यदा कायगतं न विश्रा(स्रा)व्येत शोणितम् ॥ २६ ॥

संदूषयति तद्वायून्बहून्दोषानुदीरयेत् ॥
अतिप्रवृत्तं श्र(स्र)वति निर्दोषे शोणितेऽधिकम् ॥ २७ ॥
पूर्वोक्तैश्चूर्णयोगैस्तु स्थापनं प्रतिचूर्णनैः ॥
स्थाने प्रधाने निर्दोषे शीतले स्थापयेद्गजम् ॥ २८ ॥
न चास्मै लवणं देयं नात्युष्णं नाम्लमेव च ॥
भक्ष्यं भोज्यं तथा पेयं सर्वं च परिवर्जयेत् ॥ २९ ॥
यावद्रक्तं तु तिष्ठेत्तु स्थिते स्यादपरो विधिः ॥
आहारस्य च सौहित्यात्स्पर्शाच्छब्दाद्रसादपि ॥ ३० ॥
यस्मात्प्रसिच्यते रक्तं तस्मात्तेभ्यो निवर्तयेत् ॥
भयात्क्रोधाच्च रुधिरं स्थितं यस्मात्प्रवर्तते ॥ ३१ ॥
तस्मान्न कोपयेदेनं न चास्य भयमादिशेत् ॥
परिषेकैः प्रदेहैश्च शीतलैः समुपाचरेत् ॥ ३२ ॥
नलवञ्जुलमूलैश्च मृणालैः सबिसोत्पलैः ॥
पद्मकोशीरमञ्जिष्ठासारिवाचन्दनैरपि ॥ ३३ ॥
प्रदिह्य बहुशश्चूर्णं शीतलैम्यश्च वारणम् ॥
आर्द्रैर्वस्त्रैः परिच्छाद्य वीजयेद्व्यजनैः शुभैः ॥ ३४ ॥
क्रियाभिरेवं सूक्ष्माभिर्यदि रक्तं न तिष्ठति ॥
अग्निकर्म ततः कुर्याद्यथायोगं समाहितः ॥ ३५ ॥
ततोऽग्निकर्मणि कृते घृततैलवसादिभिः ॥
मधूच्छिष्टसमायुक्तैरभ्यङ्गो रक्तनिग्रहः ॥ ३६ ॥
न तु सर्वस्य कर्तव्यमग्निकर्म विजानता ॥
रोगाभिभूते क्षीणे च हतमर्मणि च द्विपे ॥ ३७ ॥
अनिर्वापितशल्ये च तृष्णार्ते मूर्छितेऽपि च ॥
बहुव्रणे च मातङ्गे संतप्ते ज्वरितेऽपि च ॥ ३८ ॥
अग्निकर्म न कर्तव्यं नागानां हितमिच्छता ॥
षडत्यया भवन्त्येते शस्त्रे मिथ्या प्रचारिते ॥ ३९ ॥
संक्षोभः पाण्डुता चैव शोणितस्यातिसेचनम् ॥
प्रवेपनं च स्तम्भं च जीवस्यापि च मोक्षणम् ॥ ४० ॥
इत्येते षट्समुद्दिष्टाः क्रमशो ह्यत्यया नृप ॥
हीनं वाऽप्यतिरिक्तं वा वक्रं वा कर्म कस्यचित् ॥ ४१ ॥
मर्मसंधिसिराछेदो गजं प्राणैर्वियोजयेत् ॥
मूलं स्कन्धश्च शाखाश्च यथा वृक्षस्य पार्थिव ॥ ४२ ॥

सिरास्नाय्वस्थिमांसानि त्वक्चैव दन्तिनां भवेत् ॥
शरीरे मूर्तिस्तु भवेद्ध्रुवमेतच्छरीरिणाम् ॥ ४३ ॥
तत्र प्राणावृतो ह्यात्मा देहं धारयतीश्वरः ॥
प्राणान्मर्माश्रितान्विद्धि योगवाहसमायुतान् ॥ ४४ ॥
तस्मान्मर्माणि संरक्षेच्छस्त्रकर्मणि शास्त्रवित् ॥
इति शस्त्रविधौ सम्यक्प्रणिधानं प्रकीर्तितम् ॥ ४५ ॥

—:():—

अत ऊर्ध्वं प्रवक्ष्यामि व्रणेऽग्निप्रणिधौ विधिम् ॥
व्रणाः संधिगता ये स्युस्तथा मेण्ढ्रगुदाश्रिताः ॥ ४६ ॥
स्थि(शि)रास्थिमर्मधमनीकोष्ठकण्ठश्रिताश्च ये ॥
एतेष्वङ्गप्रदेशेषु नाग्निर्देयः कथंचन ॥ ४७ ॥
मोहाद्दत्तस्तु वैकल्यं प्राणैर्वा विप्रयोजयेत् ॥
दुष्यन्ति बहुशो ये तु व्रणा दुःखप्ररोहिणः ॥ ४८ ॥
नाडीजाताः सपिटकाः कृमिदुष्टाश्च ये व्रणाः ॥
उत्सन्नमांसगम्भीराः साश्र(स्र)वाः शर्कराचिताः ॥ ४९ ॥
नीलावच्छिन्नमांसाश्च वल्मीकाकृतयश्च ये ॥
व्रणो यो मांसशोषी च बहलौष्ठश्च यो व्रणः ॥ ५० ॥
एतेषु च यथायोगमग्निकर्म विधीयते ॥
शूनं विलापयत्यग्निः शुष्कमुत्सादयत्यपि ॥ ५१ ॥
व्रणसंशोधनस्त्वग्नी रोपणः परिकीर्तितः ॥
शोफापहाराचमतो वातानां चानुलोमतः ॥ ५२ ॥
न जायतेऽग्निना नाडीव्रणश्च न विसर्पति ॥
मृदुं करोति प्रस्तब्धं प्रस्तब्धं मृदुतां नयेत् ॥ ५३ ॥
उत्सन्नं सादयत्यग्निः सन्नमुत्सादयत्यपि ॥
एतेऽग्निकर्मणि गुणा यस्मात्तस्माद्विजानता ॥ ५४ ॥
कार्योऽग्निप्रणिधिः सम्यङ्नागानां हितमिच्छता ॥
कपोतवर्णं रूक्षं तु तथा संकुचितं समम् ॥ ५५ ॥
सम्यग्दग्धं विजानीयान्निराश्र(स्र)वमवेदनम् ॥
व्रणानां परिपोटाश्च स्फोटाः संश्र(स्र)वणं तथा ॥ ५६ ॥
दुर्दग्धमेतज्जानीयाद्दहेत्सम्यक्ततः पुनः ॥
ज्वरोऽत्यर्थं भ्रमो मूर्छा तृष्णा स्यान्मुखशोषणम् ॥ ५७ ॥

अतिदग्धे भवन्त्येतद्व्रणे नागस्य पार्थिव ॥
शीर्णमांसाः सुगम्भीरा व्रणा दुःखप्ररोहिणः ॥ ५८ ॥
अतिरिक्ते भवन्त्यग्नौ व्रणे दोषश्च दारुणः ॥
परिषेकैः प्रदेहैश्च शीतलैस्तमुपाचरेत् ॥ ५९ ॥
द्विव्रणीये यथा प्रोक्तं तथा व्रणमुपाचरेत् ॥
इति सम्यक्समाख्यातः शस्त्राग्निप्रणिधौ विधिः ॥६०॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने शस्त्राग्निर्मणिधिर्नाम दशमोऽध्यायः ॥ १० ॥

अथैकादशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कृतजप्यमृषिश्रेष्ठं विनयेन कृताञ्जलिः ॥ १ ॥
शस्त्राग्निप्रणिधाने यत्परिकर्मसु हस्तिनाम् ॥
सर्वं भगवता प्रोक्तं दृढे स्तम्भे निबन्धनम् ॥ २ ॥
तत्कथं वारणेन्द्राणां कर्तव्यमृषिसत्तम ॥
स्तम्भ एव निबद्धानामनल्पबलतेजसाम् ॥ ३ ॥
कथं न हस्तवालाभ्यां हिंस्युर्गात्रापरेण वा ॥
प्रतिकर्मक्रियाकाले बन्धेनैकेन संयताः ॥ ४ ॥
यथा येन निराबाधं निराबाधं च हस्तिनाम् ॥
भवेत्तु विधिवत्सर्वं तथा मे वक्तुमर्हसि ॥ ५ ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
शृणु राजन्यथा कार्यः प्रतिकर्मक्रियाविधिः ॥ ६ ॥
आलाने चैव बद्धानां कार्यस्तु पृथिवीपते ॥
शस्त्राग्निक्षारसंयुक्तः प्रतिकर्मक्रियाविधिः ॥ ७ ॥
अयन्त्रितमबद्धं वा यो नागमुपसर्पति ॥
प्रतिकर्मक्रियां कर्तुं बालिशस्त्वरयाऽपि वा ॥ ८ ॥
जीविते संशयस्तस्य वैकल्यं वा ध्रुवं भवेत् ॥
न च सम्यक्क्रियां कर्तुं स शक्नोति नराधिप ॥ ९ ॥
स्नाय्वस्थीनि सिरां वाऽपि कर्म चाप्युपहन्त्यपि ॥
तिर्यग्वा पातयेच्छस्त्रं वेपमानो ह्यशिक्षितः ॥ १० ॥

तस्मात्सुपश्रितं कृत्वा पूर्वमेव तु वारणम् ॥
स्तम्भालितं तु यत्नेन नित्यकालमुपाचरेत् ॥ ११ ॥
पूर्वापरपरिक्षेपस्त्वालानमुपयामकम् ॥
उपरिग्रहबन्धश्च हस्ते वासनमेव च ॥ १२ ॥
दन्ते सकटिके चैव अपस्कारे तथैव च ॥
दन्तोद्दानीं शिरोद्दानीं कायोद्दानीं तथैव च ॥ १३ ॥
वालं वासनमेवात्र इति बन्धास्त्रयोदश ॥
प्रतिकर्मक्रियाकाले प्रयोक्तव्यास्तु दन्तिनाम् ॥ १४ ॥
एतैः समस्तैर्बद्धस्य बन्धैर्नागस्य पार्थिव ॥
प्रतिकर्मविधिं कुर्याद्गुप्तस्याऽऽरक्षरक्षिभिः ॥ १५ ॥

—:○:—

रोमपादस्ततो राजा विनयात्पुनरुत्थितः ॥
पप्रच्छ पालकाप्यं तु पुनः प्रश्नमनन्तरम् ॥ १६ ॥
भगवञ्शिष्यभावेन किंचित्पृच्छामि संशयम् ॥
तदशेषेण विधिवत्सर्वमाख्यातुमर्हसि ॥ १७ ॥
आलिते बहवो दोषा बद्धगात्रापरस्य च ॥
रज्ज्वाद्येन सुगुप्तस्य वारणस्य महीपते ॥ १८ ॥
उद्विग्नो भयसंत्रस्तः प्रतिकर्मक्रियासु वै ॥
पतेद्वा निष्पतेद्वाऽपि ततो बाध्येत वा गजः ॥ १९ ॥
बन्धादींश्छेदयेत्सर्वानालानं वाऽपि वारणः ॥
तस्य प्रतिक्रियां काले कथं वैद्यो ह्युपाचरेत् ॥ २० ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
शृणु सर्वं महाराज यथा कार्यं भिषग्जिता ॥ २१ ॥
भूमिः पाषाणबहुला विषमा शर्करान्विता ॥
कर्दमतृणयुक्तावा प्रतिकर्मणि वर्जिता ॥ २२ ॥
या तु नात्यर्थसिकता पांशुला नष्टशर्करा ॥
निष्कर्दमा समा चैव सा भूमिः कर्मणो हिता ॥ २३ ॥
पूर्वापरपरिक्षिप्तं तत्र नागं निषादयेत् ॥
रज्जुं च निर्णयेत्पक्षे पक्षबन्धं च कारयेत् ॥ २४ ॥
पक्षबन्धविधानं च कर्तव्यं विधिना भवेत् ॥
अपस्कारे दृढं बद्ध्वा अष्ठीव्ये च नराधिप ॥ २५ ॥

बन्धयित्वा तु तं रज्जुं यूपे कार्यो(ये)ऽवलम्बयेत् ॥
तयोः प्रदेशयोर्मन्यायुक्तया स्तम्भौ निखानयेत् ॥ २६ ॥
अच्छिद्रौ सुदृढौ ह्रस्वौ बन्धनार्थं विचक्षणः ॥
बालं वासनमप्यस्य निक्षिपेदपरान्तरे ॥ २७ ॥
अनुवृत्तस्य निर्दिष्टः प्रतिकर्मक्रियाविधिः ॥
वारणस्य यथान्यायमेष ते पृथिवीपते ॥ २८ ॥

—:०:—

भूयोऽङ्गराजः पप्रच्छ पालकाप्यं महामुनिम् ॥
तत्रापि बहवो दोषा दृश्यन्ते मुनिसत्तम ॥ २९ ॥
दृश्यते क्षयभागेषु अंश(स)योः कट्योरपि ॥
विक्षिपत्यपि गात्राणि कर्म चापि न विन्दति ॥ ३० ॥
यथा वै यस्य च भवेन्निराबाधं च दन्तिनः ॥
भवेत्तु विधिवत्सर्वं तथा मे वक्तुमर्हसि ॥ ३१ ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
शृणु यन्त्रविधानं मे वारणानां नराधिप ॥ ३२ ॥
प्रत्यासन्नोदके देशे समे सुखपरिक्रमे ॥
शिवे रम्येऽथ वृक्षे वा देवायतनवर्जिते ॥ ३३ ॥
अना……श्मशानस्य नगरस्यापि दूरतः ॥
कार्यः प्रागुत्तरे देशे यत्र सिद्धिरभीप्सिता ॥ ३४ ॥
आवासाः पक्षिणां ये च ये वा स्युर्गर्हितद्रुमाः ॥
ये चापि दग्धास्तु भृशमशन्यभिहतास्तु ये ॥ ३५ ॥
अर्धशुष्कास्तु ये वृक्षास्तथैव देवताश्रिताः ॥
देवतायतने चैव उद्याने चाऽऽश्रमेषु च ॥ ३६ ॥
चैत्यश्मशानजा ये च न योज्या यन्त्रकर्मणि ॥
इत्यप्रशस्ता व्याख्याताः प्रशस्ताञ्शृणु मे नृप ॥ ३७ ॥
अञ्जनः खदिरः सालः कदरो वा समाहितः ॥
मधूकः सोमवल्को वा शा(ऽशो)को वा सर्ज एव च ॥ ३८ ॥
अष्टानां वृक्षजातीनां ये द्रुमा सुपपत्तितः ॥
अवल्मीके शुभे देशे सारवन्तः समाहिताः ॥ ३९ ॥
ज्ञाता न चाग्निना स्पृष्टा वल्लीभिः पिण्डिताश्च ये ॥
अकोटरास्तु जाताश्च योग्यास्ते यन्त्रकर्मणि ॥ ४० ॥

प्रशस्ते तिथिनक्षत्रे मुहूर्ते चापि पूजिते ॥
देवान्यष्ट्वा यथान्यायं स्वस्ति वाच्य द्विजांस्तथा ॥ ४१ ॥
वृक्षाणां ग्रहणार्थाय कुर्याच्चेमान्बलीनपि ॥
शुचिः स्नातस्ततो वैद्यो वृक्षं समुपवासयेत् ॥ ४२ ॥
तस्योपवासना कार्या सुरभिः सुमनोक्षतैः ॥
रक्तमाल्यं प्रियङ्गुं च खदिरस्योपवासने ॥ ४३ ॥
सूपौदनेन मांसेन चित्रैर्माल्यैस्तथैव च ॥
अञ्जनस्य बलिः कार्यः सुरयाऽपि विधीयते ॥ ४४ ॥
गुडौदनेन पयसा पूपसोल्लासिकासवैः ॥
कदरस्य बलिः कार्यः कर्मसिद्धिमभीप्सता ॥ ४५ ॥
एतैश्च विधिवत्कृत्वा बलिं समुपवास्य च ॥
वृक्षमूले स्थितो वैद्यस्त्रीन्वारान्वाचयेदिह ॥ ४६ ॥
स्थावरे यानि भूतानि निवसन्ति चि(च)राणि वै ॥
नमस्करोम्यहं तेभ्यः क्रियतां वा सपर्ययः ॥ ४७ ॥
वर्धापयेत्ततस्त्वेनं प्रातरुत्थाय संयतः ॥
वर्धकी वर्धयेद्वृक्षं प्राचीमभिमुखं दिशम् ॥ ४८ ॥
उत्तरां वा समाश्रित्य दिशमेनं निपातयेत् ॥
विस्वरं यदि कूजेत अन्यतो वा पतेद्यदि ॥ ४९ ॥
यन्त्रैस्तैर्निष्फलो वृक्षस्तत्र यन्त्रे नियोजयेत् ॥
सम्यङ्निपतितं दृष्ट्वा वृक्षमग्रन्थिकोटरम् ॥ ५० ॥
यन्त्रे निवेशयेद्वैद्यः समे देशे बहूदके ॥
समाहितं दृढं तत्र स्तम्भं मध्ये निवेशयेत् ॥ ५१ ॥
ततोऽष्टौ यनु(?)पादाश्च कर्तव्याः सुसमाहिताः ॥
तेषां छिद्राणि सूप्य(च्य)र्थं द्वे द्वे ह्येकस्य कारयेत् ॥ ५२ ॥
बलवत्यस्तथा सूच्यस्तत्राष्टौ कारयेद्भिषक् ॥
बहिश्च यन्त्रपादानामन्यद्दीर्घं पृथक्पृथक् ॥ ५३ ॥
ते वै निपाताः कर्तव्याश्चत्वारस्तु समाहिताः ॥
तेषु तिर्यङ्नते कार्ये द्वे तुले भारधारणे ॥ ५४ ॥
तयोरुपरि कर्तव्या स्यादेकाऽत्यायता तुला ॥
हस्ते चान्यं तुलायन्त्रं निबद्धफलकं दृढम् ॥ ५५ ॥

आयतं चतुरो हस्तान्हस्ताद्वा द्वादशाङ्गुलात् ॥
कोष्ठ्यः षडङ्गुलं चैव मधूकं शाकमेव च ॥ ५६ ॥
त्र्यङ्गुलं त्ववगाढं च चतुरस्रं समन्ततः ॥
चतुरङ्गुलविस्तीर्णाः कोष्ठ्यस्तत्र च कारयेत् ॥ ५७ ॥
असंभ्रान्तमतिर्वैद्यः सत्त्वमार्गं समाश्रितः ॥
ये त्रयोदश बन्धा वै मया पूर्वं प्रकीर्तिताः ॥ ५८ ॥
यन्त्रे प्रवेश्य वै नागो बन्धितव्यो नराधिप ॥
ततोऽस्य फलके हस्तं वासयेत विचक्षणः ॥ ५९ ॥
नस्यकर्मणि नागानामन्येषु च न वासयेत् ॥
सूचीभिरुपधेयश्च ततः स पृथिवीपते ॥ ६० ॥
उरस्येका ततो देया एकैकाऽष्ठीव्ययोः पुनः ॥
अपस्कारे तथा ह्येका एका च जघने भवेत् ॥ ६१ ॥
एका मस्तकपिण्डे तु सूची देया नराधिप ॥
एकैवाथाऽऽसने देया तथैका पश्चिमासने ॥ ६२ ॥
लाङ्गूलवंशे दातव्या चैका सूची महीपते ॥
एवमष्टौ विधातव्याः पश्च सूच्यः समाहिताः ॥ ६३ ॥
ताभिः परिगृहीतस्य बन्धाः कार्यास्त्विमे पुनः ॥
उत्सङ्गी परिदामी च तथा चैवोरसी पुनः ॥ ६४ ॥
पाददानी च कर्तव्या सुदृढा यन्त्रकर्मणि ॥
उदानाश्चापि कर्तव्याश्चत्वारः साधुपूजिताः ॥ ६५ ॥
एवं यन्त्रे निबद्धस्य बन्धैः सर्वैश्च हस्तिनः ॥
प्रतिकर्म ततः कार्यं भिषजा सिद्धिमिच्छता ॥ ६६ ॥
ज्येष्ठयन्त्रविधानं तु सम्यगेतदुदाहृतम् ॥
यथाप्रमाणविहितं वारणानां महीपते ॥ ६७ ॥
यन्त्रं तु मध्यमं कार्यं प्रमाणेन समाहितम् ॥
त्रिभागपरिहीणं स्यादुत्तमात्पृथिवीपते ॥ ६८ ॥
कन्यसं मध्यमात्किंचिदूनं यन्त्रमिहोच्यते ॥
अथवा विभजेद्यन्त्रं यथाहस्तिप्रमाणतः ॥ ६९ ॥
आयामार्धेन नागस्य विस्तारः समुदाहृतः ॥
त्रयाणामपि नागानां यथावदनुपूर्वशः ॥ ७० ॥

वारणानां यथान्यायमारोग्याय भिषग्वरः ॥
कर्म कुर्यादसंभ्रान्तस्तिथ्यादौ पूजिते यदा ॥ ७१ ॥
शुचिः सुप्रयतो भूत्वा कृत्वा ब्राह्मणवाचनम् ॥
स्नापयेच्च ततः पादान्यन्त्रस्याथ तुलास्तथा ॥ ७२ ॥
अलंकृत्य कृतास्रश्च प्रादक्षिण्येन रोपयेत् ॥
सुबद्धां सग्रहां कृत्वा ततस्तमवतारयेत् ॥ ७३ ॥
आकोटयित्वा विधिवन्निष्प्रकम्पश्च कारयेत् ॥
फलकैराश्रितैर्भूमिं निश्चलैः सुसमे दृढे ॥ ७४ ॥
स्नापयित्वा ततो यन्त्रं सर्वाङ्गं विरलं कृतम् ॥
गन्धपङ्काकुलं कृत्वा पताकावस्त्रसंकुलम् ॥ ७५ ॥
ततः पूर्वं तथाऽऽहृत्य संभारांस्तत्र कारयेत् ॥
यन्त्रस्य पश्चिमे देशे जुहुयाद्धव्यवाहनम् ॥ ७६ ॥
हुत्वाऽग्निं च यथान्यायमाज्यशेषेण म्रक्षयेत् ॥
यन्त्रं यन्त्रतुलाश्चापि शोणितेन समालभेत् ॥ ७७ ॥
पक्त्वाऽऽमकेन मांसेन तथा सीधुसुरासवैः ॥
भूतो(तौ)दनेन कुल्माषैर्मत्स्यैर्मांसैः फलैस्तथा ॥ ७८ ॥
अष्टापदं जपेत्तत्र……… …. …. देवताः ॥
सनत्कुमारं सेनान्यं देवं चाप्यपराजितम् ॥ ७९ ॥
उग्रानन्यान्परिषदान्देवान्सेनापतिं तथा ॥
नमस्कृत्य ततो वैद्यः शुक्लाम्बरधरः शुचिः ॥ ८० ॥
कृत्वा भूतोपहारं च स्वस्ति वाच्य द्विजांस्तथा ॥
यन्त्रं प्रदक्षिणीकृत्य तास्ता हि स्वाङ्गदेवताः ॥
ततः प्रवर्तयेत्कर्म वारणानां भिषग्वरः ॥ ८१ ॥
इति यन्त्रविधानं च बन्धाश्च परिकर्मणि ॥
हस्तिनां पालकाप्येन रोमपादाय कीर्तिताः ॥ ८२ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने यन्त्रविधिर्नामैकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

कृतजप्यमृषिश्रेष्ठं विनयेन कृताञ्जलिः ॥
रोमपादो महाप्राज्ञः पालकाप्यं स्म पृच्छति ॥ १ ॥

प्रनष्टशल्याहरणं यथावद्वक्तुमर्हसि ॥
यष्टितोमरशक्त्यृष्टिकिणयः सपरश्वधैः ॥ २ ॥
शरैश्च विविधैर्घोरैः परप्राणापहारिभिः ॥
नाराचैरर्धनाराचैरर्धचन्द्रनिभैस्तथा ॥ ३ ॥
भल्लैर्वराहकर्णैश्च क्षुरप्रैरिक्षुपत्रकैः ॥
पीलुशङ्कुप्रमथनैः शिखराग्रैः सकण्टकैः ॥ ४ ॥
सावरैरर्धकर्णैश्च गृध्रशीर्षैस्तु कण्टकैः ॥
नालीकैरर्धनालीकैस्तथा वेतसपत्रकैः ॥ ५ ॥
मुकुलाग्रैर्विकीर्णैश्च मुद्गरैः कूटमुद्गरैः ॥
एतैश्चान्यैश्च विद्धानां विप्रनष्टैर्महामुने ॥ ६ ॥
दृश्यन्ते वारणेन्द्राणां गूढशल्याः सुदारुणाः ॥
व्रणा हि बहुविश्रा(स्रा)वा दुर्गन्धाः कठिनास्तथा ॥ ७ ॥
गम्भीरा वेदनाप्रायाः सशोणितपरिश्र(स्र)वाः ॥
न शोधनैः कषायैर्वा विशुध्यन्ति कदाचन ॥ ८ ॥
तेषां यथा चिकित्सा च शोधनं तु सुखं भवेत् ॥
कर्तुं यथा च विज्ञेया यत्समुत्थाश्च ये व्रणाः ॥ ९ ॥
असंशयं मे भगवंस्तत्सर्वं वक्तुमर्हसि ॥
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥ १० ॥
ब्रह्मा शास्त्रमिदं प्राह पूर्वमेव प्रजापतेः ॥
प्रजापतिरथेन्द्राय सोऽश्विभ्यां पाकशासनः ॥ ११ ॥
अश्विनौ चापि तौ देवावृषिभ्यः प्रत्यभाषताम् ॥
प्रनष्टशल्याहरणं पालकाप्यो महायशाः ॥ १२ ॥
सद्यःक्षतविधाने च द्विव्रणीये च तन्मया ॥
व्रणानां लक्षणं कृत्स्नं विस्तरेण प्रकीर्तितम् ॥ १३ ॥
शल्यस्य विप्रनष्टस्य लक्षणं शृणु पार्थिव ॥
स्थानान्येतानि जानीयाद्येषु शल्यं प्रणश्यति ॥ १४ ॥
तानि सर्वाणि वक्ष्यामि पृथक्त्वेन निबोध मे ॥
छविर्मांसं तथा मेदः संधिः स्नायुस्तथाऽस्थि च ॥ १५ ॥
कोष्ठश्रो(स्रो)तांसि चैवैषां स्थानान्येतानि विद्धि वै ॥
तृणं काष्ठं च विज्ञेयं तथा लोहमयं च यत् ॥ १६ ॥

बाह्यमेतद्भवेच्छल्यं प्रकारैर्बहुभिर्युतम् ॥
शोणितं त्वस्थि मांसं च शिरा स्नायूनि वाऽप्यथ ॥ १७ ॥
पूपं(पूयं) चापि भवेच्छल्यमेतत्सर्वं शरीरजम् ॥
तत्र बाह्यानि सर्वत्र सर्वमेव नराधिप ॥ १८ ॥
शरीरजेषु चास्थीनि दारुणानि विनिर्दिशेत् ॥
शोणितादीनि शेषाणि यानि शल्यानि पार्थिव ॥ १९ ॥
निर्वहन्त्यौषधीस्तानि सुखे वा विकृते कृते ॥
यानि दारुणशल्यानि तानि सर्वाणि भूपते ॥ २० ॥
गूढतां याति कालेन शरीरस्थानि दन्तिनाम् ॥
अत ऊर्ध्वं प्रवक्ष्यामि सशल्ये लक्षणं नृप ॥ २१ ॥
वेदनाऽथ परिश्रा(स्रा)वः शोफः स्तम्भः परिग्रहः ॥
व्रणं शल्यमुखस्तेषां कठिनोष्ठश्च लक्ष्यते ॥ २२ ॥
दुर्गन्धः पिच्छिलश्चापि स्रावस्तत्र प्रवर्तते ॥
स लोहितश्च विच्छिन्नः कदाचिच्चापि संहतः ॥ २३ ॥
अष्टानां व्रणवस्तूनां यच्च वस्तु समाश्रितम् ॥
सादृश्यं तस्य च पुनः कदाचिच्छ्र(त्स्र)वति श्र(स्र)वम् ॥ २४ ॥
एतैर्लिङ्गैस्तु विज्ञेया व्रणाः सम्यग्भिषग्वरैः ॥
ईषदुन्नत उत्सन्नं त्वचं लक्षेत दन्तिनः ॥ २५ ॥
मांसस्था कूर्मसंस्थाने मेदःस्थे तु विसर्पति ॥
शिरास्नायुगते कुब्जस्तब्धाङ्गो वा भवेद्द्विपः ॥ २६ ॥
चेष्टानिरोधः संधौ तु महांश्च श्वयथुर्भवेत् ॥
अस्थिभेदस्त्वस्थिगते तेन न श्र(स्र)वति व्रणः ॥ २७ ॥
गुणोपरोधः श्रो(स्रो)तः स्याद्यस्मिंस्तिष्ठति श्रोतसि ॥
कोष्ठस्थे रक्तसंसृष्टं विस्रंश्र(स्र)वति च व्रणः ॥ २८ ॥
गुदः श्र(स्र)वति चात्यर्थं द्विपस्त्वानम्रते च सः ॥
संध्यस्थिधमनीस्नायौ सद्यःप्राणहरेषु च ॥ २९ ॥
वेदनालिङ्गबाहुल्यादसाध्यं तं विनिर्दिशेत् ॥
मर्मज्ञानं यथोक्तेन विधिना तु विशारदः ॥ ३० ॥
अत ऊर्ध्वं प्रवक्ष्यामि सशल्ये लक्षणं व्रणे ॥
अनिर्हृतानि तिष्ठन्ति वर्षाणि सुबहून्यपि ॥ ३१ ॥

शल्यानि नैवं दृश्यन्ते भिद्यन्ते नैव दन्तिनाम् ॥
निर्व्रणाश्चापि जायन्ते कदाचिच्चापि सव्रणाः ॥ ३२ ॥
न कदाचित्प्रदृश्यन्ते सुनिक्षिप्ततया नृप ॥
भूयस्तु संप्रवक्ष्यामि सशल्यव्रणलक्षणम् ॥ ३३ ॥
व्रणे प्रभिन्ने तस्याथ श्रा(स्रा)वगन्धं च लक्षयेत् ॥
सगदापानसंस्थानः खराणां वाजिनां तथा ॥ ३४ ॥
नृणां च गुदसंस्थानो नाभीभूतश्च जायते ॥
दुर्गन्धः पिच्छिलश्चापि श्रा(स्रा)वस्तत्र प्रवर्तते ॥ ३५ ॥
स लोहितश्च विच्छिन्नः काञ्जिकौदनगन्धवान् ॥
कण्डूयते दह्यते च शुष्यंश्च परिपोद्यते ॥ ३६ ॥
वालुकाकर्दमैश्चैनं पांशुभिश्च करेण च ॥
वीजते जिघ्रति तथा सशल्यं व्रणमादिशेत् ॥ ३७ ॥
व्रणोपचारैस्तस्येह वारणस्य महीपते ॥
यदि शल्यं न दृश्येत तस्य वक्ष्याम्युपक्रमम् ॥ ३८ ॥
स्वभ्यक्तं तिलतैलेन ससि(शि)रस्कं घृतेन वा ॥
मेदसा वा प्रलिम्पेत्तु वसया त्रिवृतेन वा ॥ ३९ ॥
निवाते स्वेदयेद्वैद्यो यथोक्तैः स्वेदनैस्तु तम् ॥
विमर्दनं विमार्गं च सर्वेष्वङ्गेषु कारयेत् ॥ ४० ॥
परिमर्देन नागस्य शल्यं तदुपलभ्यते ॥
अपूर्वो वाऽपि संयोगः शिराणां चैव दृश्यते ॥ ४१ ॥
यत्र वा सज्जते स्पर्शस्तत्र शल्यं विनिर्दिशेत् ॥
यथै(द्ये)वं नोपलभ्येत मृदा तमुपलेपयेत् ॥ ४२ ॥
निवाते तु समावेश्य यत्र पूर्वं विशुष्यति ॥
तनौ तमथ नागस्य तत्र शल्यं विनिर्दिशेत् ॥ ४३ ॥
तत्र शल्यं विदित्वा तु क्षिप्रं तदुपनाहयेत् ॥
मृदुं विवर्णं शिथिलं पक्कं शस्त्रेण पाटयेत् ॥ ४४ ॥
एषिण्या गतिमासाद्य गजानां राजसत्तम ॥
विष्कम्भेन विमाश्यै(मर्श्यै)नं पश्चाच्चैवोपानिग्रहात् ॥ ४५ ॥
सकर्णं वाऽप्यकर्णं वा प्रच्छन्नं तत्र दृश्यते ॥
उपस्थितं तु यच्छल्यं यन्त्रेण ग्राहयेद्दृढम् ॥ ४६ ॥

वामेन तु मुखाभ्यास उत्तानेनैव पाणिना ॥
दक्षिणेन तु हस्तेन दृढं यन्त्रं निपीडयेत् ॥ ४७ ॥
आहरेत्तु ततः शल्यं क्रियायोगेन दन्तिनाम् ॥
त्वग्गतं शल्यमेवं स्यादाहर्तव्यं विजानता ॥ ४८ ॥
मांसोपचितदेहस्य मांसभागमुपाश्रि(श्रि)तम् ॥
यदा न दृश्यते शल्यं तस्य वक्ष्याम्युपक्रमम् ॥ ४९ ॥
स्वभ्यक्तं स्वेदयित्वा तु पूर्ववच्छल्यमुद्धरेत् ॥
शिराजालगतं शल्यं यदा नागे न दृश्यते ॥ ५० ॥
तस्योपायं प्रवक्ष्यामि यथा शल्यं प्रदृश्यते ॥
गोमूत्रं मण्डलं चैव लङ्घनं मर्दनं तथा ॥ ५१ ॥
व्यायामं कारयेत्तस्य तथैव विषमेऽध्वनि ॥
भृशं संकुच्यमानस्य व्यायामोद्रावितं बलात् ॥ ५२ ॥
शीघ्रं प्रच्यवते स्थानात्तस्मादेनं विचारयेत् ॥
वेदनां कुरुते तीव्रां यत्र तेनोपनाहयेत् ॥ ५३ ॥
एषिण्या गतिमासाद्य पूर्ववच्छल्यमुद्धरेत् ॥
स्नायुजालगतं शल्यं वनजस्य न दृश्यते ॥ ५४ ॥
सिराजालगते शल्ये या क्रिया तां समाचरेत् ॥
यदि संधिगतं शल्यं वारणस्य न दृश्यते ॥ ५५ ॥
चर्मणा त्वथ रज्ज्वा वा वेष्टयित्वा पटेन वा ॥
बद्ध्वा चङ्क्रमयेच्छीघ्रं लङ्घयेत्प्लावयेदपि ॥ ५६ ॥
संधौ व्यायच्छमानस्य रुजा शोफश्च जायते ॥
ततस्तं पूर्ववद्बद्ध्वा यन्त्रैः शल्यं समुद्धरेत् ॥ ५७ ॥
यदा न दृश्यते शल्यमस्थिकायप्रतिष्ठितम् ॥
बहुमांसशरीरत्वाद्गजानां तु नराधिप ॥ ५८ ॥
स्वभ्यक्तं स्वेदयित्वा तु पूर्वेण विधिना भिषक् ॥
यथोक्तां मांसदेशस्थे क्रियां तद्वत्समाचरेत् ॥ ५९ ॥
अथ शल्यं न कम्पेत दृढं लग्नं यथा स्थितम् ॥
वा(?)रक्षमूले तद्बद्ध्वा दृढरज्ज्वा समाहरेत् ॥ ६० ॥
स्रोतःसु च यदा शल्यं सिराणां संगमेषु च ॥
घट्टयन्नेव तत्प्राज्ञो मर्मदेशे च यद्भवेत् ॥ ६१ ॥

एतेष्वेव प्रदेशेषु शस्त्रकर्म न कारयेत् ॥
न चापक्के न चाक्लिन्ने न च तिर्यङ्निपातयेत् ॥ ६२ ॥
न मुक्ताशिथिले मांसे मृदुभूते न हस्तिनः ॥
विदग्धे वाऽप्यपक्के वा निर्दोषं हरणं भवेत् ॥ ६३ ॥
एवं स्रोतोगतं शल्यमाहर्तव्यं विजानता ॥
कुम्भस्रोतोगतं शल्यं यदा नागे न दृश्यते ॥ ६४ ॥
पूर्वं शिरोभितापेषु जत्रुप्रधमनं स्मृतम् ॥
स्निग्धस्विन्नस्य नागस्य करस्रोतसि दापयेत् ॥ ६५ ॥
ततस्तं बृंहमाणस्य वनथोविन(?)मूर्छितम् ॥
क्लेदितं दोषसंसृष्टं मुखं श्रो(स्रो)तः प्रपद्यते ॥ ६६ ॥
ततस्तत्प्रच्युतं स्थानाद्भूमौ पतति हस्तिनः ॥
कोष्ठप्राप्ते तु कवलं दद्यात्तस्य विरेचनम् ॥ ६७ ॥
पुरीषदोषसंसृष्टं तस्मादेतन्निरस्यते ॥
अथवा मर्दनात्तस्य पार्ष्णिघाताद्विलीयते ॥ ६८ ॥
सहसा प्रतिपद्येत मार्गवेगसमीरितम् ॥
एवं कोष्ठगतं शल्यमाहर्तव्यं विजानता ॥ ६९ ॥
इति स्थानेषु सर्वेषु ज्ञात्वा शल्यं समुद्धरेत् ॥
ततोऽपहृतशल्यस्य घृतेन परिषेचनम् ॥ ७० ॥
कर्तव्यं हस्तिनस्तस्य सलिले चावगाहनम् ॥
अशुद्धे शोधनं चापि शुद्धे संरोपणं भवेत् ॥ ७१ ॥
सवर्णकरणं चापि द्विव्रणीये प्रकीर्तितम् ॥
एवं प्रनष्टे विज्ञानं शल्ये नागस्य कीर्तितम् ॥ ७२ ॥
शल्येनोपहृतं सम्यगेभिर्योगैरुपाचरेत् ॥
.........................र्वं यन्त्रं सिंहमुखं तथा ॥ ७३ ॥
यष्टियन्त्रं कर्कटकं दात्यूहं सर्वकायिकम् ॥
गोधामुखं मकरकं दन्तैरूभय.......... ॥ ७४ ॥
....शङ्कुमेकदन्तं च मुष्टिशार्दूलमुष्टिकम् ॥
आकृतिर्यन्त्रयोनिश्च यथावदनुकीर्तिता ॥ ७५ ॥
तस्मायुक्तं च वचनात्साङ्ख्यादागमादपि ॥
दर्शनाच्चान्ययन्त्राणां कारयेद्यन्त्रसंग्रहम् ॥ ७६ ॥

अतः परं प्रवक्ष्यामि मर्माणि मनुजाधिप ॥
मूर्ध्नि चत्वारि मर्माणि सर्वाणि च समन्ततः ॥ ७७ ॥
येषु विद्धो महाराज मुहूर्तं न स जीवति ॥
अण्डकोशे बस्तिशीर्षे शिश्ने च वृषणे तथा ॥ ७८ ॥
विद्धः शरेण हि गजो न जीवेच्चेन केनचित् ॥
सद्यः प्राणहरेष्वेव सद्यः प्राणैर्वियुज्यते ॥ ७९ ॥
कालान्तरविनाशेषु विद्धः कालाद्विपद्यते ॥
शोणिते च्याविते स्थानान्नागः प्राणैर्विमुच्यते ॥ ८० ॥
यानि कर्माणि राजेन्द्र मयोद्दिष्टानि दन्तिनाम् ॥
मर्माश्रितेषु सर्वेषु यो भवेत्ताडितो गजः ॥ ८१ ॥
तेषु तेष्वेव शल्येषु विप्रनष्टेषु दन्तिनाम् ॥
तेषामाहरणे यन्त्राण्यशेषेण निबोध मे ॥ ८२ ॥
त्र्यस्रं तथैकदंष्ट्रं च मुष्टिं शार्दूलमुष्टिकम् ॥
नन्दीमुखं शङ्कुपार्श्वं यन्त्रं सिंहमुखं तथा ॥ ८३ ॥
यन्त्रजातिभिरेताभिः शल्यं विनिर्हरेद्बुधः ॥
अङ्गुल्यैवाप्यथैषण्या परिमृश्य नखेन च ॥ ८४ ॥
सम्यक्शल्यं तु विज्ञाय प्रतिकर्म समाचरेत् ॥
वृद्धिपत्रेण शस्त्रेण निकृन्तेद्व्रणमादितः ॥ ८५ ॥
नन्दीमुखेन यन्त्रेण तेन तच्छल्यमानयेत् ॥
शोणितं पीडयेच्चैव व्रणं वांश्या च शोधयेत् ॥ ८६ ॥
विडङ्गचूर्णसंसृष्टघृतं स्याद्व्रणसेचनम् ॥
आयसेनाग्निवर्णेन समन्ताद्दाहयेद्व्रणम् ॥ ८७ ॥
घृतपानं च दातव्यं वारणस्य महीपते ॥
कङ्काद्विकृतयन्त्रेण सर्वेषामनुपूर्वशः ॥ ८८ ॥
कार्यमुद्धरणं तेषां शल्यानां पृथिवीपते ॥
विकीर्णं सावरेत्कर्णं शङ्कुशीर्षं त्रिकण्टकम् ॥ ८९ ॥
भल्लेन प्रतिविद्धस्य शल्यस्याऽऽनयने हितम् ॥
पूर्वोक्तेन विधानेन सेचनं स्याद्विधीपते ॥ ९० ॥
विद्धो वराहकर्णेन क्षुरप्रेण क्षुरेण वा ॥
मुष्टियन्त्रेण सर्वांस्तांः क्षिप्रमेव समानयेत् ॥ ९१ ॥

पीलुशङ्कुप्रमथनैः शिखराग्रैस्त्रिकण्टकैः ॥
शल्यैरेभिस्तु विद्धस्य वारणस्य महीपते ॥ ९२ ॥
गोधामुखेन यन्त्रेण सर्वेषामनुपूर्वशः ॥
कार्यमुद्धरणं तेषां शल्यानां पृथिवीपते ॥ ९३ ॥
इति कर्णसीचारकं गृङ्गशीर्षं त्रिकण्टकम् ॥
तालीकमर्धतालीकं तथा वेतसपत्रकम् ॥ ९४ ॥
शल्यजातिभिरेताभिः प्रतिविद्धस्य हस्तिनः ॥
अन्यैस्तु कीर्तितैः शल्यैः कृत्वा चान्वेषणं तथा ॥ ९५ ॥
कर्णभङ्गेन भङ्क्त्वाऽथ कर्णतस्य(?)प्रवर्तयेत् ॥
अकरालं व्रणं कृत्वा विष्कम्भित्वा च तं व्रणम् ॥ ९६ ॥
यन्त्रयित्वा च तं सम्यक्सिद्धार्थः कुशलो भिषक् ॥
यन्त्रं सिंहमुखं नाम तेन तानुद्धरेच्छनैः ॥ ९७ ॥
पूर्वोक्तश्च क्रियायोगः पानप्रक्षणकर्मणि ॥
नाराचं चार्धनाराचं सिंहदंष्ट्रेण निर्हरेत् ॥ ९८ ॥
मुकुलाग्रं च कर्तव्यं मण्डुवक्त्रेण पार्थिव ॥
यन्त्राणां च विभागं च शल्यानां च महीपते ॥ ९९ ॥
कीर्तितास्ते मया सम्यगत ऊर्ध्वं निबोध मे ॥
मर्मकर्माणि चत्वारि पूर्वोक्तानि मयाऽनघ ॥ १०० ॥
तेषु विद्धस्य नागस्य शल्यं सद्दिप्रणश्यति ॥
अनिर्गतेषु तं प्राप्य निर्गते न स जीवति ॥ १ ॥
युक्तिभिर्यापनीयाभिस्तस्मात्तमनुवर्तयेत् ॥
अभ्यङ्गालेपनाद्याभिः सिद्धाभिर्व्रणशोधनम् ॥ २ ॥
मस्तकेऽथ शरेणैव विद्धस्यान्येन केनचित् ॥
अनिर्गते निर्गते वा न स जीवति वारणः ॥ ३ ॥
आसने जघने वाऽपि श्लक्ष्णेनाथ खरेण वा ॥
अनिर्गतेषु तद्याप्यं निर्गते न स जीवति ॥ ४ ॥
उपर्यायामभिन्नस्य कोष्ठभिन्नश्च यो भवेत् ॥
शोणितानुगतो भूत्वा स्याद्वातव्याधिरन्तकः ॥ १०५ ॥
कंधरासंधिषु तथा शिरास्नायुषु पार्श्वयोः ॥
विद्धस्यापनयेच्छल्यं मर्माणि परिरक्षयेत् ॥ ६ ॥

अप्राप्तसंधिशल्ये च शल्यनिर्हरणं भवेत् ॥
विशल्यं च व्रणं कृत्वा प्रतिकर्म समाचरेत् ॥ ७ ॥
लम्बितं व्यथितं छिन्नमवकृत्तं च यद्भवेत् ॥
दुर्जातं च व्रणं दृष्ट्वा प्रतिकर्मास्य कारयेत् ॥ ८ ॥
क्षौमसूत्रेण मेधावी सीवनं चास्य कारयेत् ॥
पूर्वोक्ता च क्रिया तस्य कारयेद्व्रणशान्तये ॥ ९ ॥
विद्धः शरेण काकोला ...... छिन्नरोहयोः ॥
.... श्चूर्णैश्च प्रतिचूर्णयेत् ॥ ११० ॥
अथास्य शोफो भवति तेनैव प्रतिलेपयेत् ॥
क्षीरवृक्षकषायेण सर्पिषा चैव धारयेत् ॥ ११ ॥
शुध्यते च व्रणं तस्य क्षिप्रं चैव प्ररोहति ॥
अथ दिग्धेन विद्धस्य वक्ष्यते भेषजक्रमः ॥ १२ ॥
स्व(श्व)यथोर्दिग्धविद्धस्य पूतिर्मांससमुद्भवः ॥
श्रा(स्रा)वो भवत्यशुद्धश्च भिन्नवर्णश्च जायते ॥ १३ ॥
स तप्तदेहश्च भवेच्छोफशेषश्च जायते ॥
एतानि पूर्वरूपाणि दिग्धविद्धस्य हस्तिनः ॥ १४ ॥
व्रणं तच्छोधयित्वाऽथ संस्कृतेनाथ सर्पिषा ॥
नस्यं तस्य ततो दद्यादगदं चानुपाचयेत् ॥ ११५ ॥
शीतप्रदेहं कुर्याच्च तथा सिध्यति पार्थिव ॥
स्तब्धो विवर्णो विःसृप्तो(?)व्रणो यस्य तु हस्तिनः ॥ १६ ॥
स्थापयित्वा युतं स्थाने यन्त्रयित्वा यथाक्रमम् ॥
तन्तुसूत्रपटैर्वाऽपि क्षौमसूत्रेण वा भिषक् ॥ १७ ॥
सुसीवनं व्रणं कृत्वा नागस्यैवं समाचरेत् ॥
मधुव्रणविधानेन प्रतिकुर्याद्भिषग्वरः ॥ १८ ॥
इतीह पृष्टो भगवानङ्गराजेन धीमता ॥
पालकाप्यः क्रियामाह शल्यस्योद्धरणं प्रति ॥ ११९ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने शल्योद्धरणो नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

'अथातो विद्रधिचिकित्सितं व्याख्यास्यामः' इति ह स्माऽऽह भगवान्पालकाप्यः ॥

इह भो वातपित्तकफसंनिपातैर्विद्रधयः संभवन्ति । तत्र कटुकषायरूक्षभोजनैर्वातलैः प्रकुप्यत्यनिलः । प्रदुष्टो मांसशोणितमभिप्राप्य शृङ्गवङ्क्षणप्लीहायकृद्धृदयक्लोमबस्तिगुदमेहनानामन्यतममधिष्ठाय घनीभवति गम्भीरो ग्रन्थिः, तं वातविद्रधिमाचक्ष्महे । तत्र वातविद्रधिरनिमित्तं पच्यते । लिङ्गम्—पक्वमुस्रा(स्रा)वं विच्छिन्नं फेनिलमरुणवर्णं रूक्षं स्रवति ॥

यदा तु कटुकाम्लानि पित्तप्रकोपनीयानि भोज्यते नागः, तस्य पित्तं प्रकुपितं विद्रधिमापाद(द्य)यति । तत्र पित्तविद्रधिराशु प्रपच्यते । पक्वस्तीव्रो दुर्गन्धिः कुलत्थरससदृशः स्रावो दाहप्रायश्च[1] भवति ॥

यदा तु मधुरं दिवास्वप्नं चोपसेवते, तस्य श्लेष्मा प्रकुपितो विद्रधिमापादयति । स चिरात्पच्यते बहुश्वेतो बहुलसान्द्रपिच्छिलो मेदोमज्जासदृशस्रावो भवति स कफविद्रधिः ॥

संनिपातजे विद्रधौ सर्वरूपदर्शनम् । विशेषतश्च प्लीहश्वासारोचकाश्च भवन्ति । तस्मादचिरोत्थितस्य चिकित्सितं कुर्यात् । स्नेहकल्पोक्तैश्चैनं स्नेहैश्चैवोप(क्र)मेत ॥

तत्र श्लोकौ—

पञ्चाहं सप्तरात्रं वा व्रणं स्नेहैस्तु सेचयेत् ॥
संजातघा(प्रा)णमांसस्य प्रतिपूर्णेषु धातुषु ॥ १ ॥
स्नेहपानोपचारेण स्नेहं चास्मै प्रदापयेत् ॥
शोधनं रोपणं चोक्तं प्रतिव्रणचिकित्सितम् ॥ २ ॥
यथावत्कुशलैर्योज्यं श्रा(स्रा)वणं भेदनं तथा ॥

—:○:—

अथ विद्रधयः प्राह वातपित्तकफात्मकाः ॥ ३ ॥
संनिपाताश्च राजेन्द्र वक्ष्यन्ते तु यथाक्रमम् ॥
रसांस्तु तिक्तकटुकान्कषायान्विषमान्यदा ॥ ४ ॥
शीताम्भिःस्नेहलवणानाहारानपि सेवतः ॥
बृंहितेनाथ विषमं स्वपतः कठिनेन[2] वा ॥ ५ ॥

---

१ ख. दाहश्च । २ क. कण्ठितेन ।

गजस्य कुपितो वायुर्धमनीः संश्च(श्रि)तो यदा ॥
तदाऽस्यान्यतमे देशे प्रपाचयति शोणितम् ॥ ६ ॥
अथास्य रक्तसंसृष्टो जनयत्याशु विद्रधिम् ॥
मन्यादेशे च कक्षायां तथा गात्रापरेषु च । ७ ॥
जघनाभ्यन्तरे कोशे स्तनास्थाने च भूपते ॥
नाभौ *चलेषु देशेषु तथाऽन्येष्वपि दन्तिनः ॥ ८ ॥
प्रदेशेषु नरश्रेष्ठ सर्वव्यापी प्रभञ्जनः ॥
जायते स्व(श्व)यथुस्तेन सविदाहः सवेदनः ॥ ९ ॥

—:०:—

किंचिद्विवर्णो गम्भीरः संप्रलुप्तश्च भक्ष्यते ॥
अतः परं सम्यगस्य वारणस्य महीपते ॥ १० ॥
प्रदुष्टश्चैव लक्ष्येत अप्रदुष्टश्च लक्ष्यते ॥
मन्दकोपस्तथाऽऽयामकठिनो नद्ध एव च ॥ ११ ॥
मन्दं विक्षिपते देहं याति कण्डूयतः शमम् ॥
भवेत्तस्य गतिः सूक्ष्मा सदाहा सपरिस्रवा ॥ १२ ॥
उष्णे शान्ति स लभते शीतेन च विवर्धते ॥
इति वातसमुत्थाया लक्षणं संप्रकीर्तितम् ॥ १३ ॥

—:०:—

उष्णादत्यर्थलवणात्तथाऽम्लरससेवनात् ॥
संरम्भोद्धर्मसंतापादध्वनो गमनेन वा ॥ १४ ॥
एवं प्रकुपितं पित्तं धमनीः प्रतिपद्यते ॥
आक्षिप्तं वायुमाक्षिप्तं देहे समुपलीयते ॥ १५ ॥
लीनं स्थानाच्युतं चास्य श्वयथुं जनयेद्भृशम् ॥
तेन ज्वरश्च तापश्च तीव्रा तृष्णा च जायते ॥ १६ ॥
दह्यते चाग्निनेवास्य स देशस्तुद्यतेऽपि च ॥
हारिद्रो हरितो वाऽथ स देशः संप्रकाशते ॥ १७ ॥
पाकं चान्वेति सहसा तदेवान्तकरं तथा ॥
सुवर्णसदृशश्चास्य ततः श्रा(स्रा)वः प्रवर्तते ॥ १८ ॥

* 'च तेषु' इति पाठो भवेत् ।

१ क. °घन्याभ्य° । २ क. स्थनास्थाने । ३ ख. वलेषु । ४ क. °व्यापि-प्रभञ्जनम् ॥ जा° । ५ क. लक्षेते अवदुष्टश्च प्लक्षते । ६ ख. °म्भावर्मसंपाताद° । ७ क. °पचीय° । ८ ख. कृष्णा ।

जानीयाल्लक्षणैरेभिर्विद्रधिं पित्तसंभवाम् ॥

—:○:—

चतुर्विधमथाऽऽहारं भोज्यते मधुरं यदा ॥ १९ ॥
अप्रदानप्रदानेन शीतलं वा निषेवते ॥
अव्यायामदिवास्वप्नाद्धिज्वलादशनादिह ॥ २० ॥
तस्यैवं वर्तमानस्य श्लेष्मा चाऽऽशु प्रकुप्यति ॥
तमादाय तदा वायुरस्थीन्याविश्य दन्तिनः ॥ २१ ॥
शोफं संजनयत्याशु तस्य रूपाणि मे शृणु ॥
पृथुलः श्याववर्णाभो नीलो वा स्वल्पवेदनः ॥ २२ ॥
विकसंश्च स विज्ञेयो बहुश्लेष्माऽल्पमारुतः ॥
व्याधिमेवंविधैर्लिङ्गैर्जानीयाच्छ्लेष्मविद्रधिम् ॥ २३ ॥

—:○:—

अथ त्रयाणां दोषाणां यो विरोधीनि सेवते ॥
कुक्षी(क्षौ) तस्योपजायन्ते दोषा वातादयस्त्रयः ॥ २४ ॥
यदा विरस्यमानस्तु वायुर्वातवहाः शिराः ॥
दूषयेच्चापि श्लेष्माणं पित्तं रक्तं तथैव च ॥ २५ ॥
एकीभूतास्ततो राजन्विद्रधिं जनयन्ति ते ॥
अथास्य जायते दाहः सवत्यर्थं सवेदनः ॥ २६ ॥
स तस्य दोषबाहुल्याद्देहो दग्ध इवाग्निना ॥
दिवा स दृश्यते रक्तो रात्रौ रसमवाप्नुयात् ॥ २७ ॥
मञ्जिष्ठासदृशाः स्फोटाः पच्यन्ते मांसपाकतः ॥
दाहवन्तो विदीर्णास्ते जनयन्ति समन्ततः ॥ २८ ॥
दृष्ट्वा(ष्टाः) प्राणहरा राजन्नानावर्णोष्मणा युताः ॥
ततो नाभिलषेदन्नं तृष्णाज्वरसमन्वितः ॥ २९ ॥
अतीसारस्तथा कासः श्वासश्चैवोपजायते ॥
एवंविधाः संनिपाताद्विद्रधिः(धीः) समवाप्नुयात् ॥ ३० ॥
तासां तु प्रथमं कुर्यादनुरूपं क्रियापथम् ॥
स्नेहपानमथाभ्यङ्गं निरूहमनुवासनम् ॥ ३१ ॥
विश्रा(स्रा)वणं वेधनं च शीतलं परिषेचनम् ॥
विलायनं शोधनं च दद्याद्रोपणमेव च ॥ ३२ ॥

---

१ क. शरा । २ क. प्राणहरो । ३ क. युतः । ४ क. °द्राधिं स° ।

स चेद्यदि विदह्येत कुर्यादभ्य(भि)मुखं भिषक् ॥
अथानुपूर्वशास्त्रोक्तं कुर्याद्व्रणचिकित्सितम् ॥ ३३ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
विद्रधिरोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः ।

अथ खलु भगवन्तं भार्गवर्ष्याश्रमपदं जपनियमशुश्रूषान्वितं शिष्यगणपरिवृतं पालकाप्यमभिवाद्याभिगम्य संमान्याब्रवीद्राजा रोमपादोऽङ्गाधिपतिः— 'भगवन्य इमे व्रणा अशनिप्रत्यया नानास्रावलिङ्गवेदनाबहुला गतिमन्तो, नाडीव्रणाः संभवन्ति। तेषां साध्यासाध्यलक्षणं साधनं च निरवशेषेण व्याख्यातुमर्हसि ' ॥

स एव भगवानङ्गेन प्रश्नमुक्तः प्रोवाच पालकाप्यः—'वत्स रोमपाद, वारणानां द्वौ व्रणौ भवतः—शारीर आगन्तुश्च । तयोः शारीरं वातपित्तकफशोणितसंनिपातात्मकं विद्यात् । आगन्तुं काष्ठपतनाश्मप्राजनवधबन्धपीडनाग्निविषनिमित्तम् ॥

तत्राऽऽगन्तोर्व्रणस्य तत्क्षणमेवोष्मणः प्रशान्त्यर्थं सद्यःकृतविहिताः शीतप्रायाः क्रिया विहिताः, व्रणस्य रोपणार्थं च यथा मधु घृतं पय इति ॥

अतः परं दोषविशेषाः शारीरा भवन्ति । तत्राऽऽहाररसवैषम्यात्सात्म्यदुर्विपर्ययात्कालप्रकर्षात्त्वागन्तुर्व्रणो वातपित्तकफानामन्यतमेनाभिभूयते । तस्य लिङ्गप्रदर्शनं पृथक्त्वेनोपदेक्ष्यामः ॥

तत्र श्लोकाः—

रूक्षः परुषवर्णाभः शिराभिः संहतः खरः ।
गम्भीरानुगतश्चैव विज्ञेयो वातिको व्रणः ॥
पैत्तिको दाहबहुलो व्रणः कुणपगन्धिकः ।
हरिद्धारिद्रवर्णाभस्त्वङ्मांसस्नायुशातनः ॥
सान्द्रः श्वेतो मृदुश्चैव श्लैष्मिको मन्दवेदनः ।
महापर्यन्तमूलश्च कण्डूमांश्चैव यो भवेत् ॥
समस्तैर्लक्षणैरेभिर्वातपित्तकफात्मकैः ।
संनिपातात्मकं विद्याद्व्रणं व्रणविभागवित् ॥

१ ख. निर्विशेषेण । २ क. °गतः ॥ अ° ।

अतः परं व्रणावस्थान्तरहेतून्वक्ष्यामः—क्रियाविपर्ययादुत्तानशयमवधबन्धप्रतिहस्त्यभिघातपतनाध्वगमनाद्वेषोपरोधाच्च ये द्विपानयो व्रणाः संभवन्ति। इह खलु भो नागानां यो व्रणो मयूरग्रीवाभश्चन्द्रकी समन्ततोऽभिकठिनः, तमसाध्यं विद्यात्। मत्स्यगन्धिः पिच्छिलः, तमसाध्यं विद्यात्। अथवा यस्य नागस्य कृष्णः परिशुष्को विगन्धो व्रणः, तमसाध्यं विद्यात्। कोष्ठान्तर्गतः परिश्रा(स्रा)वी प्रवृद्धश्चापि दुर्गन्धः, तमसाध्यं विद्यात्। आ(औ)दुम्बरमुखः शोणितपरिश्रा(स्रा)वी व्रणः कठिनः, तमसाध्यं विद्यात्। वल्मीकसंस्थानः कृमियुक्तो बहुच्छिद्रः शोणितप्रस्रावः, तमसाध्यं विद्यात्। बिम्बोष्ठ उन्नतमध्यः कृष्णपर्यन्तः कठिनो व्रणो दुर्गन्धश्चेति तमसाध्यं विद्यात्। मर्माभिघातशोणितपरिश्रा(स्रा)वी जलयन्त्रवत्, तमसाध्यं विद्यात्। पूयशोणितपरिस्रावी व्रणः पिच्छिलो दुर्गन्धश्चेति तमसाध्यं विद्यात्। मांसावगाढोऽस्थिभागाश्रित आड(औदु)म्बरमुखः, तमसाध्यं विद्यात्। सिरानुगतः परिस्रावी पिच्छिल आध्मातो व्रणः, तमसाध्यं विद्यात्। अथ कठिनोष्ठः सवेदनः सशोफः, तमसाध्यं विद्यात्॥

तत्र श्लोकः—

निर्गन्धो ह्यपरिस्रावी पद्मपत्रप्रभो व्रणः।
निर्वेदनस्तथोत्तानो निर्दोष इति तं विदुः॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
व्रणचिकित्सितं नाम चतुर्दशोऽध्यायः॥ १४॥

अथ पञ्चदशोऽध्यायः।

अत ऊर्ध्वं नाडीव्रणसमुत्थानचिकित्सितं व्याख्यास्यामः—इति ह स्माऽऽह भगवान्पालकाप्यः—अथ भोः खलु वारणानां वातपित्तकफसंनिपाताभिघातैः पञ्चविधा नाड्यो भवन्ति॥

यदा तु शल्यं प्रविशत्यन्तर्देहे वारणानां वातपित्तकफादिभिर्दोषैर्दुष्टैर्मांसशोणितं भूयः स्वभागानुगतं कालप्राप्तो न निवार्यते शस्त्रैरन्तर्देहे ततः पूयबहुत्वात्समुदीर्यते। ततः संनिरुद्धे मार्ग उन्मार्गेण गच्छति। ततो धातूनभ्यन्तराश्रितान्दूषयित्वा तद्वर्त्मगमनाद्गतिरुच्यत इति। अजस्रं यतः स्रवति पूयं पिच्छिलं विवर्णं नाडीवत्। तस्मान्नाडीमभिनिर्दिशेदिति॥

---

१ क. °दुत्थान°।

गन्धाः स्रावाश्च वर्णाश्च व्रणानां ये प्रकीर्तिताः।
वातादिदोषप्राप्तानां नाडीष्वपि हि तान्विदुः॥

इति नाडी पञ्चविधाऽऽख्याता॥

तत्र श्लोकः—

नाव्रणा जायते नाडी व्रणादेवोपजायते।
प्रमादाद्वाऽपि वृद्धा सा कृच्छ्रसाध्या ध्रुवं भवेत्॥

अत ऊर्ध्वं येषु भागेषु व्रणा नाड्यो वा साध्याः, तान्व्याख्यास्यामः। तत्र दन्तवेष्टास्थिसंधिकक्षानुगता नखनयनमर्मतलप्रोहविष्कापस्कराष्ठीव्यपलि(त)हस्तनखान्तरप्रत्यङ्गप्रतीकाशकुक्ष्यङ्गुलिमण्डूकीवक्त्रसक्थिसकुटिकान्तरापरिक्षोभजवभागोत्कृष्टावग्रहे वंशरन्ध्राण्डकोशगात्रसंदानक्षयभागस्रोतोन्तरतालुनाभिमेढ्रकर्णतलसंधितलवातकुम्भत्र्यस्थिजघनगुह(द)भागेषु चेति॥

तत्र श्लोकः—

भागेष्वेतेषु या नाड्यो गम्भीरानुगताश्च याः।
तासु सम्यक्प्रयुक्ताऽपि क्रिया दुःखेन सिध्यति॥

अथ या नाडी (?) तिर्यग्गता परंपरागता मण्डलावर्ता कुटिला अनुगता (*बहुप्रदेशानुगता दन्तवेशे(ष्टे)ऽनुगता अस्थिसंधिगता नेत्रानुगताश्च भवन्त्येता या नाड्यः, तासु सिद्धिर्न भवति। त्वचमनुगता) अधोमुखा या नाड्यः साध्या भवन्ति ताः॥

तत्र श्लोकौ—

अनुनीय भिषक् सम्यक् परिमृश्य च भागशः।
छिन्द्यात्तु नाडीं शस्त्रेण अनुलोमं प्रयत्नतः॥
शस्त्रमेव तु भेषज्यं ये शस्त्रकुशला नराः।
उत्तानो हि व्रणो राजन्क्षिप्रमेव प्ररोहति॥

अथाङ्गराजः पुनरेव पप्रच्छ पालकाप्यम्—'भगवन्यत्र शस्त्रपथो नास्ति नास्ति क्षारपथोऽपि वा, तत्र वारणानां नाडीव्रणचिकित्सितं कथं कर्तव्यम्॥

ततः प्रोवाच भगवान्पालकाप्यः—इह खलु यदा वैद्यः शस्त्राग्निक्षारकर्मक्रियासु विशेषं नोपलभते, तदा त्रिकटुकहरिद्रालाङ्गलकीदन्ती(†समभागानि पिष्ट्वा नाडीव्रणपूरणं दद्यात्। गृञ्जीकटुकरोहिणीगवेधुकार्कमूलविडङ्गसर्षपा-

*धनुराकारमध्यस्थः पाठो नास्ति खपुस्तके। †धनुराकारमध्यस्थो नास्ति पाठः कपुस्तके।

१ क. °न्तचेष्टा°। २ क. °वनोत्कृ°। ३ क. °मृष्य च।

न्गोमूत्रपिष्टानातपशुष्का गुलिका नाडीव्रणपोषप्रशमनीं कुर्यात् । निम्बार्कपूतीकरञ्जकरवीरपत्रतिलक्षारलवणैः समभागैः पिष्टा गुलिका नाडीव्रणविशुद्धयर्थमप्रमत्तो भिषग्दद्यात् । कुष्ठतगरहरिद्राचित्रकसैन्धवतिलकुतिलक्षारान्समभागान्पिष्ट्वाऽश्वमूत्रेण गुलिकाः कार्याः । आतपशुष्का नाडीव्रणलेपनमुत्तमं दद्यात् । सैन्धवलवणकिण्वदन्त्यतिविषाचित्रकमूलोत्तमकरणास्तिलक्षाराः समभागाः पिष्ट्वा, आतपशुष्का नाडीव्रणानां सपूयानां शोधनं दद्यात् । स्वर्णक्षीरातगरविडङ्गमहौषधशुकनासादन्ती)देवदारुसैन्धवलवणं समभागं पिष्ट्वा गुटिकामातपशुष्कां नाडीव्रणशोधनं दद्यात् । ग्रन्थिपर्वस्य भवति पक्वः सपूयः पिच्छिलः, तच्छोधनमिदम् । हस्तिलिण्डरसं किण्वलवणं चाऽऽलेपनमप्यग्रं प्रदद्यात् । सर्षपचित्रकदन्तीसैन्धवमिति । स्नुहीक्षीरपिष्टं कृत्वा दुष्टव्रणशोधनं दद्यात् । चित्रकनागदन्तीयवक्षारपिष्टं दुष्टव्रणचिकित्सितमिति । पाठामधुरसादन्तीमधूकानि सैन्धवलवणसंयुक्तं दुष्टव्रणशोधनं दद्यात् । दन्तीशुकनासार्कमूलं सैन्धवलवणसंयुक्तं दुष्टव्रणशोधनं दद्यात् । चित्रकसर्षपतेजोवतीदन्तीश्वेतालवणसंयुक्तं प्रदुष्टव्रणलेपनं दद्यात् । हरिद्रादारुहरिद्राशुकनासादन्तीकटुरोहिणीबिल्वसैन्धवलवणसंयुक्तं समभागपिष्टं व्रणशोधनं दद्यात् । पाठादन्त्यतिविषाविषघ्नादेवदारुयवक्षारसंयुक्तं व्रणशोधनं दद्यात् । पिचुमन्दनक्तमालपत्राणि पिष्ट्वा कांस्यनीलयुक्तं व्रणरोपणं दद्यात् । मुष्ककाक्षीवतिलकुंतिलक्षारसर्षपयुक्तं क्षिप्ररोपणं घृतसंयुक्तं दुष्टव्रणलेपनमुत्तमं दद्यात् ॥

तत्र साध्यानां शस्त्रकर्मोपक्रमविशेषाननुव्याख्यास्यामः ॥

अथ भिषग्यन्त्राध्यायोक्तेन विधिना सुयन्त्रितं वारणमभिविश्वास्याऽऽशृ(श्रि)त्य स्तम्भानुगतं गतिमन्तं स्वल्पमुखं च नाडीव्रणमेषण्या च विदित्वा वृद्धिपत्रेण शस्त्रेणानुलोमं पूयप्रतिहरणार्थं छेद्यं कुर्यात् । ततश्चात्र किण्वसैन्धवक्षौद्रसर्पिर्यवक्षारैः श्लक्ष्णपिष्टैः क्षौमं वस्त्रं प्रलिप्य वर्तिं प्रणिदध्यात् । अथार्कक्षीरपलाशशाकुलीश्यामावृ(त्रि)वृद्दन्तीचित्रकयवक्षारनिम्बपत्राणि स्नुहीक्षीरस्वर्जिकाहरितालपिप्पलीमूलक्षवकशङ्खिन्यर्कक्षीरयुक्तं कल्कं शोधनं दद्यात् । तर्कार्यारग्वधपटोलशङ्खिन्यश्वगन्धानक्तमालमधुकजीवकाङ्कोल्लखदिरवनकर्पासीहरिद्रासुरसासप्तपर्णीनिम्बकरवीरकुटजास्फोटारोहिणीक्षीरिण्यामलकीः क्वाथयित्वा तेन नाडीं रोपयेत् । शङ्खिनीचित्रकतेजोवतीवृ(त्रि)वृद्भीवेरदन्तीकुष्ठकटुकरोहिणीस्नुहीसुवर्णक्षीर्यर्कक्षीरे सिद्धं सर्पिः पुराणमुपदिश्यते शोधनार्थम् । बृहत्यश्वगन्धाजशृ-

१ क. °क्षारासं° । २ क. °कुक्षिति° । ३ क. घृतसंसृष्टं । ४ क. °श्वास्य सृत्य । ५ ख. कल्कशोधनं ।

[illegible]हरिद्रासर्षपपाठाचित्रकपिप्पलीमूलमूर्वाकोशातकीकटुकाकाकाकाण्डत्रपुसीसं-मदनफलानि च गवां मूत्रेण पी(पे)षयित्वा गवां मूत्रेण तैलं पचेत् । ततः पार-पकेन नाडीः शोधयेत् । अथ जीवन्त्यारग्वधगोजीमुष्ककटुतुम्बकमञ्जिष्ठाक्षीर-वृक्षमवालैः श्लक्ष्णपिष्टैर्वर्तिरोहणमुपदध्यात् । शल्लक्यश्वकर्णमुष्ककाश्मन्तक-करवीरारग्वधादिवृक्षाणां त्वक्काथयित्वा रोपणार्थं कषायमेतैरेवौषधैर्जीवन्त्यार-ग्वधादिभिः सर्पिस्तैले कषायगर्भे रोपणार्थं विपाचयेत् ॥

अथातोऽग्निकर्म व्याख्यास्यामः ।

नाडीषु श्रीवेष्टकमधूच्छिष्टगुग्गुलुमेदोभिर्वर्तिवदनुवृत्तां गुलिकां कुर्यात् । यावद्दाहस्य सोष्मणः प्रवेगोपशमः स्यादिति । अतो द्विव्रणीयोपचारः ॥

(* इति शस्त्रकर्माग्नि† .... ।

........कथयिष्यामः । मर्मोपचारान्व्याख्यास्यामः ॥)

अथ वेच्छस्त्राग्निकर्मणार्त्तमार्गः(?)स्यात्तत्र नाडीदोषनिर्हरणार्थं भेषज-विधिमनुव्याख्यास्यामः । यवतगरपिचुमन्दपूतीकरञ्जकुष्ठैलामलककरवीरार्क-पत्राणि तिलकुतिलक्षारसंयुक्तान्यश्वमूत्रेण पिष्ट्वा गुलिकाः कृत्वाऽर्कक्षीरसंतप्त-नाड्यां निदध्यान्नाडीदोषनिर्हरणार्थम् । अथवाऽञ्जनतगरकुष्ठहरितालमनःशि-लाकटुरोहिण्यश्वगन्धालाङ्गलीसौराष्ट्रीरोचनामुरसावराचित्रकविल्वसर्षपखदिर-सारगवाक्षीदन्तीविडङ्गान्यर्कशोभाञ्जनकमूलानि च तिलक्षारेण पिष्ट्वा गुलिकाः कारयेत् । ता नाड्या(ड्यां) निदध्यादर्कसंतप्तनाडीदोषनिर्हरणार्थं चेति ॥

अत ऊर्ध्वं क्षारकर्मम(र्मा)नुव्याख्यास्यामः ॥

मुष्ककपलाशतिनिशसर्जारग्वधकरञ्जचिरिविल्वशिग्रुककुतिलस्फूर्जकपाटला-रिमेदपारिभद्रककरवीरापामार्गाश्वगन्धावरार्जुनेङ्गुदीकुटजतिलकतिलसौगन्धि-कावल्गुजकटुकतुम्बीकूष्माण्डीकाकजङ्घाकोशातकीवेतसविल्वप्राचाचलसप्तप-र्णकृतमालहरिद्रानीपयवनानि चेत्येवं संभृत्य संभारं काण्डशः कल्पयित्वाऽऽदि-त्यशोषितमीषच्छुष्कं दाहयेद्विविक्तदेशे त्वतृणभूमिभागे।ततो भस्म समादाय महा-भाजनस्थं पुनः श्रा(स्रा)वयेदजाविगामेहिण्यश्वाश्वतरखरोष्ट्राणां मूत्रैः । ततः सुपरिश्रु(स्रु)तं तैलमायसे कुम्भे शनैर्मृद्वग्निना पचेत् ।तत्राऽऽवपेल्लाङ्गलिकीदन्ती-चित्रकपिप्पलीमूलतीक्ष्णगन्धाश्वगन्धापलमरिचशृङ्गवेरस्वर्जिकायवक्षारविडसै-न्धवत्रप्यर्कक्षीराणि शनैर्दर्व्या घट्टयेद्यावत्क्षिप्तःशर्करासगन्धसान्द्रश्लक्ष्णमथ पाको निवर्तते । ततो वैश्वानरपूजां कृत्वा कृष्णायसे निर्मले भाजने स्थापयेत्सपि-

* धनुश्चिह्नान्तरगतः पाठस्तुल्यो द्विपुस्तके । † पुस्तकद्वयेऽपि त्रुटिचिह्नं न वर्तते ॥

१ क. °र्करसं तप्त° । २ क. कृष्णावमे । ३ क. भोजने ।

धाने त्र्यहं सप्ताहं वा । ततश्च प्रत्यहनि(?) शिरःस्नातो वैद्योऽहतवासा ब्राह्म-णान्स्वस्ति वाच्य ततः शस्त्रेण संशोध्य नाडीमुखं तीक्ष्णेन रुधिरपूयपरिस्रावा-न्वासोभिरपनीय ततः सूक्ष्मासु गतिमतीषु शलाकां क्षारेण प्रलिप्य क्षारबलं चावेक्ष्य निपातयेत् ॥

अथवाऽऽर्द्रां वर्तिं गुलिकां वा कृत्वा निपातयेत् । पक्वजाम्बवसंकाशां गति-मवेक्ष्य क्षारमथ निवर्तयेत् । अथ मोहात्प्रमादाद्वाऽतिदग्धं वेपथुश्वसनजृम्भणप्र-मोहशोषदाहज्वरशो(?)णितातीवातिप्रवृत्ति(?)तमेवमवस्थमभिसमीक्ष्य धान्या-म्लदधिमस्तुसु(शु)क्तसौवीरकाणामन्यतमेन सेचयेत् ॥

अथवा दध्यम्लबदरोत्क्लेदमातुलुङ्गरसानामन्यतमेन सेचयेत् । दाडिमतिन्ति-डीकाम्रपेशीश्च कृष्णतिलसंयुक्तं कल्कं शुक्ते(क्ते)न पी(पे)षयित्वा घृताक्तमालेपनं दद्यात् । क्षीरदधिसर्पिर्मेदोवसाभिश्च सततमनुलिम्पेत् । शस्त्राग्निप्रणिधानोक्तवि-धिरनुष्ठेयः ॥

अथारिमेदार्जुनकदम्बरोध्रारग्वधक्षीरिकासोमवल्कस्यन्दनमेषशृङ्गीधवशिरी-षशालाजकर्णबदर्यङ्कोटपलाशवञ्जुलधातक्यरिमेदान्संहृत्याष्टगुणे ह्यम्भसि क्वाथ-यित्वा पादावशिष्टमवतार्य श्रा(स्रा)वयित्वा तेन रसेन तैलद्रोणं पाचयेत् । पच्यमाने चात्र गिरिकर्णिकाश्वगन्धापाठातिल्वकमालत्यलाबुशिंशपानागद-न्तीमूर्वाशुकनासातेजस्विनीनां मूलानि दृषदि पेषयित्वा प्रत्येकतश्चैनं बिल्व-प्रमाणं समावपेत् । सिद्धमपहृत्य भूयो गुडपलशतं पिप्पलीचूर्णप्रस्थेन पुनर-प्यधिश्रयेत् । तत्सिद्धमवतार्य सुसंस्कृतं स्नेहविधिप्रोक्तेन विधिना पाययेत् । न्यग्रोधोदुम्बराश्वत्थमधूककदम्बधवकदरमहाजम्बूपलाशप्लक्षश्रीपर्णीमेषशृङ्गीपू-तीकप्रियङ्ग्वजकर्णककुभानां त्वचः समाहृत्य वृक्षादन्यश्वगन्धावर्षाभूमोरटाह-रिद्राद्वयशृगालविन्नाभद्रोदुम्बरीस्रुवहानां मूलैः सह निष्क्वाथयेत् । क्वाथावशे-षेणानेन तैलं विपाचयेत् । तत्र च दारुहरिद्राहरेणुकैलाप्रियङ्गुमञ्जिष्ठा चेति । तत्सिद्धमपहृत्य स्नेहपानोक्तेन विधिना पाययेत् । ततोऽस्य नाडी समाधिमुप-गच्छति ।

न्यग्रोधोदुम्बराश्वत्थप्लक्षमधूकजम्बूपलाशाशनवेतसचिरबिल्वकदम्बश्रीपर्ण्य-जकर्ण्यवा मेषशृङ्गी शिरीष इत्येषामष्टादशानां त्वक् च मूलानि समाहृत्य चतुर्षु तोयकुम्भेषु क्वाथयेत् । अर्धावशिष्टमवतारयेत् । ततः प्रातरुत्थितमप्रसे-तवन्तं (?) वारणं पाययेदर्धप्रस्थं कुडवं वा । यावद्वा सुपिबति नागस्तावद्वा-नाडीव्रणविशुद्ध्यर्थम् । लाङ्गलीचित्रककुटजकरवीरमातुलुङ्गपत्रैः सपञ्चलवण-

१ क. मुखं पि° ।

हरिद्रायष्टीमधुकं चेति, आन्तरिक्षोदकसंयुक्तैस्तैलं पाचयेत् । ततोऽस्य बस्तिनेत्रेण पिचुनाऽपि व्रणनाड्यां तैलमिदं दद्यान्नाडीव्रणविशुद्ध्यर्थम् । यदि हृदयगता नाडी, अन्यं वा गूढप्रदेशमुपगता ततोऽस्य तैलपानाभ्यङ्गेन च नाडी प्रशान्तिमुपगच्छति ॥

मुद्गौ(द्गौ)दनं घृतसंयुक्तं दद्यात् । यवसानि च हरितमृदूनि क्रमशो मत्स्यण्डिकागर्भाणि दद्यात् ॥

तत्र श्लोकः—

यथोक्तेनोपचारेण यस्तु प्रक्रमते व्रणान् ।
आगन्तुर्दोषजो वाऽपि तस्य सिद्धिर्नियच्छति ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने नाडीव्रणचिकित्सितं नाम पञ्चदशोऽध्यायः ॥ १५ ॥

अथ षोडशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कुतः शिराः संभवन्ति केषु देशेष्ववस्थिताः ॥ १ ॥
कति वातवहा विद्वन्कति पित्तवहाः शिराः ॥
श्लेष्माणं कति धर्मज्ञ रुधिरं कति वा सिराः ॥ २ ॥
श्वे(स्वे)दं मदं वा शुक्रं वा का वहन्ति द्विजोत्तम ॥
का मांसमस्थि मेदो वा मज्जानं वा वहन्ति काः ॥ ३ ॥
काभिरास्वादनं कुर्यात्काभिर्वा संप्रहृष्यति ॥
सिराणां विचयं कृत्स्नं यथावद्वक्तुमर्हसि ॥ ४ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यो महामुनिः ॥
विस्तरेण यथातत्त्वं सिराविचयमब्रवीत् ॥ ५ ॥
गर्भस्य हृदयं पूर्वं सह प्राणेन वर्धते ॥
ततः सिराः संभवन्ति सूर्यादिव गभस्तयः ॥ ६ ॥
सर्वाः शरीरसंसृष्टास्तिर्यगूर्ध्वमधस्तथा ॥
सर्वाश्चेष्टाः प्रकुर्वन्ति सिरा वै यत्रवर्धिते ॥ ७ ॥
तस्मात्तु मातृके द्वेऽप्ये(?) हृदयात्कण्ठमाश्रिते ॥
जिह्वामूले निबद्धे द्वे ये रसास्वादकारणम् ॥ ८ ॥

---

१ क. प्राणैर्न । २ क. °मथापि वा ॥ स° ।

ततः कण्ठे च मध्ये च धमन्योऽष्टौ समाश्रिताः ॥
कर्णयोस्तु तथा विद्याचाभिस्तु परिवीजति ॥ ९ ॥
ततः शिरा बस्तिकोशमुरो वालं गुदस्तथा ॥
मातृकाः प्राप्नुवन्त्येतास्तलगात्रापरं तथा ॥ १० ॥
एवमङ्गेषु सर्वेषु मातृका देहगोचराः ॥
काये शिराः सप्तशतं विभागाः शृणु पार्थिव ॥ ११ ॥
गुदं मेढ्रमथो नाभिं तत्र बस्तिं समाश्रिताः ॥
ताभिः संमूर्छितो वायुर्धमनीः प्रतिपद्यते ॥ १२ ॥
शतार्धमेव ता विद्याच्छिरा वै देहगोचराः ॥
या रसान्प्रविभागेन(ण) वायुमेव वहन्ति ताः ॥ १३ ॥
नाभेस्तु हृदयं यावदपरा परतस्तु या ॥
ताभिः संमूर्छितं पित्तं धमनीः प्रतिपद्यते ॥ १४ ॥
शतार्धमेवं तु शिराः पित्तमेव वहन्ति याः ॥
उरःसंधिशिरोग्रीवं मर्माणि च समन्ततः ॥ १५ ॥
ततः संमूर्छितः श्लेष्मा धमनीः प्रतिपद्यते ॥
विद्धि पञ्चाशदेवैताः शिराः श्लेष्मवहा गजे ॥ १६ ॥
तावन्त्या(न्त्यः) फुप्फुसपक्वहृदयानां च मध्यतः ॥
या रसानुविभागेन शोणितं संवहन्ति तु ॥ १७ ॥
त्वङ्मांसमध्ये विज्ञेयाः शिरा रसवहाः पृथक् ॥
यथास्थानविभागेन धातूनाप्याययन्ति याः ॥ १८ ॥
मांसमेदोस्थिमज्ज्ञानां शुक्रस्य च नराधिप ॥
एकैकस्याः शतार्धं तु शिरा ज्ञेयाः पृथक्पृथक् ॥ १९ ॥
दोषधातुप्रकर्षेण हर्षेण च बलेन च ॥
मदः संजायते राजन्स्वभावाच्चैव दन्तिनाम् ॥ २० ॥
शतार्धमेव तु शिराः पृथङ्मदवहाः स्मृताः ॥
या रसानुविभागेन कटौ मेढ्रे च संस्थिताः ॥ २१ ॥
समासात्कण्डरा ह्यष्टौ विद्धि गात्रापरे तथा ॥
पश्चात्पुरस्ताच्चैकैकं पादं प्रत्येकमाश्रिताः ॥ २२ ॥
सूक्ष्मो विचारी पुरुषः कटुः शीतश्च मारुतः ॥
उष्णमम्लं द्रवं पित्तं विवर्णं दारुणं भृशम् ॥ २३ ॥

---

१ क. परिजीवति । २ क. शिरो । ३ क. °च्छिरो वै । ४ क. °भावश्चैव ।

मधुरः शीतवीर्यश्च घनः श्वेतः कफो गुरुः ॥
बलवाँल्लवणाम्लश्च स्निग्धः प्राणविवर्धनः ॥ २४ ॥
आत्मैव योनिर्वातस्य पित्तमाग्नेयमुच्यते ॥
कफं सोमात्मकं विद्यादेतांस्त्रीन्देहसंस्र(श्रि)तान् ॥ २५ ॥
आत्रेयस्तु रसः प्रोक्तो वाशिष्ठं शोणितं भवेत् ॥
काश्यपं तु भवेन्मांसं मेदश्चाप्यथ गौतमम् ॥ २६ ॥
भारद्वाजानि चास्थीनि मज्जा चाप्यथ कौशिकी ॥
जामदग्न्यं भवेच्छुक्रमित्येते सप्त धातवः ॥ २७ ॥
ज्ञेयाः शरीरे तु शिराः स्वेदमेवं वहन्ति याः ॥
व्यायामे च निदाघे च मुखतः श्रा(स्रा)वयन्ति ताम् ॥ २८ ॥
यथा प्रस्यन्दते शैलाद्वर्षान्ते तेजसा रविः ॥
एवमेव मुखात्स्वेदं प्रश्र(स्र)वन्ति मतङ्गजाः ॥ २९ ॥
शिराः शतानि सप्तैवं व्याख्यातानि यथातथम् ॥
सहस्राण्यर्धषष्ठानि स्नायूनासंश्च(?) ताः शिराः ॥ ३० ॥
सर्वा वातादिभिर्दोषैः शिरा रक्तेन वाऽन्विताः ॥
वहन्ति कायजान्धातूनिर्दिशेत्सर्वदेहिनाम् ॥ ३१ ॥
आश्रयाच्छोणितादस्य यकृत्तस्य विवर्धते ॥
रक्तदोषात्मिका चैव प्लीही(हा)वृक्कौ च दन्तिनः ॥ ३२ ॥
शोणितस्य तु या धेनुः फुप्फुसं तस्य जायते ॥
असृक्पित्तकफानां तु यत्तेजो मारुतान्वितम् ॥ ३३ ॥
तेनास्य संभवन्त्यत्र यच्चैव गुदबन्धनम् ॥
शोणिते वर्धमाने तु बलं तेजश्च वर्धते ॥ ३४ ॥
शोणिते क्षीयमाणे तु क्षीयन्ते सर्वधातवः ॥
देहिनां शोणितं विद्धि प्राणायतनमुत्तमम् ॥ ३५ ॥
मात्रया रुधिरं तस्माद्दुष्टमप्यपकर्षयेत् ॥
षण्णां रसानां यत्तेजः कायं पुष्णाति हस्तिनाम् ॥ ३६ ॥
पित्तस्थाने रसस्थानं हस्तिनां संप्रकीर्तितम् ॥
रसः कपोतवर्णाभः पच्यमानो ह्यहाद्भवेत् ॥ ३७ ॥

---

१ क. °व च दन्तिनाम् ॥ व्या° । २ क. °ण्यष्टसार्धानि । ३ क. °वृद्धौ च ।
४ क. पित्तं स्थानरसं स्थानं ।

तृतीये वा चतुर्थे वा पश्चवर्णः स उच्यते ॥
पञ्चमेऽहनि षष्ठे वा किंशुकाभ इति स्मृतः ॥ ३८ ॥
एवं शुक्रं तु नागानां सप्ताहात्परिपच्यते ॥
दोषाणां प्रकृतिं ज्ञात्वा शिराव्यूहविशारदः ॥ ३९ ॥
शस्त्रकर्मणि निष्णातो पूर्वेषां श्रेष्ठ उच्यते ॥
सर्वासां सरितां यद्वत्प्रतिष्ठा वरुणालयः ॥ ४० ॥
तद्वत्सिराणां सर्वासां प्रतिष्ठा हृदयं स्मृतम् ॥
तस्माद्गर्भे शयानस्य व्यक्तं भवति हस्तिनः ॥ ४१ ॥
हृदयं च शिरश्चैव तस्मात्कायो विवर्धते ॥
शरीरविचये पूर्वं मया सम्यक्प्रकीर्त्यते ॥ ४२ ॥
मनोबुद्ध्यन्तरास्थानां त्रिविधः सोऽनुकीर्त्यते ॥
अन्तरात्मा शरीरस्य मुह्यति त्वसृजः क्षयात् ॥ ४३ ॥
मात्रया रुधिरं तस्माद्दुष्टमप्यपकर्षयेत् ॥
तत्र मात्राप्रमाणं तु द्विविधं संप्रवक्ष्यते ॥ ४४ ॥
शरीरमभिविज्ञेयं यथादोषं यथाबलम् ॥
वातजानां तथा प्रोक्तं लिङ्गं तस्माद्विवर्जितम् ॥ ४५ ॥
न विश्रा(स्रा)व्यं महीपाल प्राणवत्स्वपि हस्तिषु ॥
कदाचिद्दोषबाहुल्यात्स्कन्नं नैव प्रवर्तते ॥ ४६ ॥
तत्र मात्राप्रमाणं तु यथावदुपदेक्ष्यते ॥
तस्मान्मात्राप्रमाणाच्च विशेषं संप्रचक्षते ॥ ४७ ॥
तत्र मात्राप्रमाणं तु यथावदुपदेक्ष्यते ॥
सप्तमं भागमाहारात्तस्माद्रक्तं तु मोक्षयेत् ॥ ४८ ॥
सप्तारत्नेर्महीपाल भागेनानेन संमितम् ॥
शेषाणां वारणानां तु श्रा(स्रा)वयेन्मतिमान्भिषक् ॥ ४९ ॥
एवं प्रमाणमुद्दिष्टमतः शृणु महीपते ॥
येषां गजानां वै श्रा(स्रा)व्यमविश्रा(स्रा)व्याश्च ये गजाः ॥५०॥
वातरोगेषु नागानामविश्राव्य भिषग्भवेत् ॥
कृशे हीनेन्द्रिये चैव हृद्रोगे गुल्म एव च ॥ ५१ ॥
तथाऽतिबाले वृद्धे च प्रकृत्या दुर्बले गजे ॥
शेषे च वातप्रकृतावतिवातग्रहान्विते ॥ ५२ ॥

---

१ क. तद्वच्छरीरिणां सर्वप्र° । २ क. शिराश्चैव । ३ क. मन्ये बु° ।

धातुक्षये पाण्डुरोगे त्वविश्राव्यमसृग्भवेत् ॥
वातव्याधिषु यत्प्रोक्तं तत्कार्यमवसेचनम् ॥ ५३ ॥
हेतुं तु संप्रवक्ष्यामि यस्मात्तत्र विधीयते ॥
वातात्प्राणश्च चेष्टा च सिरा रक्तवहाश्च याः ॥ ५४ ॥
तासां चैव विशेषेण वायुरेव प्रवर्तकः ॥
पञ्चधा धारयत्येष शरीरं नृपसत्तम ॥ ५५ ॥
यस्मात्तस्माद्विशेषेण शरीरमभिवर्धयेत् ॥
अतः परं प्रवक्ष्यामि येषां विश्रा(स्रा)वणं हितम् ॥ ५६ ॥
पादरोगाक्षिरोगेषु मन्यास्तम्भे गलग्रहे ॥
शोफेषु गात्ररोगेषु शीर्षव्याधिषु चोच्यते ॥ ५७ ॥
तथैव दिग्धविद्धे च बाले[1]दष्टे महीपते ॥
स[2]र्पदष्टे च नागानां विश्रा(स्रा)वणमिहेष्यते ॥ ५८ ॥
स्थिरा ये दोषवन्तश्च ग्रन्थयः संधिमाश्रिताः ॥
अभ्यङ्गैरुपनाहैश्च स्वेदैरुन्मर्दनैश्च ये ॥ ५९ ॥
प्रदेहैः पीडनैश्चैव न प्रशाम्यन्ति दन्तिनाम् ॥
तेषां विश्रावणं कार्यं श्वयथूनां यथाऽधिप ॥ ६० ॥
शरीरमभिविज्ञाय प्रकृतिं सात्म्यमेव च ॥
अपीतवन्तं पूर्वाह्णे ज्ञात्वा सुमनसं गजम् ॥ ६१ ॥
दोषसंचालनार्थाय क्रामयेद्द्वे धनुःशते ॥
ऊष्मणा चाल्यते यस्मात्तस्मादुष्णेन सेचयेत् ॥ ६२ ॥
सुयन्त्रितमवस्थाप्य वारणं कुशलो भिषक् ॥
यन्त्रोपकरणान्यत्र यथोक्तान्युपकल्पयेत् ॥ ६३ ॥
प्रतिकर्मविधिप्रोक्तं (*शस्त्राग्निप्रणिधौ च यत् ॥
ततः पुण्याहघोषेण स्तम्भे वारणमालितम् ॥ ६४ ॥
[3]दैवनं च यथा प्रोक्तं) कर्मसिद्धिमपीष्यते(?) ॥
कर्तव्यं वारणानां तु यथावदभिनिश्चितम् ॥ ६५ ॥
ततः समालभ्य गजं.................................. ॥
...............[4]वोदकेन................................ ॥ ६६ ॥

*धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

१ क. °लदष्टे । २ क. सर्पदष्टे । ३ क. गेनं । ४ क. °पि स्वादकेन ।

वासयित्वा च शस्त्राणि यथापूर्वमुदाहृतम् ॥
शरीरविचये चैव शिराव्यूहे च हस्तिनाम् ॥ ६७ ॥
अस्थीनि संचयश्चैव मर्माणि च महीपते ॥
विदित्वा विषयं कुर्याच्छिराणामवसेचनम् ॥ ६८ ॥

तत्र शरीरस्थानि सप्त शिराशतानि संभवन्ति च । तासां दश मातृका नाम यास्तिर्यगूर्ध्वमधश्च सम्यक्प्रतिपन्नाः शरीरं धारयन्ति, रसादींश्च, धातून्, वातपित्तश्लेष्मासु विप्रतिपन्नेष्वन्तःशरीरेषु सौम्याद्बमन्यः, ताः समनुव्याख्यास्यामः । तत्र शरीरप्राग्भागमाश्रि(श्रि)त्य द्वे तथाऽधस्तिर्यक्प्रतिपन्ने । पश्चात्काये द्वे । एकैकशश्चैव तासां प्रविभागो भवति । शिरःकण्ठनयनहस्तगात्रापरवंशपृष्ठवक्त्रप्रतिमानबस्त्यण्डकोशत्वगित्येतांश्च भागानाश्रित्यावस्थिताः । तासां प्रविभागमनुव्याख्यास्यामः । प्रसारणाकुञ्चनगमनोद्यतानां विभागेन वर्तन्ते चेष्टावत्यः सर्वं शरीरमभिव्याप्यावस्थिता मर्मभागेषु चानुबद्धाः, ता वर्जयेत् ॥

तासां मदवहाः प्रोक्ताः पञ्चाशत्तु नराधिप ॥
कटौ मेढ्रे च संबद्धाः स्ववेध्याः पृथिवीपते ॥ ६९ ॥
इन्द्रियार्थं प्रवृत्ता यास्ताः पञ्चाशत्प्रकीर्तिताः ॥
गन्धरूपरसस्पर्शान्याः प्रपश्यन्ति देहिनाम् ॥ ७० ॥
एताः पार्थिव नागानां विनाशाय भवन्ति तु ॥
तासां विश्रा(स्रा)वणं नित्यं छेदनं चैव गर्हितम् ॥ ७१ ॥
चेष्टावत्यश्च या नागे शिरा रसवहाश्च याः ॥
मेदोवहाः शुक्रवहास्ताः सर्वाः परिवर्जयेत् ॥ ७२ ॥
वायुः (?) पित्तं तथा श्लेष्मा (?) रक्तं चैव वहन्ति याः ॥
तासां विभागं वक्ष्यामि येषु भागेषु चाऽऽस्रि(श्रि)ताः ॥ ७३ ॥
तासां विश्रा(स्रा)वणं कार्यं यथादोषं महीपते ॥
समीपस्था तु या यस्य सा दोषं तस्य निर्हरेत् ॥ ७४ ॥
दोषोपचितदेहस्य क्रिया नैव प्रवर्तते ॥
यदि नाऽऽसृ(श्रि)त्य रक्तस्य क्रियते किंचिदौषधम् ॥ ७५ ॥
सुविशुद्धशरीरत्वात्तत्तदर्थाय कल्पते ॥
यथा ह्युष्णाभिसंतप्तः प्राप्य शीतोदकं नरः ॥ ७६ ॥

---

१ क. °न्तः सप्त° । २ क. सात्म्याद्ध° । ३ °पृष्ठप्रवक्त्र° ।

सद्यस्त्यजति तं दोषं त्यक्त्वा च सुखमिच्छति ॥
तस्माद्विश्रा(स्रा)वणं कार्यं विधिनाऽनेन हस्तिनाम् ॥ ७७ ॥
यथाविकारं कुर्वीत भोजयेत्तद्यथा द्विपम् ॥
सप्ताहं पञ्चरात्रं वा त्रिरात्रमपि वा पुनः ॥ ७८ ॥
स्निग्धस्वेदोपपन्नस्य समीक्ष्य गुरुलाघवम् ॥
विमृश्य पूर्वं श्वयथुं दोषलिङ्गसमन्वितम् ॥ ७९ ॥
बन्धैर्यथोक्तैः कर्तव्यं यथावदवपीडनम् ॥
तस्य तस्य प्रदेशस्य चेष्टानां संनिवारणम् ॥ ८० ॥
यन्त्रं विधिज्ञं कुर्वीत बन्धेनानेन संयतम् ॥
प्रोहसंदानभागेषु तथाऽपस्कारयोरपि(?) ॥ ८१ ॥
अष्ठीवयोस्तु भागानां पूर्वसंस्थानमिष्यते ॥
श्लक्ष्णं समाहितं चैव नाभितः षोडशाङ्गुलम् ॥ ८२ ॥
तथा वृश्चिकसंस्थानं शिरस्या(स्य)यं विधीयते ॥
वंशे चोत्तरप्रदे(रदे)शे च समं कर्कटकान्वितम् ॥ ८३ ॥
मन्याभागांसदेशेषु कूर्मसंस्थानमिष्यते ॥
एवं यन्त्रविधिः प्रोक्तो विस्तरेण महीपते ॥ ८४ ॥
एवं बन्धनबद्धस्य विश्रा(स्रा)वणमतः परम् ॥
अनेन क्रमयोगेन(ण) स्थानादुत्क्राम्यते(?) शिराः ॥ ८५ ॥
तासां परीक्षा कर्तव्या वैद्यैः सम्यक्प्रपीडने ॥
पाणिना पादयोस्तत्र अङ्गुष्ठेन प्रपीडयेत् ॥ ८६ ॥
विज्ञाय नागं भागज्ञो विध्येत्तु ताः समाहिताः ॥
तत्राऽऽविद्धाः शिराः सम्यक्पार्श्वदेशेऽथवा भवेत् ॥ ८७ ॥
न प्रवर्तते सा सम्यक्तस्या दोषो न शाम्यति ॥
स्तम्भः शोफश्च दाहश्च क्षिप्रमेवोपजायते ॥ ८८ ॥
तस्माद्यथोक्तं कर्तव्यं पुनस्तस्य चिकित्सितम् ॥
अतिविद्धा तु या कष्टदोषमत्यर्थमीरयेत् ॥ ८९ ॥
तस्माद्यन्त्रविधिस्तत्र क्षिप्रमेव च मोक्षयेत् ॥
मुक्तबन्धनमोम्भेवं सलिले त्ववगाहयेत् ॥ ९० ॥

---

१ क. °नागेन । २ क. संयुतम् । ३ क. °ते ॥ ते वंशे चेत्प्रदे° । ४ क. पार्श्वयो° । ५ क. °माम्येवं ।

प्रदेहैः शीतलैश्चैवं प्रदिह्यात्तु पुनः पुनः ॥
सर्पिः क्षीरं च नागाय विधिवत्संप्रदापयेत् ॥ ९१ ॥
शीतांश्च मधुरांश्चैव भावांस्तस्मै प्रदापयेत् ॥
यद्येवं नोपपद्येत क्षिप्रं प्राणैर्विमुच्यते ॥ ९२ ॥
सम्यग्वेधे तु दोषाणां समो वृद्धिर्विपर्ययात् ॥
छव्यस्त्वपि महाराज षट्पूर्वं संप्रकीर्तिताः ॥ ९३ ॥
तासामेकैकशो राजन्प्रमाणं संप्रवक्ष्यते ॥
एका तत्र प्रमाणेन अध्यर्ध(र्ध) यवसंमिताः(ता) ॥ ९४ ॥
प्रथमा तु महीपाल द्वितीया द्वियवा स्मृता ॥
शेषाणामेतदेवाऽऽहुः प्रमाणं मनुजाधिप ॥ ९५ ॥
अध्यर्धाङ्गुलमेवं तु प्रमाणमभिधीयते ॥
[1]श्वयथुस्त्वपि विज्ञेयो दोषलिङ्गैः पृथग्विधैः ॥ ९६ ॥
व्रीहिवक्त्रेण शस्त्रेण विध्येदत्वरया भिषक् ॥
अथ चोत्पलपत्रेण कुशपत्रेण वा पुनः ॥ ९७ ॥
[2]त्र्यङ्गुलं निर्गमं कुर्याद्भागं विज्ञाय तत्त्वतः ॥
बहुलं च चतुश्चैव प्रदेशमभिलक्षयेत् ॥ ९८ ॥
यथोक्तेनोपचारेण विध्येदत्वरया नृप ॥
दोषलिङ्गेन निर्मुक्तं विशुद्धं दोषवर्जितम् ॥ ९९ ॥
प्रमुच्य यत्रं विधिना निर्वाणे चावगाहयेत् ॥
निवृत्तं पीतपानीयं भोजयेद्रसभोजनम् ॥ १०० ॥
एष [3]सर्वो विधिः कार्यो भिषजा सिद्धिमिच्छता ॥

—:०:—

अत ऊर्ध्वं शिराणां तु विचयः [4]संप्रवक्ष्यते ॥ १ ॥
येषु देशेषु यं दोषं य[5]थावद्विनिवर्तयेत् ॥
संप्रवक्ष्यामि नागानां तन्मे निगदतः शृणु ॥ २ ॥
अवग्रहस्य चाधस्तात्कुम्भस्योपरि संश्रिताः ॥
विद्रवग्रहयोश्चापि(?) विज्ञेया मध्यमाश्रिताः ॥ ३ ॥

* 'श्चापि' इति भवेत् ॥

१ क. श्वयथुं स्व°। २ क. अङ्गुलं। ३ क. पूर्वो। ४ क. ख. संप्रचक्ष्यते। ५ क. °थाविधि नि°।

विद्वक्षिकूटयोर्मध्ये ईषिकाग्रे प्रतिष्ठिताः ॥
तथा घाटाप्रदेशे च बिन्दुमध्यं तथैव च ॥ ४ ॥
निर्याणोपरि चाप्यन्याः शङ्खदेशे समाश्रिताः ॥
शिरोरोगेषु नागानामेता वेध्या महीपते ॥ १०५ ॥
तेनैव विधिना बद्ध्वा यथा पूर्वं प्रकीर्तिताः ॥
अक्षिकूटकटश्रो(स्रो)तोमध्ये सम्यग्व्यवस्थिताः ॥ ६ ॥
तथैव तालुकृष्णान्ते मध्ये विध्येदतन्द्रितः ॥
वितानास्यप्रदेशानां मध्ये जिह्वान्तरे तथा ॥ ७ ॥
अपाङ्गदेशस्याधस्ताद्या कनीनिकयोरपि ॥
नेत्ररोगेषु नागानामेता वेध्याः पृथक्शिराः ॥ ८ ॥
एतेनैवोपचारेण सम्यं विज्ञाय तत्त्वतः ॥
यतः स्थानस्य चाधस्ताद्गुह्यभागस्य चोपरि ॥ ९ ॥
विध्येदसंभ्रमाद्वैद्यः शिरामेनां गलग्रहे ॥
तथा सगदयोश्चापि मन्याभागान्तरे तथा ॥ ११० ॥
विध्येत्त्वरया वैद्यः कण्ठव्याधिषु हस्तिनः ॥
स्तनान्तरस्य चाधस्तादष्टाङ्गुलसमा स्थिताः ॥ ११ ॥
विध्येत्प्रमाणतो वैद्यस्तथा द्रोणिकसंस्थिताः ॥
नाभिप्रदेशे विज्ञेया ऊर्ध्वादष्टादशाङ्गुला ॥ १२ ॥
शोफे द्रोणीकसंस्थाने सम्यग्ज्ञात्वाऽथ वेधयेत् ॥
नाभिप्रदेशे पार्श्वे च चतुरङ्गुलसंमिताम् ॥ १३ ॥
मध्ये त्वनुसृतां विध्येत्तथैवान्तरस्तनयोः ॥
शुक्रप्रदेशस्याधस्तादण्डकोशादधस्तथा ॥ १४ ॥
विज्ञाय दोषोपचयं यथावदवसेचयेत् ॥
तेनैव क्रमयोगेन(ण) द्रोणीकवदुपाचरेत् ॥ १५ ॥
तथैव मन्ययोश्चापि बहिरन्तश्च संस्थितौ ॥
शिरे(रो) यन्त्रविधानेन *त्वचा पीड्यावसेचयेत् ॥ १६ ॥
अतः संदानभागस्य मध्ये बद्ध्वाऽवसेचयेत् ॥
तेनैव क्रमयोगेन(ण) यथापूर्वमुदाहृतम् ॥ १७ ॥

---

* 'त्वचपीड्या' इति तूचितम् ।

---

१ क. °चाऽऽमग° । २ क. °न्तस्य सं° । ३ क. त्वचपी° ।

अतः पिण्डकपोश्चापि संदानोपरि संस्र(श्रि)तम् ॥
विदित्वा विधिवत्प्राज्ञो दोषं बद्ध्वाऽवसेचयेत् ॥ १८ ॥
अस्थिलाङ्गूलवंशस्य कलाभागान्तरे तथा ॥
समं विज्ञाय भागज्ञो मध्ये विध्येच्छिरां नृप ॥ १९ ॥
वंशपक्षांसमांसेषु तथैवोत्कृष्टयोरपि ॥
वंशावभागमास्र(श्रि)त्य पर्शुकासंधिसंश्रिताः ॥ १२० ॥
शिरास्तत्रापि विज्ञेया दोषनिर्हरणे नृप ॥
रन्ध्रकक्षाविभागे च पक्षं बद्ध्वाऽवसेचयेत् ॥ २१ ॥
आसनान्तादधोभागे ग्रीवामध्यसमाश्रिता ॥
(†मन्ययोर्जवभागस्थां सम्यङ्मध्येऽवसेचयेत् ॥ २२ ॥
अथापस्करभागस्य पादस्यान्तःसमाश्रिताम् ॥)
गात्ररोगेषु नागानां विध्येत्समवपीड्य ताम् ॥ २३ ॥
अपस्करस्य चाधस्तादष्टाङ्गुलसमाश्रिताम् ॥
दशाङ्गुले चापस्कराद्बद्ध्वाऽपि च विनिर्दिशेत् ॥ २४ ॥
दाहेन सहितं शोफं विज्ञाय कुशलो भिषक् ॥
पूर्वोक्तेनैव विधिना सम्यज्ज्ञात्वाऽवसेचयेत् ॥ १२५ ॥
अन्तर्बहिः पुरस्ताच्च गात्रे मध्यं समाश्रितम् ॥
भागं[1] विज्ञाय विधिवन्मत्वा रोगं यथाक्रमम् ॥ २६ ॥
व्यधयेच्चात्रविधिना सम्यक्कृत्वा च पीडनम् ॥
प्रोहसंदानभागेषु[2] बहिरन्तः समाश्रिताम् ॥ २७ ॥
वामपूर्वेण भागेन संमितां विद्धि पार्थिव ॥
तेनैव विधिना तासां सम्यक्श्रा(स्रा)वणमिष्यते ॥ २८ ॥
विंशतिः कर्मभागानामुपरिष्टान्महीपते ॥
त्र्यङ्गुलं द्व्यङ्गुलं वाऽपि ताः प्रमुच्यावसेचयेत् ॥ २९ ॥
पादरोगेषु नागानामेता वेध्या महीपते ॥
चिक्कयोः पार्श्वदेहस्था बहिरन्तः समाश्रिताः ॥ १३० ॥
व्यधयेदेवमेवैताश्चिक्काभागं विवर्जयेत् ॥
कर्मोपरि तु याः प्रोक्ताः शिर(रा)गात्रबहिः स्थिताः ॥ ३१ ॥

† धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

१ क. भावं । २ क. °हमन्दान° ।

दोषाणामतिवृद्धानां प्रकोपं घ्नन्ति ताः शिराः ॥
एवमेतेषु सर्वेषु श(शि)राः प्रोक्ता महीपते ॥ ३२ ॥
दोषधातुप्रयोगैस्तु तासां विश्रा(स्रा)वणं हितम् ॥
संख्या समासतो ज्ञेया षष्टिस्तु चतुरुत्तरा ॥ ३३ ॥
एवमेतच्छिराजातं यथावदनुपूर्वशः ॥
शिराव्यूहे च यद्राजन्वातादीनां तु लक्षणम् ॥ ३४ ॥
श्वयथुं दोषवन्तं तं नानालिङ्गसमन्वितम् ॥
दृष्ट्वा नागस्य तं विद्याद्विद्रधिं कुशलो भिषक् ॥ १३५ ॥
स्थिरत्वाद्ग्रन्थिबन्धाच्च ग्रन्थिरित्यभिधीयते ॥
तेषामेतेन कल्पेन कार्यं संशमनं भवेत् ॥ ३६ ॥
अथवा दोषशमनादाधिक्यं यस्य लक्ष्यते ॥
तथैव तस्य कर्तव्यं यथाप्रोक्तं चिकित्सितम् ॥ ३७ ॥
शिराणामपबन्धार्थाः स्नायुकूर्चाः प्रकीर्तिताः ॥
अशीतिरेव विज्ञेया विभागस्तासु वक्ष्यते ॥ ३८ ॥
यदेहं(ये देहे) संधयः प्रोक्तास्तेषां तत्र च बन्धनम् ॥
यत्र तत्र च संबद्धाः संधिदेशं समाश्रिताः ॥ ३९ ॥
सर्वेष्वङ्गप्रदेशेषु तस्मात्ताः परिवर्जयेत् ॥
संधिसंधानमप्येतत्षड्विधं संप्रकीर्तितम् ॥ १४० ॥
तत्रास्थ्नामपि संधानं कीर्तितं यच्चतुर्विधम् ॥
शरीरविचये पूर्वं मया सम्यङ्नराधिप ॥ ४१ ॥
मनो मे मुह्यति स्मृत्वा रक्तक्षीणस्य का(क)ष्टताम् ॥
तस्मान्मात्राप्रमाणेन नित्यमेवाभिषेचयेत् ॥ ४२ ॥
यत्र मांसावगाढत्वाच्छिरा नैवोपलभ्यते ॥
स्थिरत्वाच्छ्वयथोश्चैव प्रच्छन्नं तत्र कारयेत् ॥ ४३ ॥
अनन्तरं प्रस्थपित्वा दोषलिङ्गान्वितं नृप ॥
लवणेन सतैलेन कुर्यात्तस्यावसेचनम् ॥ ४४ ॥
प्रच्छन्ने व्यधने चैव तेनासृक् श्र(स्र)वते भृशम् ॥
तत्र प्रक्षालनं कुर्याच्छीतेनैव च वारिणा ॥ १४५ ॥
इक्षुरसतलोत्पलातलैः प्रदेहं तस्य कारयेत् ॥
समङ्गाधातकीपुष्पैश्चन्दनोशीरपद्मकैः ॥ १४६ ॥

१ क. °प्रकोपैस्तु । २ क. °मध्ये त° । ३ क. °वावसेच° ।

अनेन क्रमयोगेन(ण) सम्यक्संपद्यते सुखी ॥ १४७ ॥
इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने महापाठे तृतीये शल्यस्थाने
शिराव्यूहव्यधो नाम षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

अङ्गाधिपतिरव्यग्रं पालकाप्यं कृताञ्जलिः ॥
आपृच्छद(द्)न्तचे(वे)ष्टानां शुष्यतानां(?) चिकित्सितम् ॥ १ ॥
किंमूलो दन्तविश्रा(स्रा)वो ज्ञेयं चौत्पातिकं कथम् ॥
स्यादनौत्पातिकः कस्माद्दन्तस्य श्र(स्र)वणं कथम् ॥ २ ॥
इति पृष्टोऽब्रवीत्प्रश्नं मुनिरङ्गेश्वरं तथा ॥
श्रूयतां पृथिवीपाल यथायोगं यथाक्रमम् ॥ ३ ॥
अत्यर्दितः श्र(स्र)वेद्दन्तः पूतिकं पूयशोणितम् ॥
सद्यः कृमीन्वा नागस्य तस्य दैवकृतो विधिः ॥ ४ ॥
तस्य त्यागो हि दन्तस्य पतनात्प्राग्विनिश्चितः ॥
तस्यात्यागे ह्यवाप्नोति मित्रार्थे(र्थ) वलभूक्षयम् ॥ ५ ॥
व्यायामात्पतनं यस्य दन्तस्येह द्विपस्य तु ॥
भवेत्करीरीमूलाभ्यां गदन्तं गजमुत्सृजेत् ॥ ६ ॥
[*.......................सह तूर्णं समुत्सृजेत् ॥]
भग्ने शेषं स्थितं याप्यं समूलं सकरीरिकम् ॥ ७ ॥
र्विनिष्कीर्णं यद्वि स्यात्तद्व्रणवत्साधु साधयेत् ॥
चे(वे)ष्टस्योपरि दन्तस्योद्भङ्गे स्याद्यदि च श्रु(स्रु)तिः ॥ ८ ॥
तस्य प्राक्पतनादिष्टं गजस्योत्सर्जनं न हि ॥
दन्तनाडी तु यस्य स्याद्वातादीनां प्रकोपजा ॥ ९ ॥
न तत्रौत्पातिकं किंचिन्न चास्य पतने भयम् ॥
अन्तःस्वेदा गजा यस्मान्मांसे शुषिरता तथा ॥ १० ॥
तैजसी प्रकृतिश्चापि कोपे भूयिष्ठता ततः ॥
यस्य श्रु(स्तु)तिस्तु दुर्गन्धा विषाणस्योपलक्ष्यते ॥ ११ ॥

* धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ॥

१ ख. मन्यार्थे । २ क. श्रुतम् । ३ क. °तितं किं° । ४ क. यस्माच्छ्रुति° ।

कर्मजेऽपि समुत्पाते तत्रास्य च्यवनं स्मृतम् ॥
पुष्पनेत्रं तु वृत्तास्यमनुपूर्वं समं दृढम् ॥ १२ ॥
बस्तिर्जरद्गवः श्रेष्ठं तस्मिन्व्रणे विधीयते ॥
दृढां बलवतीं श्लक्ष्णामेषणीं ताम्रनिर्मिताम् ॥ १३ ॥
गण्डूपदास्यां सूक्ष्मां च कारयेद्भिषगुत्तमः ॥
स्पूर्जार्कनिम्बजातानां हरिद्रानक्तमालयोः ॥ १४ ॥
पुत्रंजीवकभङ्गस्य निष्क्वाथं कुटजस्य च ॥
सुखोष्णः करवीरस्य सप्तपर्णस्य चोभयोः ॥ १५ ॥
क्षालनं बस्तिना कार्यं क्षौमपट्टैस्तु शोधनम् ॥
पूतिगन्धं च कण्डूं च क्वाथ एष प्रणाशयेत् ॥ १६ ॥
मार्दवं शोधनं चैव व्रणस्याऽऽशु करोति च ॥
वर्षाभूश्चैव बिल्वं च निष्क्वाथो वा वचान्वितः ॥ १७ ॥
सोभाञ्जनकतर्कारीयूथिकाभङ्गसंयुतः ॥
अलर्ककाकदन्तीनां पूतीकैरण्डयोरपि ॥ १८ ॥
सुरसाकुटजत्वग्भ्यां संयुक्तो व्रणधावनः ॥
मधुशिग्रुर्धवश्चैव निष्क्वाथः कुटजस्य च ॥ १९ ॥
पूतीकस्याग्निमन्थस्य पुत्रंजीवकनिम्बयोः ॥
सप्तपर्णत्वचश्चास्य नक्तमालस्य चोभयोः ॥ २० ॥
तेन वा बस्तियुक्तेन क्षालनं दन्तिनो व्रणे ॥
जात्यर्ककाकदन्तीनां पूतीकैरण्डयोरपि ॥ २१ ॥
विडङ्गं त्रिवृता दन्ती चित्रकः पिप्पलीद्वयम् ॥
श्यामा सलवणा कार्या पिष्टः स्याद्व्रणपूरणम् ॥
स्यात्त्वालेपो वचा शुण्ठी पाठा कटुकरोहिणी ॥ २२ ॥
अक्षिपीलकगण्डीरे सुवहाऽतिविषा तथा ॥
तेजोवत्यथवा पिष्टा(ष्टा) सुवर्णा क्षीरिणी तथा ॥ २३ ॥
शुण्ठी सुवर्चिका चैव कषायं लशुनानि च ॥
लाङ्गलिकासमायुक्तः क्षौद्रेण सह संप्लुतः ॥ २४ ॥
लेपोऽयं दन्तनाडीषु वारणानां सुखावहः ॥
नक्तमालहरिद्राभ्यां करवीराङ्कुरस्य च ॥ २५ ॥

१ क. तस्यास्य चवनं । २ क. °त्रं वीजक° । ३ क. °स्तिनीकार्थं क्षौ° ।
४ क. °पीडकठाण्डी° ।

पूतीकस्य च जात्याश्च कल्केन कुटजस्य च ॥
दन्तनाडीषु तैलं स्याद्वृश्चिकालीहरेणवा (?)॥ २६ ॥
कुस्तुम्बुरुस्तथैला च शोधनी साक्षिपीलुकाः ॥
श्रीवेष्टकसमायुक्ताः कुटजस्तालपत्रिकाः ॥ २७ ॥
जात्याः सकरवीराया भङ्गः पूतीकपल्लवाः ॥
अभीरुपत्री स्रुवहा गुग्गुलुः सुकुटमटः ॥ २८ ॥
करञ्जपल्लवा मुस्ताहंसपादीहरेणवः ॥
एतानि पाके तैलस्य समपिष्टानि योजयेत् ॥ २९ ॥
तेन तैलेन वा शोध्या दन्तनाड्यस्तु दन्तिनाम् ॥
अपूतिकमविस्रा(स्रा)वं कण्डूदोषविवर्जितम् ॥ ३० ॥
विज्ञाय तु व्रणं शुद्धं क्रियां कुर्यादिमां भिषक् ॥
बिल्वाश्वत्थमधूकानां त्वग्भिर्न्यग्रोधशाल्योः ॥ ३१ ॥
सबीजकोदुम्बरायाः सोमवल्कशिरीषयोः ॥
निष्क्वाथः क्षालनं(ने) कार्यः सुखोष्णः सरलस्य च ॥ ३२ ॥
तेनोपद्रवहीनस्तु व्रणो रोहति दन्तिनः ॥
शमीक्षुरकमूलानि पाटलामूलमेव च ॥ ३३ ॥
वितानकं सहोशीरं कुटजः शालितण्डुलाः ॥
इक्कटा मधुकं रोध्रं मन्मितस्तालमस्तकः ॥ ३४ ॥
विदार्यर्षभकश्चैव स्रुवहाजीवकावपि ॥
कुलिङ्गाक्षी पयस्या च तथैव तालपत्रिका ॥ ३५ ॥
किरात्या सह पक्वं तु तैलं स्याद्व्रणरोपणम् ॥
गतिः स्याद्यदि संरूढा प्रकोपमुपगच्छति ॥ ३६ ॥
पूतिस्रावी भिषग्वा स्याच्छृणु तत्रापि यो विधिः ॥
पटोलं हस्तिपिप्पल्यः कुटजस्य फलानि च ॥ ३७ ॥
वृश्चिकाली विडङ्गानि पृथ्वीकाः श्वेतसर्षपाः ॥
कुस्तुम्बुरुसमायुक्तं गोमूत्रे क्वाथयेच्चिरम् ॥ ३८ ॥
क्वाथेनाथ सुखोष्णेन तेन तां शोधयेद्गतिम् ॥
सर्पगन्धा मधूच्छिष्टं सर्वबीजानि गुग्गुलुः ॥ ३९ ॥
सर्षपैः सह धूपः स्यान्नाडीनां दन्तयोर्हितः ॥
पूतिगन्धमविष्यन्दं दन्तनाड्या शिरोरुजम् ॥ ४० ॥

---

१ क. ख. किरास्य ।

आक्षेपयति धूपोऽयं दन्तनेत्रसुखावहः ॥
पृष्टपर्ण्यंशुमत्यौ च छिन्नरुत्तालपत्रिकः ॥ ४१ ॥
समङ्गा च करञ्जश्च सुवहाऽतिबला बला ॥
महासहा च विश्वा च निक्वाथस्तैलपाचनः ॥ ४२ ॥
सुवहागिरिकर्ण्यौ च कपिकच्छूः समूलिका ॥
महौषधं रसं क्वाथं तैलेन सह पाचयेत् ॥ ४३ ॥
द्विगुणक्षारसंयुक्तं कल्कश्चैव भिषग्वरः ॥
मञ्जिष्ठायाः प्रियङ्ग्वाश्च मधूकस्य हरिद्रयोः ॥ ४४ ॥
मांस्याः कालानुसार्याश्च ध्यामजीवकयोरपि ॥
ऋषभस्य सरोभस्य वचाश्रीवेष्टकस्य च ॥ ४५ ॥
प्रपौण्डरीकस्य तथा श्लक्ष्णं पिष्ट्वा प्रदापयेत् ॥
त्र्यहं शिरोविरेकः स्यात्तैलपीतस्य च त्र्यहम् ॥ ४६ ॥
पश्चान्नस्यावसेकस्य दन्ताप(वे)ष्टश्रु(स्रु)तस्य च ॥
काकोली मधुपर्णी च सालपर्णी सरोहिणी ॥ ४७ ॥
पयस्या च लुलिङ्गाक्षी छिन्नरुण्मुद्गपर्ण्यपि ॥
अम्बष्ठा चैव तैलं स्यात्तेन तैलं विपाचितम् ॥ ४८ ॥
द्विगुणक्षीरसंयुक्तं तैलमात्रावशेषितम् ॥
तेन चाभ्यञ्जनं पानं नस्यकर्म च पूज्यते ॥ ४९ ॥
शशतित्तिरिलावानां मयूरवृषभस्य च ॥
युक्तं मरिचचूर्णेन पिप्पलीशुण्ठिसैन्धवैः ॥ ५० ॥
स्निग्धं सलवणं चैव तं रसं पाययेद्गजम् ॥
देयं शाल्योदनं चैव रसैस्तैरेव संस्कृतैः ॥ ५१ ॥
यदा चास्य स्थिरीभावः समाधिश्चैव दन्तयोः ॥
पश्चाहान्तरितं तस्मादथवाऽपि त्र्यहं तथा ॥
प्रतिपानं प्रसन्नां च तैलयुक्तां प्रदापयेत् ॥ ५२ ॥
इतीदं दन्तनाडीनां सनिदानं चिकित्सितम् ॥
पृच्छते रोमपादाय पालकाप्येन कीर्तितम् ॥ ५३ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने दन्तनाडीचिकित्सितं नाम सप्तदशोऽध्यायः ॥ १७ ॥

---

१ क. तरसं ।

अथाष्टादशोऽध्यायः ।

*षोडश दशनाः प्रोक्ता नागानां सगदा नृप ।
द्वावन्यावधिकौ दन्तावुपर्यूर्ध्वौ च विज्ञेयौ ॥
हन्वस्थिसंधिरुद्धो वायुर्मज्जास्थिबृंहणं कुरुते ।
हन्वस्थिदन्तदोषादधिदन्तैस्यानतस्य नश्वरतः ॥
स्ववेदना स्यात्सुदारुणा तेन दन्तमूलेषु ।
परुषच्छविर्विवर्णा कृशश्च मन्दाभिलाषश्च ॥
तस्य गलग्रहनिर्मितयन्त्रेण सुयन्त्रितस्य नागस्य ।
स्तम्भालितस्य राजन्विकासमुविदारितास्यस्य ॥
द्वात्रिंशदङ्गुलायतदशनपरिणाहेन लोहदण्डेन ।
एणीपदेन कुर्यादुद्धरणं तयोः सम्यक् ॥
व्रीहिमुखेन च परिशोध्य सर्वतस्तस्य दन्तमूलेषु ।
उष्णोदकधौतेषु मधुसर्पिः पूरणं दद्यात् ॥
तेन सुखी भवति गजो बलवान्सुखविक्रमश्चैव ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थानेऽधिकदन्तचिकित्सितं नामाष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

देवराजप्रतीकाशश्चम्पायां पृथिवीपतिः ॥
अभिगम्याऽऽश्रमं पुण्यं पालकाप्यमथाब्रवीत् ॥ १ ॥
यथा शिरा भवेच्छिन्ना भिन्ना वायुविघट्टिता ॥
अतिप्रवृत्ते रुधिरे स्थापनं च कथं भवेत् ॥ २ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शृणु सर्वं महाराज अविक्षिप्तेन चेतसा ॥ ३ ॥
केवलं शास्त्रकर्माणि ह्यशास्त्रज्ञाश्चिकित्सकाः ॥
मर्ममार्गमजानन्तो हिंस्युः स्नायुशिरास्तथा ॥ ४ ॥

* आदर्शद्वयेऽपि तुल्यत्वादस्मिन्नध्याये छन्दोविचितिश्चिन्तनीया ॥

१ क. हस्तिसं°। २ क. °न्तश्चानृश्नतः । वर° । ३ क. °ता यस्य । ४ ख. °तः स्वस्य दन्तेषु । ५ क. ख. शिरो । ६ क. °विवृद्धिता ।

दुर्गृहीतं भवेच्छस्त्रं तिर्यग्वा विनिपातयेत् ॥
तेन स्नायुः शिरा वाऽपि विशेषेणोपहन्यते ॥ ५ ॥
तस्मिन्प्रवर्तते राजञ्शोणितं जलयन्त्रवत् ॥
तस्य सिद्धिं प्रवक्ष्यामि साध्यासाध्यं च सर्वशः ॥ ६ ॥
अस्थिमर्मगताश्चैव संधिजातास्तथैव च ॥
शिरा नागस्य वक्ष्यामि ता मे विस्तरतः शृणु ॥ ७ ॥
नाभ्यामेव तु संभूता धमन्यो दश पञ्च च ॥
नानाश्रो(स्रो)तोवहाश्चैव नानाधातुवहाश्च ताः ॥ ८ ॥
धमनीप्रभवानां तु शतानि दश पञ्च च ॥
हस्ते गात्रापरे चैव शिरा काये च दन्तिनाम् ॥ ९ ॥
त्र्यस्थितांसेऽथ बाले च जघन्यापरयोरपि ॥
अण्डकोशे च नागस्य विद्धि सप्त शतानि वै ॥ १० ॥
तासामुपशिराश्चैव स्नायवश्च सहस्रशः ॥
एवं स्नायुकृता संख्या रोमकूपसमा नृप ॥ ११ ॥
एकस्कन्धो यथा वृक्षः शाखाभिर्बहुभिर्वृतः ॥
एवं नाभिप्रवृत्तास्तु शिराः स्नायुश्च कुञ्जरे ॥ १२ ॥
तासां वक्ष्यामि विस्तारं येषु भागेषु हस्तिनाम् ॥
सद्यः प्राणहरः स्यात्तु शिराच्छेदो महीपते ॥ १३ ॥
पुरो नखे च प्रोहे च चिक्कायां पलिहस्तयोः ॥
संदानजवभागे च विक्षोभे च महीपते ॥ १४ ॥
भागेष्वेतेषु[1] नागस्य शिराच्छेदो विनाशयेत् ॥
एता दश शिरा[2] राजन्सद्यः प्राणहराः स्मृताः ॥ १५ ॥
उरोग्रीवागुहा(दा)भागे स्कन्धे मूर्ध्नि च हस्तिनः ॥
शिरा दश विजानीयाद्धस्ते पञ्च विनिर्दिशेत् ॥ १६ ॥
विभागे द्वे धमन्ये द्वे धमन्ये द्वे कृकाटिके ॥
तथा द्वे रसवाहिन्यौ शिरा दश तु कीर्तिताः ॥ १७ ॥
नानाश्रो(स्रो)तोवहाश्चैव भागेष्वेतेषु दन्तिनाम् ॥
सद्यः प्राणहरा राजन्नासां छेदं विवर्जयेत् ॥ १८ ॥
वातकुम्भस्य चान्ते द्वे ईषीके द्वे समाश्रिते ॥
ईषीकाकुम्भयोर्मध्ये हस्तश्रो(स्रो)तोवहा नृप ॥ १९ ॥

---

१ क. नागेष्वेतेषु । २ क. ख. शिरो ।

हस्ते पञ्च शिराः श्वेता वारणस्य प्रकीर्तिताः ॥
सद्यः प्राणहरा राजंस्तासां छेदो विवर्जितः ॥ २० ॥
निर्याणमध्ये पञ्चूर्षे विलागे दन्तवेष्टयोः ॥
कटिश्रो(स्रो)तसि मध्ये च तासां छेदो विनाशयेत् ॥ २१ ॥
वसस्यातु(?)च मध्ये च तत्पले च समाश्रिते ॥
दलिरे पृथिवीपाल तासां छेदो विनाशयेत् ॥ २२ ॥
पेचकस्य च मध्ये स्यात्करीषस्य च मध्यतः ॥
प्रस्रावस्य च मध्यस्थः शिराच्छेदो विनाशयेत् ॥ २३ ॥
तथैवाऽऽन्तरसक्थ्नोश्च अण्डकोशस्य पार्श्वतः ॥
अष्टास्वेव महीपाल शिराच्छेदो विनाशयेत् ॥ २४ ॥
संदानभागे मण्डूक्यो ग्रन्थी सकुटिकाह्वये ॥
भागेष्वेतेषु नागस्य शिराच्छेदो विनाशयेत् ॥ २५ ॥
तनुभागे च रन्ध्रे च अण्डकोशे च दन्तिनः ॥
स्तनान्तरे च नाभ्यां च शिराच्छेदो विनाशयेत् ॥ २६ ॥
अक्ष्णोर्वै कर्णसंधौ च शिरा नागमनुस्रुताः ॥
भागेष्वेतेषु नागस्य शिराच्छेदो विनाशयेत् ॥ २७ ॥
अतिप्रवृत्ते रुधिरे वारणस्य महीपते ॥
शोणितस्य क्षयाच्चैव वायुर्मर्माणि बाधते ॥ २८ ॥
हृदयं पीड्यते चास्य शोफश्चास्योपजायते ॥
मूर्छां च भजते नागस्तृष्णाऽप्यस्य विवर्धते ॥ २९ ॥
दुर्मना वर्णतः पाण्डुर्यवसं नाभिनन्दति ॥
एवंलिङ्गं महाराज प्रत्याचक्षीत वारणम् ॥ ३० ॥
उत्तानायाः प्रसन्नाश्च छवीरोमसमाश्रिताः ॥
शिरास्नायु(?) महाराज छेदमाहुर्मनीषिणः ॥ ३१ ॥
यदा शिरा भवेच्छिन्ना भिन्ना वाऽपि विघट्टिता ॥
अतिप्रवृत्ते रुधिरे स्थापनानि निबोध मे ॥ ३२ ॥
श्रीपर्णीमथ तां बद्ध्वा धातुर्कामदनावुभौ ॥
सूक्ष्मचूर्णानि कृत्वा तु तं व्रणं प्रतिसारयेत् ॥ ३३ ॥
यदि वाऽनेन योगेन शोणितं न प्रतिष्ठते ॥
क्षौमस्य तु मषी चूर्णं तथा सर्जरसस्य च ॥ ३४ ॥

१ क. °त् ॥ मन्दान° । २ क. °गेश्चेते° । ३ क. शिरो । ४ ख. °कागद° ।

धातकीमदनौ चोभौ काश्मर्याः प्रस्थयोर्जवौ ॥
सूक्ष्मचूर्णानि कृत्वा तु तं व्रणं प्रतिसारयेत् ॥ ३५ ॥
ततः शोणितवेगं तच्चूर्णेनानेन तिष्ठति ॥
यदि वाऽनेन योगेन शोणितं न प्रतिष्ठते ॥ ३६ ॥
मधुकं चन्दनं रोध्रं सर्जं पद्मकमेव वा ॥
सूक्ष्मचूर्णानि कृत्वा तु तं व्रणं प्रतिसारयेत् ॥ ३७ ॥
गोधूमश्चैव रोध्रं च कदम्बश्चैव गैरिकम् ॥
सूक्ष्मचूर्णीकृतैरेतैस्तं व्रणं प्रतिसारयेत् ॥ ३८ ॥
अर्जुनश्च धवश्चैव यष्टी मधुकमेव च ॥
सूक्ष्मचूर्णानि कृत्वा तु तं व्रणं प्रतिसारयेत् ॥ ३९ ॥
समुद्रफेनं तेजोह्वां गोमयस्य रसेन च ॥
शङ्खमध्यं मधुक्षीरमरिमेदस्य ग्रन्थयः ॥ ४० ॥
तथा पलाशनिर्यासो निर्यासस्तिनिशस्य च ॥
भूमीकदम्बकश्चैव गैरिकः सह लाक्षया ॥
सूक्ष्मचूर्णानि कृत्वा तु तं व्रणं प्रतिसारयेत् ॥ ४१ ॥
एभिर्योगैर्यथाप्रोक्तैर्यदि रक्तं न तिष्ठति ॥
अवगाहं महाराज वारणं तु प्रवेशयेत् ॥ ४२ ॥
गम्भीरे शीतले देशे प्रण(न)ष्टतृणशर्करे ॥
यदि चैभिः क्रियायोगैः शोणितं न प्रतिष्ठते ॥ ४३ ॥
अश्वत्थोदुम्बरं चैव न्यग्रोधं काकजम्बुकम् ॥
क्षोदयित्वा महाराज महास्थालीषु पाचयेत् ॥ ४४ ॥
क्वाथेनानेन शीतेन तं व्रणं प्रतिषेचयेत् ॥
अथाग्निश्च प्रयोक्तव्यो विधिना तेन दन्तिनाम् ॥ ४५ ॥
सर्पिषा म्रक्षयित्वाऽथ अग्निकर्म प्रयोजयेत् ॥
नातिदग्धं व्रणं कुर्यादामदग्धं चिकित्सितम् ॥ ४६ ॥
गन्धनिर्वापणार्थाय सर्पिषा परिषेचयेत् ॥
शस्त्राग्निप्रणिधानोक्तैस्तैश्च निर्वापयेद्गजम् ॥ ४७ ॥
पानं च सर्पिषा मिश्रं क्षीरमस्य विधीयते ॥
यथावकाशे महति शस्त्रकर्म विधीयते ॥ ४८ ॥

---

१ क. प्रतष्ट° ।

स्वस्ति वांच्य[1] द्विजान्वैद्यः शुचिर्भूत्वा समाहितः ॥
वासितैश्च भवेच्छस्त्रैर्बन्धैर्बद्ध्वा मतङ्गजम् ॥ ४९ ॥
यथा शिरास्तथा शस्त्रं सर्वगात्रेषु चारयेत्[2] ॥
मनश्चक्षुः समाधाय हस्तेन परिमृश्य च ॥ ५० ॥
शस्त्रं निपातयेत्तत्र शिराश्च परिवर्जयेत् ॥
विश्रा(स्रा)व्या ग्रन्थयो ये च तान्मे निगदतः शृणु ॥ ५१ ॥
स्थिरा ये मेदसा चैव ये च संधिं समाश्रिताः ॥
ये च मर्मगता नित्यं येऽन्ये चैवंविधाः स्मृताः ॥ ५२ ॥
अभ्यङ्गैरुपनाहैश्च स्नेहैरुद्वर्तनैरपि ॥
प्रदेहैः पीडनीयैश्च विश्रा(स्रा)व्या ग्रन्थयस्तु ते ॥ ५३ ॥
यथा दोषोपसृष्टानि शोणितानि परीक्ष्य वा ॥
तथा विश्रा(स्रा)व्यमाणे च तत्रैव उपसर्पयेत् ॥ ५४ ॥
वारणं मन्दलवणां पाययेत्तादृशीं सुराम् ॥
तया शोणितवृद्धिश्च जायते दन्तिनस्तथा ॥ ५५ ॥
न हि केवलशास्त्रेण न तथा कर्मदर्शिना ॥
वैद्येन शक्यं भवितुं चिकित्सां वाऽपि वेदितुम् ॥ ५६ ॥
सूत्रं विभजते बुद्ध्या त्रीणि पश्यन्ति चक्षुषा ॥
साध्यासाध्यं च याप्यं च नास्ति तत्र विचारणा ॥ ५७ ॥
अदृष्टकर्मका ये च शास्त्रहीनाश्चिकित्सकाः ॥
प्राप्य कर्मावसीदन्ति बहवो धीरमानिनः ॥ ५८ ॥
शास्त्रज्ञः कर्मणा हीनः कर्मज्ञः शास्त्रवर्जितः ॥
तावुभौ न प्रशस्येते पालकाप्यवचो यथा ॥ ५९ ॥
यः कर्मणि च शास्त्रे च उभयत्र विशारदः[3] ॥
स पूज्यः सततं राज्ञा दानमानप्रतिग्रहैः ॥ ६० ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने शिराच्छेदो नामैकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

अथाङ्गराजो विनयादभिगम्य भगवन्तं पालकाप्यं पप्रच्छ—'भगवन्वारणानां नानाविधं विषमदुर्गमसंबाधगमनगिरिशिखरकंदरारोहणावतरणसम-

---

१ क. वाद्य । २ क. वा चरेत । ३ क. °न विशारदैः ॥ ६० ॥

धानां संग्रामे शक्तिऋष्टितोमरपरशुभिण्डिमाद्याभिघाताद्भिहतदेहानां कथं कर्माणि विज्ञेयानि । तेषां भगवन्कति कर्मा(र्म)णि, किं च मर्मप्रमाणम्, कथं वा चिकित्सेत, केन वा शास्त्रानुसारेण मर्मप्रदेशा विज्ञेयाः, न शक्यं मर्माण्यज्ञाता (ज्ञात्रा) शस्त्राद(दि)चारणं कर्तुम् । यथा वारणानां न चाऽऽबाधकरं भवति, तथा मे वक्तुमर्हसि । भगवञ्छुश्रूषुरस्मि ' इति ॥

ततः पालकाप्यः प्रोवाच—इह खलु भो वारणानां सप्तोत्तरमर्मशतम् । पूर्वमेव तु शरीरविचये मर्मसंग्रहे समासतो व्याख्यातम् । मर्मप्रमाणमिदानीं यथा विज्ञायते नागस्य शरीरे तद्वक्ष्यामः—तत्रावग्रहहृदयाण्डकोशवातकुम्भबिम्बकपणवनाभिनिष्कोस(श)मुष्ककमृदुकुक्षिः ॥

तत्र गुदाण्डकोशे हृदयमेढ्रमध्योदरकरप्रत्यङ्गं सप्रतीकाशप्रतिमानगुहस्तनप्रोहसंदानभागग्रन्थिसकुटिकातलपलिहस्तवि(चि)क्कारन्ध्रान्तरापरकुक्षी (?) करीषप्रस्रावकटनयनकर्णहस्तवदनतालुस्रोतःकक्षाभागनिष्कोशमन्यान्तर्बाहुपणवकबिम्बकवातकुम्भा अपस्कराष्ठीव्यमृदुकुक्षिगलपृष्ठपतस्थानग्रीवामन्याभागतालुवाहित्थशम्बुकजिह्वाविलावङ्क्षणविक्षोभचूचुकमुष्ककूर्मांसतलसंधित्रपस्थिक्षपकलाभागांसेषु नरसंध्युरसि चेति । स्तनेचिक्कालमध्यभागतालुमेहनरन्ध्रगलकण्ठकक्षावङ्क्षणजिह्वासकुटिकातलसंधिकूर्मप्रोहसंधियतस्थानविक्षोभप्रतिमानपलिहस्तत्रपस्थिवाहित्थशम्बुकवक्षःसंधिकुक्षमध्यमुरसंदानभागकटकर्णमुखतालुनेत्रचूचुकपायुमेहनहस्तश्रो(स्रो)तांस्यष्ठीव्यगुहभोगप्रत्यङ्गसगुहान्तरबाहुग्रीवाविभागापस्करे करीषस्रावशंबुककरमध्यप्रतीकाशांसक्षयभागकलाभागान्तरापरोदरपृष्ठमध्याख्यानां सद्यःप्राणहरकालान्तरप्राणहरसशल्यप्राणहरवैगुण्यकराणां मर्मणां सप्तोत्तरशतं विज्ञेयम् ॥

इदानीमेषां विभागं प्रमाणं व्याख्यास्यामः ।

तत्र गुदमध्ये मर्म षडङ्गुलप्रमाणम् । हृदयमध्ये मर्माष्टाङ्गुलप्रमाणम् । अण्डकोशमध्ये मर्म षडङ्गुलप्रमाणम् । बिम्बकमध्ये मर्म षडङ्गुलप्रमाणम् । पणवकमध्ये मर्म षडङ्गुलप्रमाणम् । नाभिमध्ये मर्म षडङ्गुलप्रमाणम् । निष्कोशमध्ये मर्म षडङ्गुलप्रमाणम् । मुष्ककमध्ये मर्म षडङ्गुलप्रमाणम् । मृदुकुक्षिमध्ये मर्म चतुरङ्गुलप्रमाणम् । स्तनमध्ये मर्म षडङ्गुलप्रमाणम् । चिक्कामध्ये मर्म षडङ्गुलप्रमाणम् । तलमध्ये मर्माष्टाङ्गुलप्रमाणम् । मन्याभागे मर्म चतुरङ्गुलप्रमाणम् । तालुमध्ये मर्म चतुरङ्गुलप्रमाणम् । मेहनमध्ये मर्म चतुरङ्गुलप्रमाणम् । रन्ध्रमध्ये मर्म सप्ताङ्गुलप्रमाणम् । गलमध्ये मर्म सप्ताङ्गुलप्रमाणम् ।

१ क. °नभाग° । २ क. °विलागा° ।

कक्षाभागे मर्म नवाङ्गुलप्रमाणम् । वङ्क्षणमध्ये मर्म दशाङ्गुलप्रमाणम् । जिह्वामूले मर्म त्र्यङ्गुलप्रमाणमिति । एषामन्यतमे मर्मणि गाढविद्धः सद्यः प्राणैर्वियुज्यते ॥

इत्येतानि चतुस्त्रिंशति* सद्यःप्राणहराणि ॥

अत ऊर्ध्वं छवीनां भिन्नानां लक्षणं व्याख्यास्यामः । इह खलु भोः षट् छव्यो भवन्ति हस्तिनः । तत्र यदा प्रथमा छविर्भिद्यते, तदा पुरीषोदकनिभः स्रावो भवति । द्वितीयायामुदकश्रा(स्रा)वः । तृतीयायां शोणितश्रा(स्रा)वः । चतुर्थ्यां मेदःश्रा(स्रा)वः । पञ्चम्यां मज्जश्रा(स्रा)वः । षष्ठ्यां मर्माभिघातो ज्ञेयः ॥

—:():—

अत ऊर्ध्वं दन्तिनां मर्माणि कालान्तरप्राणहराणि वक्ष्यामः । तत्र सकुटिकामध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासत्रयान्म्रियते । तलसंधिमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र विद्धो मासत्रयान्म्रियते । कूर्ममध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धः षण्मासाभ्यन्तरे विनश्यति । मोहसंधिमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासद्वयेन म्रियते । पतस्थाने मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढविद्धो मासद्वयान्म्रियते । विक्षोभमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धः षण्मासाभ्यन्तरे म्रियते । प्रतिमानमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासत्रयान्म्रियते । पलिहस्तमध्ये[1] मर्म सप्ताङ्गुलप्रमाणं, तत्र गाढं विद्धो मासत्रयान्म्रियते[2] । त्र्यस्थिमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासत्रयाद्व्यापद्यते । वाहित्थमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धः षण्मासाभ्यन्तरे विनश्यति । शम्बुकमध्ये मर्माष्टाङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासत्रयाद्व्यापद्यते । वक्षःसंधिमध्ये मर्माष्टाङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासद्वयान्म्रियते । कुक्षिमध्ये मर्माष्टाङ्गुलप्रमाणम्, तत्र गाढं विद्धो मासद्वयान्म्रियते । संदानभागमध्ये मर्माष्टाङ्गुलप्रमाणम्, तत्र गाढं विद्धः षण्मासाभ्यन्तरे विनश्यति । इत्येतानि पञ्चविंशतिमर्माणि कालान्तरप्राणहराणि ॥

—:○:—

अत ऊर्ध्वं वैगुण्यकराणां लक्षणं वक्ष्यामः । कर्णमुखतालुनेत्रचूचुकपायुमेहनहस्तश्रो(स्रो)तःसु[3] पञ्चदशसु प्रत्येकं चतुरङ्गुलप्रमाणम्, तत्र गाढं विद्धो

† कण्ठमध्ये मर्म सप्ताङ्गुलप्रमाणम् । इत्यधिकमितः परं कपुस्तके ॥

* आदर्शद्वयेऽपि तुल्यः पाठः । तथाऽप्युक्तसंख्या तु न लभ्यते ॥

१ क. पलिह° । २ क. ख. °ते । अस्थि° । ३ क. °मः । तालुपायुमेहनहस्तमुखकण्ठकर्णनेत्रचूचुकश्रो° ।

वैकल्यात्कृच्छ्रजीवी भवति । अष्ठीव्यपयोर्मर्म चतुरङ्गुलप्रमाणम्, तत्र गाढं विद्धोऽपकर्षति । गुह्यभागमध्ये कर्णाश्रितं मर्म चतुरङ्गुलप्रमाणम्, तत्र गाढं विद्धः स्तब्धगात्रो भवति । प्रत्यंसमध्ये मर्म पञ्चाङ्गुलप्रमाणम्, तत्र गाढं विद्धः स्तब्धकर्णो भवति । अन्तर्बाहुमध्ये मर्म पञ्चाङ्गुलप्रमाणम्, तत्र गाढं विद्धो हृद्रोगी भवति । ग्रीवामध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धस्य मन्यास्तम्भो भवति । बिलाङ्गमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धश्चक्षुर्विकलो भवति । अपस्कारमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धः स्तब्धगात्रो भवति । करीषस्रावमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्ध आनाहेन पीड्यते । चूचुकयोर्मध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्ध उरःसङ्गमवाप्नोति । करमध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्ध उत्कर्णकेन पीड्यते । प्रतीकास-(श)मध्ये मर्म षडङ्गुलप्रमाणम् । तत्र गाढं विद्धः पाकलेन पीड्यते । अंश(स)मध्ये मर्म षडङ्गुलप्रमाणम्, तत्र गाढं विद्धो गात्रभङ्गमवाप्नोति । क्षयभागे मर्म सप्ताङ्गुलप्रमाणम्, तत्र विद्धस्य गात्रस्य रुजा भवति । कलाभागमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धोऽतीसारमवाप्नोति । अन्तरापरमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धो मूत्रसङ्गमवाप्नोति । उदरमध्ये मर्म सप्ताङ्गुलप्रमाणम्, तत्र गाढं विद्धो मेढ्रशोषमवाप्नोति । पृष्ठमध्ये मर्म विंशत्यङ्गुलप्रमाणम्, तत्र गाढं विद्धोऽपररोगी भवति । इत्येतानि चतुस्त्रिंशन्मर्माणि वैगुण्यकराणि भवन्ति । तत्र वैगुण्यकराणां चतुर्दशानां मर्मणां लक्षणान्युक्तानि ॥

तत्र श्लोकाः—

एवं सप्त महाराज शतं च परिकीर्तितम् ।
वारणानां शरीरेषु मर्मणामिति निश्चितम् ॥
तस्मान्मर्माणि संरक्षेद्वारणानां भिषग्वरः ।
....ततः कुर्यात्क्रियापथम् ॥
यो मर्माणि न जानाति वारणानां विभागशः ।
न स कायक्रिया(?)नागे विषयान्ते तमुत्सृजेत् ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने तृतीये शल्यस्थाने मर्मप्रमाणो नाम विंशोऽध्यायः ॥ २० ॥

१ क. °रामध्येऽप° । २ क. °शत्पञ्चाङ्गुलं प्र° । ३ क. °शतिमर्मा° ।

अथैकविंशोऽध्यायः ।

अङ्गश्च राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
एरण्डकानामुत्पत्तिं ब्रूहि लिङ्गं तथा क्रियाम् ॥ १ ॥
पूर्वं च निर्विषो भूत्वा सविषः केन जायते ॥
दष्टस्तु सप्तरात्रेण कस्मात्कुप्यति दन्तिनाम् ॥ २ ॥
मासैश्च सप्तभिः कस्मात्तथा संवत्सरैरपि ॥
के वर्णाः कानि रूपाणि जातयः कति च स्मृताः ॥ ३ ॥
निर्विषं च कथं दष्टमविषं चात्र वै कथम् ॥
एवं पृष्टस्तु राजेन्द्र(?) पालकाप्यस्ततोऽब्रवीत् ॥ ४ ॥
शृणु सर्वं महाराज यन्मां त्वं परिपृच्छसि ॥
भौमास्तथाऽऽन्तरिक्षाश्च श्वानस्तु द्विविधाः स्मृताः ॥ ५ ॥
भौमास्तु त्रिविधा ज्ञेया ग्राम्यारण्यसमुद्भवाः ॥
तेषामृतुविपर्यासाद्रसानां च विपर्ययात् ॥ ६ ॥
गर्भा एव तु जायन्ते मातुराहारजै रसैः ॥
मण्डूकान्कृकलासान्वा सर्पवृश्चिकगोनसान् ॥ ७ ॥
यदा तु नरमांसं वा श्वमांसं वा समश्नुते ॥
विषं तदुपयुक्तं हि मात्रा त्वस्य तदा भवेत् ॥ ८ ॥
संतर्पयति तं गर्भं तर्पितं च प्रसूयते ॥
तेन दोषश्च जायेत गर्भस्थस्यैव देहिनः ॥ ९ ॥
अप्रकोपाद्धि दोषाणां जातः स्वस्थो भवेद्यदा ॥
कोपयेत्तु तदा दोषांस्तस्य तत्संचितं विषम् ॥ १० ॥
अन्योन्यमूर्छिताः सर्वे मंदं कुर्वन्ति दोषजम् ॥
तेन श्वा भ्राम्यतेऽत्यर्थं विनमत्युन्नमत्यपि ॥ ११ ॥
लालाप्रसेकी च तथा क्रोधनो मदचेष्टितः ॥
श्लथलाङ्गूलचरणो मदचेष्टोऽनवस्थितः ॥ १२ ॥
यदसौ भक्षयेत्प्राप्य तल्लिङ्गः सोऽपि जायते ॥
सविषं त्रिविधं दष्टं निर्विषं तु चतुर्विधम् ॥ १३ ॥
दष्टं चतुर्भिर्दंष्ट्राभिस्तत्कष्टमिति निर्दिशेत् ॥
दष्ट्वा क्षिपति योऽत्यर्थमतिदष्टमतिक्रियम् ॥ १४ ॥

---

१ क. सप्तति । २ क. सा । ३ क. मन्दं । ४ ख °द्वेष्टि° ।

एवं द्विविधमाख्यातं सविषं निर्विषं शृणु ॥
विस्फोटितं विलिखितं ग्रथितं स्निग्धशोणितम् ॥ १५ ॥
व्यवकृष्टं विजानीयान्निर्विषं तद्भवेन्नृप ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव तु जातितः ॥ १६ ॥
शुक्ला रक्ता धूम्रवर्णाः कृष्णाश्चेति यथाक्रमम् ॥
तेषां गन्धाः स्मृता मौममत्स्यचन्दनसर्पिषाम् ॥ १७ ॥
शुक्लास्तु श्लैष्मिका ज्ञेया रक्ता वै पित्तसंभवाः ॥
धूम्रा वातसमुत्थास्तु संकीर्णा मिश्रलक्षणाः ॥ १८ ॥
तेषां वर्णविभागेन प्रतिकुर्याच्चिकित्सितम् ॥
कालेन यावता दष्टो हस्तिनः प्रति कुप्यति ॥ १९ ॥
तावतैव तु कालेन भूयो भूयः प्रकुप्यति ॥
तत्रेमे हेतवः प्रोक्ता श्वदष्टस्य प्रकोपनैः ॥ २० ॥
मेघविद्युन्निपातेन अशनेः पतनेन वा ॥
अजीर्णाध्यशनाद्वाऽपि तथैवाप्यतिभोजनात् ॥ २१ ॥
जलमध्यगतो वाऽपि पश्चाऽऽत्मानं प्रपश्यति ॥
सप्तमे दिवसे मासे पक्षे संवत्सरेऽपि वा ॥ २२ ॥
परिकुप्यति यद्दष्टं तस्मात्कुर्याच्चिकित्सितम् ॥
विषं तत्त्रिविधं ज्ञेयं त्रिवेगं त्रिःप्रतिक्रियम् ॥ २३ ॥
प्रथमे विषवेगे तु नमत्यपि च कम्पते ॥
नदत्यूर्ध्वमुखोऽत्यर्थं द्वितीये जृम्भते मुहुः ॥ २४ ॥
तृतीये जृम्भतेऽत्यर्थं श्वसन्नदति वाऽसकृत् ॥
श्र(स्र)स्तलाङ्गूलचरणः श्र(स्र)स्तकर्णशिरोधरः ॥ २५ ॥
मूर्छति क्रोधनोऽत्यर्थं म्रियते नात्र संशयः ॥
इति त्रयाणां वेगानां लक्षणं परिकीर्तितम् ॥ २६ ॥
एवंप्रकारस्य यथा दर्शनं नाभिजायते ॥
असाध्यं तं विजानीयात्त्रिवेगाक्षिप्तकश्च यः ॥ २७ ॥
याप्यो बभ्रुसवर्णाभः शेषाः साध्याः क्रियां प्रति ॥
धूपाञ्जनं च पानं च विविधाश्च क्रियाः स्मृताः ॥ २८ ॥
कुङ्कुमं तगरं कुष्ठं श्वेतपर्ववचा स्मृताः ॥
एतदञ्जनपानेषु धूपनेषु च योजयेत् ॥ २९ ॥

श्वेतसर्षपमादाय पिप्पलीमरिचानि च ॥
एतद्गुडेन संयुक्तं छायायां परिशोषयेत् ॥ ३० ॥
एतदञ्जनपानाभ्यां धूपने च प्रशस्यते ॥
कुष्ठं ध्यामकसंयुक्तं वार्ताकीबीजमेव च ॥ ३१ ॥
देवदारु च सर्पिश्च पुष्पाणि ह्यसनस्य च ॥
त्रिफलाऽतिविषा कुष्ठं तथा पाषाणभेदकः ॥ ३२ ॥
गवां मूत्रेण पिष्टं तु क्षौद्रेण सह योजितम् ॥
एतत्पानाञ्जने देयं गजानां हितमिच्छता ॥ ३३ ॥
पुराण.......................राजसिद्धार्थका वचा ॥
हिङ्गुजीरकशुण्ठी च सर्पिश्चापि गुडं तथा ॥ ३४ ॥
दष्टे तु कुपिते पानं रसाञ्जनमनुत्तमम् ॥
पिप्पली पिप्पलीग्रन्थिर्मधुसर्पिःसमन्वितम् ॥ ३५ ॥
एरण्डदष्टं कुपिते पानं दद्यात्तथाऽञ्जनम् ॥
आर्द्रकं सगुडं कुष्ठं घृतेन सह योजितम् ॥ ३६ ॥
पिण्डं दद्याद्गजानां तु दष्टानामुपशान्तये ॥
कुष्ठं च तगरश्चैव आर्द्रकं गुडमेव च ॥ ३७ ॥
श्वदष्टस्य तु नागस्य पिण्डं दद्याद्विचक्षणः ॥
हरिद्रा हरितालं च मञ्जिष्ठा समनःशिला ॥ ३८ ॥
श्वेतसिद्धार्थकाः कुष्ठं कपित्थं तगरं तथा ॥
गोरोचना शुना पित्तं समभागानि योजयेत् ॥ ३९ ॥
तदभ्यञ्जनपानं च आलेपं चास्य दापयेत् ॥
क्षीरमिक्षुरसं चास्मै अन्नपानं प्रदापयेत् ॥ ४० ॥
शाल्योदनं ससर्पिष्कं भोजयेन्मुद्गसंयुतम् ॥
मृद्वुं च यवसं दद्यात्सर्पिश्चास्य प्रवर्तते ॥ ४१ ॥
क्षान्तिश्चास्य क्रियायोगे सिद्धिः कर्माभिनीतवत् ॥
अन्तरिक्षगताः श्वानः कामगा दिव्यचारिणः ॥ ४२ ॥
तेषां मूत्रपुरीषाणि लालाश्चापि विषं भवेत् ॥
दष्टवद्व्रजते रूपं सीदत्यपि च दंष्टवत् ॥ ४३ ॥

---

१ क. °गादित्यचा° । २ क. °त् ॥ दष्ट° । ३ क. दष्टवत् ।

इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन निवेदितः ॥ ४४ ॥
इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने तृतीये शल्यस्थाने एरण्डको नामैकविंशोऽध्यायः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां देवराजसमद्युतिः ॥
पालकाप्यं महाराजः पप्रच्छ विजितेन्द्रियः ॥ १ ॥
मर्माणि कति नागानां शरीरेषु महामुने ॥
तत्र मर्माणि सर्वाणि भागागोचरतत्त्वतः ॥ २ ॥
*ते प्रसादाद्भगवते (?) तदिच्छामि च वेदितुम् ॥
पालकाप्यस्ततस्तस्य श्रुत्वा वचनमब्रवीत् ॥ ३ ॥
शरीरस्य च वक्ष्यामि नागस्याहं महीपते ॥
तद्यथा चानुपूर्वेण प्रदेशान्मर्मसंस्थितान् ॥ ४ ॥
तत्र कुम्भस्य मध्ये तु मर्मैकं मनुजाधिप ॥
नाम्ना प्रवेपणं नाम सद्यःप्राणहरं हितम् ॥ ५ ॥
श्रवणश्रो(स्रो)तसी स्यातां मर्मणी द्वे महीपते ॥
सद्यःप्राणहरे विद्धि वारणस्य न संशयः ॥ ६ ॥
तथा निर्याणमध्येऽपि वालो यत्र प्रदृश्यते ॥
मर्म तद्वारणस्यापि सद्यः प्राणहरं हितम् ॥ ७ ॥
नेत्रयोरुपरिष्टात्तु इषीकागुच्छयामृतम् ॥
मर्म तस्मिन्क्षते नागः पञ्चत्वमुपगच्छति ॥ ८ ॥
अवग्रहस्य मध्ये तु कपालं यत्समाश्रितम् ॥
सीवनीमर्म तं विद्यात्क्षते तस्मिन्न जीवति ॥ ९ ॥
मस्तकाकृति(?) यौ पिण्डौ नयोर्मध्ये तु मस्तकौ ॥
भिन्नो मस्तकमध्ये तु नागः प्राणैर्वियुज्यते ॥ १० ॥
पिञ्जूषस्योपरिष्टात्तु कर्णसंधिसमाश्रितम् ॥
कर्णश्रो(स्रो)तोनुगं मर्म क्षते चास्मिन्विपद्यते ॥ ११ ॥

---

* 'तव प्रसादाद्भगवंस्तत्' इति तूचितम् ॥

---

१ ख. गति । २ क. °कालुंगु° । ३ क. मस्तुकौ । ४ क. ख. भिन्नौ ।

दन्तान्तरस्य मध्ये तु प्रतिमानस्य चोपरि ॥
फेत्करं नाम तन्मर्म सद्यः प्राणहरं नृप ॥ १२ ॥
वातकुम्भस्य चाधस्तात्प्रतिमानस्य चोपरि ॥
तालुश्रो(स्रो)तोवहं मर्म भिन्ने तस्मिन्न जीवति ॥ १३ ॥
अथोपरिष्टाद्ग्रीवायाः कर्मसंधिसमाश्रिताम् ॥
मर्म वायसतुण्डं तु विद्धस्तस्मिन्न जीवति ॥ १४ ॥
ग्रीवासंधिमनुप्राप्तमधो मस्तकपिण्डयोः ॥
मध्ये पणवकं नाम मर्म प्राणहरं स्मृतम् ॥ १५ ॥
वारणस्य गुहाभागे मर्म संधिसमाश्रितम् ॥
धमन्याध्मापनं नाम सद्यः प्राणहरं नृप ॥ १६ ॥
गुहाभागेऽपरमपि यतस्थानं समाश्रितम् ॥
मर्म तस्मिन्क्षते नागः पाकलेन विपद्यते ॥ १७ ॥
गुहाभागेऽपि मध्ये तु कर्मसंधिसमाश्रितम् ॥
मर्म तस्मिन्क्षते नागः स्तब्धग्रीवो भवेन्नृप ॥ १८ ॥
शङ्खसंधिगतं यत्तदुपवाहिसमाश्रितम् ॥
मर्म तस्मिन्क्षते नागः सद्यः प्राणैर्वियुज्यते ॥ १९ ॥
मन्ययोर्मध्यतश्चैकं गलसंधिसमाश्रितम् ॥
मर्म तन्निर्गलं नाम सद्यः प्राणैर्वियोजयेत् ॥ २० ॥
उपरिष्टादुरोमन्या* गलभागस्य चाप्यधः ॥
हिक्कामर्मेति तद्विद्यात्सद्यः प्राणहरं हि तत् ॥ २१ ॥
संधिमध्ये तु नागस्य उरोमणिसमाश्रितम् ॥
तस्मिन्क्षिते द्विपं क्षिप्रं वातस्कन्दो विनाशयेत् ॥ २२ ॥
उरोमणेर्मध्यतस्तु मणिर्नाम प्रतिष्ठितम् ॥
मर्म तद्दारुणं विद्यात्सद्यः प्राणहरं नृप ॥ २३ ॥
चतुरस्रं च मध्ये तु यत्राऽऽवर्तः प्रदृश्यते ॥
आवर्तं नाम तन्मर्म सद्यः प्राणहरं स्मृतम् ॥ २४ ॥
अथोपरिष्टात्कायस्य प्रवक्ष्यामि महीपते ॥
आसनस्य तु पार्श्वे तु वंशनागस्य संश्रितम् ॥ २५ ॥

---

* 'मण्या' इति भवेत् ।

---

१ क. फत्करं । २ क. कर्णसं° । ३ क. °स्य गूहा° । ४ क. गूहाभागे । ५ क. कर्णसं° । ६ क. °तश्चिक्कं ग° । ७ ख. °द्वारणं ।

उत्कर्णकेन मातङ्गः क्षते तस्मिन्न जीवति ॥
अधस्तात्पेचकस्याथ गुदभागस्य चोपरि ॥ २६ ॥
मर्म तस्मिन्क्षते नागो मूत्रसङ्गेन नश्यति ॥
अथ निष्कोशमध्ये वै मर्मैकं मनुजाधिप ॥ २७ ॥
सद्यः प्राणहरं तत्तु वारणस्य (†विनिर्दिशेत् ॥
पर्शुकास्तु समाश्रित्य निष्कोसस्य तु पार्श्वतः ॥ २८ ॥
मर्म प्राणहरं तत्तु वारणस्य) नराधिप ॥
पक्षतोऽप्यथ नागस्य मर्मैकं समुदाहृतम् ॥ २९ ॥
क्षते तस्मिन्महीपाल वातानाहः प्रधावति ॥
वारणस्य महीपाल कक्षाभागं समाश्रितम् ॥ ३० ॥
मर्म तस्मिन्क्षिते नागं पाकलस्तु विनाशयेत् ॥
तनुभागस्य चाधस्तान्मर्म रन्ध्रसमाश्रितम् ॥ ३१ ॥
तस्मिन्क्षिते वारणस्य व्याधिरुत्कर्णको भवेत् ॥
कक्षाभागस्य मध्ये तु क्षयभागं समाश्रितम् ॥ ३२ ॥
मर्म प्राणहरं विद्धि वारणस्य महीपते ॥
उपरिष्टात्तु कायस्य मर्मभागाः प्रकीर्तिताः ॥ ३३ ॥
गात्रापरे प्रवक्ष्यामि मर्माणि प्रविभागशः ॥
आसनस्य तु पार्श्वे तु मर्मैकं समुदाहृतम् ॥ ३४ ॥
तंतस्तस्मिन्क्षते नागं गात्रशोफो विनाशयेत् ॥
अपस्कारस्य चाधस्ताद्वैशाखस्य तु मध्यतः ॥ ३५ ॥
तत्र क्षतस्तु मातङ्गः स्तब्धगात्रः सदा भवेत् ॥
गात्रस्य पूर्वभागे तु जवभागस्य पार्श्वतः ॥ ३६ ॥
तत्र मर्म महीपाल सद्यः प्राणहरं स्मृतम् ॥
विष्कयोः पश्चिमे भागे वालयस्तत्र दृश्यते ॥ ३७ ॥
मर्म तस्मिन्क्षते नागः सद्यः प्राणान्विमोचयेत् ॥
विशेषयोः पश्चिमेन व(प)लिहस्तस्य मध्यतः ॥ ३८ ॥
मर्म तस्मिन्क्षते नागः सद्यः प्राणैर्वियुज्यते ॥
नेत्रमण्डलभागे तु मर्मैकं पृथिवीपते ॥ ३९ ॥

† धनुश्चिह्नान्तरगतो नास्ति पाठः खपुस्तके ।

१ क. ख. मागतः । २ क. °ष्कोसम° । ३ क. वातानाहं । ४ क. तु यव° ।

नाम्ना आलिङ्गितं नाम तदपि प्राणनाशनम् ॥
अथास्य प्रोहमध्ये तु मर्मैकं समुदाहृतम् ॥ ४० ॥
तस्मिन्क्षते महीपाल नागः प्राणैर्वियुज्यते ॥
पारुष्यपश्चिमे भागे कर्मस्योपरि पार्थिव ॥ ४१ ॥
पलिपादे महीपाल मर्म प्राणहरं स्मृतम् ॥
पुरोनखस्य यत्पार्श्वे नखश्रो(स्रो)तस्य मध्यतः ॥ ४२ ॥
मर्म तस्मिन्क्षते नागं गात्रशोफो विनाशयेत् ॥
स्तनयोश्चूचुकः पार्श्वे मर्मैकं पृथिवीपते ॥ ४३ ॥
सद्यः प्राणहरं तु स्याद्वारणस्य हि पार्थिव ॥
अथ वङ्क्षणपार्श्वे तु मर्मैकं समुदाहृतम् ॥ ४४ ॥
रक्तश्रो(स्रो)तोवहं नाम तदपि प्राणनाशनम् ॥
वङ्क्षणस्याप्यधोभागे वारणस्य महीपते ॥ ४५ ॥
मर्म तस्मिन्क्षते नागः सद्यः शोफेन नश्यति ॥
अष्ठीव्यसंधिमाश्रित्य मर्मैकं तु महीपते ॥ ४६ ॥
क्षते तत्र भृशं नागस्त्वपरे परिकर्षति ॥
मण्डूक्या वाऽपि नागस्य मर्मैकं समुदाहृतम् ॥ ४७ ॥
क्षते तस्मिन्महीपाल ख(ष)ण्ढः संजायते गजः ॥
तथा सकुटिकायां तु मर्मैकं समुदाहृतम् ॥ ४८ ॥
सद्यः प्राणहरं त्वेतद्वारणस्य विनिर्दिशेत् ॥
अपरातलयोर्मध्ये मर्मैकं समुदाहृतम् ॥ ४९ ॥
सद्यःप्राणहरं तं तु वारणस्य विनिर्दिशेत् ॥
इत्येष कीर्तितः सम्यक्प्रविभागस्तु मर्मणाम् ॥ ५० ॥
यथावदनुपूर्वेण वारणानां हितैषिणा ॥
तत्र भागेषु सर्वेषु मर्माणि परिरक्षयेत् ॥ ५१ ॥
मर्मभागेषु नागानां शस्त्रकर्म न कारयेत् ॥
सुपक्वं भिषजा ज्ञात्वा शस्त्रकर्म नियोजयेत् ॥ ५२ ॥
शस्त्रकर्माणि नागस्य शिरास्नायूंश्च वर्जयेत्[1] ॥
सर्वसंधिषु मर्माणि विज्ञाय कुशलो भिषक् ॥ ५३ ॥
मर्मभागेषु नागस्य तिर्यक्शस्त्रं न पातयेत् ॥
अनुलोमं तु यत्रैवं यथेष्टं सिद्धिरिष्यते ॥ ५४ ॥

---

१ ख. °स्नायुश्च ।

गजानां न हयानां च मानुषाणां तथैव च ॥
छेदं तु विविधं कार्यं वारणस्य विजानता ॥ ५५ ॥
वृद्धिपत्रेण तीक्ष्णेन मण्डलाग्रेण वा पुनः ॥
आसनेऽथ कलाभागे कण्ठे वंशे च गण्डयोः ॥
वृत्तच्छेद्यं तु कर्तव्यं भागेष्वेतेषु दन्तिनाम् ॥ ५६ ॥
पञ्चाङ्गुलपदं कुर्यात्सप्ताङ्गुलमथापि वा ॥
नवाङ्गुलं वा नागस्य शस्त्रकर्म विधीयते ॥ ५७ ॥
एतत्सर्वं विनिश्चित्य च्छेदं नागस्य कारयेत् ॥
वासितेनैव शस्त्रेण कर्म कुर्याद्विचक्षणः ॥ ५८ ॥
वेध्यं व्रीहिमुखेनैव मण्डलाग्रेण लेखनम् ॥
विश्रा(स्रा)वणं कुठारेण वेत्सदन्तेन च स्मृतम् ॥ ५९ ॥
सीवनं द्विविधं विद्याद्गुणवद्ग्रन्थिमत्त्वपि ॥
स्थिरेषु त्ववकाशेषु ग्रन्थिसीवनमिष्यते ॥ ६० ॥
मांसलेष्वेवकाशेषु चलेषु मृदुसंधिषु ॥
गुणसीव्यं च कर्तव्यं वारणस्य विजानता ॥ ६१ ॥
सीवने तु भवेत्सूची सूक्ष्मा त्वष्टाङ्गुलायता ॥
नागदन्तकसंस्थाना श्लक्ष्णा वै सुसमाहिता ॥ ६२ ॥
कंधरावग्रहा भागे कुक्षौ पक्षेषु संधिषु ॥
नागदन्तकसूच्या वै सीवनं सम्यगिष्यते ॥ ६३ ॥
संग्रामे हस्तियुद्धे वा विक्षतस्य तु हस्तिनः ॥
सद्यःक्षते महाराज सीवनं तु विधीयते ॥ ६४ ॥
पक्करेष्ववकाशेषु परिश्रा(स्रा)विषु दन्तिनाम् ॥
संधानान्येव कार्याणि सीव्यं तत्र न कारयेत् ॥ ६५ ॥
शतं सप्त च मर्माणि भागाभागेषु हस्तिनाम् ॥
प्रोक्तानि पालकाप्येन अङ्गराजाय पृच्छते ॥ ६६ ॥
व्रणकर्मणि नागस्य अभ्यङ्गः पूज्यते सदा ॥
स्नेहपानं च नागानां स्निग्धमेव च भोजनम् ॥ ६७ ॥

---

१ क. ख. नागेष्वेतेषु । २ ख. च्छेद्यं । ३ क. ख. तत्सदन्तेन । ४ क. °न्थिवत्त्व° । ख °न्थिमत्स्वपि । ५ क. °ष्वककालेषु । ६ क. सीवनं । ७ क. ख. कर्माणि । ८ क. ख. °कर्माणि ।

तस्मात्तु कुशलो वैद्यः श्रुतवान्कालदेशवित् ॥
परीक्ष्यकारी शूरश्च जितक्रोधो जितेन्द्रियः ॥ ६८ ॥
अप्रमत्तश्च दक्षश्च यशसश्चैव रक्षिता ॥
वैद्य एवंविधो राजन्प्रमुह्यति कर्मसु ॥ ६९ ॥
एष ते पृथिवीपाल यथावदनुपूर्वशः ॥
मर्मणामिह सर्वेषामशेषेण विनिश्चयः ॥ ७० ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने मर्मविद्धो नाम द्वाविंशतितमोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
भगवन्कति कामानां नृपाणां विजिगीषताम् ॥ १ ॥
प्रायशो युध्यमानानां वारणेषु ध्रुवो जयः ॥
संग्रामे युध्यमानानां कायवेध्यं पृथग्विधम् ॥ २ ॥
शस्त्राकृतिविशेषैश्च तथा छेद्यं च जायते ॥
शस्त्रकर्मणि चाप्येवं दन्तैर्वा प्रतिहस्तिनाम् ॥ ३ ॥
तत्राल्पोऽथ कथं कश्चिद्व्रणः प्राणान्तिको भवेत् ॥
अथ येन प्रबाधन्ते प्राणास्तद्वक्तुमर्हसि ॥ ४ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
स्वभावात्सर्वसत्त्वानां प्राणा देहसमाश्रयाः ॥ ५ ॥
देहप्राणेष्वथाऽऽपन्नाः प्राणा मर्माश्रयास्तथा ॥
तेजोनिलगुणैः सार्धं पुरुषो मर्मसंश्रयः ॥ ६ ॥
तस्मान्मर्माश्रयं विद्यात्प्राणबाधाकरं व्रणम् ॥
मर्म चाप्यभिविज्ञेयं प्रतिभागाच्चतुर्विधम् ॥ ७ ॥
सद्यः प्राणहरं चैव तथा कालान्तरेण च ॥
तथा सशल्यप्राणं च वैगुण्यकरमेव च ॥ ८ ॥
तत्रानलगुणैर्युक्तं सद्यः प्राणहरं भवेत् ॥
कालान्तरप्राणहरं सौम्याग्नेयमुदाहृतम् ॥ ९ ॥

---

१ क. शूरस्य । २ क. ख. प्राणदे° । ३ क. प्राणम° ।

तथा सशल्यप्राणं च वापव्यं कथ्यते बुधैः ॥
सौम्यं वैगुण्यकरणमिति*पूतगुणाश्रयः ॥ १० ॥
सद्यःप्राणहराण्यादौ तत्र वक्ष्यामि पार्थिव ॥
गुदोऽण्डकोशो हृदयं मेण्ढ्रं पणवकस्तथा ॥ ११ ॥
मन्याभागे विवेकश्च मेलो नाभिस्तथैव च ॥
मृदुकुक्षी सनिष्कोशौ कक्षाभागौ तथा तलाः ॥ १२ ॥
वङ्क्षणौ मुष्कभागौ च तालु जिह्वा स्तनान्तरम् ॥
रन्ध्रौ कुम्भं तथा वक्षः कण्ठश्चोदरमेव च ॥ १३ ॥
करीषास्राव इत्येवं सद्यःप्राणहराणि तु ॥
चतुस्त्रिंशत्तु मर्माणि निर्दिष्टानि मनीषिभिः ॥ १४ ॥
अग्निर्जीवाश्रयो यस्माज्जीवश्चाग्निसमाश्रयः ॥
तस्मात्तत्र क्षते क्षिप्रं प्राणांस्त्यजति वारणः ॥ १५ ॥
कालान्तरप्राणहराण्यथ वक्ष्यामि तच्छृणु ॥
प्रोहे सकुटिके त्र्यस्थिसंदानौ तलसंधयः ॥ १६ ॥
विक्षोभौ कूर्मभागौ च उरःसंधिरुरस्तथा ॥
पलिहस्तौ यतस्थाने अन्तर्बाहू तथैव च ॥ १७ ॥
कालान्तरविनाशीनि याप्याभागौ च पार्थिव ॥
निर्याणे चैव कुम्भे च स्रोतसः कुम्भयोरपि ॥ १८ ॥
क्षीरिके च महीपाल पुरस्कारे तथैव च ॥
पञ्चविंशतिरेतानि ज्ञेयानि परिसंख्यया ॥ १९ ॥
क्रमाद्यावत्क्षपयति साम्यस्तेजोगुणैर्गुणात् ॥
यस्मात्क्रमेण म्रियते कालप्राणहरं ततः ॥ २० ॥
तत्रोपद्रवजातं च रोमस्थमभिलक्षयेत् ॥
ततः सशल्यप्राणानि प्रवक्ष्याम्यनुपूर्वशः ॥ २१ ॥
निर्याणश्चैव कुक्षी च स्रोतसी कर्णयोस्तथा ॥
कुम्भश्चैव महीपाल पुरस्कारोऽथ चूचुके ॥ २२ ॥
स्यातामक्षिगुहे चैव विद्रुलं वदतां वर ॥
विद्यात्सशल्यप्राणानि मर्माणीह चतुर्दश ॥ २३ ॥

* भूत इति स्यात् ॥

१ क. गणना° ।

यावच्छल्यनिरुद्धस्तु वायुस्तिष्ठति मर्मणि ॥
तावत्सशल्यप्राणेषु स जीवति मृतोऽन्यथा[1] ॥ २४ ॥
अथ वैगुण्यकारीणि अपस्कारस्तथैव च ॥
विज्ञाय तु गुहाभागौ क्षपभागं ततः परम् ॥ २५ ॥
अस्मे चैव विभागे च करस्य श्रो(स्रो)तसी तथा ॥
प्रतिमानं गुहाभागौ चत्वारो ग्रन्थयस्तथा ॥ २६ ॥
तथाऽन्तरपरे स्यातां प्रवक्ष्याम्यत उत्तरम् ॥
करश्च प्रत्यगंसौ च प्रतीकासौ तथैव च ॥ २७ ॥
नेत्रे चैव महीपाल मुनिभिः परिकीर्तिते ॥
ग्रीवा चान्तरसूना च वाहित्थं च नराधिप ॥ २८ ॥
पेचकश्च विताने च वैगुण्यकरसंग्रहः ॥
एतान्येव चतुस्त्रिंशत्प्रोक्तानि मनुजाधिप ॥ २९ ॥
स्थिरा यतः सौम्यगुणाः स्थिरत्वाच्च न मृत्युदाः ॥
तस्मात्तद्वैगुण्यकरं मृत्युदं क्लेशयेन्न तम् ॥ ३० ॥
इति सप्तोत्तरं प्रोक्तं शतं ते मर्मणां मया ॥
धैर्यं वीर्यं बलं सत्त्वं संघातः पौरुषा गुणाः ॥ ३१ ॥
एतेष्वधिष्ठिताः सर्वे गुणा मर्मसु हस्तिनाम् ॥
यस्मात्तस्मात्क्षते तत्र प्राणांस्त्यजति वारणः ॥ ३२ ॥
मारणादुच्यते मर्म नैरुक्तैः शास्त्रनिश्चयात् ॥
तथैवाष्टविधं प्राहुः संख्यया मनुजाधिप ॥ ३३ ॥
शिरामर्मा[2]स्थिमर्माश्च(?) धमनीमर्म चापरम् ॥
स्नायुमर्म च विज्ञेयं कोष्ठमर्म तथैव च ॥ ३४ ॥
संधिमर्म च विज्ञेयं स्रोतोमर्म तथैव च ॥
दोषमर्म च विज्ञेयं वक्ष्यन्ते तत्र हेतवः ॥ ३५ ॥
शिरामर्मण्यभिहतो रक्तश्रा(स्रा)वाद्रजोऽधिकः ॥
क्षिप्रं वियुज्यते प्राणैस्तस्मात्तदभिरक्षयेत् ॥ ३६ ॥
अस्थिमर्मण्यभिहतः शुक्रमज्जापरिश्र(स्र)वात् ॥
परित्जेयद्रजः प्राणानस्थिधातुक्षयात्ततः ॥ ३७ ॥
हिंस्यते धमनीमर्म यदा नागस्य मर्मसु ॥
तदाऽप्यगुणनिश्रा(स्रा)वाद्रजस्त्यजति जीवितम् ॥ ३८ ॥

१ क. ख. मृतेऽन्य° । २ क. ख. शिरोम° ।

स्नायुमर्मण्यभिहतः स्नायुसंश्र(स्र)वणाद्गजः ॥
विश्लिष्टसंधिर्भवति स्नायुर्देहनिबन्धनः ॥ ३९ ॥
कोष्ठमर्मण्यभिहतः करीषस्रावपीडितः ॥
महाक्षयाभिभूतस्तु प्राणांस्त्यजति वारणः ॥ ४० ॥
संधिमर्माभिघाताच्च चेष्टावैगुण्यमुत्तमाः ॥
प्राप्नुयाद्वारणः क्षिप्रं मरणं वातपीडितः ॥ ४१ ॥
श्रो(स्रो)तोमर्माभिघाताच्च स्वगुणैः स्रोतसां गजः ॥
विमुक्तस्त्यजति प्राणान्विगुणो वाऽपि जीवति ॥ ४२ ॥
दोषाशयाभिघाताच्च क्षीर्णपित्तकफानिलः ॥
प्राणांस्त्यजति मातङ्गो दोषमर्मसु ताडितः ॥ ४३ ॥
रक्षणं मर्मणां नित्यं तस्मात्कार्यं विचक्षणैः ॥
शस्त्रकर्मविधिज्ञैश्च कार्यं शस्त्रावचारणम् ॥ ४४ ॥
असिद्धिरल्पसिद्धिर्वा हिंसितेष्वपि कर्मसु ॥
विपत्तिः श्रेयसी वाऽपि सिद्धिर्याहच्छिकी भवेत् ॥ ४५ ॥
अस्थिस्नायूपपन्ना ये गम्भीराश्चैव सर्वशः ॥
शिरामर्मगता ये च न च्छेद्या ये च संधिषु ॥ ४६ ॥
स्नायुजाले न कार्यं च तज्ज्ञैः शस्त्रावचारणम् ॥
अनुलोममृजुगतिं त्वचि सम्यक्समाहितम् ॥ ४७ ॥
श्वयथूनां विदग्धानां कार्यं शस्त्रावचारणम् ॥
यथा व्यापद्यते नागः स्वयोगाच्छस्त्रकर्मणाम् ॥ ४८ ॥
न तथा म्रियते दोषैः प्रवृद्धैरपि वारणः ॥
शस्त्रकर्मणि निर्युक्ते सेवनं सर्पिषा हितम् ॥ ४९ ॥
पानं च सर्पिषः श्रेष्ठं स्निग्धं भोजनमेव च ॥
शस्त्रकर्मणि निर्युक्ते हवनं शान्तिकर्म च ॥ ५० ॥
वारणस्य तु कर्तव्यं यथोक्तं मन्त्रकर्मणि ॥
तस्मात्सर्वप्रहाराणां विद्धमादि प्रकीर्त्यते ॥ ५१ ॥
अवाच्छस्त्रावसृष्टानि त्ववकृत्तं तथैव च ॥
घृष्टदग्धे च राजेन्द्र पश्चाद्व(न्य)व्रणसंज्ञितम् ॥ ५२ ॥
तस्माद्विद्धमिति प्राहुः शास्त्रतत्त्वार्थकोविदाः ॥
तस्मात्प्रयोगकुशलं लघुहस्तं जितेन्द्रियम् ॥ ५३ ॥

---

१ क. °भिश्चैव का° । २ क. °ज्ञतव्रण° ।

परीक्ष्यकारिणं शूरं बलिनं शास्त्रकोविदम् ॥
यशस्विनमलुब्धं च जितक्रोधं जितक्लमम् ॥
वैद्यं नियोजयेद्राजा प्रतिकर्मसु हस्तिनाम् ॥ ५४ ॥ इति ।

तत्र श्लोकाः(कः)—

इति भिषगनुशिष्य बुद्धी शुभमशुभं च ततः शुभं च कुर्यात् ॥
विपुलबलयशोर्थकीर्तिहेतोर्विपुलगुणार्थी गजे परीक्ष्य ॥ ५५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
मर्मविद्धो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

अङ्गराजो महाप्राज्ञः कुबेरसमविक्रमः ॥
हस्तिशालासमासीनं पालकाप्यं स्म पृच्छति ॥ १ ॥
भगवन्यत्त्वया प्रोक्तं रोगज्ञानं सलक्षणम् ॥
तत्र मे संशयः कश्चित्तन्मे शंसितुमर्हसि ॥ २ ॥
शुद्धश्लेष्मसमुत्पत्तिः शुद्धपाकल आदितः ॥
प्राग्भागोष्णः कथं विप्र पश्चाद्भागेन शीतलः ॥ ३ ॥
न चोष्णलक्षणं चेति हस्तिनां जायते ज्वरः ॥
निदानलक्षणो ह्येष यस्त्वयोक्तो महामुने ॥ ४ ॥
कथं साध्यश्च बालोऽयं कूटश्चायं न सिध्यति ॥
समानदोषैर्विप्रेन्द्र तावुभावपि कीर्तितौ ॥ ५ ॥
पकलः पुण्डरीकश्च वातपित्तकृतावुभौ ॥
विकारेषु विरुध्येते चिकित्सायां तथैव च ॥ ६ ॥
शनैः क्षीयेत वा केन हेतुना च मृदुग्रहः ॥
कथं च भूतसंसृष्टो दृष्टः कुक्कुटपाकलः ॥ ७ ॥
दैवाच्च केचिदिच्छन्ति दोषतश्चापरे जनाः ॥
एकाङ्गग्रहसंज्ञस्तु पाकलो मुनिसत्तम ॥ ८ ॥
दृश्यते भूतसंसृष्टो दोषतश्च न दृश्यते ॥
स कृशत्वेन संयोज्यः कथं तीक्ष्णोदरानलः ॥ ९ ॥

शारदश्चोपलक्ष्यश्च प्रसूतः पाकलो भवेत् ॥
महापाकलसंज्ञश्च श्लेष्मणः संचयाद्भवेत् ॥ १० ॥
न चाऽऽदौ क्रियते कस्मात्प्रतीकारः कफस्य वै ॥
महत्त्वं चैव यत्तस्य तन्मे शंसितुमर्हसि ॥ ११ ॥
एतान्सपरिहारान्मे सनिरुक्तान्ससंभवान् ॥
तत्त्वतो निखिलान्प्रश्नान्महार्थान्वक्तुमर्हसि ॥ १२ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शृणु राजन्नवहितो यन्मां पृच्छसि संशयम् ॥ १३ ॥
नाभेरुपरि पित्तस्य स्थानं हृदयमाश्रितम् ॥
नाभेः पश्चिमभागे तु स्थानं वायोर्निरुच्यते ॥ १४ ॥
प्रोक्तान्यामाशयः पर्वाण्युरः कण्ठः शिरस्तथा ॥
स्थानान्येतानि सर्वाणि श्लेष्मणो दन्तिनां नृप ॥ १५ ॥
शुद्धपाकलनिर्वृत्तौ स्थानात्पित्तं च विच्युतम् ॥
श्लेष्माणं पश्चिमं भागमानयेत्सह वायुना ॥ १६ ॥
ततः श्लेष्मानिलौ तत्र शीतलं कुरुते गजम् ॥
प्राग्भागसोष्मता तस्य सा तु पित्तस्य वीर्यतः ॥ १७ ॥
सुरशापाद्गजेन्द्राणामन्तःस्वेदत्वमाहितम् ॥
न चोष्मलक्षणस्तेषां हस्तिनां जायते ज्वरः ॥ १८ ॥
कदाचिदङ्गप्रत्यङ्गं यदा गच्छति मारुतः ॥
तेन बालस्य राजेन्द्र युज्यते यदि भेषजम् ॥ १९ ॥
तेन सिध्यति बालोऽयं कूटहेतुः प्रवक्ष्यते ॥
मुक्त्वा स्थानानि सर्वाणि कूटादानं प्रभञ्जनः ॥ २० ॥
सहसा हृदयं गच्छेद्धृतश्चापि च पातयेत् ॥
हृदयग्रहणाद्वायुः कूटस्तेन न सिध्यति ॥ २१ ॥
व्यानो वायुः प्रकुपितो ह्युदानसहितो नृप ॥
पित्तमुत्क्षिप्य जनयेत्पकलं कोपमाश्रितम् ॥ २२ ॥
गुरुस्थानोपरोधाच्च रौद्रस्तस्माद्भवेद्गजः ॥
इत्येष पाकले हेतुः पुण्डरीके प्रवक्ष्यते ॥ २३ ॥
मारुतः कुपितः पित्तं कोपयेन्मनुजाधिप ॥
पित्तं सरक्तं नागस्य त्वचं दूषयति प्रभो ॥ २४ ॥

---

१ क. °दश्चोपजायेव ल° । २ क. कूटे हेतुः प्रचक्षते ।

तस्माद्व्युक्तो विकारोऽयमधिकश्चैव क्षपयेत् ॥
मारुतः कुपितो देहे कारणैः पूर्वकीर्तितैः ॥ २५ ॥
मांसं मेदो रसं रक्तं मज्जां शुक्रं च दन्तिनाम् ॥
यस्मात्क्रमोत्क्षपयति तेनैष क्षीयते शनैः ॥ २६ ॥
श्लेष्माभिभूतो योऽत्यर्थं पेशलं तु लभेत वै ॥
समानः कुपितस्तस्य प्राणापानौ च दूषयेत् ॥ २७ ॥
व्यानोदानौ च संहृष्य कुर्यात्कुक्कुटपाकलम् ॥
शरीराणां च भूतानां विपर्यासस्ततो भवेत् ॥ २८ ॥
विपर्यस्तेषु भूतेषु भूतसंश्लेषवद्भवेत् ॥
तस्माद्भूतोपसृष्टस्तु दृष्टः कुक्कुटपाकलः ॥ २९ ॥
स्पृष्टस्य वारुणैः पाशैर्गजस्याऽऽदौ नराधिप ॥
पीड्यमानस्य तैः पाशैर्वातः श्लेष्मा च कुप्यति ॥ ३० ॥
एवं स दैविको भूत्वा पश्चाद्दोषेण लिप्यते ॥
आदानं दैवमेवास्य दोषाणां संप्रकीर्तितम् ॥ ३१ ॥
पित्तादानैर्गजे पित्तं वृद्धमग्निं विवर्धयेत् ॥
तीक्ष्णज्योतिः स भवति शारदत्वं स गच्छति ॥ ३२ ॥
ततः सुषिरमांसत्वाद्वायुर्नागस्य कुप्यति ॥
श्लेष्माणं कोपयेत्पश्चाद्विकारः श्लैष्मिकः स्मृतः ॥ ३३ ॥
बलेन संचितः श्लेष्मा जठरं कुरुते गजम् ॥
स यदा जठरो नागः सहसा कर्म कार्यते ॥ ३४ ॥
समानः कुपितं प्राणं पश्चात्संदूषयेत्ततः ॥
क्षीयते हेतुना तेन कृशत्वे तु प्रतिक्रिया ॥ ३५ ॥
मारुतः कफमादाय हृदयं संश्रितस्तु यत् ॥
करोति महतीं पीडां तेनायं पाकलो महान् ॥ ३६ ॥
वातोऽत्र कारणं यस्मात्तेन वाते प्रतिक्रिया ॥
कर्तव्या नृपशार्दूल पालकाप्यमतानुगा ॥ ३७ ॥
महारोगो यतश्चायं पतनाच्च महद्भयम् ॥
उभयत्र महत्त्वाच्च महापाकलसंज्ञितः ॥ ३८ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
दोषविवायो(चयो) नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

---

१ क. ख. °मात्क्षिप°। २ क. ख. दूष्यते। ३ क. सादरत्वं च। ४ क. °तः शुषि°।

अथ पञ्चविंशोऽध्यायः ।

अङ्गराजो हि चम्पायां पालकाप्यं स्म पृच्छति ॥
भगवन्नग्निदग्धानां वारणानां महामुने ॥ १ ॥
व्रणा देशेषु जायन्ते नानासंस्थानवर्णकाः ॥
तेषां रूपं चिकित्सां च ब्रवीतु भगवान्मम ॥ २ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
तत्राग्निदग्धो द्विविधस्त्वग्गतः स्फोट एव च ॥ ३ ॥
द्रवात्स्थिराच्च विज्ञेयः स तु दाहो नराधिप ॥
भवेज्जतुमधूच्छिष्टरसगुडामेध्यपावकैः ॥ ४ ॥
अङ्गराशीविषाभ्यां च तथाऽशनिनिपाततः ॥
दाहयोनिः स्वयं प्रोक्ता बहुधा पार्थिवोत्तम ॥ ५ ॥
विकल्पतः पञ्चविधो राजन्दाहः प्रकीर्तितः ॥
परंपरादिद्रव्येभ्यस्तथाऽऽदित्याग्निसेवनात् ॥ ६ ॥
ज्वालाबाष्पैश्च नागानां दग्धमुत्पद्यते नृप ॥
तत्र वैद्यो यथाशास्त्रं कर्म कुर्यादतन्द्रितः ॥ ७ ॥
परिषेकं प्रदेहं च चूर्णं तैलं घृतं वसाम् ॥
अतिदग्धस्य नागस्य यथाक्रमं सुखोदकम् ॥ ८ ॥
मे(इ)क्षुरसं पयश्चैव मधुकं च सशर्करम् ॥
तण्डुलोदकमप्येवं सुराश्चैव पृथग्विधाः ॥ ९ ॥
एष कार्यो भवेत्सेको वैद्यैः संनिहितैः सदा ॥
एतेन दाहो रोगश्च वेदना च प्रशाम्यति ॥ १० ॥
अतः प्रलेपं कुर्वीत मधुपर्णी शतावरी ॥
तालीसपत्रमञ्जिष्ठातिलैर्लाध्रोतेन लेपयेत् ॥ ११ ॥
ततः सयष्टीमधुकं सर्वमालोड्य भाजने ॥
प्रलेपं कारयेद्वैद्यस्त्वग्निदग्धप्रशान्तये ॥ १२ ॥
एवमेवानुपूर्वेण कुर्यादालेपनं भिषक् ॥
अश्वत्थोदुम्बरप्लक्षान्मधुकं काकजम्बुकम् ॥ १३ ॥

---

१ क. च प्रब्रवीतु भवा° । २ ख. °ज्जन्तुम° । ३ क. ख. °च्छिष्टे स° ।
४ क. °लाध्येते° ।

एलां मधुरसां चैव श्लक्ष्णपिष्टानि कारयेत् ॥
तेनास्य व्रणमालिम्पेद्घृताक्तेन पुनः पुनः ॥ १४ ॥
दाहो निवर्तते तेन वेदना चोपशाम्यति ॥
लभते सौमनस्यं च यवसं चाभिनन्दति ॥ १५ ॥
रोध्रं च मांषपर्णी च हरिद्रे चाप्युभे तथा ॥
क्षीरिकायाः शतावर्याः पयसा च घृतं पचेत् ॥ १६ ॥
ततोऽस्य दग्धं नागस्य म्रक्षणेन प्ररोहति ॥
अथवा रोपणं तैलं विपचेतेन रोपयेत् ॥ १७ ॥
मांसी समङ्गाममृतां माषपर्णीं तथैव च ॥
मधुकं च समञ्जिष्ठं कुशमूलं च पेषयेत् ॥ १८ ॥
एतत्सर्वं समाहृत्य क्षीरेण सह योजयेत् ॥
तत्तैलं पाचयेद्धीरो यथायोगं यथासुखम् ॥ १९ ॥
तेनास्य व्रणमभ्यङ्ग्यान्नित्यमेवमतन्द्रितः ॥
क्षिप्रं प्ररोहते तेन अग्निदग्धं समन्ततः ॥ २० ॥
तथैव कारयेच्चूर्णं रोपणं मनुजाधिप ॥
पद्मं समङ्गा तगरं जीवकर्षभकावुभौ ॥ २१ ॥
मधुकं धातकीपुष्पं रोध्रं सैर्जरसं तथा ॥
बलामतिविषां चैव सूक्ष्मचूर्णानि कारयेत् ॥ २२ ॥
प्रतिचूर्णनमेवं स्यादिदमन्यच्च रोपणम् ॥
सुपिष्टानथ कृष्णांश्च तिलांस्तु मधुना सह ॥
घृतेन मिश्रयित्वाऽथ रोपणं वा प्रलेपनम् ॥ २३ ॥
सुप्ररूढव्रणं नागं प्रसूनत्वक्तनूरुहम् ॥
दोषप्रशमनार्थाय घृतेन सह भोजयेत् ॥ २४ ॥
इत्यङ्गराजो विधिवद्धस्तिशास्त्रसमाश्रयम् ॥
श्रावितं(तः) पालकाप्येन अग्निदग्धचिकित्सितम् ॥ २५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने वृद्धोपदेशे तृतीये शल्यस्थानेऽग्निदग्धचिकित्सितं नाम पञ्चविंशोऽध्यायः ॥ २५ ॥

१ ख. शालां। २ ख. सर्वर॰।

अथ षड्विंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कथं लूताः संभवन्ति वारणानां महामुने ॥ १ ॥
स पृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
अतो लूताः प्रवक्ष्यन्ते भास्करानुचराश्च ताः ॥ २ ॥
तासां लालाः प्रति प्राप्ता विनाशयति वारणम् ॥
मालती पुष्कराग्रे तु काकोल्यपि च वर्त्मनि ॥ ३ ॥
अङ्गुल्यां मेदिनी नाम स्थूलहस्तेऽतिभावनी ॥
कुम्भे च प्राभवा नाम विद्वोश्च हरिणी स्मृता ॥ ४ ॥
आसने विजया नाम श्यामा ज्ञेया तथोरसि ॥
आष्ठीव्ये मधुका नाम धनुर्नामा तु या मुखे ॥ ५ ॥
अंसयोरपि कापोती सुभगा दन्तवेष्टयोः ॥
मण्डे गृध्रनखी नाम पांशुका गात्रयोरपि ॥ ६ ॥
कर्णिकारी भवेत्प्रोहे कोशे च कुक्कुटीं स्मृता ॥
अक्षिका तल्पले चैव मेढ्रे वसुमती तथा ॥ ७ ॥
नाभ्यां पुष्करमध्ये तु खगता रन्ध्रदेशयोः ॥
नाम्ना गुल्मवती नाम मस्तकेषीकयोर्दिशेत् ॥ ८ ॥
एकविंशतिरित्येता देशेष्वन्येष्वपि स्मृताः ॥
सर्वाः संमोहसंदाहव्यापत्सु परिकीर्तिताः ॥ ९ ॥
सर्वासु च भ्रमच्छर्दिस्तृष्णादाहसमुद्भवाः ॥
विशेषान्मस्तकेषीकास्तनगण्डकटाक्षिषु ॥ १० ॥
स्तनान्तराण्डकोशांसतल्पलेष्वप्रतिक्रिया ॥
धूमभ्रमरशुभ्राभ्रपक्कोदुम्बरसंनिभाः ॥ ११ ॥
कटुकाश्च कपोताश्च कर्णिकारनिभास्तथा ॥
वदन्ति वर्णतो लूतास्तासां कुर्यात्क्रियां भिषक् ॥ १२ ॥
तां छिन्द्यान्मण्डलाग्रेण प्रोत्क्षिप्य बडिशेन तु ॥
ताश्चाग्निना दहेत्सम्यक्कुर्याच्चाऽऽशु प्रलेपनम् ॥ १३ ॥

१ क. प्रावता । २ क. ख. विद्वेश्च । ३ क. प्रेया । ४ क. ख. आष्ठीवे । ५ क. कुर्कुटी । ६ क. ख. °योर्देशेत् । ७ क. °ट्यादिषु ।

हरिद्राद्वयमञ्जिष्ठामपुन्नाटफलेन तु ॥
श्लक्ष्णैर्हिङ्गुलकागारधूमसैन्धवसंयुतैः ॥ १४ ॥
प्रपौण्डरीकरोधत्वक्सारिवोत्पलकन्दुकैः ॥
नवनीतयुतैः क्षीरैः क्षालितं लेपयेत्पुनः ॥ १५ ॥
ततो मन्त्रं त्रिरुक्त्वाऽस्य पुनः कुर्याच्चिकित्सितम् ॥
शीतावगाहक्षीराज्यपानमृल्लेपनैः शुभैः ॥ १६ ॥
उत्तरे हिमवत्पार्श्वे पर्वतो गन्धमादनः ॥
तस्य कुक्षौ निवसति कुमारी पुण्यलक्षणा ॥ १७ ॥
ऐणेयचर्मवसना सर्पमेखलमण्डिता ॥
गोनसांश्चोत्तरां कृत्वा भुङ्क्ते नानाविधं विषम् ॥ १८ ॥
सा तत्र नित्यं लपति विद्या जाङ्गुल्यहं शुभा ॥
विषाण्यहं दोषयामि निहन्मि विषकुम्भके ॥ १९ ॥
मया मन्त्रपदाः सृष्टा यैर्दष्टः साध्यते गजः ॥
स मां स्मरतु मन्त्रांश्च दष्टो यो लूतया क्वचित् ॥ २० ॥

'इरिलि मिरिलि द्रमिडि द्रामिडि गुल्मगुल्माशिरोवेष्टानि अङ्गानामङ्गनाटानि अङ्गानां दंशानाशने यक्षराक्षसपिशाच मिरिलि स्वाहा' ।

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने षड्विंशो लूताध्यायः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
चरन्तस्तेऽपि बहवो विषकीटा नराधिप ॥ १ ॥
तस्मिन्मिथुनकाले तु मुदिता जन्तवः स्मृताः ॥
सृजन्ति शुक्रं मूत्रं वा पुरीषं स्वेदमेव वा ॥ २ ॥
हस्तिनां यदि चेत्काये पतेयुर्मनुजाधिप ॥
स्फोटास्तत्रोपजायन्ते तस्मिन्देशे महारुजाः ॥ ३ ॥
अग्निदग्धा इवाऽऽभान्ति दाहश्चान्तः प्रजायते ॥
हस्तेन जिघ्रत्यसकृज्ज्वालां च विसृजत्यपि ॥ ४ ॥

---

१ क. या । ख. सा । २ क. °शो भूता° ।

सुखं न लभते चैव यवसं नाभिनन्दति ॥
परिमूत्री भवेच्छ्वासी मुहुस्तुदति विस्वरम् ॥ ५ ॥
विसर्प इति तं प्राहुर्दृष्ट्वा केचिदपण्डिताः ॥
एतदेवास्य विज्ञानमत ऊर्ध्वं चिकित्सितम् ॥ ६ ॥
जलौकाभिर्हरेद्रक्तं शस्त्रेण निशितेन वा ॥
शुद्धे तस्मिन्हृते रक्ते चेन्द्रगोपकसंनिभे ॥ ७ ॥
शीतलेन ततः सिञ्चेत्सलिलेन मतङ्गजम् ॥
अथास्य लेपं वक्ष्यामि येनायं लभते सुखम् ॥ ८ ॥
खदिरं चाश्वकर्णं च धवं शैलमुदुम्बरम् ॥
अश्वत्थं सिन्दुवारं च उशीरं नलदं तथा ॥ ९ ॥
वरुणस्य प्रवालानि करञ्जतरुजानि वा ॥
अश्वमारकनिर्गुण्ड्योर्मधूकस्य तथैव च ॥ १० ॥
तगरः श्वेतकिणिही श्यामा काला तथैव च ॥
श्लक्ष्णपिष्टकृतांश्चैताञ्शीतले भाजने स्थितान् ॥ ११ ॥
कृष्णमृत्तिकया सार्धं घृतेन सह संसृजेत् ॥
दिह्यात्प्रलेपेनैतेन सुखी संपद्यते गजः ॥ १२ ॥
परिषेकस्ततः कुर्याद्विषनाशनमुत्तमम् ॥
क्षीरवृक्षत्वचश्चैव मधूकाश्मन्तकत्वचः ॥ १३ ॥
श्लक्ष्णपिष्टं द्रवीकृत्य नवे कुम्भे निपातयेत् ॥
तेन कुर्यात्परीषेकं ततः संपद्यते सुखी ॥ १४ ॥
अभ्यङ्गः शतधौतेन सर्पिषा चैव कारयेत् ॥
अङ्कोठं वरुणं शेलुं तथा द्वे च पुनर्नवे ॥ १५ ॥
श्वेतां श्यामां च भा………रोहिषं चापि तत्समम् ॥
सलिले पाचयेदेनं ततस्तमवतारयेत् ॥ १६ ॥
तस्मिन्नेव च निष्काथे द्विद्रोणे भेषजं भवेत् ॥
दन्तीमूलपलं चैव त्रु(त्रि)वृतायास्तथैव च ॥ १७ ॥
चित्रकस्य पलं चैव शुकाख्यायास्तथैव च ॥
फणिज्झकपलं चैव विडङ्गानां पलं तथा ॥ १८ ॥
पिप्पलीनां पलं चैव शृङ्गवेरपलं तथा ॥
पाठाया गजपिप्पल्या बीजपूरफलं तथा ॥ १९ ॥

---

१ क. °हुर्नृद° ।

यावन्त्येतानि सर्वाणि घृतं तावत्प्रदीपयेत् ॥
तत्सर्वमेकतः कृत्वा शनैर्मृद्वग्निना पचेत् ॥ २० ॥
एवं तु पाययेन्नागं विषं तेन प्रशाम्यति ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेनाथ नोदितः ॥ २१ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
सप्तविंशो विषकीटचिकित्साध्यायः ॥ २७ ॥

अथाष्टाविंशोऽध्यायः ।

अथ व्यालेन दष्टस्य लक्षणं वारणस्य च ॥
चिकित्सां च महाराज शृणु कीर्तयतो मम ॥ १ ॥
व्यालो यदाऽक्षिकाविष्टो वारणं दशति प्रभो ॥
वातमूर्छानिदानानि द्विरदः कुरुते तदा ॥ २ ॥
व्यालवद्भ्रमते क्रुद्धो वित्रसेच्च जलाशयात् ॥
व्यापन्नचित्तश्च गजो मूर्छते व्यथतेऽपि च ॥ ३ ॥
एतल्लक्षणविज्ञानं चिकित्साऽतः प्रवर्तते ॥
दहेच्छलाकया तस्य दशां भिषगतन्द्रितः ॥ ४ ॥
समन्ताच्चापि दष्टस्य कार्यं शोणितमोक्षणम् ॥
तस्य कार्यं विशेषेण रात्रिक्षिप्तचिकित्सितम् ॥ ५ ॥
या तु वातगतिः प्रोक्ता क्रियास्तस्य तु कारयेत् ॥
धूपाञ्जनाभ्यङ्गविधैस्तस्य रक्षोघ्नमिष्यते ॥ ६ ॥
काश्यपस्य मताच्छेषं चिकित्सितमुपाचरेत् ॥
अनाविष्टश्चिकित्स्यः स्यादाविष्टश्च न सिध्यति ॥ ७ ॥

तत्र श्लोकः—

इक्षुविकारः पललं तिलतैलं क्षारमार्कमिति ॥
पीतं सद्यो विषमिह शुष्काभ्रमिवानिलः क्षिपति ॥ ८ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
व्यालदष्टो नामाष्टाविंशोऽध्यायः ॥ २८ ॥

---

१ क. °ष्टस्य न । २ क. विषं हन्ति शु° ।

अथैकोनत्रिंशोऽध्यायः ।

अथातः प्रदेशज्ञानं नामाध्यायं व्याख्यास्यामः ।

इति ह स्माऽऽह भगवान्पालकाप्यः । इह खलु शरीरं मूलम् । तन्मूलान्यङ्गप्रत्यङ्गानि लोकप्रसिद्धानि । पञ्चदश प्रदेशाः प्रत्यङ्गानीत्यनर्थान्तरम् ॥

तत्र प्रदेशानामग्रेऽङ्गुलिः । अङ्गुल्यभ्यन्तरे वर्त्म । ततः स्रोतसी । एतयोरन्तरं श्रो(स्रो)तोन्तरम् । तस्मात्पुष्करम् । पुष्करे राजिः । (†तदुपर्यङ्गुलम् ।) अङ्गुल्या उपरि गण्डूषः । ततोऽग्रहस्तः । गण्डूषपार्श्वयोः श्रीः । एतयोरभ्यन्तरं गण्डूषा । तदुपरि बहिष्कर्षः । एतस्य दक्षिणपार्श्वे आकर्षः । वामपार्श्वे परिकर्षः । पृष्ठत उपकर्षः । तस्यैवाभ्यन्तर उत्कर्षः । एतैः प्रदेशैः समन्वितोऽग्रहस्तः । बहिष्कर्षादुपरि मध्ये हस्तस्य संभोगः । एतस्य पार्श्वयोर्हस्तबाहू । तयोश्चाभ्यन्तरं संभोगान्तरम् । संभोगस्योपरि त्रिराजिः । त्रिराजेरुपरि पर्व । तस्योपरि स्थूलहस्तः । एतस्याभ्यन्तरे पलिहस्तः । पलिहस्तस्योपरि पृथुहस्तः । पृथुहस्तस्याभ्यन्तरेऽतिहस्तः । अतिहस्तस्याभ्यन्तरे राजयः । सर्वगता वलयश्चेति ॥

तत्र श्लोकः—

अङ्गुलीप्रभृति प्रोक्ताः क्रमेण द्विरदस्य ते ।
अष्टौ च विंशतिश्चैव प्रदेशा हस्तमाश्रिताः ॥

आस्ये कृष्णान्त(र)म् । ततस्तालु । तालुमध्ये श्रो(स्रो)तसी । अतो मध्ये तालुवंशः । ततो जिह्वाभ्यन्तरे भक्षणार्थं दशनाः षोडशाधस्ताच्चोपरिष्टाच्च । तेषु चतस्रो दंष्ट्राः । तत ओष्ठः । तस्याभ्यन्तरे वर्त्मनी । तत ओष्ठप्रस्राव ओष्ठपार्श्वयोः । ओष्ठबाहू अधस्तात् । ओष्ठसंधी ओष्ठसंध्योः । ततः सृक्किणी । ओष्ठाधो रोमकूर्च इति ॥

तत्र श्लोकः—

कृष्णान्तादय इत्येते क्रमशः परिकीर्तिताः ।
प्रदेशा मुखसंबद्धास्त्रिंशदिह तु संख्यया ॥

दन्तयोर्दन्ताग्रे दन्तमध्ये दन्तमूले । दन्तयोरुपरि दन्तवेष्टौ । एतयोरुपरि प्रवेष्टाविति ॥

---

† धनुश्चिह्नान्तर्गतः कपुस्तके नास्ति ।

---

१ क. नाम व्या° । २ क. पुष्करमध्ये ।

तत्र श्लोकः—

इत्येते त्वभिविज्ञेयाः प्रदेशा दन्तयोर्दश ।
यथावदनुपूर्वेण शिक्षाविद्भिरुदाहृताः ॥

बहिर्मुखे दन्तान्तरे प्रतिमानम् । तस्य पार्श्वयोः शम्बुके । प्रतिमानस्योपरि मध्ये मुखस्य वाहित्थम् । तस्य पार्श्वयोर्विलागौ । विलागयोरुपरि कर्कटमध्ययोः कटस्रोतसी । कटस्रोतसोरधस्तात्कटप्रस्रावौ । कटप्रस्रावयोरधस्ताद्गण्डौ । गण्डयोरधस्तात्कपोलौ । कपोलयोर्मध्ये रोमकूर्चौ । रोमकूर्चयोरधस्ताद्धनू । हन्वोरधस्तात्सगदे । तयोः संधिः सगदासंधिः । एतयोरन्तरं सगदान्तरम् । कटयोः पार्श्वतो घाटे । घाटयोरुपरि कटसंधी । कटसंध्याश्रितौ श्रवणाविति ॥

तत्र श्लोकः—

त्रयस्त्रिंशदिह प्रोक्ताः प्रदेशा मुखमाश्रिताः ॥
प्रतिमानप्रभृत्येते क्रमशः शास्त्रनिश्चिताः ॥

चक्षुषोरक्षिगुहे । अक्ष्णोरुपर्यक्षिकूटौ । अक्ष्णोरधस्तादक्षिस्रावौ । अक्ष्णोः पूर्वभागयोः कनीनिके । पश्चाद्भागयोरपाङ्गौ । पक्ष्ममण्डले वर्त्ममण्डले शुक्लमण्डले कृष्णमण्डले दृष्टिमण्डले पक्ष्मवर्त्मसंधी वर्त्मशुक्लसंधी शुक्लकृष्णसंधी कृष्णदृष्टिसंधी कनीनिकासंधी चेति ॥

तत्र श्लोकः—

प्रदेशा[1] नेत्रयोरेते द्वात्रिंशदिह कीर्तिताः ।
दृष्टिमण्डलसंयुक्ता व्यक्ता द्वादश संधिजाः ॥

शिरसि वाहित्थम् । वाहित्थस्योपरि कुम्भौ । एतस्याभ्यन्तरे कुम्भान्तरम् । एतस्याग्रे कुम्भस्योपरि बिम्बकौ । बिम्बकपार्श्वयोः पाकले । अक्षिकूटोपरीषीके । इषीकयोर्मध्य इषीकान्तरादूर्ध्वे इषीकाग्रे । इषीकाग्रयोर्बहिः पार्श्वे निर्याणम् । पार्श्वयोरधस्तान्निर्याणसंधी । निर्याणसंध्योरूर्ध्वं बिम्बकस्योपरीषीकाग्रमध्ये तिर्यगायतोऽवग्रहः[2] । अवग्रहस्योपरि पुरस्कारः । पुरस्कारस्योपरि निर्याणम् । तयोरन्तर उन्नता तिर्यगायताऽवग्रहवर्तिः । अवग्रहवर्त्या उपरि मस्तकौ । मस्तकयोर्मध्ये विदुः[3] । मस्तकयोर्बहिःपार्श्वयोर्विताने निर्याणयोः पश्चात्पार्श्वायेः कूर्ममस्तकसंधी केशाश्चेति ॥

तत्र श्लोकः—

१ क. ख. प्रदेशो । २ क. ख. °वगाहः । ३ क. ख. विदू ।

चतुर्विंशतिरित्युक्ताः शिरसः क्रमशो मया ।
यथावदनुपूर्वेण प्रदेशा हस्तिनामिह ॥

कर्णयोः कर्णाग्रे कर्णपर्वतौ । कर्णयोरधस्तात्प्राक्कर्णौ कर्णमध्ययोः । तयोः पर्यन्तौ मध्यकर्णौ । कर्णयोरधस्तात्कर्णपाली । कर्णयोर्बहिर्बहिष्कर्णौ, अन्तरेऽन्तरकर्णौ कर्णपर्वतौ । कर्णयोः कर्णपिञ्जषौ । कर्णावर्तपार्श्वयोः कर्णपिञ्जूकौ । कर्णावर्तपार्श्वपार्श्वयोः कर्णपञ्जूकौ । अधस्तात्कर्णसंधी । ततः श्रोत्रे । श्रोत्रपार्श्वयोर्वातालके कर्णचूलिके कर्णपिप्पल्यावुद्यानवत्यावुद्यातौ चेति ॥

तत्र श्लोकः—

एते कर्णाश्रिताः शास्त्रे संख्यया दन्तिनामिह ।
त्रिंशत्प्रदेशा व्याख्याता यथावदनुपूर्वशः ॥

ग्रीवायां ग्रीवापृष्ठम् । तस्याधस्ताद्गलः । ततः कण्ठपार्श्वयोर्धमन्यौ । गलपार्श्वयोर्दुर्दुरौ । दुर्दुरयोरुपरि मन्ये । मन्ययोरुपरि (†गुहे । गुहाभ्यां समुद्रौ । समुद्रपार्श्वयोः पिण्डके । पिण्डकयोरुपरि गुहाभागौ । तयोर्यतस्थाने) । यतस्थानपार्श्वयोः पार्ष्णिघातौ । पार्ष्णिघातयोरुपर्युत्सङ्गौ । उत्सङ्गयोरुपरि स्कन्धः । स्कन्धमध्ये पणवकश्चेति ॥

तत्र श्लोकः—

त्रयोविंशतिरित्येते संख्यया परिकीर्तिताः ।
ग्रीवाप्रदेशा नागानां क्रमशः शास्त्रनिश्चिताः ॥

उरसि ग्रीवासंध्याश्रितोऽन्तर्मणिः । अन्तर्मणेरधस्तादुरोमणिः । उरोमणिपार्श्वयोर्गात्रसंध्याश्रितौ विक्षोभौ । विक्षोभयोर्मध्य आवर्तमणिः । आवर्तमणेः प्रभृति हृदयम् । हृदयादुरः । ततः संधिः । उरोगात्रमध्ये चतुरक्षान्तरमिति ॥

तत्र श्लोकः—

प्रदेशाः सप्त संख्याता उरसस्तु नृपोत्तम ।
हृदयस्थानप्रदेशान्प्रवक्ष्याम्यत उत्तरम् ॥

हृदय(ये) स्तनौ । (यं) चूचुकयोर्मध्ये क्षीरिके इति ॥

तत्र श्लोकः—

हृदयस्थानसह (?) ते व्यक्ता मे जठराश्रयाः ।
दश प्रदेशा व्याख्याता दन्तिनामिह संख्यया ॥

गात्रयोरासनपार्श्वयोः प्रतीकासौ । प्रतीकासयोरधस्तादंसौ । अंसाधस्तात्प्रत्यंसौ । प्रत्यंसाधस्ताद्बाहू । बाहुमध्ययोरुपरि प्रत्यंसफलकौ । अंसफलकाध-

---

† धनुश्चिह्नगतं कपुस्तके न ।

स्तादृात्रसंधयः। संधयोरधस्तात्क्षयौ। क्षययोरधस्तात्पृष्ठतो वहिः। तयोरधः पुरस्तात्पिण्डिकौ। पिण्डिकयोरधस्ताद्वैशाखौ। वैशाखयोरधस्ताज्जवभागौ। जवभागयोरधस्ताद्विशेषौ। विशेषयोरधस्तादुत्सङ्गौ। उत्सङ्गयोरधस्तात्प्रोत्साहौ। प्रोत्साहयोरधस्तात्पर्वणी। पर्वण्योरधस्तात्संदानभागौ। संदानभागयोरधः पष्ठिपादौ। तयोरधः कूर्मौ। ततो दश नखाः। ततो दश नखविशिखाः, दश नखाग्राणि। ततो राज्यः। ततः पश्चात्पादयोर्दश नखाः। तेषामुभौ पुरोनखौ। पुरोनखद्वयस्य प्रत्येकं बहिःपार्श्वे द्वौ सनखौ। अन्तःपार्श्वे नखश्रा(स्रा)वौ। तेषां चतुर्णां बहिःपार्श्वतश्चत्वारः पार्श्वे नखाः। इत्येवं नखा विंशतिः। पार्श्वनखयोरुपरि बहिःपार्श्वेऽपराजयः। अन्तःपार्श्वे नखयोरुपरि तलप्रोहौ। तलप्रोहयोरुपरि विक्षे। विक्षयोरुपरि पलिहस्तौ। पलिहस्ताभ्यन्तरे निवाहू। पलिहस्तयोरधस्तात्प्राक्कर्णौ *नवहौ। पलिहस्तयोरुपर्यपस्कारौ। अपस्कारयोरुपरि पाद्यौ। पाद्ययोरधस्तादृात्रग्रहौ॥

तत्र श्लोकः—

षडेते नवतिश्चैव प्रदेशा गात्रसंश्रिताः॥
आसनात्प्रभृति †श्रीमानातलात्परिकीर्तिताः॥

काय आसनम्। आसनात्परो वंशः। वंशपार्श्वे तलपलौ। वंशादुपरि कुवंशः। कुवंशस्य मध्ये पश्चिमासनम्। पश्चिमासनात्परं त्र्यस्थि। तस्योभयपार्श्वयोरुत्कृष्टौ। अस्थ्नः परो लाङ्गूलवंशः। पश्चिमवंश इत्येके। अपरवंश इत्यपरे। लाङ्गूलवंशस्याधस्ताल्लाङ्गूलसंधिः। लाङ्गूलसंधेरधस्तात्पेचकः। पेचकाधस्ताद्गुदः। पायुरित्येके। गुदाधस्तात्करीषस्रावः। कायस्य मध्ये कक्षाभागौ। कक्षाभागपार्श्वयोः करणौ। ततः पृष्ठतः पादौ पत्र प्रतिबद्धाः पर्युकाः। पक्षयोरुपर्यवतारौ। पक्षपश्चाद्भागयोः कुक्षी। कुक्षिमध्ये निष्कोसौ। ततः संकोसौ। तयोरुपरि मृदुकुक्षी। वंशस्य पश्चाद्भागाश्रितौ पक्षसंधी। ततः पक्षयोरधस्तादायामकाण्डे। तयोरधः कक्षौ। आयामकाण्डयोः पश्चादपरसंधिः। अपरसंधेरधस्तादनुसारौ। तत्र आहृदयाज्जठरम्। जठरमध्ये कोशम्। कोशस्याग्रतो नाभिः। तत एव हृदयादनुष्ठतान्तरं स्तनाः। तस्याः पार्श्वे स्तनौ। उत्कृष्टसंधयोरधस्तादुत्कृष्टसंधी इति॥

तत्र श्लोकः—

---

* निवाह्वोः पलिहस्तयोरिति भवेत्। † 'श्रीमन्नातलात्' इति भवेत्।

---

१ ख. प्रोत्सयो°। २ क. प्रदेशो।

चत्वारिंशच्च पञ्चैव प्रदेशाः परिकीर्तिताः ।
संख्यया कुञ्जराणां तु कायमध्ये समाश्रिताः ॥

अपरयोर्जघनम् । जघनस्याधस्तात्पार्श्वयोरधस्तात्करीषप्रस्रावादधः कलाभागौ । कलाभागयोरधस्ताद्बहिःपार्श्वे जघनस्य पश्चात्पिण्डिके । पिण्डिकयोरधस्तान्मण्डूक्यौ । मण्डूक्योरधस्तात्संदानभागौ । संदानभागयोरधस्तात्संत्कुटिके । सत्कुटिकासंधिपार्श्वयोश्चत्वारो ग्रन्थयः । सत्कुटिकयोरधस्तात्पार्ष्णी । पार्ष्ण्योरधस्तात्तलप्रोहौ तयोरभ्यन्तरपार्श्वे कचाः । बहिःपार्श्वे राजयः । तलप्रोहयोरधस्तात्तलकर्णौ । ततस्तलौ । समन्ततस्तलसंधी । संध्योश्चपर्यष्ठीण्यौ । अष्ठीण्याधस्ताद्वक्त्रसक्थिनी । अनन्तरं वक्त्रसक्थ्योरधस्तादपरान्तरे । संदानभागयोरधस्तात्कूर्मौ । कूर्मयोरधस्ताद्दशनकर्म । दश नखकूर्माः । दश नखशिखाः । तेषां पुरो नखादिविभागो गात्रनखवज्ज्ञेयः । नखान्तराण्यष्टाविति ॥

तत्र श्लोकः—

चतुःसप्ततिरित्येते प्रदेशाः परिसंख्यया ।
आतलात्प्रभृति प्रोक्ता जघनात्प्रभृति प्रभो ॥

मेढ्रस्य करीषप्रस्रावाधस्तादण्डकोशः । अण्डकोशस्य पार्श्वयोर्वङ्क्षणौ । वङ्क्षणपार्श्वयोर्मुष्कौ । अण्डकोशस्योपरि कोशसंधिः । मेढ्रर्नस्तलः । तत्संधिनिर्गमात्प्रत्यूहः । प्रत्यूहस्याग्रे ककुदम् । ककुदान्मेढ्राग्रम् । तस्य मध्ये श्रो(स्रो)त इति ॥

तत्र श्लोकः—

एवं मेढ्राश्रिताः शास्त्रे प्रदेशा दन्तिनामिह ।
संख्ययैकादश प्रोक्ता यथावदनुपूर्वशः ॥

लाङ्गूलस्य सर्वत्र ग्रन्थयः । लाङ्गूलमध्ये वर्तकः । अभ्यन्तरे किली । तस्या बहिः संवर्तकाः । अधस्तात्किल्याः संवालः । तस्याधस्ताद्वालपुष्करम् । वालपुष्कराधस्तात्पर्व, इति ॥

तत्र श्लोकाः—

सप्तैते संख्यया सर्वे ये लाङ्गूलसमाश्रिताः ।
प्रदेशा हस्तिनां प्रोक्ता गजशास्त्रविशारदैः ॥
हस्तास्यदन्तवदनदृक्शिरःकर्णकंधराः ।
उरोहृदयगात्राङ्गमपरामेढ्रवालधिः ॥

---

१ क. °त्सकुटि° । २ क. सकुटि । ३ क. सकुटि° । ४ क. °नस्तानलः । ५ क. सर्वस्य । ६ क. ये न लाङ्गूलमा° ।

एतानि पञ्च दश च हस्तिनोऽङ्गानि ये श्रिताः ।
चतुःषष्टिशतं प्रोक्तं ते प्रदेशाः प्रमाणतः ॥
शरीरं हि चिकित्सायाः प्रदेशज्ञानमुच्यते ।
शरीरमेवं विज्ञाय प्रदेशैर्बहुभिर्वृतम् ॥
वारणानां यथाशास्त्रं प्रतिकर्म प्रयोजयेत् ।
विदितेषु प्रदेशेषु सुखं कर्माणि वेदिषुः (?) ॥
कर्मणामनभिज्ञस्तु गजं व्यापादयेद्भिषक् ।
वेतेनैव विना तस्याः प्रयोगो नेष्यते क्वचित् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने प्रदेशज्ञानं नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

अथ त्रिंशोऽध्यायः ।

अथासनस्थमासीनमभिवाद्याङ्गराजो रोमपाद*(एव)मब्रवीत्—'भगवञ्शास्त्रे छेद्यभेद्यलेख्यविस्रावणविदारणैषणसीवनान्युक्तानि कर्माणि । तत्र कीदृशेन किंसमुत्थेन वा शस्त्रेण कीदृशं किं कर्म चानुष्ठेयम् ॥

अथोवाच भगवान्पालकाप्यः—इह खलु भो हस्तिनामागन्तवो दोषसमुत्थाश्च व्रणविधयो बहुविधा भवन्ति । तेषां दोषप्रशमनार्थं शस्त्रविधानं संस्थानप्रमाणतश्च वक्ष्यामः ॥

तत्र कुण्ठं खरधारं वक्रं ह्रस्वमनतिस्थूलं दीर्घमानतं खण्डं वर्जयेत् । गुणवद्विपरीतं न चातिनिशितं शस्त्रमवचारयेत् ॥

तत्र तीक्ष्णेनायसा विधिवन्निष्पन्नेन कुशलकर्मारैः शस्त्राणि कुर्यात् । तदुत्तमेन हि द्रव्येणोत्तमेन चाऽऽचार्येण क्रियया चोत्तमया कृतं शस्त्रं कार्यं साधयेदिति । तस्मात्प्रयत्नः कार्यः शस्त्राणामुत्तमानां करणे ॥

तत्र शस्त्राणि दशनामसंस्थानानि भवन्ति । तद्यथा—वृद्धिपत्रम्, कुशपत्रम्, मण्डलाग्रम्, व्रीहिमुखम्, कुठाराकृति, वत्सदन्तम्, उत्पलपत्रम्, शलाका, सूची, रम्पकश्चेति । फालजाम्बवतापिकादर्व्याकृतयश्चेति । एतान्यग्निकर्मविधाने चत्वारि चान्यानि शल्योद्धरणानि यथायोगं सिंहदंष्ट्रं गोधामुखं

---

* आदर्शद्वयेऽप्यदृष्टः पूरितः ।

---

१ क. °नसाऽभि° । २ ख. वातोऽनेन । ३ क. चक्रं । ४ क. °मति° । ५ क. °तिशीतं । ६ क. °प्नवौष्ठता° ।

कङ्कमुखं कुलिशमुखं चेति । तिस्र एषिण्यः । एकविंशतिरेव वाऽपोमयानि साधनानि भवन्ति । तेषां संस्थानं प्रमाणं कर्माणि वक्ष्यामः—तत्र दशाङ्गुलप्रमाणं वृद्धिपत्रम् । षडङ्गुलप्रमाणं वृत्तम् । चतुरङ्गुलप्रमाणं पत्रम् । त्र्यङ्गुलविस्तीर्णं पाटनार्थं छेदनार्थं चेति । षडङ्गुलवृत्तमर्धाङ्गुलं सर्वतः । तत्र पूर्णचन्द्राकृतिरग्रे मण्डलाग्रम् । लेखनार्थमक्ष्णोर्व्रीहिमुखम् । उत्पलपत्रकमष्टाङ्गुलमेवैकम् । तथाष्टाङ्गुलप्रमाणमध्यर्धाङ्गुलविस्तृतमुभयतोधारं (* व्रीहिमुखाकृति व्रीहिमुखम् । मुञ्जभेदनार्थं छेदनभेदनार्थं चेति । नवाङ्गुलं कुशपत्रम् । पञ्चाङ्गुलं वृत्तम् । चतुरङ्गुलं पत्रम् । अध्यर्धाङ्गुलतुलविस्तृतमुभयतोधारं) कुशपत्राकृति गम्भीरपाकभेदनार्थं षडङ्गुलं वृत्तम् । अध्यर्धाङ्गुलं पत्रम् । पूर्णचन्द्राकृत्याग्रमण्डलाग्रम् । लेखनार्थमक्ष्णोर्व्रीहिमुखप्रमाणमुत्पलपत्रं भेदनार्थं कुठाराकृति कुर्यात् । कुठारो (?) शस्त्रप्रच्छेदनार्थम् । वत्सदन्ताकृति वत्सदन्तं दशाङ्गुलम् । एकैकमध्यर्धाङ्गुलमुखम् । एवमेतानि च त्रीण्यपि यथायोगं प्रच्छनार्थम् । सूची सेवनार्थम् । अष्टाङ्गुलं नागदन्ताकृति । त्र्यस्रा चतुरस्रा वा दृढा समाहिता समा वा शलाका वने वर्त्मविधृत्यर्थम् । रम्पकस्त्र्यङ्गुलमुखो दशाङ्गुलवृत्तः पादशोधनार्थं नखच्छेदनार्थं चेति । एषणी दशाङ्गुला विंशत्यङ्गुला त्रिंशदङ्गुला यथायोगमञ्जनशलाकाकृति मुखतः श्लक्ष्णा समा चैवमेतास्तिस्र एषण्यः प्रमाणतः कार्याः । कोरण्टकपुष्पाकृति मुखनेत्रताम्रायसं षोडशाङ्गुलमनुपूर्वं व्रणानां प्रक्षालनं कुर्याद्बडिशं चक्राग्रमष्टाङ्गुलप्रमाणमक्ष्णोः पटलोद्धरणार्थं चेति ॥

तत्र श्लोकः—

यथोक्तान्येवमेतानि शस्त्राणि विधिवद्भिषक् ।
कारयित्वा यथायोगं कुर्याद्व्रणविदारणम् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने त्रिंशः शस्त्रविधिरध्यायः ॥ ३० ॥

अथैकत्रिंशोऽध्यायः ।

क्षारयोगं प्रवक्ष्यामि यथा सिध्यति कुर्वतः ॥
विविधानां विकाराणां क्षारः प्रशमने हितः ॥ १ ॥

---

* धनुराकारमध्यस्थः पाठो नास्ति कपुस्तके ॥

देशे प्रशस्ते जातं तु प्रशस्तं ग्राहयेद्द्रुमम् ॥
मुष्ककं मध्यपवसं काण्डशस्तं प्रकल्पयेत् ॥ २ ॥
अश्मन्तकं दाहयित्वा तु तिलेनालेन संमितम् ॥
तद्भस्म परिनिर्वातं सुनिगुप्तं निधापयेत् ॥ ३ ॥
गोगजाश्वखरमूत्रैरालोड्य विधिवद्भिषक् ॥
परिश्रा(स्रा)व्य च तद्भस्म सप्तकृत्वः पुनः पुनः ॥ ४ ॥
परिश्रु(स्रु)तं तु तं क्षारमायसे भाजने पचेत् ॥
पञ्चभागावहीनं तु तत्र वापं समाचरेत् ॥ ५ ॥
सुवर्चिका सुधाचूर्णं यवक्षारो विडं तथा ॥
कासीसं शङ्खचूर्णं च तथा सौराष्ट्रिकामपि ॥ ६ ॥
चूर्णीकृत्यैतदावापं पच्यमाने विनिक्षिपेत् ॥
दर्व्या च घट्टयेत्सम्यग्यावद्दर्विप्रलेपनम् ॥ ७ ॥
उत्तार्य स्थापयेद्गुप्तं ततो वैद्यः प्रयोजयेत् ॥
व्रणा येऽल्पव्रणा राजन्दुष्टमांसचिताश्च ये ॥ ८ ॥
सास्रावा नाडिका जन्तोः कृमिदुष्टाश्च ये व्रणाः ॥
कण्डूमन्तः प्रदुष्टाश्च ये च केशाः प्रकीर्तिताः ॥ ९ ॥
वातिकाः पैत्तिकाश्चापि श्लैष्मिकाश्चापि ये व्रणाः ॥
क्षारेणानेन साध्यास्तु यथायोगं भिषग्जिता ॥ १० ॥
गम्भीरानुशया ये च व्रणास्ते राजसत्तम ॥
सुरा सौवीरकं चापि व्रणप्रक्षालनं हितम् ॥
इत्ययं क्षारयोगस्तु पालकाप्येन कीर्तितः ॥ ११ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थान एकत्रिंशः क्षाराध्यायः ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
भग्नं कतिविधं दृष्टं भगवन्ब्रूहि तत्त्वतः ॥ १ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शरीरे पूर्वमुक्तानि यानि चास्थीनि दन्तिनाम् ॥ २ ॥

---

१ ख. काण्डशस्तं । २ क. °लताले° । ३ क. °नुगता ये ।

अस्थ्नां तेषां प्रवक्ष्यामि यथावद्भङ्गकारणम् ॥
पतने ह्यवपाते च समरेऽभिहतस्य च ॥ ३ ॥
स्खलनभ्रंशनावेधैः पतनैरपि दन्तिनाम् ॥
नागानामभिघातैर्वा भज्यन्तेऽस्थीनि सर्वशः ॥ ४ ॥
तेषां नामापि वक्ष्यामि भग्नानां मनुजाधिप ॥
निष्पिष्टमथ विश्लिष्टं तथा प्रक्षिप्तमेव च ॥ ५ ॥
तिर्यक्क्षिप्तमतिक्षिप्तं मुक्तकाण्डं च यद्भवेत् ॥
स्थापितं जर्जरीभूतं चूर्णितं मथितं च्युतम् ॥ ६ ॥
मज्जानुजातं मथितं भग्नं चैव तथा स्मृतम् ॥
त्रयोदशविधं त्वेवं भग्नं भवति दन्तिनाम् ॥ ७ ॥
यथावदनुपूर्वेण कीर्तितं ते मया नृप ॥
पालकाप्यवचः श्रुत्वा ततः प्रोवाच पार्थिवः ॥ ८ ॥
तत्र यच्छिन्नभिन्नं च स्फोटितं प्रोटितं तथा ॥
त्वङ्मांसममृतं चैव स्थानभ्रष्टं च यद्भवेत् ॥ ९ ॥
कथं तदभिजानीयात्काण्डमुक्तं तथैव च ॥
एतन्मे पृच्छतः सर्वं भगवन्वक्तुमर्हसि ॥ १० ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
नातिमात्रं भवेच्छोफो वेदना च न शाम्यति ॥ ११ ॥
अस्थिस्थाने स्थितं दृष्ट्वा निष्पिष्ट इति तं विदुः ॥
यः संधिदेशे श्वयथुर्यदा वा स्याद्रुजाऽन्वितः ॥ १२ ॥
एभिर्लिङ्गैर्महाराज विद्याद्विश्लिष्टमेव तु ॥
निवृत्तो विषमः संधिर्गात्रदेशे यथा भवेत् ॥ १३ ॥
वेदना वर्धते वाऽपि तथा ह्युत्क्षिप्तमादिशेत् ॥
यद्वै पार्श्वगतं स्थानात्तिर्यक्क्षतमिति स्मृतम् ॥ १४ ॥
अतिक्रान्तं भवेत्संधिं तद्वा निक्षिप्तमुच्यते ॥
वेदना शूनभावश्च केवलं विच्युते सदा ॥ १५ ॥
मथितं पृथुलं विद्धि चूर्णितं तु महारुजम् ॥
स्फालितं स्फाटितं नाम जर्जरं जर्जरीकृतम् ॥ १६ ॥
वेदना परिशोषश्च भृशमस्योपजायते ॥
सशल्यमिव चाऽऽध्मातं सरुजं जर्जरं तु यत् ॥ १७ ॥

---

१ क. ख. °त्क्षिप्यमा° ।

वारणानां महीपाल यथावदुपलक्षयेत् ॥
यदा न क्षमते स्पष्टं विसृष्टं शब्दवत्तथा ॥ १८ ॥
विषण्णो वाऽनुवृत्तो वा वारणो न लभेत्सुखम् ॥
भग्नस्यास्थ्नस्तु विज्ञानं वेदना चाभिवर्धते ॥ १९ ॥
स्फालितं त्वस्थिमध्येऽन्यन्मज्जानुगतमेव तत् ॥
काण्डमुक्तं तु यत्किंचिद्विश्लिष्टं तत्प्रकीर्तितम् ॥ २० ॥
चतुर्विधानामस्थ्नां तु तेषां वक्ष्यामि लक्षणम् ॥
कपालास्थीनि भिद्यन्ते भज्यन्ते नालिकास्तथा ॥ २१ ॥
नाम्यन्ते तरुणास्थीनि स्फुटन्ति रुचका नृप ॥
अत्यर्थमभिघाताच्च मन्यते चूर्ण्यते तथा ॥ २२ ॥
अस्थित्रयं नृपश्रेष्ठस्तरुणास्थिसुखक्रियाम् ॥
इति भङ्गाः समुद्दिष्टा यथावदनुपूर्वशः ॥ २३ ॥
चिकित्सोपक्रमस्तेषां साध्यासाध्यं च वक्ष्यते ॥
(*अप्राप्तं···) ॥ २४ ॥
अत ऊर्ध्वं महाराज चिकित्सां न प्रयोजयेत् ॥
स्थानस्थश्च(†यनं चात्र) यन्त्रे वाऽपि प्रतिष्ठिते ॥ २५ ॥
वारणं शीतलेनाथ जलेन परिषेचयेत् ॥
(*······························ लभते सुखम्) ॥ २६ ॥
यस्त्वपर्वणि भङ्गः स्यादसाध्यः स तु कीर्त्यते ॥
ऊर्ध्वं संवत्सराद्याप्यो भङ्गो भवति हस्तिनाम् ॥ २७ ॥
च्युतप्रम्लानविश्लिष्टव्याविद्धेषु महीपते ॥
सर्वेषामेव भग्नानामेतदेव चिकित्सितम् ॥ २८ ॥
कर्तव्यं च [1]मनुष्येण नागानां हितमिच्छता ॥
एवं हि कीर्तितं सर्वं मया भग्नचिकित्सितम् ॥ २९ ॥
इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने
भग्नचिकित्सितं नाम द्वात्रिंशोऽध्यायः ॥ ३२ ॥

---

* धनुराकारमध्यस्थौ पाठौ न स्तः कपुस्तके ॥ † धनुराकारमध्यस्थः पाठो नास्ति खपुस्तके ॥

---

१ क. मनुष्येन्द्र ।

अथ त्रयस्त्रिंशोऽध्यायः ।

परापरज्ञं तत्त्वज्ञं वेदवेदाङ्गपारगम् ॥
पालकाप्यं महात्मानं रोमपादः स्म पृच्छति ॥ १ ॥
कथं व्यापद्यते कुक्षौ मूढगर्भः कथं भवेत् ॥
लक्षणं मूढगर्भाया गर्भनिर्हरणं तथा ॥ २ ॥
श्र(स्र)वणं लपनं चैव वक्तुमर्हसि(ति) तद्भवान् ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ ३ ॥
विषमशय्यान्यशनैर्व्याधिभिश्च क्षुधा तथा ॥
अतियानातिभाराद्वा लङ्घनप्लवनादपि ॥ ४ ॥
वातमूत्रपुरीषाणां धारणादभिघातनात् ॥
उपद्रवान्मनस्तापात्कुक्षौ गर्भो विपद्यते ॥ ५ ॥
आचतुर्थाच्च मासाच्च रक्तं श्र(स्र)वति संनिभम् ॥
ऊर्ध्वं संघातभूतस्तु पतेदासप्तमादपि ॥ ६ ॥
यथापर्यागतं काले फलं वृन्तात्प्रमुच्यते ॥
एवं विमुच्यते गर्भस्तन्तुमुक्तश्च जायते ॥ ७ ॥
पूर्वोक्तकारणैर्वाऽपि यस्याः कुक्षौ विपद्यते ॥
मृतगर्भा तदाऽत्यर्थं पूतिमूत्रपुरीषिणी ॥ ८ ॥
पूतिनिःश्वासिनी क्षामा न चाऽऽहाराभिलाषिणी ॥[1]
दुर्मना दुर्मनस्का च गुरुप्राणा च हस्तिनी ॥ ९ ॥
विपन्नमत्स्यगन्धा वा मृतगर्भेति तां विदुः ॥
धर्मार्थं च यशोर्थं च मित्रार्थं च भिषग्वरः ॥ १० ॥
भर्तुस्त्वनुमतेनास्या[2] गर्भे शल्यं[3] तु निर्हरेत् ॥
सर्पिषा कल्कमिश्रेण शाल्मल्या धन्वनस्य च ॥ ११ ॥
दक्षिणं करमभ्यज्य योनिद्वारं च सर्वशः ॥
विश्वासयित्वा सर्वस्वं पर्यायित्वा च हस्तिनीम् ॥ १२ ॥
प्रवेश्य हस्तं योनौ तु गर्भमार्गेण वा हरेत् ॥
ऋजुमार्गेण नाऽऽगच्छेत्तं तु शस्त्रेण निर्हरेत् ॥
छित्त्वा तथाऽऽनुपूर्व्येण तस्याङ्गानि पृथक् पृथक् ॥ १३ ॥

१ क. नवाहाराविभाषि° । २ क. भर्तुः स्वभिम° । ३ ख. °ल्यं मुनि° ।

अक्लीबो दारुणो भूत्वा त्वरमाणो जितेन्द्रियः ॥
सूतिकारक्षणार्थं तु निःशेषं निर्हरेत्तु तम् ॥ १४ ॥
यदि वाऽपि विशल्योऽयं जरायुर्न प्रमुच्यते ॥
तत्र लाङ्गलकीकन्दं पानमस्यै प्रदापयेत् ॥ १५ ॥
एलागुडसमायुक्तं न चेदेतेन सिध्यति ॥
ततः पूर्वोक्तविधिना हस्तेनैव तु निर्हरेत् ॥
*विमृश्य नारीगर्भं च तस्यास्तमपसंहरेत् ॥
उपाचरेद्विशल्यां च सूतिकाविधिना भिषक् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने तृतीये शल्यस्थाने मूढगर्भापनयनं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथ चतुस्त्रिंशोऽध्यायः ।

इदमन्यत्प्रवक्ष्यामि शल्यभूते चिकित्सितम् ॥
प्रशस्ते तिथिनक्षत्रे मुहूर्ते करणे तथा ॥ १ ॥
कृत्वा सामान्ययज्ञं तु ततो दन्तमुपाचरेत् ॥
शालाऽवश्यं भवेत्कार्या जलाध्या(ढ्या)से तु शीतले ॥ २ ॥
निवाता कुसुमाकीर्णा द्रव्योपस्करसंभृता ॥
प्रमाणेनोत्तमं स्तम्भं निखातं चात्र कारयेत् ॥ ३ ॥
हतपश्च परिश्रा(स्रा)व्याः शरीरे वारिपूरिताः ॥
घृतेन शतधौतेन कषायैः शीतलैस्तथा ॥ ४ ॥
लेपयेच्चास्य वदनं पटेनाऽऽच्छादयेत्ततः ॥
दध्ना च सघृतेनैनं शाल्यन्नं भोजयेद्द्विपम् ॥ ५ ॥
पूर्वोक्तैस्त्रयोदशभिर्बभ्रीयोत्तैर्मतङ्गजम् ॥
वत्सादन्ताकृतिमुखा जलौकःपृष्ठसंनिभाः ॥ ६ ॥
द्वात्रिंशदङ्गुलायामा लोहसूचीस्तु कारयेत् ॥
ताभिः संवेष्टयेद्दन्तं विवृताभिरथाङ्गुलम् ॥ ७ ॥
दन्तचे(वे)ष्टानुसारेण ततस्ताः कुशलो भिषक् ॥
नोन्नता न चावनता न च पार्श्वगता नृप ॥ ८ ॥

* इदमर्धम् 'एलागुड'– इत्यतः प्राक्पुस्तकेऽस्ति ।

१ क. °परं ह° । २ क. शाल्या । ३ क. वातेन । ४ क. °यात्तं मत° ।

शनैः प्रवेशयेत्सूचीर्व्यापत्तिर्न भवेद्यथा ॥
तालुस्रोतः करश्रो(स्रो)तस्तथा नेत्रनिबन्धनम् ॥ ९ ॥
शिराः स्नायूंश्च रक्षेत्तु उन्मार्गगमनं तथा ॥
त्र्यहात्त्र्यहात्प्रवेश्यैतान्द्व्यङ्गुलं द्व्यङ्गुलं भिषक् ॥ १० ॥
क्षारेण लेपयेच्चाग्रं तेन मांसं विशुध्यति ॥
प्रवेशयित्वाऽङ्गुलानि विंशतिस्त्रिंशदेव ताः ॥ ११ ॥
चतुर्विंशत्यङ्गुलं वा ततोऽस्थीनि विनिर्दिशेत् ॥
मुखप्रमाणं सत्त्वस्य स्वबुद्ध्या विभजेद्भिषक् ॥ १२ ॥
यदा विमुक्तो मांसेन बन्धमूलाच्चलत्यपि ॥
यन्त्राध्यायविधिप्रोक्तैर्बन्धैर्बद्ध्वा मतङ्गजम् ॥ १३ ॥
त्रिभागे वेधयेद्दन्तं शलाकां चानुकारयेत् ॥
तत्र सूत्रमयीं रज्जुं दन्ते बद्ध्वा नवां दृढाम् ॥ १४ ॥
ततोऽन्यां वर्धयेत्तस्मिन्रज्जुं वा रत्तुकां(?)दृढाम् ॥
वक्त्रभ्रमरकं यन्त्रं ततोत्सेधायमेव च ॥ १५ ॥
यन्त्रमेकतमं तस्मिन्पुरस्तात्संनिवेशयेत् ॥
ततस्तं योजयेत्प्राज्ञो यन्त्रयोगेन बुद्धिमान् ॥ १६ ॥
प्रक्षिपेच्च बलाद्रज्जुं यथा दन्तो निपात्यते ॥
दन्तमार्गं च नागस्य पूरयेन्मधुसर्पिषा ॥ १७ ॥
जलेऽवगाहयेच्चैनं विमले शीतले च तम् ॥
पानार्थं दापयेत्क्षीरं घृतयुक्तं नराधिप ॥ १८ ॥
शाल्योदनं च सघृतं भोजनाय प्रदापयेत् ॥
पूर्वमेकं च नागाय सर्पिषा दापयेद्भिषक् ॥ १९ ॥
द्विव्रणीयोपचारस्य कर्तव्यं स्यादतः परम् ॥
असाध्यदन्तनाडी या दन्ते यस्येह जायते ॥ २० ॥
दन्तस्रावीति तं विद्यात्तस्योपायः प्रवक्ष्यते ॥
विद्ध्वा दन्तं त्रिभागेन दूषयित्वा करीरिकाम् ॥ २१ ॥
तस्मात्तु चालितं रक्तं कृत्वा तु सुपरिश्रु(स्रु)तम् ॥
पूर्वोक्तेनैव विधिना दन्तं नागस्य साधयेत् ॥ २२ ॥
भोजनं चास्य तेनैव क्रमेणोपचरेद्भिषक् ॥
भज्यते यस्य वा दन्तः पतेद्वा सकरीरिकः ॥ २३ ॥

वनं प्रस्थापयेत्तं तु न तस्मै प्रतिकारयेत् ॥
उन्मार्गगमने सूची दोषानुत्पादयेद्बहून् ॥ २४ ॥
व्यापदश्चास्य जायन्ते यास्ता निगदतः शृणु ॥
शोफोऽस्य कूर्मसंस्थानो मांसं दूषयते यदा ॥ २५ ॥
मांसधावनतुल्यस्तु श्रा(स्रा)वश्चास्य प्रवर्तते ॥
श्रो(स्रो)तसा प्रक्षरत्युग्रं श्रो(स्रो)तः संदूषयेद्यदा ॥ २६ ॥
व्यापत्संजायते नेत्रे दूषिते नेत्रबन्धने ॥
वेदना गद्गदत्वं च स्नायुच्छेदे प्रजायते ॥ २७ ॥
यवनिक्काथतुल्यस्तु श्रा(स्रा)वस्तस्य प्रवर्तते ॥
करकर्णास्यसंतप्तः शिराः संदूषयेद्यदा ॥ २८ ॥
श्रा(स्रा)वो माञ्जिष्ठतुल्यो वा रक्तो वाऽथ प्रवर्तते ॥
वैकल्यं जायते चास्य प्राणैर्वाऽपि प्रयुज्यते ॥ २९ ॥
अतोऽर्थं रक्षयेद्राजन्नुन्मार्गगमनाद्भिषक् ॥
सद्यः क्रियामथोत्सृज्य मत्वाऽवस्थां च पीडितः ॥ ३० ॥
सद्यःक्षतविधानोक्तां क्रियां तस्येह कारयेत् ॥
शोफस्योपशमं दृष्ट्वा वेदनायास्तथैव च ॥ ३१ ॥
आरभेत्स(त) ततो दन्तं पूर्वोक्तेनैव कर्मणा ॥
मन्दोष्मा जायते शोफो वेदना च तथा भवेत् ॥ ३२ ॥
सम्यक्श्रा(स्रा)वसमे सूच्याः क्लेदश्चैवोपजायते ॥
अत्यर्थं च यदा सूची दन्तं नागस्य कर्षति ॥ ३३ ॥
तदा सुखं न लभते भज्यते वा न संशयः ॥
तत उत्सृज्य तां सूचीं पुनः सम्यक्प्रवेशयेत् ॥ ३४ ॥
पूर्वोदितविधानेन व्यापत्तिर्न भवेद्यथा ॥
.... ॥ ३५ ॥
.... ॥
इत्युक्तो भूमिपालेन पालकाप्यस्ततोऽब्रवीत् ॥ ३६ ॥
यष्टिदन्ताः सदन्ताश्च प्रशलाकास्तथाऽपरे ॥
राजिदन्ता ग्रन्थिदन्ताः पर्वदन्तास्तथाऽपरे ॥ ३७ ॥

---

१ ख. सत्त्वावस्थां । २ ख. उत्सृजतां । ३ क. पूर्वोद्दिष्टवि° । ४ क. ख. °न्तास्तु द° ।

वल्लीदन्ताश्च वक्राश्च द्विपुटास्त्रिपुटास्तथा ॥
अतिदीर्घाश्च ह्रस्वाश्च अतिस्थूलाः कृशास्तथा ॥ ३८ ॥
भवन्ति दन्ता नागानां दुर्भगा विषमास्तथा ॥
एवं बहुविधा भेदा दन्तानां दन्तिनां नृप ॥ ३९ ॥
महाविकल्पाश्चत्वारः शृणु कीर्तयतो मम ॥
अन्तर्मुखावूर्ध्वमुखावधःपार्श्वगतौ तथा ॥ ४० ॥
दन्तावूर्ध्वमुखौ यौ तौ करालाविति निर्दिशेत् ॥
आपाण्डुरौ पार्श्वमुखावग्यौ·········वाऽप्यधोमुखौ ॥ ४१ ॥
दन्तावनुगतौ ह्रस्वं मानं हस्तौ तु तौ विदुः ॥
आभ्यन्तरगतौ यस्य सदन्तः स तु कीर्तितः ॥ ४२ ॥
संमुखौ संकटौ ज्ञेयौ विशालौ चास्थिसंमितौ ॥
एकपार्श्वौ मुखाभ्यां तु स साधीत्युच्यते नृप ॥ ४३ ॥
एते विशल्या व्याख्याताः शृणु दोषानुपक्रमम् ॥
पूर्वोक्तैः कारणैर्युक्तो दन्तो यस्येह दृश्यते ॥ ४४ ॥
कल्पयित्वा तु तं दन्तं लक्षयेद्यत उद्यतः ॥
अनुपूर्वं ततः कृत्वा तत्रान्यं योजयेद्दृढम् ॥ ४५ ॥
काष्ठदन्तोपमं कृत्वा माहिषं शृङ्गमेव च ॥
मूले तु कर्तरिं कृत्वा दन्तमूलसमां नृप ॥ ४६ ॥
कुशलं शिल्पिनं चैव ग्राहयित्वा समन्ततः ॥
आयसैश्च त्रिभिः पट्टैः कीलां चास्यानुकारयेत् ॥ ४७ ॥
सूचीप्रयोगाद्दतस्य तथा पीडनमेव च ॥
तेनैव विधिना राजन्यो मया परिकीर्तितः ॥ ४८ ॥

—:():—

अतः परं प्रवक्ष्यामि दन्तानां संभवं नृप ॥
वातकुम्भादधस्तात्तु वृत्ताः स्युः सकरीरिकाः ॥ ४९ ॥
संभूता नृपशार्दूल विज्ञेया वातसंभवाः ॥
रन्ध्रधुवाश्च विज्ञेया दन्तमध्ये व्यवस्थिताः ॥ ५० ॥
सप्तत्रिंशच्चपञ्चिंशत्त्रिंशच्चैव प्रमाणतः ॥
नद्युंभयाद्रिवा(चा)रीणामङ्गुलानि करीरिकाः ॥ ५१ ॥

---

१ क. दुर्गता । २ क. सुखाभ्यां । ३ क. समाधी° । ४ ख. विशाल्या ।
५ ख. सचाप्र° । ६ क. °या क्षत° । ७ क. °द्युर्भवाद्रि° ।

षडङ्गुला नदीजस्य वृद्धिर्भवति दन्तयोः ॥
अष्टार्धं विश्वरूपस्य त्र्यङ्गुलं गिरिचारिणः ॥ ५२ ॥
मारुतस्तु यदा वे(वे)ष्टौ दूषयित्वोष्मणा सह ॥
मत्कुणस्तेन जायेत अग्राह्यः स तु दन्तिनाम् ॥ ५३ ॥
एकवेष्टनिरोधेन एकदन्तो भवेन्नृप ॥
द्विदन्तानां तु नागानां प्रकृत्या जायते नृप ॥ ५४ ॥
त्रिदन्ताश्चापि जायन्ते चतुर्दन्तास्तथाऽपरे ॥
पिशाचाश्चासुराश्चैव न तेषां ग्रहणं स्मृतम् ॥ ५५ ॥
गृहीताः पापमिच्छन्ति स्वभावानुगतास्तथा ॥
स्पृशन्ते यस्य सङ्गाय दृश्यन्ते वा नराधिप ॥ ५६ ॥
न तस्य ग्रहणं कार्यं परराष्ट्रे तमुत्सृजेत् ॥
न्यूनाधिकत्वं नागानां वैषम्यं वैकृतं तथा ॥ ५७ ॥
तत्सर्वं मारुताद्विद्धि समत्वं चैव यद्भवेत् ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रणोदितः ॥ ५८ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने महापाठे वृद्धोपदेशे तृतीये शल्यस्थाने दन्तोद्धरणं नाम चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

समाप्तं चेदं तृतीयं शल्यस्थानम् ॥

---

१ क. मारुतस्य ।

अथातश्चतुर्थमुत्तरस्थानमारभ्यते ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
हितं निःश्रेयसं चैव गजानामनुचिन्तयन् ॥ १ ॥
यदा मयेयं विजिता सागरान्ता वसुंधरा ॥
तदा मे वारणैस्तुल्यं न कृतं कर्म केनचित् ॥ २ ॥
गुरुभाराभिवहनं गमनं विषमेषु[१] च ॥
तरसा मर्दनं चैव तरणं सलिलस्य च ॥ ३ ॥
तीव्राघाता विघाताश्च तोयौघस्यावतारणम् ॥
सर्वगात्रायुधत्वं च वारणेष्वेव दृश्यते ॥ ४ ॥
नान्यैरसंमिताः[२] सन्ति गुणा दन्तिषु केवलम् ॥
त्रिविधेष्वपि ये न स्युर्बलाङ्गेषु महामुने ॥ ५ ॥
अप्रमेयैर्गुणैरेतैर्बलाङ्गं प्रथमं गजाः ॥
अपि शालागताः कृत्स्नां रक्षन्ति सनृपां महीम् ॥ ६ ॥
कथं ते भगवन्नागा नीरोगा बलशालिनः ॥
भवेयुर्जवसंपन्ना बलिनो मददर्पिताः ॥ ७ ॥
तेषां मे भगवन्प्रश्नमिममाख्याहि पृच्छतः ॥
तैर्हि मे वाहनं तुल्यमन्यद्भुवि न विद्यते ॥ ८ ॥
तेषां कतिविधः स्नेहः कीदृशः किंप्रयोजनः ॥
कत्युपायाः कथं चापि प्रदातव्यो[३] विजानता ॥ ९ ॥
यच्चान्यदपि नागानां कर्तव्यं हितमिच्छता ॥
तदशेषेण भगवन्सर्वं व्याख्यातुमर्हसि ॥ १० ॥
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
पृच्छते रोमपादाय प्रश्नं गजहितं शुभम् ॥ ११ ॥
सर्पिस्तैलं वसा मज्जा संस्कृतासंस्कृतं भवेत् ॥
वारणेभ्यः प्रदातव्यं स्नेहजातं चतुर्विधम् ॥ १२ ॥
सर्वौषधप्रयोगेभ्यः स्नेहपानं मतं मम ॥
स्नेहपानं प्रशंसन्ति पूर्वाचार्या मनीषिणः ॥ १३ ॥
वह्नि वर्णकरं बल्यं सर्वव्याधिहरं स्मृतम् ॥
उत्तमाधममध्यानां कुञ्जराणां यथागमम् ॥ १४ ॥

---

१ क. विषयेषु । २ ख. घ. °संस्मिताः । ३ क. प्रदातव्या ।

स्नेहपाने विधिं कृत्स्नं तमिमं प्रवरं शृणु ॥
आषाढे समतिक्रान्ते श्रावणे पर्युपस्थिते ॥ १५ ॥
बहुले चातिक्रान्ते च शुक्ले स्नेहं समावपेत् ॥
यदाऽल्पसारं तरुणं तृणं वर्षासु लक्ष्यते ॥ १६ ॥
स्नेहपानं तदा कार्यं रोगघ्नं बलवर्धनम् ॥
सम्यक्परिणमेच्छिष्य(च्छष्प)मल्पसारं तथाऽसितम् ॥ १७ ॥
लघुत्वात्तैलवृद्धौ च हितं न हितमन्यथा ॥
शीतकालश्च विहितः शीतसात्म्या हि हस्तिनः ॥ १८ ॥
भूर्यम्बुपानेन तदा मन्दतृष्णा तदा भवेत् ॥
अहितं मृत्तिकादीनां सततं यन्निषेवते ॥ १९ ॥
तद्वह्निशर्क्तिं निष्पिष्टं तैलं काले निषेवितम् ॥
ऋतुसंधौ विशेषेण यो देहे कुपितोऽनिलः ॥ २० ॥
तं तैलं हन्ति सहसा शक्रः शत्रुमिवौजसा ॥
आर्तवं तु यथाकामं पाययेन्नत्वनार्तवम् ॥ २१ ॥
मन्यन्तेऽनार्तवेऽप्यन्ये स्नेहं प्रायोगिकं जनाः ॥
मदकोदकदुग्धैश्च सुरया विषयाऽपि वा ॥ २२ ॥
संयुक्तं दन्तिनां देयं क्वचित्क्वचिदसंयुतम् ॥
तेषामभ्यञ्जने पाने नस्तकर्मानुवासने ॥ २३ ॥
मेढ्रतः कटतश्चैव प्रदानं षड्विधं स्मृतम् ॥
व्याधिनिर्ग्रहणार्थं च बलार्थं चैव दन्तिनाम् ॥ २४ ॥
स्नेहपानं महीपाल हितं तद्धि प्रयोजनम् ॥
तत्र तैलं प्रदातव्यं सुकृतं चक्रसंभवम् ॥ २५ ॥
गजानाममलं चैव सद्यःकृतमपूतिकम् ॥
विश्रं(स्रं) पुराणमत्यर्थं विवर्णं कटुकं च यत् ॥ २६ ॥
पूतिकं चातिदग्धं च घृतमेतद्विवर्जितम् ॥
मांसपक्वमनिर्दग्धरसौषधिसमन्वितम् ॥ २७ ॥
त्रिवृतं दन्तिनां देयं सर्वस्नेहसमुद्भवम् ॥
महिषाजवराहाणां वसा सद्यो विनिःसृता ॥ २८ ॥

---

१ क. °ले च तथाक्रा° । २ क. घ. समाचरेत् । ३ क. लभ्यते । ४ क. °क्तिभिः श्रेष्ठं तै°। घ. °क्तिनिःश्रेष्ठं तै°। ५ क. प्रयोजयेत् । ६ ख. घ. °द्यःक्षत°। ७ क. °तपानं प्रशस्यते ॥ मां° ।

त्रिवृतार्थे प्रदातव्या गात्राभ्यङ्गे च दन्तिनाम् ॥
हेमन्ते तैलपानं तु वर्षासु च विधीयते ॥ २९ ॥
वसा मज्जा च नागानां वसन्ते संप्रदीयते ॥
शरत्काले निदाघे च घृतपानं प्रशस्यते ॥ ३० ॥
एवं यथर्तुसामान्यात्स्नेहं नागेषु दापयेत् ॥
वर्षासु पुष्टा नागेन्द्राः स्नेहादिभिरुपक्रमम् ॥ ३१ ॥
तुरङ्गा रणदक्षाश्च योधाश्च रणकर्कशाः ॥
वैशेषिकं बलं लब्ध्वा व्यायामैश्च स्थिरीकृताः ॥ ३२ ॥
प्रवातवर्षे कुर्वीत राज्ञः कर्माष्टमासिकम् ॥
न मार्गप्रतिपन्नेषु परेषां विषयेऽपि वा ॥ ३३ ॥
शक्यं बलिक्रियां कर्तुं रोगाणां वा प्रतिक्रियाम् ॥
हेमन्तकाले च पुनर्निदाघसमयेऽपि च ॥ ३४ ॥
स्नेहपानं बद्धफले तृणे शुष्के च वर्जितम् ॥
दोषाः शुष्कतृणे दृष्टा तथा बद्धफले तृणे ॥ ३५ ॥
शुष्केणानह्यते नागः सफलेनास्य जीर्यति ॥
दिनैर्हैमन्तिकैः पीतं पानं सम्यङ्न जीर्यति ॥ ३६ ॥
अथ सर्पिः पिबेन्नागः शीते तदपि लीयते ॥
निदाघे तैलपानेन मूर्छा तन्द्रा प्रजायते ॥ ३७ ॥
पिपासां वमथुश्चापि त्वग्दोषाश्चैव दन्तिनाम् ॥
तस्माद्धेमन्तकालं च ग्रीष्मकालं च वर्जयेत् ॥ ३८ ॥
हिताहितज्ञो नागानां कालाकालविभागवित् ॥
काले वा यदि वाऽकाले तैलं दत्तमजानता ॥ ३९ ॥
सर्वानुपद्रवान्कुर्याद्व्यापादयति वा गजम् ॥
रक्षेद्यत्नेन वैद्यस्तु स्नेहपीतं मतङ्गजम् ॥ ४० ॥
आतपाच्च प्रवाताच्च अजीर्णाध्यशनादपि ॥
अतितोयावगाहाच्च पानाच्छीतस्य चाम्भसः ॥ ४१ ॥
सात्म्यासात्म्यविपर्यासादतिचङ्क्रमणादपि ॥
निदाघे स्नेहपीतस्य दोषाः पूर्वं प्रकीर्तिताः ॥ ४२ ॥

---

१ ख. दृष्ट्वा । २ क. दिने हेमन्तिके । ३ क. ख. घ. तिलपानेन । ४ क. °सा च मधुश्चा° ।

स्नेहं प्रवाते पिबतो वायुरङ्गानि बाधते ॥
अजीर्णाध्यशनाद्वाऽपि स्नेहे कोष्ठे व्यवस्थिते ॥ ४३॥
आनाहो वा भवेत्तस्य मरणं वाऽपि जायते ॥
अतितोयावगाहाच्च कायाग्निरुपशाम्यति ॥ ४४ ॥
पिपासा वर्धते चापि स्नेहस्तस्य न पच्यते ॥
यदि पीत्वा गजः स्नेहं जलमक्कथितं पिबेत् ॥ ४५ ॥
तेन तस्यापचारेण स्नेहो भवति दुर्जरः ॥
वेदना सर्वगात्रेषु वमथुश्चापि जायते ॥ ४६ ॥
कुक्षिर्विहन्यते चास्य दौर्मनस्यं भवत्यपि ॥
सात्म्यासात्म्यविपर्यासात्स्नेहपीतस्य दन्तिनः ॥ ४७ ॥
जायते चापि दौर्बल्यं रोगाः प्रादुर्भवन्ति च ॥
अतिचङ्क्रमणाद्वाऽपि सद्योऽव्यायामसंभवः ॥ ४८ ॥
वायुः प्रचलितः स्थानात्सर्वाण्यङ्गानि बाधते[1] ॥
पाकलस्तस्य भवति प्रेवापो(?)[2] वाऽतिदारुणः ॥ ४९ ॥
भेदश्च पर्वणां चापि गात्राणामपि वेष्टनम् ॥
स्नेहोपयोगाद्द्विगुणः परिहारो विधीयते ॥ ५० ॥
विरूक्षणं बृंहणं च कर्मणश्च प्रवर्तनम् ॥
तस्मात्कुर्याद्बुधो वैद्यस्तैलपाने त्ववेक्षणम् ॥ ५१ ॥
दुर्युक्तं तैलपानं तु विषं हालाहलं भवेत् ॥
इत्येष स्नेहपानस्य कालाकालविधिः स्मृतः ॥ ५२ ॥
स्थावरो जङ्गमश्चैव द्विविधः स्नेह उच्यते ॥
तस्य चैवं प्रयुक्तस्य विकल्पा बहवः स्मृताः ॥ ५३ ॥
सर्पिस्तैलं वसा मज्जा मेदो मांसं पयो दधि ॥
एवमादि विजानीयात्स्नेहजातं पृथग्विधम् ॥ ५४ ॥
तिलादिजस्तु यः स्नेहः स्वशास्त्रे परिकीर्तितः ॥
स्थावरस्तु समाख्यातो नानाफलसमाश्रयः ॥ ५५ ॥
तत्र सर्पिर्वसा मज्जा तैलं चैवोत्तमं स्मृतम् ॥
घृतं तु सविशेषत्वात्तेषु श्रेष्ठतमं स्मृतम् ॥ ५६ ॥
यथावदनुपूर्वेण गुणांस्तस्य निबोध मे ॥
मधुरं शीतवीर्यं च लघु चैवाविदाहि च ॥ ५७ ॥

१ ख. घ. साधते । २ क. प्रवापो ।

हितं वाते च पित्ते च मेदःशुक्रविवर्धनम् ॥
दारुणानां मृदुकरं बलवृद्धिकरं तथा ॥ ५८ ॥
प्रसृष्टमल्पमूत्रं च ग्रहणीदीपनं तथा ॥
सुकुमारकरं बल्यमायुष्यं चक्षुषोर्हितम् ॥ ५९ ॥
अल्पक्लेशं सुखस्पर्शं स्नेहानामपि चोत्तमम् ॥
घृतान्यन्यानि वक्ष्यामि भैषज्यं सर्वदेहिनाम् ॥ ६० ॥
तत्र ये पित्तला नागाः प्रकृत्याऽवनताश्च ये ॥
मदक्षीणाश्च वृद्धाश्च धेनुकासु च निश्रु(स्रु)ताः ॥ ६१ ॥
बाला दुर्बलपादाश्च ये च नेत्रातुरा गजाः ॥
तेभ्यः सर्पिः प्रदातव्यं गजा ये च नवग्रहाः ॥ ६२ ॥
घृतादनन्तरं तैलमृषिभिः समुदाहृतम् ॥
गुणांस्तस्य प्रवक्ष्यामि यथावदनुपूर्वशः ॥ ६३ ॥[1]
तैलं त्वच्यं बलकरं लेखनीयं तिलोद्भवम् ॥
विदाहि चोष्णवीर्यं च कषायमधुरं तथा ॥ ६४ ॥
वातश्लेष्महरं चैव विपाके कटुकं स्मृतम् ॥
कृमिघ्नं पिच्छलं चापि मेदोघ्नं योनिशोधनम् ॥ ६५ ॥[2]
अव्यायामैरुपचिता ये गजाः स्थूलशारदाः ॥
वातोपहुतदेहाश्च ये चाल्पलघुविक्रमाः ॥ ६६ ॥
वातप्रकृतयो ये च श्लैष्मिका ये च वारणाः ॥
बहुशश्चापि सज्जन्तो ये चाऽऽनाहेन कुञ्जराः ॥ ६७ ॥
सहसा ह्रसते येषां मांसं चाध्वप्रयोजने ॥
तेषां तैलं प्रदातव्यं ये चापि कृमिकोष्ठिनः ॥ ६८ ॥
धेनुकानां तु विहितं तैलमेव महीपते ॥
तासां हि बहुवातत्वाद्वायुः कोष्ठे प्रकुप्यति ॥ ६९ ॥
वसा हि वातशमनी दन्तिनां मधुरा स्मृता ॥
वृष्या विपाके मधुरा बलवर्णप्रसादनी ॥ ७० ॥
स्रोतोभिघाते विहिता मन्यास्तम्भे गलग्रहे ॥
भग्नस्फटितविद्धानां गात्ररोगेषु चोत्तमाम् ॥ ७१ ॥[3]
मज्जा बल्या विशेषेण वातपित्तविनाशिनी ॥
कफं मेदश्च शुक्रं च वृद्धिं नयति दन्तिनाम् ॥ ७२ ॥

---

१ क. °मि यथावदनुपूर्वशः ॥६०॥ २ क. घ. योगजाः । ३ क. °तोविघा° ।

उष्णश्चैवोष्णवीर्यश्च गुरुश्चापि प्रकीर्तितः ॥
वातरोगहरो वृष्यः स्रोतसां परिशोधनम् ॥ ७३ ॥
तैलादर्धं घृते मात्रा ततोऽर्धं त्रिवृता भवेत् ॥
मज्ज्ञश्चैव वसायाश्च मात्रा प्रायोगिकी स्मृता ॥ ७४ ॥
इति स्नेहगुणाः प्रोक्ताः कालाकालौ च हस्तिनाम् ॥
अतः परं प्रवक्ष्यामि स्नेहपाने विधिं नृप ॥ ७५ ॥
शालां सुगुप्तां सुच्छि(च्छ)न्नां सर्वतः कटकैर्वृताम् ॥
देशे यथोक्ते कुर्वीत नित्यं बलिविभूषिताम् ॥ ७६ ॥
अजातपर्व तरुणं शुचि चोपहरेत्तृणम् ॥
यथाकालं यथामात्रं स्थलजं च विशेषतः ॥ ७७ ॥
उष्णोदकः(कं) कटाहानि स्नानपानाय दन्तिनाम् ॥
नित्यं संनिहितानि स्युः स्नेहकाल उपस्थिते ॥ ७८ ॥
अलिन्दांश्च घटांश्चैव पर्याप्तानुपकल्पयेत् ॥
पानार्थे चैव तैलस्य सलिलस्य च हस्तिनः ॥ ७९ ॥
काष्ठान्युष्णोदकस्यार्थे संशुष्कान्युपकल्पयेत् ॥
कुशलांश्चापि गृह्णीयान्नागस्य परिचारकान् ॥ ८० ॥
वैद्यं च शास्त्रकुशलं दृष्टकर्माणमेव च ॥
हस्त्यध्यक्षं च तत्रैव संदिशेत्पितृवद्धितम् ॥ ८१ ॥
मुखद्वारविशुद्धाय सुकृतं पानपायिने ॥
हस्तैः सुमर्दितं कृत्वा तैलं नागस्य दापयेत् ॥ ८२ ॥
दापयित्वा त्र्यहं मद्यं ततो रूक्षं च भोजनम् ॥
विरूक्षितशरीराय स्नेहं नागाय दापयेत् ॥ ८३ ॥
उपायं चापि सुकृतं तैलं चक्रसमुद्भवम् ॥
स्थापयेद्भोजने स्निग्धे तैलं दद्याद्विचक्षणः ॥ ८४ ॥
उपार्जयेच्च त्रिवृतं सर्वं स्नेहसमुद्भवम् ॥
पानार्थे च वसा ग्राह्या गात्राभ्यङ्गे च हस्तिनाम् ॥ ८५ ॥
मापयित्वा प्रमाणेन यथोक्तेन तु बुद्धिमान् ॥
यथोक्ते तिथिनक्षत्रे स्वस्थं विज्ञाय वारणम् ॥ ८६ ॥
भक्ततैलप्रमाणेन श्रेष्ठां मात्रां प्रदापयेत् ॥
पादहीनं(नां) तथा मध्यां मध्यार्धेन कनीयसीम् ॥ ८७ ॥

१ क. ख. घ. स्वच्छं । २ ख. घ. चारणम् ।

एष एव क्रमो वृद्धेरा समाप्तेर्विधीयते ॥
यथाग्नि पञ्चरात्रं वा त्रिरात्रं वा मतङ्गजम् ॥ ८८ ॥
सप्ताहं वा पि वा स्नेहं पानी गुणयुतो भवेत् ॥
यदि न स्नेहमर्यादां प्राप्य न स्निह्यते गजः ॥ ८९ ॥
स्नेहान्तां पीनिमेकैकां पुनस्तां प्रतिलोभयेत् ॥
केचित्पीनीं व्यवस्यन्ति दिनान्यष्टादशोत्तमाम् ॥ ९० ॥
मध्यमां दश पञ्चैव सप्त पञ्च कनीयसीम् ॥
तासां वक्ष्यामि राजेन्द्र प्रमाणं च शृणुष्व मे ॥ ९१ ॥
एष एव क्रमो वृद्धेरा समाप्तेर्विधीयते ॥
त्रिषष्टिराढकानि स्युरुत्तमायाः प्रमाणतः ॥ ९२ ॥
मध्यमाया द्विपञ्चाशदाढकानि च निर्दिशेत् ॥
कनीयसीं विजानीयाद्विचत्वारिंशदेव हि ॥ ९३ ॥
एतत्प्रमाणं निर्दिष्टं पीनीनां त्रिविधं मया ॥
यस्मात्प्रीणयते पीनी देहे नागस्य पार्थिव ॥ ९४ ॥
तस्मात्पीनीति सा प्रोक्ता सम्यग्दत्ता मनीषिभिः ॥
दिनान्यष्टादशैवात्र दापयेत्तैलसर्पिषी ॥ ९५ ॥
दश पञ्च च तैलस्य सर्पिषः सप्त पञ्च च ॥
मात्रा यद्यपि निर्दिष्टाः स्नेहस्य करिणां नृप ॥ ९६ ॥
अग्नेर्बलाबलं ज्ञात्वा यथाग्न्येव प्रदापयेत् ॥
समस्तं पायितः स्नेहं स्निग्धो भवति नान्यथा ॥ ९७ ॥
तत्र त्वग्निपरीक्षायामिदं लक्षणमिष्यते ॥
वैद्यस्तत्र विबुध्येत गजरक्षार्थमुत्थितः ॥ ९८ ॥
तत्र यः पीतवान्स्नेहं परिणामेन मुह्यति ॥
न वा नमति मातङ्गो न चात्यर्थं प्रवेपते ॥ ९९ ॥
†स्पष्टलाङ्गूलनयनः †स्पष्टकर्णशिरोधरः ॥
न च तिष्ठति मातङ्गः स्तम्भमालानमाश्रितः ॥ १८० ॥
ग्रासार्थं चोद्यमानस्य न वा कुप्यति वारणः ॥
तस्य स्नेहं यथायोगं क्रमेणाभिप्रवर्धयेत् ॥ १ ॥

---

† स्पृष्ट इति स्यात् ।

---

१ क. गुणवृतो ।

यस्त्वतो विपरीतानि लिङ्गानि कुरुते गजः ॥
न तस्य वर्धयेत्स्नेहं स्नेहो यस्य न जीर्यति ॥ २ ॥
अरतिर्गात्ररुग्ग्लानिर्दाहस्तृष्णा विजृम्भणम् ॥
सीकरभ्रममोहाश्च स्नेहेऽजीर्णे विमुह्यति ॥ ३ ॥
(*एषामुपशमे विद्याज्जीर्णस्नेहस्य लक्षणम् ॥
स्नेहपीतो यदि स्नेहे जीर्यमाणे प्रमुच्यति) ॥ ४ ॥
अतस्तं लम्भयेच्छय्यां जलेनाक्ष्णोश्च सेचयेत् ॥
ग्रहणीं दीपयेच्चास्य दीपनैः कुशलो भिषक् ॥ १०५ ॥
येन योगेन नागस्य स्नेहयोगो विवर्धते ॥
तेन योगेन कर्तव्यं विधाया व्यपकर्षणम् ॥ ६ ॥
चतुर्भागे चतुर्भागमर्धेऽर्धं चापकर्षयेत् ॥
त्रिभागवृद्धौ तु भवेत्त्रिभागाद्यपकर्षणम् ॥ ७ ॥
स्नेहत्रिभागवृद्धौ तु कर्तव्यं दन्तिनां भवेत् ॥
वैद्यो लवणवर्जाया विधाया व्यपकर्षणम् ॥ ८ ॥
हीनं चतुर्थेनांशेन स्नेहस्य तच्चूर्णं हितम् ॥
अध्यर्धांशेन हीनं वा प्रदद्यात्प्रथमेऽहनि ॥ ९ ॥
ततोऽर्धमासं च ततः क्रमेणैवं प्रदापयेत् ॥
आध्मातकुक्षिरचलः प्रकोपान्मातरिश्वनः ॥ ११० ॥
परुषं फेनिलं नीलं तथा मारुतपीडितम् ॥
सत्त्वस्थिरमदुर्गन्धमविदग्धमसंप्लुवम् ॥ ११ ॥
संशुष्कं पिच्छिलं लिण्डं कृच्छ्रान्निर्गममेव च ॥
अपक्वमुदके यच्च क्षिप्रमेव निमज्जति ॥ १२ ॥
प्रवाहणविसर्गे च शकृन्मूत्रानिलस्य वा ॥
वायुर्न चातिप्रगुणो यस्य प्राणश्च हीयते ॥ १३ ॥
तस्य व्यावर्तयेत्स्नेहं यथाकालं यथाबलम् ॥
दौर्बल्यमधिकं गच्छेदतिस्नेहेन पीडितः ॥ १४ ॥
गात्राणि चास्य सीदन्ति बलहानिश्च जायते ॥
अतीसारश्च तृष्णा च वर्णभेदश्च लक्ष्यते ॥ १५ ॥

---

* धनुश्चिह्नद्वयान्तःस्थः पाठो नास्ति कपुस्तके ।

---

१ ख. विण्डं । २ क. °नस्य ही° ।

भिन्नं स्विन्नमदुर्गन्धि शकृदाशु प्रमुञ्चति ॥
कृच्छ्रादल्पाल्पमापीतं मूत्रं सृजति वारणः ॥ १६ ॥
हस्तगात्रापरैर्नागः सीदति भ्रमतीव च ॥
न च सम्यक्तृणे लोभं कुरुते प्राणकर्षितः ॥ १७ ॥
अतिस्निग्धस्य नागस्य लिङ्गान्येतानि लक्षयेत् ॥
नागमेवंविधं स्निग्धं क्रमेणैवं विरूक्षयेत् ॥ १८ ॥
स्नेहजीर्णे तृणं किंचिद्भक्षयित्वा जलं पिबेत् ॥
स्नापयेच्च ततो युक्त्या(क्त्या) दद्यात्तृणमनिग्रहम् ॥ १९ ॥
वातानुलोमता हर्षः श्रेष्ठता लिण्डमूत्रयोः ॥
प्रकाङ्क्षा लाघवं चैव स्नेहे जीर्णे निदर्शनम् ॥ १२० ॥
गुरुत्वं सर्वकायस्य मूत्रानिलशकृद्ग्रहः ॥
यवसेऽल्पप्रकाङ्क्षा च तदजीर्णस्य लक्षणम् ॥ २१ ॥
कृष्णाभं यच्च दुर्गन्धं विच्छिन्नं फेनिलं च यत् ॥
द्रवं खरं सशूलं च तत्पुरीषमपक्वजम् ॥ २२ ॥
अवेदनमदुर्गन्धं श्लेष्मणा विद्धि वर्जितम् ॥
यथा यवसवर्णं च पक्वमित्युच्यते शकृत् ॥ २३ ॥
परिषेकश्च कर्तव्यः सुखोष्णेनात्र वारिणा ॥
तैलघृतं तु पीताय कदुष्णेनोभयक्रियाम् ॥ २४ ॥
शय्याभागोत्थितं नागं पीततैलं तथैव च ॥
शनैरेकेन वा रूढं गमयेद्द्वे धनुःशते ॥ १२५ ॥
गजस्याधिक्रमकृतान्गुणदोषान्निबोध मे ॥
प्रवर्तनं ग्रासपाने छा(स्था)ने स्कन्नस्य कर्शनम् ॥ २६ ॥
उत्साहमाणजननं रुजाशोकनिबर्हणम् ॥
मृदूकरं शरीरस्य श्रो(स्रो)तसां परिशोधनम् ॥ २७ ॥
कामाग्निज्वलनं बल्यं मनसश्च प्रसादनम् ॥
गात्रापरव्यथार्ते च नागे कफविकारिते ॥ २८ ॥
श्रेयस्तु व्याधिते वाऽपि प्रागुत्थाय विचारणम् ॥
व्याधितेषु विशेषेण नित्यं चङ्क्रमणं हितम् ॥ २९ ॥
यत्पित्तं तैलजनितं लिण्डशोषं च यद्भवेत् ॥
तयोर्निर्हरणार्थाय तैलान्ते पाययेद्घृतम् ॥ १३० ॥

---

१ क. °न्गुणान्दो° । २ क. ख. घ. लिण्डं शोषं ।

सप्ताहमथ पञ्चाहं त्रिरात्रमथवा पुनः ॥
ति(तै)लपानाद्घृतं वाऽपि वृद्ध्यर्थेन प्रदापयेत् ॥ ३१ ॥
हृष्टोदग्रः स मातङ्गस्तेजोबलसमन्वितः ॥
लघुर्जवबलामर्षाद्दीप्ताग्निर्धेनुकामना ॥ ३२ ॥
मांसोपचयसंयुक्तः कामवानिन्द्रियैः (*पटुः ॥
विसृष्टलिण्डमूत्रस्तु स्निग्धत्वक् प्रियदर्शनः ॥ ३३ ॥
मृदुभिर्विशदैः स्निग्धैः सर्वश्रोतोभिर)न्वितः ॥
यान्यान्प्रार्थयते कामान्समस्तांश्चोपपादयेत् ॥ ३४ ॥
न वेपते उरश्चास्य सम्यग्भक्तं च जीर्यति ॥
न क्षुद्रमतिशुष्कं च स्निग्धं वृत्तं च युक्तितः ॥ १३५ ॥
पक्वलिङ्गान्वितं काले शकृद्वाऽपि प्रमुञ्चति ॥
ततो जवे च भारे च स्थाने च शयनेऽपि च ॥ ३६ ॥
न च स्वेदमवाप्नोति सुखं शेते विबुध्यते ॥
वातादीनां च दोषाणामनुलोमप्रवर्तनम् ॥ ३७ ॥
इन्द्रियैरिन्द्रियार्थं च यथावदवगच्छति ॥
नित्योदग्रोऽथ सुमनाः सम्यक्स्निग्धो भवेद्द्विपः ॥ ३८ ॥
यदा तु गुरुगात्रत्वं क्रमे न्यासे च लक्ष्यते ॥
मन्दमुद्धरते गात्रं मन्दं च परिवीजति ॥ ३९ ॥
अल्पमूत्रपुरीषश्च जृम्भते च पुनः पुनः ॥
पर्यश्रु चोपलक्ष्येत ध्यानस्वप्नपरोऽपि वा ॥ १४० ॥
विनमत्ययं चाभीक्ष्णं द्वेष्टि शय्यासनं निशि ॥
क्षिप्रं न कुरुते संज्ञां दुर्मनाः संभवेद्गजः ॥ ४१ ॥
विद्यात्सुमनसं नागं दीप्ताग्निं धेनुकार्थिनम् ॥
मृदुगात्रमुदीर्णं च रूपेभ्यो न च कुप्यति ॥ ४२ ॥
रुजावान्न भवेत्तस्य त्वक्प्रसादश्च लक्ष्यते ॥
शरीरोपचयश्चास्य स्वाम्यर्थाश्च विवर्धते ॥ ४३ ॥
शब्दं स्पर्शं रसं रूपं गन्धं वाऽपि विशेषतः ॥
सर्वाण्येतानि निःसङ्गं वेत्ति यः पञ्च पञ्चभिः ॥ ४४ ॥

*कपुस्तके धनुश्चिह्नान्तर्गतं पाठमलिखित्वा 'इन्द्रियान्वितः' इति लिखितमस्ति।

१ क. ख. घ. हृष्टोदग्रं। २ क. °मता ॥ ३२ ॥

घनं स्निग्धं च यस्य स्याच्छकृत्पाण्डु विवर्णतः ॥
मृत्तिका शर्करा वाऽपि यत्र मिश्रा न दृश्यते ॥ १४५ ॥
एकवर्णमदुर्गन्धमविदग्धमनप्लुवम् ॥
पुरीषं दृश्यते यस्य स नागो रोगवर्जितः ॥ ४६ ॥
तैले दत्ते घृते दत्ते स्नेहं यद्यतिसार्यते ॥
पश्चाहमथसप्ताहं कदुष्णं स पिबेज्जलम् ॥ ४७ ॥
दर्भमूलपलान्यष्टौ सलिले क्वाथयेच्छुचौ ॥
एतत्स्निग्धाय पानीयं देयं वातानुलोमनम् ॥ ४८ ॥
किंचित्स्निग्धपुरीषाय यवागूं पाययेद्भिषक् ॥
यदा यच्च प्रयोक्तव्यं स्नेहपानाय तच्छृणु ॥ ४९ ॥
यावद्द्रोणो भवेन्नागस्तावत्प्रस्थान्सुसंस्कृतान् ॥
तन्दुलानां प्रमाणेन यवागूं पाययेद्भिषक् ॥ १५० ॥
एतैश्च मुद्गसहितैरनयैव हि मात्रया ॥
कृत्वा यवागूं नागाय त्र्यहं भूयः प्रदापयेत् ॥ ५१ ॥
तन्दुलाद्याढके भुक्तं मुद्गानामाढके रसम् ॥
कृत्वा नागाय दातव्यमस्नेहलवणं त्र्यहम् ॥ ५२ ॥
ततो भक्तचतुर्भागं चतुर्भागरसप्लुतम् ॥
लवणस्य चतुर्भागं चैकाहं प्रतिभोजयेत् ॥ ५३ ॥
विंधार्थं त्वथ भुञ्जीत रसार्धेन मतङ्गजः ॥
लवणस्योचितस्यार्धयोगं चास्मिन्प्रदापयेत् ॥ ५४ ॥
रसस्य तु यथोक्तस्य विधाया लवणस्य च ॥
पादहीनं प्रदातव्यं समस्तं भोजयेत्कृतम् ॥ १५५ ॥
धान्याम्लैर्दाडिमाम्लैश्च दध्यम्लैः स्वरसंयुतम् ॥
भक्तं त्र्यहं त्र्यहं दत्त्वा प्रसन्नां पाययेत्त्र्यहम् ॥ ५६ ॥
यथापूर्वं समादिष्टो भोजनस्य विधिक्रमः ॥
रसजातेषु सर्वेषु *तथा कार्यक्रमो भवेत् ॥ ५७ ॥
यवसस्य चतुर्भागं स्नेहस्यान्ते प्रदापयेत् ॥
ततोऽर्धमर्धस्यार्धेन हीनं सर्वक्रमात्ततः ॥ ५८ ॥
स्नेहे निवृत्तमात्रे तु गात्राभ्यङ्गो विधीयते ॥
विधां समस्तां च तथा शीतं चाम्भोऽवतारयेत् ॥ ५९ ॥

---

* 'तथा' इति तूचितम् ।

नागं ततः स्वलंकृत्य बलिनं व्याधिवर्जितम् ॥
प्रशस्ते तिथिनक्षत्रे पार्थिवाय प्रदर्शयेत् ॥ १६० ॥
अथ क्रमेण कुर्वीत रक्षां बद्ध्वाऽध्वकर्मसु ॥
स्नेहं ततोऽस्य जनयेन्मदं च मदवर्धनैः ॥ ६१ ॥
तैलक्षीरघृताद्यैश्च रोगसंशमनैः पुनः ॥ ६२ ॥
इत्यङ्गाधिपनोदितेन मुनिना हेत्वर्थयुक्ता स्मृता
पीनी प्रीतिगुणेन वारणहिता मात्रोपचारक्रमैः ॥
यां पीत्वाऽऽतपशीतवृष्टिपवनाद्यत्यर्दितानां क्रमो
नीरोगो बलवान्गजः श्रु(स्नु)तमदो भूत्वाऽथ हन्याद्रिपून् ॥ १६३ ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचने महापाठे वृद्धोपदेशे चतुर्थे उत्तरस्थाने स्नेहपानं नाम प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

अङ्गो हि राजा चम्पायां हस्तिशास्त्रविशारदम् ॥
पालकाप्यं महामात्रं सुखासीनं स्म पृच्छति ॥ १ ॥
स्नेहपानं तथा कार्यं वारणानां महामुने ॥
सर्पिर्वाऽपि कथं देयं वसा मज्जाऽपि वा कथम् ॥ २ ॥
कस्मिन्दिने वा मासे वा तैले मात्रा च का स्मृता ॥
जीर्यमाणं कथं तैलं विद्याज्जीर्णं कथं पुनः ॥ ३ ॥
अजीर्णायां(?) कथं कुर्यादेतदिच्छामि वेदितुम् ॥
उपचारप्रयोगं च निष्ठा तैलस्य वाऽऽदितः ॥ ४ ॥
माननिर्माणयोगं च यवसे वाऽपि को विधिः ॥
आहारं च कथं दद्यात्तैलपीताय दन्तिने ॥ ५ ॥
शय्याभङ्गं कथं कुर्यात्कथं च रसभोजनम् ॥
को घृतस्योपचारश्च देयो वा कीदृशो गजे ॥ ६ ॥
विचार्य सम्यग्बुद्ध्या हि भगवन्वक्तुमर्हसि ॥
पालकाप्योऽङ्गराजेन तु पृष्टस्त्विदमब्रवीत् ॥ ७ ॥
शृणु राजन्निदं सर्वं यथावदनुपूर्वशः ॥
सर्पिस्तैलं वसा मज्जा यस्मिन्काले प्रदीयते ॥ ८ ॥

आषाढे समतिक्रान्ते श्रावणे समुपस्थिते ॥
बहुले च व्यतिक्रान्ते शुक्ले स्नेहं प्रदापयेत् ॥ ९ ॥
हस्तश्रवणपुष्येषु चित्रायामश्वयुज्यपि ॥
दशम्येकादशीद्वित्र्यष्टम्यादिषु तिथिष्वपि ॥ १० ॥
बलाभिजितसावित्रमैत्रेषु त्रिजयेषु च ॥
वर्जिता ऋतवो ये च तैलपानस्य ताञ्शृणु ॥ ११ ॥
ग्रीष्मे हेमन्तकाले च तैलपानं न दापयेत् ॥
उद्योगे पूजितावेतौ ऋतू विजयकाङ्क्षिभिः ॥ १२ ॥
हृष्टो वा विजयार्थं यो गजो राज्यान्तरं व्रजेत् ॥
पीड्यमानोऽपि चान्येन राजा योद्धुं समुत्सहेत् ॥ १३ ॥
हेमन्ते सस्यसंपूर्णा मेदिनी शीतलोदका ॥
पत्त्यश्वरथनागानां भवेच्चापि सुखावहा ॥ १४ ॥
लोभाद्वा यो व्रजेद्यात्रां भयाद्वाऽप्यथवा च यः ॥
अकस्मात्संप्रयोगात्तु व्यापत्तिर्द्विरदे ध्रुवा ॥ १५ ॥
महामात्रैस्तदा नागा विनीयन्ते च कर्मसु ॥
शिशिरे घर्मकाले च वारणानां नराधिप ॥ १६ ॥
घर्मकाले च ये दोषाः स्नेहपानस्य ताञ्शृणु ॥
ग्रीष्मे सूर्यांशुभिर्दग्धा वृक्षा गुल्मास्तथैव च ॥ १७ ॥
मेदिनी दवदग्धा च संक्षिप्तयवसोदका ॥
निदाघजलरोधे च स्नेहतृष्णा प्रवर्तते ॥ १८ ॥
क्षिप्रं प्राणा विपद्यन्ते तृणाग्निरिव पार्थिव ॥
इत्येतैः कारणै राजन्नृतुर्ग्रीष्मो विगर्हितः ॥ १९ ॥
तस्मात्प्रावृषि तैलं तु वारणेभ्यः प्रदापयेत् ॥
तृणानि हरितान्यत्र स्युर्वनस्पतयस्तथा ॥ २० ॥
पूर्णा वापी तडागानि मेदिनी सस्यसंवृता ॥
शोभते हरतेऽत्यर्थमिन्द्रगोपकदर्दुराः ॥ २१ ॥
न चातिशीतं नात्युष्णं न च युद्धं न कर्म वै ॥
सर्वावस्थाश्च राजानो जलपूर्णा च मेदिनी ॥ २२ ॥
स्वादुपानोदके पथ्ये विचित्रयवसावृते ॥
स्थाने ग्रामे शिवे रम्ये स्नेहपानं समाचरेत् ॥ २३ ॥

श्रावणे तैलपानं स्याच्चाद्रौ भाद्रपदस्य च ॥
तैलमात्रा तु नागस्य मात्रार्धमस्य संमता ॥ २४ ॥
उत्तमाधममध्यानां भवेषा हस्तिनां भवेत् ॥
तैलं स्थूले महाकायं कृशे सर्पिर्विधीयते ॥ २५ ॥
उरःक्षतानां भग्नानां वसां मज्जां च दापयेत् ॥
तैलस्याथ प्रवक्ष्यामि प्रयोगमत उत्तरम् ॥ २६ ॥
प्रतिपानं विशुद्धाय कवलैर्दीपिताय च ॥
प्रातरुत्थाय नागाय तैलपानं समाचरेत् ॥ २७ ॥
जीर्णेऽल्पता(म)स्यं देयं च ततस्तोयावगाहनम् ॥
स्नातपीतोदकं चैव निवाते स्थापयेत्ततः ॥ २८ ॥
यथोचितं च यवसं तस्य दद्याद्विचक्षणः ॥
त्रिधा च स्नेहयोगेन स्नापयेत्तस्य हस्तिनः ॥ २९ ॥
पीते चतुर्नालिकं च शय्यां रात्रौ नयेद्गजम् ॥
प्रत्युद्गताय यवसं वारणाय प्रदापयेत् ॥ ३० ॥
प्रभाते सुसमुत्थं च शुद्धरक्त(मू)त्रपुरीषिणम् ॥
ततः सुमनसं ज्ञात्वा तैलं नागाय दापयेत् ॥ ३१ ॥
द्रोणं चतुर्थे दिवसे पीतवन्तं मतङ्गजम् ॥
धनुःशतायतां वीथीं नयेच्चैवैर्गतेन तम् ॥ ३२ ॥
चोद्यमानस्य तस्यैवं सर्वतः प्रतिपाचति ॥
सम्यग्गच्छति कोष्ठं च विक्रिया न च गच्छति ॥ ३३ ॥
स्वच्छन्नं चोदकं दद्याद्यावत्सात्म्यं च कोद्रवम्(?) ॥
पञ्चाढकं मंडेदेयं दिवसे पञ्चमे गते ॥ ३४ ॥
षष्ठे षडाढकं दद्याद्दिवसे तस्य हस्तिनः ॥
दिवसे सप्तमे चैव परीक्षेत मतङ्गजम् ॥ ३५ ॥
अच्छपानं च पिबतः कोष्ठो यस्य न भिद्यते ॥
रूक्षं तु तस्य तं विद्यात्कोष्ठं मारुतपीडितम् ॥ ३६ ॥
आढकक्रमयोगेन वर्धयेत्तस्य हस्तिनः ॥
यां मात्रां जरयेत्सम्यक्तां मात्रां समुपाचरेत् ॥ ३७ ॥
उत्तमाय च नागाय देयं द्वात्रिंशदाढकम् ॥
मध्ये च विंशतिश्चैव ह्यधमाय नराधिप ॥ ३८ ॥

१ क. जीर्णे कर्म ततो देयं त° ।

चतुर्विंशत्पलकं तु पाययेच्च कनीयसे ॥
त्र्यहं पाययेत्स्नेहमुत्तमाग्निं मतङ्गजम् ॥ ३९ ॥
मध्यमाग्निं च पञ्चाहं मन्दाग्निं त्र्यहमेव च ॥
विरिच्यते ततः सम्यक्कोष्ठं चाऽस्य विशुध्यति ॥ ४० ॥
एतत्स्नेहप्रमाणं तु विधिं चैव समाचरेत् ॥
विभागेन विधानाच्च दृष्टं भोजनमिष्यते ॥ ४१ ॥
स्नेहमच्छं तु पिबतो लवणं न प्रदापयेत् ॥
यस्यापि पिबतस्तैलं वारणस्य न जीर्यति ॥ ४२ ॥
तस्य विश्रम्य दातव्यं द्व्यहं वा त्र्यहमेव वा ॥
पिप्पलीशुण्ठिमरिचं सपञ्चलवणायुतम् ॥ ४३ ॥
विश्राम्येतस्य पिण्डं तु सायं प्रातः प्रदापयेत् ॥
तक्रं वातहरं चैव लवणांश्च प्रदापयेत् ॥ ४४ ॥
यथोक्तं यवसं चैव नानार्थेषु सुखोदकम् ॥
एवं जीर्णं यदा तैलमथैनं पाययेत्पुनः ॥ ४५ ॥
अथास्याजीर्णतैलस्य लिङ्गानीमानि लक्षयेत् ॥
दाहं संजनयेच्चैव गात्राणि मूर्धा च दन्तिनः ॥ ४६ ॥
तैलं वमति सङ्क्षोभ्य हृदयं चास्य पीड्यते ॥
वेपते श्वसिति स्थूलं मुखशोषश्च जायते ॥ ४७ ॥
मिश्रं चैव पुरीषं स्याद्रक्तमल्पं च मेहति ॥
स्नेहव्यापत्सु च प्रोक्तां क्रियां तस्य समाचरेत् ॥ ४८ ॥
लक्षणं जीर्यमाणे तु तैले वक्ष्याम्यतः परम् ॥
शिरसः कुरुते गात्राणि करं च परिवीजति ॥ ४९ ॥
विस्फारान्परिणामे तु कुरुते वारणो मुखे ॥
विजृम्भते विनमति तृष्णा चास्योपजायते ॥ ५० ॥
जीर्यमाणस्य विज्ञानं जीर्णे जीर्णे प्रदापयेत् ॥
अथैनं स्नेहितं ज्ञात्वा यवागूं प्रतिपादयेत् ॥ ५१ ॥
ईप्सितं यदि नागेषु तैलं स्याद्भृशोत्तम ॥
परं प्रमाणं वक्ष्यामि वदतस्तन्निबोध मे ॥ ५२ ॥
पञ्च सार्धाः स्मृताः श्रेष्ठे चतस्रो मध्यमे स्मृताः ॥
तिस्रः सार्धा अधमस्य इत्येवं स्नेहनिश्चयः ॥ ५३ ॥

यदा पूर्णो भवेत्कोष्ठः संतर्पं तस्य कारयेत् ॥
पञ्चाहं पाययेन्मण्डं भक्तं चास्मै प्रदापयेत् ॥ ५४ ॥
पञ्चाहं मुद्गमण्डस्य दद्याच्च यवसं लघु ॥
शकृद्द्रवेद्यदा बद्धं निःस्नेहं रूक्षमेव च ॥ ५५ ॥
चतुर्भागं त्रिभागास्तु वारणं प्रतिभोजयेत् ॥
वर्धयेत्क्रमशश्चास्य मुद्गयूषेण भोजयेत् ॥ ५६ ॥
पिप्पलीशृङ्गवेराभ्यां पञ्चमूलसुसंस्कृतान् ॥
दापयेत्क्रमशश्चास्मै संस्कृतं रसभोजनम् ॥ ५७ ॥
शालीनामोदनं दद्यात्सुस्विन्नं मृदुमेव च ॥
सुखोदकं च द्विरदे स्नेहपीते प्रशस्यते ॥ ५८ ॥
भक्तं स्नेहं रसं मांसं क्रमयोगेन(ण) वर्धयेत् ॥
पर्वाणि पञ्च नागाय नवनस्य प्रदापयेत् ॥ ५९ ॥
वर्धयेत्पानकं तावद्यावत्पूर्णं प्रमाणतः ॥
नागानां सर्वमेवं तु कन्दरेषु प्रचारयेत् ॥ ६० ॥
श्रमातिनिरन्ध्रावाणां मांद्यपन्नयनयोः ॥
खड्गवाराहमाषैर्वेसवारं प्रकल्पयेत् ॥ ६१ ॥
पिप्पलीमरिचैर्युक्तः शुण्ठीगुडसमन्वितः ॥
वेसवारः प्रदेयः स्यात्क्रमं तेनैव कारयेत् ॥ ६२ ॥
कुमाराचार्यापिण्याकपिष्टो गुडसमन्वितः ॥
प्रदेयो बृंहणार्थाय मांसपानं च दन्तिनाम् ॥ ६३ ॥
प्रसन्ना पञ्चलवणैर्युक्ता त्रिकटुकेन च ॥
वराहमहिषाजाश्वकुक्कुटानां सरोहयोः ॥ ६४ ॥
श्वाविच्छल्लकगोधानां मृगाजाविकमांसजम् ॥
रसपूतं सलवणं मातुलुङ्गरसान्वितम् ॥ ६५ ॥
हिङ्गुसैन्धवसंयुक्तं तथा त्रिकटुकेन च ॥
रसं प्रदापयेन्नागे दाडिमाम्लकसंयुतम् ॥ ६६ ॥
तैरेव मांसैः पूर्वोक्तैर्यवसत्त्वकल्पितैः ॥
दाडिमत्रिकटुकोन्मिश्रैर्गुडशर्करया युतैः ॥ ६७ ॥
ग्रासयेद्बृंहणार्थाय वेसवारं प्रदापयेत् ॥
पञ्चकुर्मांसपानं च चास्मै संदापयेत् ॥ ६८ ॥

---

१ क. °मुकेषु सं° । २ क. प्रकल्पयेत् ।

एतेनैवोपचारेण रक्ष्यो मासद्वयं गजः ॥
रसमग्र्यं प्रवक्ष्यामि वारणानां यथाक्रमम् ॥ ६९ ॥
अर्धोदकं मत्स्यरसी रसं नागाय दापयेत् ॥
तापं मात्रश्च निर्गच्छेद्यथापूर्वमरोगवान् ॥ ७० ॥
यथाशास्त्रसमुद्दिष्टं वस्तवं समुपाचरेत् ॥
एवमाप्यायते नागो न च तैलं विपद्यते ॥ ७१ ॥
मृद्नाति मर्दनीयानि हार्याण्यपि हरत्यसौ ॥
स्निग्धरोमच्छविर्नागः स्नेहितः स सुखी भवेत् ॥ ७२ ॥
तैलमात्रा तु या प्रोक्ता सर्पिषो वा विधीयते ॥
उपचारविधिश्चैव यथा तैले तथैव च ॥ ७३ ॥
सर्पिराश्वयुजे मासि वारणेभ्यः प्रदापयेत् ॥
सुखोष्णं पाययेत्सर्पिः प्रातरुत्थाय वारणम् ॥ ७४ ॥
कारयेत्कट(ट)कच्छन्नं हस्तिवेश्मास्य सर्वतः ॥
समृद्धे चाग्निसंदीप्तं प्रतिवाहोऽनुकारयेत् ॥ ७५ ॥
गोकरीषसुम्व(मं)कीर्णा शय्या चास्य हिता भवेत् ॥
यवसानि च देयानि हरितानि मृदूनि च ॥ ७६ ॥
कवलाश्च प्रदेयाः स्युस्तथा वातहरा गजे ॥
प्रभाते मुदितं दृष्ट्वा ततश्च क्रमयेद्गजम् ॥ ७७ ॥
धनुःशतायतां वीथीं वाहयेत्प्रथमं गजम् ॥
बलं प्रकृतिसात्म्यं च जीर्णाजीर्णं च लक्षयेत् ॥ ७८ ॥
द्वितीयं द्विगुणं वीथ्यां वाहयेद्वारणं शनैः ॥
षष्ठाहिकं तु याते तु स्नपनं चास्य निर्दिशेत् ॥ ७९ ॥
यवृ(दु)ष्णाय यवसं वारणाय प्रदापयेत् ॥
प्रभाते स्थानमासीनं दृष्ट्वा सुमनसं गजम् ॥ ८० ॥
सर्पिः प्रदापयेत्तस्मै पूर्वोक्तैस्तैरुपक्रमैः ॥
एष ते सर्पिषः प्रोक्तो विधिवच्छस्य(?) भूमिप ॥ ८१ ॥
दुर्बलो बलमाप्नोति मांसं तेनास्य वर्धते ॥
तथाऽध्वानं विषहते शीतमुष्णं च वारणः ॥ ८२ ॥
खेदं विषहतेऽत्यर्थं न च कर्माणि सज्जते ॥
इत्येते सर्पिषः पाने गुणाः सम्यक्प्रकीर्तिताः ॥ ८३ ॥

१ क. °केऽनिषा° ।

एतावच्चाभयार्थं तु निश्चितं वक्ष्यते त्वतः ॥
मद्या चैव यथा योज्या तन्मे शृणु महीपते ॥ ८४ ॥
चैत्रवैशाखयोर्मध्ये दद्यान्मद्यानि ते भिषक् ॥
महिषाजवराहाणां ये चान्ये वनचारिणः ॥ ८५ ॥
नक्रपाठीनमत्स्यानां ये च स्युर्जलचारिणः ॥
मद्या तेभ्यः प्रदातव्या वसा वाऽपि महीपते ॥ ८६ ॥
रोमाः सम्यक्प्रशाम्यन्ति बलं तेजश्च वर्धते ॥
मांसोपचितसर्वाङ्गैर्लाघवं चास्य जायते ॥ ८७ ॥
मद्यानां विधिरित्येष गुणाश्चापि प्रकीर्तिताः ॥
क्रमः स एव पूर्वोक्तो यथोक्तः सर्पिषो यथा ॥ ८८ ॥
तथाचरेच्चयोरिदं वैद्यः शास्त्रविशारदः ॥
पयांसि विविधानि वारणं तान्यपनिकम् ॥ ८९ ॥
मेदनीयानि जाम्नीयाकृष्णान्येतानि पार्थिव ॥
उत्कलं रोहिषं चैव कर्णिकारं तथैव च ॥ ९० ॥
उप(त्प)लं पद्मकं चैव यथान्यथाकुलं स्मृतम् ॥
संघातार्थं प्रदेयं स्यान्मोहपीतेषु हस्तिषु ॥ ९१ ॥
इति स्वबुद्ध्या विनयेन निश्चया-
दुवाच तेभ्यं विधिवत्प्रपालितम् ॥
करोम्यरोगं बलिनं च वारणं
स चापि राजा नियमानुपाल्यताम् ॥ ९२ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदमहाप्रवचने चतुर्थे उत्तरस्थाने स्नेह-
पानविधिकथनं नाम द्वितीयोऽध्यायः ॥ २ ॥

अथ तृतीयोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
अन्नपानविधिं कृत्स्नं श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥
मेदक्षौद्रकमुख्यानां घृततैलरसस्य च ॥
गुणदोषाश्च ये तत्र तन्मे व्याचक्ष्व पृच्छतः ॥ २ ॥
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
नानाभागोपयोगज्ञः पापहीनमहारथिकः ॥ ३ ॥

तथारे द्व्यरत्नी च आयामस्तस्य दन्तिनः ॥
द्व्यरत्नी वितस्तिश्च नाहोऽप्यस्य विनिश्चितः ॥ ४ ॥
अङ्गुलानि च चत्वारि पञ्चमांशो यवस्य च ॥
स्मृतोत्तमस्य नागस्य वर्षवृद्धिः समुच्छ्रये ॥ ५ ॥
पञ्चाङ्गुलं सत्रियवं यवभागश्च पञ्चमः ॥
तस्य स्याद्वृद्धिरायामे परिणाहे षडङ्गुला ॥ ६ ॥
अहीनाङ्गस्य नागस्य जन्मना वा विरोधिनः ॥
समवेतप्रमाणं स्याद्विषमं स्यादतोऽन्यथा ॥ ७ ॥
वृद्धाः क्षीणाश्च बालाश्च न निर्देश्या हि रूपतः ॥
बालः समस्तरूपश्च क्षीणो वृद्धश्च हीयते ॥ ८ ॥
पूर्वकायेऽधिको यश्च यश्च पश्चात्प्रपीडितः ॥
विक्षिप्तसक्थिसंक्षिप्तो हीनग्रीवामुखस्तथा ॥ ९ ॥
यो विशालशिरोग्रीवाग्रविकोरासित(?)स्तथा ॥
धेमतश्चापि कुब्जश्च पृष्ठतश्च समुन्नतः ॥ १० ॥
वामनो मदहीनश्च विकटोऽन्यथसमाहितः ॥
अल्पयं दीर्घगात्रश्च अप्रमेयश्च षोडश ॥ ११ ॥
विपरीतगुणा येऽन्ये निर्माणे चाविरोधिनः ॥
तेषु मानं प्रयोक्तव्यं समस्तगुणयोगतः ॥ १२ ॥
तदर्धे चैव मातव्यो नागो वैद्यैः प्रमाणतः ॥
ततः सुस्थितसर्वाङ्गः समादेशाभयो गजः ॥ १३ ॥
प्रगुणतो मानमतो मातव्यो दण्डरज्जुभिः ॥
तस्मान्मध्यस्थयोः कार्यो दण्डस्तिर्यक्प्रतिष्ठितः ॥ १४ ॥
भूमिसंस्थेन दण्डेन ऊर्ध्वं दण्डं चरं स्पृशेत् ॥
स च येन प्रदेशेन दण्डो दण्डं च संस्पृशेत् ॥ १५ ॥
*ताप्यस्त्वमेव तथास्य प्रमाणं वर्ष्मणो भवेत् ॥
तत्र षड् चैव तत्र स्युः पञ्चैव पारिभाषिताः ॥ १६ ॥
उत्तमाधममध्यानां वर्ष्ममाने च लक्षणः ॥
तिर्यग्दण्डायतः स्यात्पः कुम्भपेचकयोर्गजः ॥ १७ ॥

* 'ताप्य' इति 'स्याप्य' इति वा भवेत् ॥

१ क. °स्य वाप्यमना वा विरोधिनः ॥६॥ च° । २ क. अर्धाक्षीवश्च कु° । ख- नथाग्रश्चापि कु° ।

आयामस्तु प्रमाणज्ञो रत्नना पञ्चाथ योजयेत् ॥
तत्र भवेच्चाष्टौ च तेषामायामसंमितो ॥ १८ ॥
उत्तमाधममध्यानामरत्नीनां तु पञ्चभिः ॥
परिणाहः प्रमाणज्ञः कलाकारणमाश्रितः ॥ १९ ॥
रत्ना तथापि नागानां प्रमाणं संप्रवक्ष्यते ॥
तथाष्टौ परिणाहः स्यादधमो गज मध्यमः ॥ २० ॥
दश रत्नीपरीणाहो गजस्योत्तमो भवेत् ॥
वर्ष्म त्रिविधमप्युक्तं गजानां नपकोविदैः ॥ २१ ॥
तत्र प्रमाणं प्रोक्तं तु हस्तिनीनां महामुने ॥
तदहं ज्ञातुमिच्छामि त्वत्सकाशाद्द्विजोत्तम ॥ २२ ॥
त्रिविधं हस्तिनीनां तु वर्ष्मरूपं प्रचक्ष्व मे ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ २३ ॥
षड्रत्नीसमुत्सेधा त्वष्टारत्निसमायता ॥
कलाभागप्रदेशे च नवरत्निसमायतः ॥ २४ ॥
सिता मानविधिज्ञैस्तु यदि स्यात्सर्वतः समा ॥
उत्तमं वर्ष्मरूपं तु हस्तिनीनां विनिर्दिशेत् ॥ २५ ॥
पञ्चहस्तसमुत्सेधा आयामे सप्तसंमिता ॥
अष्टहस्तिपरीणाहा मध्यवर्ष्माणि पूजिताः ॥ २६ ॥
चतुर्हस्तसमुत्सेधा आयामे षट्(ड्)संमिताः ॥
अधमा सप्तहस्ता तु परिणाहेन कीर्तिता ॥ २७ ॥
इति वर्ष्मप्रमाणं तु प्रोक्तं हस्तिनीषु ते ॥
उत्तमाधममध्यानां प्रवक्ष्यामि यथाक्रमम् ॥ २८ ॥
नायोत्थिकं भवेदेकं वैपरीतकं तथा ॥
प्रकुञ्जस्य मध्यस्य प्रयोगे पञ्चकं स्मृतम् ॥ २९ ॥
उत्तमायां प्रयोगे तु हस्तिन्यां तत्प्रकीर्तितम् ॥
मध्यमं वक्तुमिच्छामि तस्याः श्रेष्ठं मनीषिणः ॥ ३० ॥
पञ्चयोजनमा राजन्मध्यमा हस्तिनी भवेत् ॥
योजनानि तु चत्वारि अधमायास्तथा वदे ॥ ३१ ॥
वैपरीत्यविधौ संज्ञा वर्षे चैव विभावयेत् ॥
गुणान्तमरत्नेनाह तत्प्रमेयास्तु कल्पयेत् ॥ ३२ ॥

यवानुपानः कार्यः स्यादिति मे निश्चिता मतिः ॥
अत्यराश्च भवेद्धेनुरराजस्य प्रमाणतः ॥ ३३ ॥
उत्तमा मध्यमस्याप्यमध्यमा चाधमस्य च ॥
जघन्यामपि जानीयाच्चतुर्हस्तसमन्विताम् ॥ ३४ ॥
वर्ष्मतश्च विशेषो भवेत्त्वाहारजो विधिः ॥
*अरत्नेश्च नागानां द्रोणमित्युपदिश्यते ॥ ३५ ॥
कुडवस्य प्रमाणं तु पूर्वं पलमुदाहृतम् ॥
स्नेहमेकादि नागेभ्यो विधिनाऽनेन दापयेत् ॥ ३६ ॥
भक्तस्नेहप्रमाणं तु प्रवक्ष्याम्यत उत्तरम् ॥
तथारत्नौ प्रदातव्यं स्नेहस्यार्धाढकं भवेत् ॥ ३७ ॥
तण्डुलानां भवेद्द्रोणमरत्नौ लवणस्य तु ॥
पलानि दश तावन्ति गुडस्यापि प्रमाणतः ॥ ३८ ॥
द्वादश द्रोणपर्यायो माषाणां तुलया पुनः ॥
भारः स विहितो द्रोणो यवसस्य प्रमाणतः ॥ ३९ ॥
आर्द्रस्य यवसस्यैतत्प्रमाणं परिकीर्तितम् ॥
शुष्काणां च लघूनां च शष्पाणां च नराधिप ॥ ४० ॥
चर्याद्विगुणितं भारं यवसार्थे महीपते ॥
फलितानां तु धान्यानामर्धभारं प्रदापयेत् ॥ ४२ ॥
तेषामेव समर्थानां त्रिभागोनं प्रदापयेत् ॥
अथैककवला मात्रविधा भुञ्जीत वारणः ॥ ४२ ॥
सर्पिर्गुडसमायुक्तं दध्ना सपयसेन वा ॥
सायमर्धा सलवणा सस्नेहरसका नृप ॥ ४३ ॥
विधायोगाच्चतुर्भागः कवलग्रासनादिकः ॥
ग्रीष्मे भवेयो नागानां मोदकश्च महीपते ॥ ४४ ॥
वृद्धत्वाच्चापि नागानां बद्धो···तृणराठ्यः ॥
आढकीयं भवेद्द्रोणं पयसा मेदकस्य च ॥ ४५ ॥
मांसस्य पञ्चपञ्चाशदेषा स्याद्द्रोणसंख्यया ॥
वराहोरभ्रमहिषाः शशाश्च हरिणा मृगाः ॥ ४६ ॥
स्वच्छन्दतो प्रदातव्या रसार्थं दन्तिनां नृप ॥
कुक्कुटाश्च मयूराश्च लावातित्तिरिभिः सह ॥ ४७ ॥

---

* 'अराजस्य' इति भवेत् ॥

आटीहंसाश्च नागानां रसार्थं विहिताः स्मृताः ॥
द्रोणे त्रिकुडवस्नेहसंस्कारार्थं पलं स्मृतम् ॥ ४८ ॥
स्नेहस्य कुडवः पूर्णो रसप्रायोदकं भवेत् ॥
मर्दितो तेन विधिवद्धिया भुञ्जीत वारणः ॥ ४९ ॥
भुक्त्वा वाऽनुपिबेन्मद्यं पीत्वा भुञ्जीत वा पुनः ॥
रसा हि वै महाराज शेषा दोषकराः स्मृताः ॥ ५० ॥
वारुणी मेदकस्तथा रसस्यार्धांशकं भवेत् ॥
विषापोमात्तु द्विगुणं सर्पिः क्षीरं प्रपाययेत् ॥ ५१ ॥
द्विगुणं तु विषापोगात्पादभागोदकं पिबेत् ॥
मानरेव गजो भुञ्जेत्(?) द्विगुणोदकतैलकम् ॥ ५२ ॥
भक्तैकमयमेदो मेदकेषु विधीयते ॥
मेदकाख्यपि नागानामिति मे निश्चिता मतिः ॥ ५३ ॥
विडक्षारीक्षुकुम्भाषमाषगोधूमसंकृताः ॥
दधिसौवीरकयुता पूपश्चेदकसंज्ञिताः ॥ ५४ ॥
यदा मद्यं पिबेन्नागो द्राक्षया सह वाशिनम् ॥
तदा द्राक्षा प्रदातव्या भक्तषोडशभागिकी ॥ ५५ ॥
भक्तप्रस्थप्रमाणेन योगं प्रयत्य कारयेत् ॥
तैलेन लवणेनापि यथोद्दिष्टप्रमाणतः ॥ ५६ ॥
गुडेनापि च संयोगो यथोद्दिष्टेन योजनः ॥
कुडवं दीपनेऽस्य रसनार्थं प्रदापयेत् ॥ ५७ ॥
प्रसन्नस्य वाणकोशस्य प्रसवे गैरिकाद्युतः ॥
मरन्द्रू दाडिमे देयो चूतस्य कुडवो भवेत् ॥ ५८ ॥
गैरिकस्य पलं तत्र द्रोणे दद्याद्विचक्षणः ॥
दन्तिमे कुडवः पूर्णस्तैलस्याथ घृतस्य च ॥ ५९ ॥
प्रबले शिशिरे देयो मद्यसंयोजने भवेत् ॥
अर्धमस्यामु विशेषो गजानां मासमेकम् ॥ ६० ॥
तस्मादनुगुणः स्नेहो विहितः संचये नृप ॥
देयः पटुपांशुकां शीर्षगैरिकस्य यथाक्रमः ॥ ६१ ॥
कोशातक्यान्त नागस्य स्नेहपीतस्य भोजनम् ॥
शुक्रस्य चानुपानं च कोशातक्यानि पार्थिव ॥ ६२ ॥

अत्रापि बहवो दृष्टा गुणाः शास्त्रविशारदैः ॥
इति स्नेहविचारस्य सप्रमाणगुणक्रमः ॥ ६३ ॥
सविधायोगयवसं सर्वं देयं च कीर्तितम् ॥
यवसमाणं समुद्दिष्टं त्रिविधेष्वेव हस्तिषु ॥ ६४ ॥
तत्क्रमेण समुद्दिष्टं दीप्ताग्न्यधिकं भवेत् ॥
ततोऽङ्गपतिरव्यग्रो विनयात्पुनरुत्थितः ॥ ६५ ॥
अब्रवीच्चतुरव्यग्रः पुनः प्रश्नमनुत्तमम् ॥
भगवन्यवसयोर्दिष्टं कीर्तयिष्याम्यहं तथा ॥ ६६ ॥
ये तु यस्मिन्गुणा दृष्टे तन्मे व्याचक्ष्व पृच्छतः ॥
ततः प्रोवाच भगवानादितो यवसे गुणान् ॥ ६७ ॥
तृणं तृष्णापहं प्रोक्तं तृणं तृप्तिकरं स्मृतम् ॥
मनःप्रसादनं चैव प्रहर्षोद्दीपनं तथा ॥ ६८ ॥
वातपित्तकफानां च रक्तस्य च निबर्हणम् ॥
तृणं हरयेत(?) दोषानुदीर्णानपि हस्तिनाम् ॥ ६९ ॥
तृणाद्वर्धयते प्राणांस्तृणात्संभवतीन्द्रियम् ॥
भयग्लानिविपन्नत्वं तन्द्रा निद्रा च हस्तिनाम् ॥ ७० ॥
तृणं यथा नाशयति शृणु यस्माच्च कारणात् ॥
सोमादापः संभवन्ति तृणमप्स्वथ जायते ॥ ७१ ॥
यत्किंचित्स्थावरं चैव प्रभूतं जङ्गमं तथा ॥
आप्याययति तत्सर्वं सोमो वै पृथिवीगते ॥ ७२ ॥
सोमात्मकाश्च मातङ्गाः शीतसात्म्या विशेषतः ॥
तस्माद्यदा व्रजेदर्कः पर्यायेणोत्तरां दिशम् ॥ ७३ ॥
क्षीयन्ते हि तदा नागा हीनप्राणा भवन्ति च ॥
दक्षिणायनसंस्थे तु सूर्ये सुखपरायणाः ॥ ७४ ॥
आस्वादयन्ति निष्पन्नं तृणं नागा न संशयः ॥
भवन्त्युत्साहवन्तश्च तृणेनैव मतङ्गजाः ॥ ७५ ॥
तदा च *पुष्टं विपुलं बलवन्तो भवन्ति च ॥
ततः प्रहृष्टमनसो रमन्ते धेनुकादिभिः ॥ ७६ ॥

* 'पुष्यन्ति पुष्टं' इति भवेत् ।

१ क. °धरेष्वेव ।

विहरन्ति च सरितः स्वैरचारा मतङ्गजाः ॥
ते स्वैरं तृणपुष्टास्तु स्वैरमाश्रित्य वारणाः ॥ ७७ ॥
गच्छन्ति मैथुनं स्वैरं गर्भं चैवाऽऽदधत्यपि ॥
वशाः स्वैरं प्रजायन्ते तृणास्तृणगुणैः तथा ॥ ७८ ॥
तृणेन तेजो भवति तृणात्संभवतीन्द्रियम् ॥
सर्वे तृणास्तृणचरास्तृणभावास्तृणप्रियाः ॥ ७९ ॥
तृणेन नागा जीवन्ति वने ग्रामेऽपि वा तथा ॥
भुक्त्वा नरो हि मृष्टान्नं किंचित्स्वादेत्पयोपरि ॥ ८० ॥
तथा तृणेन तृणानां किंचिदेवानुभोजनम् ॥
आसवैः क्षीरपानैर्वा रसैर्वा विविधैर्हितैः ॥ ८१ ॥
नस्यवस्तिक्रियाभिर्वा भेषजैर्वा पृथग्विधैः ॥
न हि धारयितुं शक्यास्तृणहीना मतङ्गजाः ॥ ८२ ॥
तृणैर्विना न जीवन्ति तृणसात्म्यतया गजाः ॥
तस्मात्तृणेन हीनानां जीविते संशयो ध्रुवम् ॥ ८३ ॥
तत्समुत्था बलवर्णतेजोबलगुणा नृप ॥
अनापन्नतृणाहारा ह्यसमक्लाशिनः नरा ॥ ८४ ॥
वने दोषा न गच्छन्ति तथा कवलवर्जिताः ॥
अत्यन्तोचितभावाद्धि मातङ्गानां तृणं हितम् ॥ ८५ ॥
यथा कवलसंयुक्तं कुवलं पल्लवानि च ॥
वधबन्धपरिक्लिष्टा ग्राम्याः परवशं गताः ॥ ८६ ॥
अभ्युद्धर्तुं न शक्यन्ते परसेनैव केवलम् ॥
क्षीरक्षीराम्बुरसैर्विधाय वल्लोऽपि च ॥ ८७ ॥
सम्यग्व्याधितनिघ्नैश्च भोजनैर्विविधैरपि ॥
विधिवत्ते गजा पुष्टाः कर्तव्याः पृथिवीपते ॥ ८८ ॥
नृपोऽङ्गराजः पप्रच्छ पालकाप्यं महामुनिम् ॥
चतुष्प्रकारो यः प्रोक्तस्त्वयाऽऽहारो महामुने ॥ ८९ ॥
स कथं दन्तिने देयस्तन्ममाऽऽचक्ष्व पृच्छतः ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ ९० ॥
भोज्यं भक्ष्यं च पेयं च लेह्यं चेति चतुर्विधम् ॥
तत्र भोज्यं भवेद्ग्रासमात्रार्थं दृष्यन्विदम् ॥ ९१ ॥

---

१ ख. दानवाः ।

संस्कृतासंस्कृतं चैव द्विविधं संप्रचक्ष्यते ॥
तत्र संस्कृतमेवाग्रे प्रवक्ष्यामि यथाक्रमम् ॥ ९२ ॥
अन्नं मांसरसं स्नेहं कल्कं च तथा दधि ॥
संस्कृतं त्वेकतः प्रोक्तमसंस्कृतमतः शृणु ॥ ९३ ॥
एतैर्विवर्जितं स्वच्छं तण्डुलाश्च नराधिप ॥
वक्ष्यामि भक्ष्यं नागानां तन्मे निगदतः शृणु ॥ ९४ ॥
कुवलं पल्लवं मङ्गु शालान्यङ्कमूलमेव च ॥
तृणानि चेति जानीयाद्भक्ष्यं राजन्विशेषतः ॥ ९५ ॥
पेयान्यपि च वक्ष्यामि यानि नागाः पिबन्त्यतः ॥
यवागूक्षीरमद्याश्च रसाश्च विविधा नृप ॥ ९६ ॥
स्नेहाः सर्वे महीपाल संस्कृतासंस्कृताश्च ये ॥
पंचकं त्रितयं चैव महास्नेहश्च पार्थिव ॥ ९७ ॥
तैलं घृतं यमकं च वसा च त्रितयं स्मृतम् ॥
स्नेहाः सर्वेऽथ मांसानि मेदोमज्जारसास्तथा ॥ ९८ ॥
वसा चाप्येकतः पक्त्वा महास्नेह इति स्मृतः ॥
पेयान्येतानि प्रोक्तानि लेहानपि निबोध मे ॥ ९९ ॥
उत्कारिका वेसवारो मेदकाश्च नराधिप ॥
उत्कारिकां प्रवक्ष्यामि तन्मे निगदतः शृणु ॥ १०० ॥
प्रियालबीजं खर्जूरं मस्तकं पनसानि च ॥
यवगोधूमचूर्णानि घृतेन सह पाचयेत् ॥ १ ॥
मत्स्यण्डिका शर्करा वा तत्र देया यथाक्रमम् ॥
लवणगोधूमचूर्णानि पिप्पलीस्तण्डुलास्तथा ॥ २ ॥
घृते गुडं च संयोज्य पाचयेन्मतिमान्भिषक् ॥
सक्तवश्च यवजा वै क्षौद्रं वाऽथ कसेरुकः ॥ ३ ॥
तथा पुष्करबीजानि लवणचूर्णानि कारयेत् ॥
घृतेन मरिचैर्वाऽपि युक्त्या सम्यग्विपाचयेत् ॥ ४ ॥
एवं दद्यात्तु नागस्य कायाग्निबलवर्धनम् ॥

इत्युत्कारिका ॥

अतः परं प्रवक्ष्यामि वेसवारं महीपते ॥ ५ ॥

---

१ क. ख. यमकं ।

मांसं निरस्थि सुस्विन्नं पुनर्दृषदि पेषितम् ॥
पिप्पलीशुण्ठिमरिचगुडसर्पिःसमन्वितम् ॥ ६ ॥
एकस्थं पाचयेत्तच्च वेसवारस्ततः स्मृतः ॥
* —— ...... —— —(¹द्वितीयमपि मे शृणु) ॥ ७ ॥
एतेनैव च कल्पेन दध्ना संयोज्य पाचयेत् ॥
एतद्दद्यात्तु नागानां बलमांसविवर्धनम् ॥ ८ ॥

इति वेसवारः ॥

मेदकांश्च प्रवक्ष्यामि नागानां बलवर्धनान् ॥ ९ ॥
गोधूमानथ सुस्विन्नान्घृताक्तान्समापुतान् ॥
गुडेन द्विगुणीकृत्य देयो बलविवर्धनः ॥ ११० ॥
तिलकल्केन माषांश्च तैलेन सह योजयेत् ॥
द्वितीय एष विज्ञेयः कृमिकोष्ठविनाशनः ॥ ११ ॥
सुस्विन्नं पक्वकूष्माण्डं निस्तुषं मधुनान्वितम् ॥
क्षीरं घृतं गुडं चैव एकस्थं पाचयेद्बुधः ॥ १२ ॥
एवं दद्यात्तु नागेभ्यो बलमांसविवर्धनम् ॥
इत्येते मेदकाः प्रोक्ताः वारणानां यथाक्रमम् ॥ १३ ॥
यस्मादन्नं वर्धयते मांसं मेदोऽथ शोणितम् ॥
मेदका इति निर्दिष्टास्तस्मादेते मनीषिभिः ॥ १४ ॥

इति मेदकाः ॥

स्यात्सप्तविंशत्पलकः स्नेहस्य परिमाणतः ॥
पञ्चविंशत्पलः प्रस्थो मेदके परिमाणतः ॥ ११५ ॥
शेषाणां पञ्चषड्विंशल्लोणानामुपयुज्यते ॥
क्षीरस्य तु शतः प्रस्था घृतप्रस्थः प्रकीर्तितः ॥ १६ ॥
रसद्रोणं च दातव्यं षट्प्रस्थार्धाढकं तथा ॥
स्नेहस्यार्धाढकं तस्यास्तोमस्यार्धमुक्ता तथा ॥ १७ ॥
मेदकस्याऽऽढकं देयं पञ्चमायस्य एव च ॥
श(त)स्य कोलाढकं चैव गुडस्यार्धपलं तथा ॥ १८ ॥

* कल्पचन्द्रको ' . ' इति त्रुटिचिह्नं वर्तते । तालपत्रे तु त्रुटिचिह्नं नोपलभ्यते । ¹ ' द्वितीयमपि मे शृणु ' नास्ति पाठः कपुस्तके ॥

१ क. °द्वाकानि च° ।

मद्गः क्षेद्दसो देपस्त्वपीडस्तथैव च ॥
मांसक्षीररसैर्युक्तं सायाह्ने भोजयेद्गजम् ॥ १९ ॥
यथाविकटुकस्यापि पलं द्रोणे विचक्षणः ॥
यथाऽपि च विधा देया साय्यं प्रातश्च दन्तिनाम् ॥ १२० ॥
दध्ना पलमथापुक्ता गुडेन च समन्वितः ॥
पूर्वाह्णे भोजयेन्नागं प्रतिपत्तिमतन्द्रितम् ॥ २१ ॥
विधागुणान्प्रवक्ष्यामि विस्तरेण यथाक्रमम् ॥
सर्वमर्गाणि मरेयानि धान्यानि मनुजाधिप ॥ २२ ॥
शालयो यवगोधूममसीहयोऽथ प्रियङ्गवः ॥
कोद्रवाश्चैव धान्यानि विहिता हीनभोजने ॥ २३ ॥
यथोपपर्णानि तेषां तु भोजनं तु विशेषतः ॥
प्रापने द्विरदः सम्यक्सुखं शय्यां विगाहते ॥ २४ ॥
भक्तस्नेहगुणानन्यान्प्रवक्ष्याम्यत उत्तरम् ॥
भक्ते सर्पिः प्रदातव्यं तैलं वा दन्तिनां भवेत् ॥ १२५ ॥
तत्र ये पित्तला नागाः प्रकृत्या तनवश्च ये ॥
प्रदक्षीणाश्च वृद्धाश्च धेनुकाश्च च विश्रुताः ॥ २६ ॥
बाला दुर्बलपादाश्च ये च नेत्रातुरा गजाः ॥
सर्पिस्तेभ्यः प्रदातव्यं तथा ये च नवग्रहाः ॥ २७ ॥
तस्य दत्तस्य ये दृष्टा गुणास्तांस्तु निबोध मे ॥
ताड वर्णकरं श्रेष्ठमारोग्यं बृंहणं परम् ॥ २८ ॥
आयुष्यं च विषघ्नं च सर्वरोगविनाशनम् ॥
पुनं वर्णरसोपेतं गन्धसंपन्नमेव च ॥ २९ ॥
(* बलं वर्णं जवं चैव सत्त्वं नागस्य वर्धयेत् ॥
प्रवर्धितं स्थिरं चैव आतदस्थं तथैव च) ॥ ३० ॥
भवेद्द्रोणमदुष्टं वा कांसभिर्वा समान्वितम् ॥
एवंविधं भोज्यमानो बलाधानः महीपते ॥ ३१ ॥
बलात्प्रवृत्यमानस्तु भोजनं नाभिनन्दति ॥
आप्यायायेदपाचिता ये गजाः स्थलशारदाः ॥ ३२ ॥

* धनुश्चिह्नान्तर्गतान्तःस्थो नास्ति पाठः कपुस्तके ॥

१ क. °भ्रा च चक्षंसु° ।

वातोऽनुलोमतां याति ये चान्ये वातसंभवाः ॥
ये च वातकफजाः क्रिमिजा ये च दारुणाः ॥ ३३ ॥
चतुस्तथापि स्रवन्ते ये च नागेन कुञ्जराः ॥
स्नेहनं कुरुते यस्तु तेषां वातप्रकोपने ॥ ३४ ॥
तैलं तेभ्यः प्रदातव्यं ये चापि क्रिमिकोपिनः ॥
धेनुकानां च विविधं तैलमेव महीपते ॥ १३५ ॥
नाली च मधुपिच्छलात्तैलाम्लरससमन्विते ॥
तैलं वातहरं प्रोक्तं स्थूलमांसविवर्धनम् ॥ ३६ ॥
क्रिमिकोपप्रशमनं चातुर्यादिकरं तथा ॥
उत्साहजननं चैव तेजोबलविवर्धनम् ॥ ३७ ॥
गर्भिणी तेन विधिवद्द्विपा युञ्जीत वारणः ॥
स्नेहेन सहिता हस्ता सम्यग्बृंहयति द्विपम् ॥ ३८ ॥
वर्षास्वपि मन्दाग्निं सम्यक्कारिणमर्पयेत् ॥
तैलं यवोद्धृतं पथ्य सद्यःप्रशमनक्रमम् ॥ ३९ ॥
भवेत्स्वादुरसं पथ्यं तेन पुष्टिः प्रजायते ॥
पद्मासने भवेत्स्निग्धं क्षारामिदूषितं च यत् ॥ १४० ॥
यद्वा कषायसंयुक्तं यवाम्लरसदूषितम् ॥
अतीसारकरं तेषां वैवर्ण्यकरमेव च ॥ ४१ ॥
एवंविधं तु वर्षेष्वेतं नागस्य पार्थिव ॥
अतो लवणदानस्य गुणान्वक्ष्यामि भूमिप ॥ ४२ ॥
अहितं चैव पथ्यं च यथार्थं चास्य प्रकल्पयेत् ॥
सौम्यं वर्षेष्वास्य दानं चास्यानुलोमयेत् ॥ ४३ ॥
वातमेदोऽस्थिमज्जानो विवर्धयति दन्तिनाम् ॥
शोषयेत्कुमयास्ति च बलं चाग्निमन्वयेत् ॥ ४४ ॥
व्याधिप्रशमनं प्रोक्तं तेजोबलविवर्धनम् ॥
छेदनं पाचनं चैव वमनं रक्तवर्धनम् ॥ १४५ ॥
लवणं दीपयेदग्निं पश्चाद्याहारमेव च ॥
*हविषसत्योरपिज्ञानं नित्यं हि लवणं भवेत् ॥ ४६ ॥
क्रिमिकोपप्रशमनं वातरोगनिवर्हणम् ॥
लवणं भक्षयित्वा तु बलं विन्दति वारणः ॥ ४७ ॥

* पक्ष्मयोः इति लक्षणदर्पणपाठः ।

शोणितस्य जलं योनिस्तेजसा तच्च रज्यते ॥
तच्च गुल्मवते देयं विषालेपेन वर्जितम् ॥ ४८ ॥
पश्चात्पचाने भृष्टस्य हेतुं स्पष्टनिदर्शनम् ॥
यद्वदिन्धनसंभारं कृत्वा वह्निर्नियोजितः ॥ ४९ ॥
भस्मी करोति लवणं तद्वत्पचति भोजनम् ॥
आहारोपचिताश्चैव दोषाभावस्त्वत्र संशयः ॥ ५० ॥
न चाऽऽहारोऽन्यसत्त्वानां गजाहारेण संमितः ॥
वृक्षभङ्गलतागुल्मतृणशस्यादिभिर्गुरुः ॥ ५१ ॥
विषायोगश्च सुतरां लवणेन विना कृतः ॥
अभक्ष्य इव पक्वानि बहुदोषकरो भवेत् ॥ ५२ ॥
कोपयत्यनिलं क्षिप्रमजीर्णं जनयत्यपि ॥
यत्कुर्यान्मूत्रनिका भुक्ता तदेवाल्लवणा विधा ॥ ५३ ॥
तस्माल्लवणदानं तु न प्रमुह्येत्कदाचन ॥
रोमकं सैन्धवं चैव विडं सौवर्चलं तथा ॥ ५४ ॥
स्वर्जिकाऽथ यवक्षारं सामुद्रमथवोद्भिदम् ॥
महावेगानि करिणां लवणानि यथाविधि ॥ १५५ ॥
दद्याद्दोषे दशपलं सामुद्रस्यैव भूमिप ॥
शेषाणां पञ्चपालिकमर्धानि विद्धि पार्थिव ॥ ५६ ॥
इक्षुः क्षीरं घृतं मांसं वसा मेदक एव च ॥
उत्कारिका वेसवारो मेदकेन समो तथा ॥ ५७ ॥
नैव मद्याय देयानि दद्यात्क्षीणाय वा पुनः ॥
नवग्रहं दम्यमानमुत्तमं मांस लम्भयेत् ॥ ५८ ॥
गुडतण्डुलकैर्युक्ता भक्ष्यात्पथ्यमेऽहनि ॥
वेणवैः शाकतैर्भिन्ना त्याग भक्षयतस्ततः ॥ ५९ ॥
पलं पलं वर्धयते यावच्च कुडवो भवेत् ॥
ततो द्विपलिका हारिद्राम्लतण्डुलानां गुडस्य च ॥ १६० ॥
अत्र त्रिगुणितं देयं तस्माच्चापि चतुर्गुणम् ॥
अनेन क्रमयोगेन(ण) विवर्धयेद्दशाढकम् ॥ ६१ ॥
अतः प्रस्थविवृद्धिः स्यात्तावत्पूर्णा विधा भवेत् ॥
कर्षं गुडस्य तु पलं प्रथमे तण्डुलाढके ॥ ६२ ॥

यावद्गुणप्रमाणं तु पूर्वोक्तं ते मया नृप ॥
क्रमेणानेन हस्तिस्तु अवस्थापि निश्चिता ॥ ६३ ॥
यदा मात्रं तु सकलं सात्मी भवति हस्तिनः ॥
ज्ञातो गुडस्य कर्तव्यस्तथैव दृष्टिवर्धने ॥ ६४ ॥
अथ दद्यात्परं मात्रां दन्तिनां मधुभावितः ॥
सक्तवस्त्वम्बुकाः सर्पिर्गुडेन सह योजिताः ॥ १६५ ॥
मध्याह्नेऽन्विते तापं बलमांसविवर्धनम् ॥
यदा सर्वांश्चतान्सारयेत्ततः पेयेषु योजयेत् ॥ ६६ ॥
क्रमेण पूर्वयोगेन(च) विशेषस्त्विह वक्ष्यते ॥
तैलं तोयेन संयुक्तं सर्पिस्तैलेन संयुतम् ॥ ६७ ॥
सर्पिश्च मेद(:)संयुक्तं मेदश्च वसया सह ॥
वसया योजयित्वा च मज्जा देया यथाक्रमम् ॥ ६८ ॥
एतासामिह शेषाणां पूर्वोक्तो यो भवेत्क्रमः ॥
अभ्यवहारपाने तु नियुक्ते तस्य दन्तिनः ॥ ६९ ॥
अथ भोज्ये क्रमश्चायं कर्तव्यो वक्ष्यते तु यः ॥
पिण्डमेकं ततो द्वौ त्रींश्चतुरश्च प्रदापयेत् ॥ १७० ॥
अनेन क्रमयोगेन(च) या च पूर्णा विधा भवेत् ॥
स्नेहस्य व्यवहारे तु क्रमो ह्यन्यश्च वक्ष्यते ॥ ७१ ॥
कुडवं प्रथमं दद्यात्ततो द्विगुणितं पुनः ॥
तस्मात्त्रिगुणितं दद्याच्चतुर्गुणमतः परम् ॥ ७२ ॥
वृद्धिरेषा भवेत्कार्या यावत्स्नेहप्रमाणतः ॥
स्नेहयुक्ता विधा दत्ता सम्यग्बृंहयति द्विपम् ॥ ७३ ॥
वर्धयेच्च ह्यऽप्यग्निं सम्यक्स्निग्धमेव च ॥
स्नेहं च पीत्वा विधिवद्रोच्यते बालको यदा ॥ ७४ ॥
तदा तत्र गुणा दृष्टाः ज्ञातव्याः कुशलैरिह ॥
अयनाज्ज्वरदहनस्थो बालको ह्युपशाम्यति ॥ १७५ ॥
कृशरोगाश्च नागानां न भवन्त्युग्रवेदनाः ॥
सुखं परिणमत्यन्नं गजस्नेहस्योपयोजनात् ॥ १७६ ॥
प्रसादं च प्रयच्छन्ते व्याधयोऽनिलसंभवाः ॥
नागानां (० बालसमये) तृष्णा चाऽप्युपशाम्यति ॥ ७७ ॥

---

० ङ पुस्तकयोर्वृद्धिह्रासान्तरमतः पाठो नोपलब्धः ।

वंशभङ्गुविपत्तस्थः पवनपोत्रेव मारुतः ॥ ७८ ॥
न कुप्यति भवेच्चापि वारणः स्थिरतां गतः ॥ ७९ ॥
संशुष्कयवसाहारैर्व्यायामक्लमनैः कृशैः ॥
आपन्ने ये गजानां वै वाहिता चैव मातृषु ॥ १८० ॥
गर्भ एवानिलस्तेषां कुपितो गात्रसंधिषु ॥
संचिन्वन्(?) कुप्यति मुहुः स्कन्धं च कुरुते सकृत् ॥ ८१ ॥
गात्रावकुञ्चनमित्याहुस्तं द्विपं शास्त्रकोविदाः ॥
तेषां न कम्पतेऽत्यर्थं विक्षेपो गात्रसेचनैः ॥ ८२ ॥
तेषामपि भवेत्पानमथ तैलस्य पूजितम् ॥
महोदराश्च ये नागास्तथा येऽपि च शारदाः ॥ ८३ ॥
मत्स्या सर्वलवणैरन्विता तेषु दापयेत् ॥
वारुणी दीपयत्यग्निं जनयत्यङ्गलाघवम् ॥ ८४ ॥
प्रसादनीया हृष्या च बृंहणी वीर्यवर्धिनी ॥
कृमिघ्ना तैलसंयुक्ता श्लेष्माणं च निरस्यति ॥ १८५ ॥
हिता व्यायामभग्नाय तथा वाऽग्निकरोगिणे ॥
क्षुधितातिवर्धमानां विष्पुतभस्तवनसाम् ॥ ८६ ॥
मदिरा द्राक्षया युक्ता हिता क्षौद्रेण चान्विता ॥
भाराध्वगमनश्रान्ता वधबन्धार्दिताश्च ये ॥ ८७ ॥
संहता ये च विहिता गजाः संपानकर्मसु ॥
(¹तेभ्यो गुडयुता देया दन्तिभ्यो मदिरा सदा ॥ ८८ ॥
वातपित्तसंनिपातेषु विहिता ये मर्मविद्धिपैः ॥
वारुणी पद्मासवयुक्ता रसैर्लवणवर्जितैः) ॥ ८९ ॥
तेभ्यो गजेभ्यो दातव्या यथान्यायं महीपते ॥
समानाहेऽग्निदोर्बल्ये तृषितकानाह एव च ॥ १९० ॥
मदिरा दन्तिने पथ्या लवणैः सह योजिताः ॥
वातोन्मथितदेहाश्च नागगुल्माश्च ये गजाः ॥ ९१ ॥
तेषां मधु हुरा देयो पद्मासवकर्णैर्युता ॥
श्रान्ता ये तृषिता ये च भिन्नमूत्रपुरीषिणः ॥ ९२ ॥

¹ चतुर्थिद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

१ क. न कुप्यति मुहुः सक्तं नागस्य कुक्षौ सहृत् । २ क. °या यथान्यायं महीपते ॥ मा° ।

अरोचकार्दिता ये स्युरानाहपरिचारिणः ॥
मन्दाग्नयश्च ये नागास्तथा च कफकोपिणः ॥ ९३ ॥
तेभ्यो कादम्बरी देया वारुणेभ्यो विशेषतः ॥
असंयातं तथाऽम्लं च लवणं च विवर्जितम् ॥ ९४ ॥
अग्निना दूषितं यच्च यच्च भाजनदूषितम् ।
कृमिदोषैर्विमुक्तानि मद्यानि संप्रयोजयेत् ॥ १९५ ॥
यत्स्वच्छं तैलवर्णं स्याद्घृतमण्डाभिधं च यत् ॥
करवीरोत्पलाम्भोजैस्तुल्यगन्धं रसस्फुटम् ॥ ९६ ॥
आस्वादे तिक्तमधुरं मद्यलिङ्गं समन्वितम् ॥
ईदृशं पाययेन्मद्यमदुष्टं दोषवर्जितम् ॥ ९७ ॥
तस्य दोषान्प्रवक्ष्यामि दुष्टमद्यस्य पार्थिव ॥
पानदोषाञ्छमयेदन्नं क्रियया च यथागमः ॥ ९८ ॥
विदाहमाध्मका कुर्यादाध्मानं विमोहिका ॥
त्वग्दोषं पुंस्त्वता कुर्यात्प्राणाश्च स्वरोपघम् ॥ ९९ ॥
उन्मत्ततामतिसंज्ञा दत्ता पित्तं प्रकोपयेत् ॥
अर्धं मद्यविमोहानी स्यात्कफवातानिलार्तिकम् ॥ २०० ॥
माण्डपुष्टा तथाऽऽध्मानं श्लेष्मणा स्याद्विवर्जिता ॥
एवमेते सुरादोषास्त्वत्र सम्यगुदाहृताः ॥ १ ॥
सुरा भ्रमं नाशयति श्लेष्माणं चापकर्षति ॥
दीपयेज्जठराग्निं च भुक्तं चास्यानुलोमयेत् ॥ २ ॥
स्वप्नं करोति हृदयमाह्लादं चापि नन्दति ॥
बलोदर्यकरी चैव सद्यःकृमिविनाशिनी ॥ ३ ॥
सुराया इति वै नागगुणदोषाः प्रकीर्तिताः ॥
दन्तिभ्यो दापयेद्राजन्बलमांसाभिवृद्धये ॥ ४ ॥
यथोपयोगे नागानां (*अन्येषां विहितो विधिः ॥
अतः परं प्रवक्ष्यामि मेदकस्य गुणोदयम् ॥ २०५ ॥
गजानामन्नपानशीलानां मेदकः सह संयुताः(?) ॥
बृंहणस्तु नागानां) मदं चैव विवर्धयेत् ॥ ६ ॥

* चिह्नद्वयान्तर्गतोऽधिकः पाठः कपुस्तके ।

१ क. °थ यच° ।

पित्तप्रशमनो बल्यस्तृष्णोपशमनस्तथा ॥
भेदकः संमतावस्थो ग्रीष्मे तु मदकारिणा ॥ ७ ॥
विरूक्षाणां कषायेण मुद्गान्स्विन्नान्प्रमाणतः ॥
कषाये खादिरे चैव प्रभाते च सुशीतलान् ॥ ८ ॥
कुटजस्येङ्गुदस्यापि किण्वस्य च गुडस्य च ॥
सुरसचूर्णं समालोड्य निम्बस्य च धवस्य च ॥ ९ ॥
षण्णां तु पञ्चपञ्चाशत्प्रमांशानामरत्निनाम् ॥
सौवीरस्याऽऽढकेनाथ तिलतैलेन वा पुनः ॥ २१० ॥
सर्वं संमर्द्य तत्सर्वं प्रातरेव प्रदापयेत् ॥
मांसं च वर्धते तेन न च कुप्यन्ति धातवः ॥ ११ ॥
दोषाश्चास्य न कुप्यन्ति विरूक्षान्भेदकादतः ॥
अक्षीवाणां कषाये तु कुलत्थान्पाचयेद्भिषक् ॥ १२ ॥
रजन्या वा कषायेऽस्य मसूरान्क्वाथयेन्नृप ॥
खादिरासननिम्बानां चूर्णं च कुटजस्य च ॥ १३ ॥
चतुर्णां पञ्चपञ्चाशन्मधुनः काञ्जिकस्य च ॥
कुडवः कुडवश्चात्र प्रदातव्यो विजानता ॥ १४ ॥
स्यात्त्रिकण्टगुडतैलानां प्रत्येकं पञ्चविंशतिः ॥
सर्वं संमर्द्य तत्सर्वं प्रातः शीतं प्रदापयेत् ॥ २१५ ॥
शरीरं चीयते धातुं दोषाः कोपं न यान्ति च ॥
ग्रहणी दीप्यते चास्माद्गजस्याक्षीवभेदकात् ॥ १६ ॥
मांधूमसक्तूंश्चापि चूर्णयित्वा च पूर्ववत् ॥
तामो सम्यक्कृतं चूर्णं वाऽप्यपकं सुशीतलम् ॥ १७ ॥
प्रभाते तदुपादाय दापयेद्दधिकण्वयोः ॥
बलानागबलाशुककोलोत्पलकन्दजाम् ॥ १८ ॥
तथेक्षुरकबीजानां चूर्णं च मधुपाहरेत् ॥
सर्वेषां पञ्चपञ्चाशत्प्रमांशानामरत्नितः ॥ १९ ॥
तैलेन सर्पिषा वाऽपि दध्नस्त्वर्धाढकेन च ॥
दधियुतं च संमर्द्य प्रातरेव प्रदापयेत् ॥ २२० ॥
पित्तप्रशमनं बल्यं तृष्णादाहप्रणाशनम् ॥
कफवातहरं पथ्यं मदसंजननं तथा ॥ २१ ॥

गोधूमभेरकं दद्याद्वारणानां नराधिप ॥
माषास्तु निस्तुषान्तस्तो हस्तिनां वातवेगिवत् ॥ २२ ॥
प्रभाते शीतलं द्राक्षा मृद्वीकागुडकिम्बयोः ॥
क्षीरिकायाः सुचूर्णेन तस्यपानेन योजयेत् ॥ २३ ॥
पञ्चाशत्पलमानेन पञ्चाशानामरत्निवः ॥
तैलेन सर्पिषा वाऽपि दधिस्तवर्णाढकेन च ॥ २४ ॥
एकीभूतं समालोड्य भाजने प्रदापयेत् ॥
भोक्तभेदोविवर्धार्थं दोषप्रशमितं नृप ॥ २२५ ॥
कृष्णां दाहं भयं मृतो नाशयेदग्निमुद्धरेत् ॥
बलं तथ्यं बलं वीर्यं जनयेन्माषभेरकः ॥ २६ ॥
संजातशोणिता शोभा भविष्यन्त्या च दन्तिनः ॥
मासाय नृपते देयो गोधूमाख्यस्तु भेरकः ॥ २७ ॥
पञ्चमेधिनी शोभा तमस्का च हस्तिनः ॥
मासाय त्रिपदो भेद दातव्यो माषभेरकः ॥ २८ ॥
तमतत्यकथा युक्तो यस्तु स्याद्गतिदीर्घपा ॥
अतीवभेरकस्तस्मै दातव्यो दन्तिनं नृप ॥ २९ ॥
प्रथमायां द्वितीयायां देयो गोधूमभेरकः ॥
तृतीयायां चतुर्थ्यां च शोभायां माषभेरकः ॥ २१० ॥
गजस्य पञ्चषष्ठ्यां शोभायां कुल्माषभेरकः ॥
मासाय सप्तमी शोभा तिलकुल्माषस्तु भेरकः ॥ २११ ॥
पूजितो वार्षिके काले तिलकुल्माषभेरकैः ॥
हिमे शीताय संजातपुलिष्ठराय दन्तिने ॥ १२ ॥
गोधूमभेरकं दद्यात्सर्वकालेषु योगवित् ॥
ग्रीष्मे शरदि दातव्यः कार्ये माषभेरकः ॥ ११ ॥
कुष्ठार्शपित्तदा कम्पो वृषणो भगदर्पनः ॥

—:0:—

क्षीरस्य गुणदोषं तु यथावत्तम्भेदतम्भवे ॥ १४ ॥
गव्यं माहिषमाजं वा त्रिविधुक्तं पयो भवेद् ॥
दाय्येभ्यः प्रयासभ्यं सम बोधे गुणाः स्मृताः ॥ २१५ ॥

१ क. समस्तानेन । २ क. °प्रभाते ।

शीतलं मधुरं स्निग्धं जीवनं बृंहणं हितम् ॥
आयुष्यं चैव वृष्यं च पयः परमभेषजम् ॥ ३६ ॥
(*ग्रहणीदीपनं चैव तथोपचयकरं तथा ॥
मधुरस्निग्धभावाभ्यां वातरोगविनाशनम्) ॥ ३७ ॥
शैत्यान्माधुर्यभावाच्च पित्तप्रशमनं नृप ॥
एवमुक्तैर्गुणैर्युक्तं कफे नातिहितं भवेत् ॥ ३८ ॥
तथैव रक्तपित्तानां भेषजं परमं स्मृतम् ॥
क्षीरपानाद्धि सततं जायन्ते प्राणिनो भुवि ॥ ३९ ॥
निर्विकाराः प्रवर्तन्ते तस्मात्सर्वहितं पयः ॥
गर्भाभिष्क्रान्तमात्रस्तु क्षीरं नागोऽभिनन्दति ॥ २४० ॥
मात्रान्वर्धयते क्षीरं वर्णं च जनयत्यपि ॥
तस्मात्क्षीरं नृपश्रेष्ठ हस्तिनां दापयेद्भिषक् ॥ ४१ ॥
वृद्धास्तरुणका ये च धेनुकाश्च च विश्रुताः ॥
तेभ्यः प्रयततः क्षीरं केवलं संप्रदापयेत् ॥ ४२ ॥
संजातबलमांसेषु सर्पिष्कं संविधीयते ॥
तेन संजायते नागः प्रबलत्वकनूरुहः ॥ ४३ ॥
स्थिरोपचितगात्रश्च प्रसन्नेन्द्रियमानसः ॥
चक्रादिभिश्च युक्तं च रात्रिपर्युषितं च यत् ॥ ४४ ॥
दोषान्प्रकोपयत्येतद्दोषजनोपहतं च यत् ॥
तृष्णां छर्दिं च जनयेद्धर्ष्यां कृशयत्यपि ॥ २४५ ॥
सद्यःश्रुतमसंसृष्टं पयः सर्वगुणावहम् ॥
[1]इमेष्वेव विकारेषु क्षीरपानं न शस्यते ॥ ४६ ॥
मन्यास्तम्भे हनुस्तम्भे अर्दिते सापतानके ॥
शिरस्तापे चास्थिभङ्गे ग्लाने शूने तथैव च ॥ ४७ ॥
कोष्ठमूकेषु सर्वेषु योनिमूत्राश्च ये स्मृताः ॥
प्रवाहिकायां दातव्यं पयो मध्यं प्रमाणतः ॥ ४८ ॥
रुद्धे वाते कृशे क्षीणे पित्तरोगहतेषु च ॥
धेनुकासु च दातव्यं भग्नेषु विभ्रमेषु च ॥ ४९ ॥

* चतुश्चिह्नान्तर्गतः नास्ति पाठः क पुस्तके । [1] आर्षप्रयोगोऽयम् ।

१ क. °पयेतच्च योज° ।

वयोऽतीतेषु हीनेषु ये चापि क्षतशोणिताः ॥
विहिताः संनिपातेन ग्रहणी येषु वा पुनः ॥ २५० ॥
मदक्षीणाश्च ये नागा विदग्धकवलाश्च ये ॥
क्षीरं तेभ्यः प्रदातव्यं नागेभ्यो हितमिच्छता ॥ ५१ ॥
बलवन्तो दर्पवन्तः सर्वक्षीणा भवन्ति ये ॥
श्रमाभिभूता ये वा स्युर्ये चाप्यध्वगता नृप ॥ ५२ ॥
क्षीरपानं परं तेषामारोग्याय बलाय च ॥
एवमेतन्महीपाल मनसश्च प्रसादनम् ॥ ५३ ॥
यथावदनुपूर्वेण नित्यमेव भिषग्वरः ॥
न मदेही पिबेत्क्षीरं न कृमी क्षयरी तथा ॥
दन्तुनिर्भिन्नगात्रश्च न श्विती नैव कामली ॥ ५४ ॥
न व्रणी न किलासी च न च पामी पिबेद्द्विपः ॥
न पिबेत्कुष्ठगुल्मार्तो ज्वरगण्डी च वारणः ॥ २५५ ॥
एवमेतेषु रोगेषु क्षीरं वैद्यो न दापयेत् ॥
वातव्याधौ प्रदातव्यमथवा वारिमिश्रणा ॥ ५६ ॥
इत्येते कीर्तिताः सम्यक्क्षीरदानस्य [illegible] ॥
गुणदोषाश्च विविधा यथावदनुपूर्वशः ॥ ५७ ॥

अतः परं प्रवक्ष्यामि तोयदोषगुणान्नृप ॥
क्षीरदोषे यथाऽप्युक्तमम्लवृद्धमथैव च ॥ ५८ ॥
वातं प्रकोपयत्येतत्स्निग्धं रूक्षं च दूषयेत् ॥
संज्ञातरसवीर्यं च वारणाय प्रदापयेत् ॥
मध्यं माहिषमाजं वा तथा पक्वमथैपुनम् ॥
वातपित्तप्रशमनं क्षीरं चक्षुष्यमप्यतः ॥ २६० ॥
ऋतुना प्रविभागेन (च) प्रवक्ष्यामि नराधिप ॥
प्रावृषि स्निग्धमधुरमुष्णमम्लं च दापयेत् ॥ ६१ ॥
कषायमधुरं शीतं शरत्काले हितं तथा ॥
अत्युष्णं च शरत्काले लवणं च विवर्जयेत् ॥ ६२ ॥
(*हेमन्ते तिक्तकटुकं कषायाम्लं च दापयेत् ॥)
कटुकं चैव तिक्तं च कषायमधुरं तथा ॥ ६३ ॥

* चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ॥

लवणं च यथासात्म्यं वसन्ते दन्तिनां नृप ॥
एवमृतुपुटेष्वेषु विभज्य गुणदोषतः ॥ ६४ ॥
स्वबुद्ध्या चैव सात्म्यं विभज्य गुरुलाघवम् ॥

—:०:—

विधायां शालयः श्रेष्ठा व्रीहयश्च नराधिप ॥ २६५ ॥
मध्यमं यवगोधूममधम्य(ध)मं कङ्गूकोद्भवम् ॥
(*त्रिविधेष्वपि भागेषु यथावदनुपूर्वशः ॥ ६६ ॥
विधाकाले सुर्जनिता (?) रसं तर्पयते नृप) ॥
रसस्तर्पयते रक्तं रक्तं मांसमथापि च ॥ ६७ ॥
मांसं तर्पयते मेदो मेदोऽस्थीनि च दन्तिनाम् ॥
अस्थिभिः पुष्यते मज्जा मज्जा शुक्रं च पुष्यति ॥ ६८ ॥
शुक्रेण तर्पितो देहो हृष्टस्तुष्टमना भवेत् ॥
सत्त्वोत्साहबलोपेतः स्वस्थाङ्गश्च जायते ॥ ६९ ॥
स्वस्थाविकलता तस्य दोषा वातादयो नृप ॥
समीभवन्त्यथाग्निश्च मदस्तस्मात्प्रवर्तते ॥ २७० ॥
मदः श्रीर्विजयस्तेजः कान्तिरारोग्यमेव च ॥
गन्धः सम्पन्नगुणत्वं च सत्त्वमुत्साहमेव च ॥ ७१ ॥
एवमादीन्महीपाल विधा वर्धयते गुणान् ॥
एतेषामेव सर्वेषामभावे विधया विना ॥ ७२ ॥
उपनाहे भवेन्मात्रा यवगोधूम एव च ॥
अनुमांसप्रमाणेन कर्तव्यश्चोपनाहकम् ॥ ७३ ॥
मोदकान्समवायांश्च तथैवोत्कारिकाश्च याः ॥
देयमापतिशीताय पूर्वं क्षीरं च दन्तिने ॥ ७४ ॥
तथैवोदकमन्यं च ग्रीष्मकाले प्रदापयेत् ॥
एवं पेयं तथा लेह्यं भोजनं च प्रदापयेत् ॥ २७५ ॥
नरेन्द्र त्रिदशेन्द्रेभ्यो यदृष्टोन्मादमात्मनः ॥
वास्तिसिद्धौ च ये दृष्टा गुणा ये वास्तिकर्मभिः ॥ ७६ ॥
वास्तितैलप्रदानेन गुणाः सम्यक्प्रकीर्तिताः ॥
वास्तवानावासादिष्टा गुणास्तु तत्त्वतस्तु ॥ ७७ ॥

* धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

१ घ. कुपरिता । २ क. °नश्च प्र° ।

कटसंरुद्धभागानां कटस्नेहनमिष्यते ॥
तत्र ये हेतवः प्रोक्ताः कटश्रो(स्रो)तोनिरोधने ॥ ७८ ॥
शरशक्त्यृष्टिखड्गानां प्रतिघातैः पृथग्विधैः ॥
प्रतिहस्ता(स्त्य)भिघाताद्वा प्रकोपादनिलस्य च ॥ ७९ ॥
वृक्षप्राकारभित्तीनां हरणाद्घृष्यतः कटौ ॥
ज्वलनाभिहि(ह)तस्यापि रुध्येते दन्तिनः कटौ ॥ २८० ॥
एवं बहुविधोपायैः संनिरुद्धकटो गजः ॥
दानपूर्णायतकटस्तिष्ठत्यल्पपरिश्र(स्र)वः ॥ ८१ ॥
सलोष्टकाष्ठैर्मातङ्गः कटान्तमभिघर्षति ॥
बहुशश्चावकिरति वालुकोदककर्दमैः ॥ ८२ ॥
लिङ्गैरेतैर्विजानीयात्संनिरुद्धकटं गजम् ॥
कटश्रो(स्रो)तोविशुद्ध्यर्थमिमं कुर्यादुपक्रमम् ॥ ८३ ॥
भद्रदारुहरिद्राभ्यां लवणैर्लशुनैरपि ॥
विडङ्गैः पञ्चमूलाभ्यां सरत्नेन च दन्तिनः ॥ ८४ ॥
सर्पिःसिद्धमनिर्दग्धमन्तःश्रो(स्रो)तः प्रदापयेत् ॥
बस्तिदानेन नागस्य विशुद्धिरुपजायते ॥ २८५ ॥
माहिषं त्वथ गव्यं वा तत्र बस्तिं तु ग्राहयेत् ॥
तत्र नेत्रं दृढं बद्ध्वा काञ्चनं रौप्यमेव वा ॥ ८६ ॥
कोरटं पुष्पवृन्ताग्रं सुश्लक्ष्णं सुसमाहितम् ॥
द्वादशाङ्गुलमायामं प्रवेशे त्र्यङ्गुलं भवेत् ॥ ८७ ॥
मुद्गमात्रप्रमाणेन स्रोतसाऽथ समन्वितम् ॥
बस्तिदानेन नागस्य कण्ठशुद्धिर्भविष्यति ॥ ८८ ॥

—:():—

अतो गुणान्प्रवक्ष्यामि विधिवद्गात्रसेचने ॥
सर्वसेके च नागानां यथावदभिनिश्चितम् ॥ ८९ ॥
गुरुबन्धाभिघाताभ्यां विरुद्धपरिवर्तनात् ॥
विषमे कर्दमे निम्ने सलिले वाऽपि धावतः ॥ २९० ॥
स्खलनैर्भर्त्सनैर्बन्धैः प्ररोधैर्वाऽपि दन्तिनाम् ॥
अभिघातैश्च विविधैः स्तम्भो गात्रेषु जायते ॥ ९१ ॥

---

१ ख. सरसेन। २ क. °स्य विशुद्धिरुपजायते ॥ ८८ ॥ माहिष्ये(ण) कण्ठशुद्धिर्भविष्यति न संशयः। अ° ।

तथैव विषमाहाराच्छयनाद्वाऽपि दन्तिनाम् ॥
दुःस्थानाच्चापि नागानां जायते गात्ररोगता ॥ ९२ ॥
तेषां तैलेन सिक्तानां सर्पिषा वसयाऽपि वा ॥
भवन्ति मृदुभूतानि श्वयथुश्चोपशाम्यति ॥ ९३ ॥
आदीप्तस्य प्रशमनं हरणे प्रतिहस्तिनः ॥
सहसा वाऽप्यभिहतस्तरणान्महतोऽपि वा ॥ ९४ ॥
क्षुभ्यन्ते दन्तिनोऽङ्गानि ततस्तिष्ठति वारणः ॥ २९५ ॥
स्तब्धगात्रापरकरः श्र(स्र)स्तश्रवणवालधिः ॥
भवेच्चैव ततः क्षिप्रं काष्ठभूतः सुदुर्मनाः ॥ ९६ ॥
यथोद्दिष्टप्रमाणेन सर्पिषा तस्य दन्तिनः ॥
सेचनं सर्वगात्राणां विहितं नृवृतेन वा ॥ ९७ ॥
शेषैर्वाऽपि यथायोगमित्ययं विहितो विधिः ॥

—:():—

अतः परं प्रवक्ष्यामि शिरसो म्रक्षणे गुणान् ॥ ९८ ॥
विकृतान्यङ्कुशाग्रेण दन्तितो घातनेन च ॥
ततो वृष्टानि सहसा कवलैः कुवलैरपि ॥ ९९ ॥
निर्वाणमुपगच्छन्ति भवन्ति च नराधिप ॥
शिरांसि स्निग्धकेशानि तथाऽलंकारमेव च ॥ ३०० ॥
दृष्टिश्च नाविला तस्य श्रो(स्रो)तश्चास्य न हन्यते ॥
कोशाद्विक्षरते मूत्रं प्रभिन्नस्य महीपते ॥ १ ॥
दन्तिनः पच्यते कोशः सर्व एव समन्ततः ॥
तस्य गैरिकयुक्तेन घृतेन परिषेचनम् ॥ २ ॥
तत्रारत्नेः प्रदातव्यं गैरिकस्य पलं भवेत् ॥
वृश्चिकाः कृकलाशा(सा)श्च तथैव गृहगोलिकाः ॥ ३ ॥
छर्दनात्क्रमपश्चान्ये बहवो वारणे हिताः ॥
रात्रौ विनिःसृता धाम्नो भुजङ्गाश्च महाविषाः ॥ ४ ॥
व्पातिष्ठन्त्यप्रदीपत्वाद्भक्षयित्वा च तान्गजः ॥
तीव्रां बाधामवाप्नोति मरणं वा नियच्छति ॥ ३०५ ॥
सुमना दुर्मनस्त्वं च कृतत्वं लिण्डमूत्रयोः ॥
सुखं विज्ञायते रात्रौ दीपे ज्वलति दन्तिनः ॥ ३०६ ॥

तस्माद्गजहितार्थं च रक्षणे चानुजीविनाम् ॥
गजागारे प्रदीपार्थं स्यात्तैलकुडवो नृप ॥ ७ ॥
दन्ताभ्यङ्गे तु सामर्थ्यमत ऊर्ध्वं प्रवक्ष्यते ॥
दृढौ स्थिरौ दन्तवेष्टौ करीरी चैव दन्तिनाम् ॥ ८ ॥
विषाणैः प्रहरतां च न हीयन्ते च दन्तिनाम् ॥
न राजयश्च जायन्ते स्निग्धा दन्ताश्च भूमिप ॥ ९ ॥
एतत्सर्वं महीपाल दन्ताभ्यङ्गे विधीयते ॥

नेत्राभ्यङ्गे तु सामर्थ्यमत ऊर्ध्वं शृणुष्व मे ॥ ३१० ॥
अभीक्ष्णं साधु पश्यन्ति घृताभ्यङ्गेषु योजिताः ॥
अक्षिरोगा न जायन्ते स्थिरा दृष्टिस्तु जायते ॥ ११ ॥
नेत्रजानि तु रोमाणि स्निग्धान्यस्य दृढानि तु ॥
भवन्ति न न भिद्येत दृष्टिस्तस्य कदाचन ॥ १२ ॥
शोभते चैव नेत्रं च निर्वाणं परमेव च ॥
एतत्सर्वं महीपाल नेत्राभ्यङ्गे विधीयते ॥ १३ ॥
पादाभ्यङ्गे तु नागानां वक्ष्यते गुणविस्तरम् ॥
नखा न परिभिद्यन्ते स्थिराः पादा भवन्ति वा ॥ १४ ॥
न चाध्वनि निषीदेत न च क्षीणतलो भवेत् ॥
न जायन्ते कचाः पादे न चक्षुरुपहन्यते ॥ ३१५ ॥
सर्वश्रमविनाशाय पादाभ्यङ्गो विधीयते ॥
यथा हि पादपः सिक्तः सर्वतः परिमाणतः ॥ १६ ॥
मूलतः स्कन्धतश्चापि सत्पुष्पफलवानपि ॥
एवं स्नेहपरीषेकैर्वारणास्तु विधीयते ॥ १७ ॥
प्रीणाति रोमकूपेभ्यः प्रविष्टो मांसमेदसी ॥
रोमान्तराणि नागस्य त्रिभिर्मात्राशतैः स्थितः ॥ १८ ॥
शुद्धाः प्रविशति स्नेहस्त्वक्चतुर्भिश्च गच्छति ॥
रक्तं व्रजति वीर्येण मात्राणां पञ्चभिः शतैः ॥ १९ ॥
षड्भिर्मांसं प्रपद्येत शतैर्मेदश्च सप्तभिः ॥
शतैरष्टाभिरस्थीनि मज्जानं दशभिर्व्रजेत् ॥ ३२० ॥
मांसं मेदोऽस्थि वाऽऽसाद्य स्वशक्तिपरिणामतः ॥
तत्रस्थः शमयेद्रोगान्वातपित्तकफात्मकान् ॥ २१ ॥

---

१ ख. घ. °द्दोस्थि तामासा° ।

इत्यङ्गायेदं शुभलघुपदयुक्तं
दाना(नं) स्नेहानां द्विरदहितं विधिज्ञः ॥
कृत्स्नं प्रोवाच क्रमगुणविधियुक्तं
विप्रो नागानां प्रथितविपुलबुद्धिः ॥ ३२२ ॥ इति ॥

इति श्रीपालकाप्ये गजायुर्वेदशास्त्रे महाप्रवचने श्रीपाठे
चतुर्थ उत्तरस्थानेऽन्नपानविधिकथनं नाम
तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

अथ खलु भगवन्तं पालकाप्यं रोमपादोऽङ्गाधिपतिरधिकतरमपृच्छत् । 'भगवन्, कति स्नेहविशेषाः, कति स्नेहपाकविशेषाः, कति स्नेहद्वाराणि, कति स्नेहसंयोगाः, केषां च व्याधीनामुपशमनकः स्नेह उपदिश्यते, किमुत्तममध्यमाधमानां नागानां स्नेहप्रमाणम्, केषां च स्नेहपानं प्रदेयम्, तदशेषेणाभिधत्तां भगवान्' इति ॥

अथ भगवानुवाच पालकाप्योऽङ्गरोमपादाय—'शृणु भद्रमुख स्नेहान्, स्नेहविशेषांश्च । तद्यथा—नवनीतं घृतं मस्तिष्कं मज्जा तैलं फलतैलं मेदो वसा शुक्रमित्येते नव स्नेहविशेषाः । तत्र शुक्रमस्तिष्कव्यपेतान्गार्ग्यः प्रोवाच । प्रधानतः स्नेहान्सप्ताग्निवेशः । चतुरः स्नेहांस्तेषां प्राह गौतमः सर्पिस्तैलं वसा मज्जा चेति । भरद्वाजस्तु स्थावरजङ्गमौ द्वौ विशेषौ प्राह । स्थावरस्तु वीरुद्वनस्पतिर्वानस्पत्यजः । तत्र तैलं प्रधानम् । जङ्गमस्तु पयोदधिनवनीतघृतानि । तेषु घृतं प्रधानम् । पानविरेचनानुवासनोत्तरवस्तिककटबस्त्यभ्यङ्गगात्रसेकनस्यकर्माणि च । एतेषु प्रयोज्याः स्नेहाः । तत्र प्रवरमध्यमाधमवारणानां स्नेहपानं प्रदेयम् । तत्र क्लान्तपिपासितपाकलाभिभूतातियातबलक्षीणमदक्षीणकृशविभिन्नामाशयविकाराणां च बालवृद्धधेनुकानामकृतमुखद्वारणामकामानामन्नपानेष्वप्रसन्नानां च स्नेहपानमादेयं भवति । देया च तेषां विधा स्नेहसंयुक्ता यथाद्रोणप्रमाणविहिता । तयाऽस्य धातुवृद्धिश्छविप्रसादः सौमनस्यं पयसाभिनन्दनत्वं चोपजायते ॥

तत्र मात्राप्रमाणं यथाविचारं स्नेहगतमनुव्याख्यास्यामः ॥

द्रोणेऽर्धाढकीनं प्रमाणं कृत्वोत्तमस्यारत्निप्रमाणस्य विचारः । स्नेहोपयोगेन

पुनराढकम्, तथा कुवलपल्लवयवसलवणविधाप्रमाणं यथोपदिष्टमन्नपानविधौ विधेयम्। एवमेतेन प्रमाणेन यथाद्रोणमष्टा(व)रत्निसप्तारत्निषडरत्निपञ्चारत्निचतुररत्नित्र्यरत्नीनां स्नेहपानमनुविधेयं भवति। तत्र ग्रीष्मवर्षाशरद्धेमन्तशिशिरवसन्तेषु स्नेहपानमप्रसेयम्(?) । अथ पित्तप्रबलभूयिष्ठानां पित्तनिर्हरणार्थं गोघृतं प्रधानमुपदिश्यते । मेदःश्लेष्मानिलव्याध्यभिभूतानां तैलमष्टारत्निप्रमाणस्य चत्वारिंशदाढकानि पानार्थमुपकल्पयेत्। अच्छपाने स्नेहमपि वर्धयेत्। भक्तस्नेहात्प्रभृति पञ्चविधां ह्रासयेत्तु। तथाऽऽढकविवृद्धिर्यावद्दशाढकम्। अतो द्व्याढकविवृद्धिर्यावद्विंशत्याढकम्। अतः परं त्र्याढकविवृद्धिर्यावत्त्रिंशदाढकम्। अतः परं चतुराढकविवृद्धिर्यावत्पूर्वोद्दिष्टं स्नेहप्रमाणं स्यात्। तस्माद्ग्रहणीं पूर्वमेव कवलपिण्डप्रतिपानैर्दीपयित्वा सुमनसं जीर्णयवसकवलकुवलभक्तं विदित्वा द्विपक्षशयितं वा यथाकालोत्थितमात्मशब्दानुवयसां भिषगुत्सृष्टमूत्रपुरीषं परीक्ष्य स्नेहं पाययेत्। पीतवन्तमभिज्ञाय ऋजुवीथ्यां प्रतिवार्य द्वे पदशते त्रीणि वा स्थानमुपानयेत्। ततोऽस्य चतुरङ्गुलोच्छ्रायं यवसमुपानयेत्। अपबद्धपर्वशष्पं तस्योपयुज्यमानं मुखवैशद्यमुत्पादयति, पिपासां चोपहरति॥

अथैनं लङ्घितस्नेहमभिज्ञाय लोहितकशालितण्डुलानां षष्टिकानां व्रीहीणां विधाष्टभागस्य प्रद्रवभूयिष्ठामस्यन्दिसिद्धामलवणामस्नेहामीषदुष्णां यवागूं पाययेत्। पीतवन्तं चावगाहयेत्। नदीप्रस्रवणसरस्तडागानामकर्दमसलिलेऽवगाह्य स्थानमुपनयेत्। लङ्घनप्लवनहरणीयानि यानि चान्यानि व्यायामजातीयानि सर्वाण्येव विवर्जयेत्। अथैनं स्थानमुप·········यित्वा यवसेनैवोपच्छन्दयेत्। विधाह्रासं चोपनयन्प्रक्रमयेद्यवसेन। एवं प्रतिपूर्णमभिज्ञाय द्विनालिके शय्याभागमुपनयेत्। तस्योपनीतशय्याभागस्य श्वासो वेपथुर्ग्लानिश्चोपशाम्यति। शायकाधोरणैश्चाप्रमत्तैर्मृत्तिकाभक्षणकृताद्दोषात्संरक्ष्यो भवति । मृत्तिकारक्षणं शङ्कुमस्य हस्ते बध्नीयात्। द्विपक्षशयनं(*चैनं) चतुर्नाडिकावशेषायां रजन्यां यथाकालोत्थितमात्मच्छन्दोपयुक्तयवसं सुमनसमभिज्ञाय द्वितीयेऽहनि स्नेहं पाययेत्। एतेनैव क्रमयोगेन(ण) यथोद्दिष्टमष्टारत्निविशिष्टत्र्यरत्न्यधमं दशवर्षात्प्रभृति यावदशीतिकाः, तावत्स्नेहपानं नियोजयेत्। तावन्तं च कालं स्नेहं दद्याद्यावत्स्नेहमतिसार्यते, स्निग्धमृदुलिण्डश्चाभिवर्तते।

तत्र श्लोकः—

कोष्ठनिर्वापणार्थं तु तैलपीतस्य दन्तिनः।
दोषानां(णां) चानुलोमार्थं घृतपानं प्रशस्यते॥

---

* कपुस्तके नास्ति॥

तत्र सर्पिः पाने ··························· ।
सुखोष्णोदकेनावसेकः पानं चानुसंभवः ॥
स्नेहपानगुणानन्यत्(न्यान्)प्रवक्ष्याम्यत उत्तरम् ।
तत्र तावत्प्रवक्ष्यामि महापीनीगुणोदयम् ॥
तत्रोपयुक्तया विधिवदुत्साहं जनयत्यपि ।
लाघवं चैव गात्राणामथवाऽग्नेर्विवर्धनम् ॥
अध्वनस्तूर्णगमनं महतश्चाम्भसो भवेत् ।
लवणं मर्दनं चैव गृहप्राकारदन्तिनाम् ॥
कर्माण्येतानि मातङ्गो गुरूण्यन्यानि यानि च ।
तानि पीनीगुणैर्युक्तः करोत्यपपरिश्रमम् ॥
दृढसर्वेन्द्रियबलः प्रसन्नत्वक्तनूरुहः ।
भवत्युत्साहसंपन्नो यथाकालप्रभेदनः ॥
दुःस्थानमथ दुःशय्यां वधबन्धाभिघातनम् ।
स्नेहपीतो विषहते शीतमुष्णं च वारणः ॥
सुखसंवर्तनप्रेक्ष्यः सुखस्थानोपवेशनः ।
भवत्यपि च मातङ्गः सुखसर्वाङ्गचेष्टितः ॥
अत ऊर्ध्वं तु नागानां सर्वसेके गुणाञ्शृणु ।
गुरूष्मघ्नो मलहरः स्नेहनो बलकृत्तथा ॥
मृदुकरश्चेति गुणाः षडभ्यङ्गे प्रकीर्तिताः ।
एतत्ते कीर्तितं राजन्यथा पृष्टं त्वयाऽनघ ॥

—:():—

[1]अथ प्रोवाच नृपतिर्विनयेन कृताञ्जलिः ।
यस्तु दृष्टो भगवता आहारविधिविस्तरः ॥
सर्वं दास्यामि नागेभ्यो तत्ते तस्मिन्महामुने ।
गुणा ये भगवन्दृष्टा तन्मे व्याचक्ष्व पृच्छतः ॥
एकैकस्य च ये दोषा गुणाश्चैव महामुने ।
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
कृत्याकृत्यविधिं सर्वं वारणानां यथाक्रमम् ।
(*शृणु सर्वमशेषेण यत्त्वं मां परिपृच्छसि ॥

* धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ॥

१ क. °युक्तवि°। २ क. °दतः। दुः° ।

बलं नागेषु राजेन्द्र प्रोक्तं प्रकृतिसंभवम् ।
तद्बलं द्विविधं भूप प्रवक्ष्यामि यथाक्रमम्) ॥
विधास्नेहरसैर्युक्तं पञ्च प्रकृतिसंभवम् ।
तद्धि श्रेष्ठं बलं राजन्बले बलसमाश्रितम् ॥
ततः प्रयोगे सततं विपरामर्षणे तथा ।
षड्रसा यं महीपाल आहारविधिमाश्रिताः ॥
तेषां विभागं वक्ष्यामि यथातथ्यं महीपते ।
कषायं मधुरं शीतं पित्तघ्नं तिक्तमेव च ॥
अम्लं च लवणं चैव तस्य तीक्ष्णं च कोपनम् ।
कषायं कटुकं तिक्तं रूक्षं चानिलकोपनम् ॥
अम्लमुष्णं च लवणं स्निग्धं वातनिवृत्तये ॥
मधुरं लवणं सौम्यं शीतं च कफवर्धनम् ॥
तिक्तं च कटुकं चैव रूक्षं च कफनाशनम् ।
मधुराम्लकषायाणां लवणस्य तथैव च ॥
दद्यादरत्निपलिकं दन्तिने प्रथमे दिने ।
कटुकस्याथ कर्षं च तिक्तस्य द्विगुणं ततः ॥
भागान्वृद्ध्या क्रमः कार्यो यावत्सम्यक्प्रतिष्ठितः ।
पित्तसात्म्यस्य नागस्य परिशुद्धमुखस्य च ॥
पलानि मधुरः पिण्डषष्टिर्देया विजानता ।
तिक्तकः पञ्चहीनो वा दशभिः कटुको नृप ॥
षष्टिरेव कषायस्य लवणस्य तथैव च ।
सप्तहस्ताय दातव्यो हीनो हीनाय दन्तिने ॥
विज्ञेयो विंशतिपलः केवलस्तु प्रमाणतः ।
ज्ञेयमौषधवर्गाणां प्रमाणं पिण्डवत्प्रभो ॥
मात्रया हीनया द्रव्यं विकारं न निवर्तयेत् ।
अधिकं कुरुते दोषं वारणस्य महीपते ॥
तस्मादग्निं बलं कालं शरीरं प्रकृतिं वयः ।
सात्म्यं सत्त्वं च विज्ञाय भिषग्भेषजमाचरेत् ॥
द्रोणे तु विंशतिपलं भेषजानां विधीयते ।

एतत्प्रमाणं (*घृतमनु)विधेयं भवति, अथ वातरक्तपित्तोपशमने वर्तते,

---

* कपुस्तकस्थोऽयं पाठः । ख-घपुस्तकयोस्तु वर्णानां त्रुटिरेव स्थापिता ॥

श्लेष्मणश्चाऽऽधिक्यमभिनिवर्तयति, पित्तजातव्याधीनामुपशमने वर्तते । बलवर्णकरं वृष्यं कृत्स्नाङ्गबृंहणं मतम् । वर्चःसंघातकरमग्निदीपनं श्वयथुगात्ररोगप्रशमनं रक्तगुल्मशोणिताण्डवातरोगोत्कर्णकवातानाहस्कन्धसर्वाङ्गरोगपाण्डुरोगव्रणशोषीशिरोभितापगात्रशोफशूलविद्युन्मालीकदम्बपुष्पहस्तग्रहमन्याग्रहाक्षिरोगसमुत्थानां च सर्वेषामुपशमने सर्पिर्वर्तते । तत्र तैलं पित्तं वर्धयत्युष्णवीर्यत्वात्, कटुकषायत्वाच्च श्लेष्माणमुपशमयति । त्वग्वर्णप्रसादजननं मृदुकरणमेकाङ्गगतानां च व्याधीनां सर्वाङ्गगतानां च, विबन्धभेदनम्, कण्डुकृमिहरम्, कोष्ठविशोधनम्, आक्षेपकानां च बाह्याभ्यन्तरायामज्वगण्डग्रहाभिस्थूलानां च लेखनम्, मृत्तिकाभ्यवहारिणामवसन्नमृत्तिकानां वातश्लेष्मकृतानां च व्याधीनां सर्वेषामुपशमं नयेत् ॥

स्नेहपानाशनैस्तैलमुपदिश्यते ।

वसा तु सर्वाभ्यवहाराणां परमधातुतुल्यवीर्यत्वात्सर्पिषो वातपित्तोपशमनी श्लेष्मा शिरोविरेचकजननी सर्वरसानां च धातूनां परमगुणगुणिता विशेषवती तत्प्रसवधर्मत्वाच्छुक्रस्येति ।

मज्जा तु रसशोणितमांसमेदोस्थिमज्जपरंपरोपयोगत्वाद्रसाद्यानां परमधातुमभिनिवर्तयतीति । सा तु मज्जाक्षये हि भिषजा नागाय दीयते । यो हि धातुः क्षयमुपगतो भवति तस्य च धातोस्तेनैव च धातुविशेषेण वर्धनं कार्यम् । मज्जा वातप्रशमनी श्लेष्मणो भूयः संवर्धनीति । अथ वसातैलादीनां सर्वेषां संस्कृतानामभिहिताच्चतुर्भागविहीनो विधिः । तैलसर्पिर्वसातृवृतानामुपसंस्कृतानामर्धपानां सवितव्यं भवति । व्याधितानामव्याधितानां द्विरदपतीनां यथाव्याधिबलं सर्वत्र सात्म्यं वयो ग्रहणीबलाबलं वा रौक्ष्योक्ष्याकर्षापकर्षेण स्नेहपानं कार्यम् । स्नेहपानात्परमात्प्रभृति यथापूर्वोद्दिष्टस्नेहपानेनोपरमेत । अन्नं यवागूं मुद्गयूषं वा यावद्वा पुरीषं संबध्यते मुद्गयूषस्नेहलवणं दद्यात् । घनमनवसंहतमस्निग्धवर्णमविच्छिन्नश्लक्ष्णं पाण्डुभावोगतमविदग्धमनुष्णमदुर्गन्धमित्येवं बलं शुद्धमभिविज्ञाय त्र्यहं मुद्गयूषरसं भोजनं च दद्यात् । सर्वसेकं च मुखवर्जं तैलेनोपहरेत् । सर्पिषा चास्य मुखमभ्यञ्जयेत् । एतेन क्रमोपचारेण संजातबलमांसस्य यथोक्तप्रमाणं प्रतिपानं दद्यात् । ततः शीतोपचारम् ।

अत ऊर्ध्वं विधोपचारमुपदेक्ष्यते । तस्य यथोक्तविधायाश्चतुर्भागमवधारयेत् । ततोऽर्धां पादहीनां संपूर्णां दद्यात् । संपूर्णायाः स्नेहश्चतुर्भागमवतारयेत् । ततस्तरतमयोगे नव विधाः स्नेहाभ्यासोऽस्य पुनर्मांसं, द्रोणेऽस्य पञ्चाशत्पलप्रमाणं लावतित्तिरकुक्कुटकपिञ्जलानां यथाप्रधानमवचारयेत् । ततो महिषवराह-

शरभशार्दूलखजिवमराश्वतरवृषभोष्ट्ररुरुगवयगोधाश्वविधशल्यकष्टमालकुररमांसैर्यथोद्दिष्टप्रमाणैरसंस्कृतं युक्ताम्ललवणं नातिस्निग्धं च भोजनं दद्यात् । ततः कुलीरशङ्खनकशिशुमाररोहितमत्स्यकूर्ममहाशकलपाठीनचर्मिणाम् । तैलोदकपिप्पलीमरिचसैन्धवलवणसंयुक्तेन मातुलुङ्गरसविस्फार्जितेनार्जकपत्रच्छन्नसुगन्धेन रसेन यथोद्दिष्टप्रमाणेन भोजयेत् । एतैरेव मांसैर्यथोद्दिष्टैः सुकल्पितैर्दधिघृतमरिचसैन्धवशृङ्गवेरगुडशर्करामाधुर्योपगतं सुसंस्कृतमुपकल्पयेद्वेसवारम् । तेनास्य वर्धितशरीरस्य स्थिरकठिनमांसजाव्यायामास्यमर्थं च निषेच्यते । गोजाविमहिषीणां सुसारेण दध्ना युक्तानि भोजनान्युपकल्पयेत् । तथा गुडकृशरादधिपिण्याकरससंयुक्तं पिण्डं भोजनं दद्यात् । तस्यैव बृंहितशरीरस्य कृमिकोष्ठहरं मूत्रबस्तिविशोधनं छविवर्णप्रसादनं सैन्धवसुवर्चिकायवक्षारं सौवर्चलरोमकपिप्पलीमरिचशृङ्गवेरचव्याजमोदतेजोवतीपिप्पलीमूलकहस्तिपिप्पलीचित्रकहिङ्गुविडङ्गपञ्चलवणसंयुक्तं यथोक्तप्रमाणमासवं सुरां वा प्रतिपानं दद्यात् । ततः प्रतिपानपीतस्य षड्रात्रोषितस्य पिप्पलीशृङ्गवेरमधुतैलं सुरा गुड इत्येतत्षडङ्गप्रतिपानं ग्रहणीदीपनं रुचिकरं त्वक्प्रसादनं दद्यात् । एवमेतेन विधिना पीतः स्नेहप्रतिपानभोजनविकल्पैर्विधिविहितैः संरक्ष्यः । विशेषि(ष)तश्च नागानां मृद्भक्षणरक्षणं कार्यम् ।

पर्यवगताक्षं कवलकानां मृत्तिकाणां(नां) च विशेषेणाभिलषमाणं पिपासितमार्गकुवलयवसाभिनन्दिनं दन्तिनं विशेषतः प्रवाहिनं भिन्नलिण्डशय्यास्तम्भाभिकामं प्रमेहवन्तमतिस्निग्धं विद्यात् ।

ग्रथितपुरीषमलाघवोपपन्नं पर्यश्रुकमाध्मातं रूक्षवृत्तलिण्डं दुर्बलाग्निं सलिलकाममतिप्रमाथशीलमस्निग्धं विद्यात् ।

स्निग्धं मृदुस्निग्धविच्छिन्नं पुरीषं लाङ्गूलश्रवणहस्तैः सम्यक्परिवीजिनं प्रसन्नेन्द्रियमानसं सर्वाहारजाताभिकामिनं सुस्निग्धं विद्यात् ।

अथ प्राग्भोजनविधानमनुव्याख्यास्यामः ॥

भोजनास्थापनेऽर्धाढकीयं द्रोणं पूर्वोद्दिष्टप्रमाणेन विधास्नेहं पाययेत् । ततः पश्चाद्रूक्षं भोजयेत् । तेन नागस्याधःकायः प्रबली भवति, वातमनुलोमयति, ग्रहणीं दीपयति, बलवर्णवृद्धिं चोपजनयति, वातमूत्रपुरीषाणां च यथाकालं विसर्गमुपपादयति ॥

यस्तु पूर्वमन्नं भुक्त्वा पश्चात्स्नेहमनुपिबति, तस्य नयनदन्तगात्रगता विकाराः

१ क. ततोऽर्धां पादहीनां बृं° ।

प्रशान्तिमुपगच्छन्ति, वक्षसश्च बलवृद्धिमनुजनयति, पूर्वकायः प्रबली भवतीत्येतदनुभक्तिकं स्नेहपानमुपदिशन्त्याचार्याः ॥

अत ऊर्ध्वं षडृतुविभागजं स्नेहपानविधिमनुव्याख्यास्यामः ॥

यदा तु ग्रीष्मे–विततमयूखः सविता मध्यमकोष्ठमुपगतो भवति, तदा वायुः प्रबलो भवति । खरपरुषोष्णभावात्कालस्य तद्वायुरभिभवति, तदा नृवारणानां नानाविधलिङ्गवेदनाश्च विकारान्कुरुते । तदा तैलमसंस्कृतं त्रिभागजलसंयुक्तं मासमेकं खजाकमथितमच्छं दापयेत्पूर्वाह्णे । ततः प्राप्ते मध्याह्ने चावगाह्य यथा चतुर्गुणसंयुक्तं तृणमुपयोजयेत्, विधां (*चास्मै यथावत्प्रमाणविहितां दद्यात् । मृत्तिकारक्षणं च विशेषतः कार्यम् । एतमुपयोजयेत्, न वातदोषजा विकाराः संभवन्ति । तदा तैलोदकपानेन क्षुत्पिपासासहत्वं प्रसन्नतनुरोमता ग्रहणीदृष्टिबलं मुखशोषं पित्तकोपचयेत् । रोगाभवो बृहत्कायता वारणानां भवति ॥

अथ वर्षाकाले क्षीयमाणदिवसे मन्ददिवसकरविसर्गे निचितजीमूतसलीलविसर्गे कलुषनदीजलावर्तबहुलनानामृदुशष्पमृत्तिकाभक्षणकृतैर्दोषैः क्षीणधातुशरीराणां वारणानां नानाविधलिङ्गवेदना विकाराः संभवन्ति । तस्माद्यथोक्तप्रमाणमानुभुक्तिकं सर्पिस्तैलं यथाकालं पाययेत् । तेनैषां वातपित्तजा विकाराः शान्तिमुपगच्छन्ति । स्थिरकठिनशरीरा अनाविलाः संभवन्ति । निरुपहतवीर्याः संपूर्णदेहाश्च विशेषेण भवन्ति ॥

अथ शरदि[1] दिवसकरकराभिनिर्दिष्टे जगति विहितवीर्यास्वौषधीषु सस्यैर्बहले भूमिभागे मन्दवृष्टिजलधरशब्दवीरुद्वनस्पतिवानस्पत्यानामसमत्वागतवीर्यत्वादुष्णभूयिष्ठास्वौषधीषु तदा सर्पिःक्षीरपानं वारणानां प्रातः संविधेयं भवति तदा च क्षीरसर्पिर्भ्यां निदाघसमुत्थाः पित्तप्रबलभूयिष्ठा विकाराः प्रशान्तिमुपगच्छन्ति ॥

यदा तु हेमन्ते भिन्नजात इव विश्वंभरा इव बाष्पायमाणाः सरितः सपृष्ठजलमभिवहन्ति तदा यवसौवीरकसंस्कृतं तैलमुपदिशन्ति । तेनैषां श्लेष्मणः संजायमानस्य प्रवेगोपशमो भवति । वातश्लेष्मप्रशान्तिश्च भवति ॥

शिशिरे यदा तु शिशिरपवनजातशोषे गजानां संजातबलवीर्याणामौषधीनामुपयोगाच्छ्लेष्मणो भूयस्त्वं भवति । वारणानामत्यर्थं स्थूलशरीराणामिति[2] ।

---

* धनुश्चिह्नद्वयान्तःस्थः पाठो नास्ति कपुस्तके ॥

---

१ क. देहा । २ क. ख. खजानम° । घ. खर्जवम° ।

प्रवेगप्रशमाच्छ्लेष्मणः पूर्वलिङ्गत्वं प्रायशो भवति । ततस्त्रिफलारससंयुक्तमयथोक्तप्रमाणं तैलं पाययेत् । अनेन कफजा विकाराः प्रशान्तिमुपगच्छन्ति ॥

अथ वसन्ते संजातबलवीर्यास्वौषधीषु प्रमुदितविहगेषु पुष्पभारावनतशाखिष्वाम्रकुरबकवनखण्डबहलेषु द्विरेफानुनादिषु वनदेशेषु द्विरदपतीनां त्रिभागप्रसन्नायुक्तं तैलं दापयेत् । पूर्वोद्दिष्टसामान्यक्रियाविधिरनुष्ठेयो भवति । अनेन च मातङ्गाः प्रहृष्टा दीप्ताग्नयोऽनुपहतवीर्या यवसाभिनन्दिनः शुद्धमूत्रबस्तयः प्रसन्नवयसश्च भवन्ति । इत्येष षडृतुपानविधिर्विहितः) पूर्वाचार्यैरिति । आस्वादे मधुरा विपाक ईषत्तिक्तकटुकषायां च व्युपगतफेना नातिबलवती सुरा तच्छील्याभिपूजिता भिषग्भिरुपयोज्या नागानां भवति द्रोणे द्याढकं तु पयः सर्पिषोऽर्धाढकं विनीय दापयेत् । अथैव द्रोणे ततः प्रभृति यथाप्राणप्रमाणेन पयसः सर्पिषश्च वृद्धिरनुष्ठेयो भवति । एवमेतत्सर्पिःक्षीरपानमध्वक्लान्तस्तच्छविरदुर्बलकृष्यबालबलक्षीणभग्नमथितविष्कताकर्यातिनीतभारक्लान्तधातुकोपहतशोणितपित्तपित्तातिसारविषसंसर्गोपहतदेहगात्ररोगाभिभूतानां मदपरिस्रावक्षीणानां क्षीणदेहानां नव(ग्र)हाणां प्रशस्तं भवति । न तु क्लान्तपीतपानीयमूर्छितश्लेष्मगुल्ममूत्रापघातापष्टमेहीक्रिमिकोष्ठयामाशयविकारगलग्रहातङ्काभिभूतानाम् । मृत्तिकाभ्यवहारिणां (च) क्षीरपानमप्रदेयं भवति । मस्तिष्कमज्जाघृतनवनीतं तिलतैलं फलतैलमेदोवसाः सर्वाण्येव च यथोद्दिष्टानि च प्रमाणतः पयांसि रसांश्च जाङ्गलभूशयानां च महति कटाहे समालोड्य मृद्वग्निना पचेत्, शनैर्दर्व्याऽवघट्टयेत् । तत्संजातफेनमभिगतद्रव्यरसं वृत्तगुलिकमात्रानुपहतमविदग्धमभिविज्ञाय दर्व्या तदौषधमुद्धृत्योद्वर्तनकृतमादाय तत्र मृदुपाकं तैलं पक्त्वा व्रणविधिषु योज्यम् । नागानां बल्यं स्थिरीकरणं भवति । तदा मध्यमपाकं बस्तिनस्येषु प्रयोगकुशलैर्यथाविधिविहितम् । इहाऽऽचार्यैरभ्यङ्गसाधनार्थं च खरपाकं प्रशस्यते । तत्राभ्यङ्गमङ्गमत्यङ्गाश्रयव्याधिप्रशमनं क्रियाप्रयोगकुशलं प्रयुक्तं मृदुकरणमध्यं व्याधितृष्णोपशमनं प्राहुराचार्याः । तत्र सहस्रपाकं प्रधानमुपादिशन्ति । शतपाकं मध्यम्, दशावरे, विंशत्यपरे, कनीयन(?)स्नेहानुगतद्रव्यानिष्पन्नं सततभावनीत् । संयुक्ततैलद्रव्यकपालपालं काष्ठचर्मसंसर्गोपगमतैलैर्नित्यमत्र तैलविधानं कार्यमभ्यङ्गार्थम् ।

अत ऊर्ध्वं सद्यःस्नेहविधिमनुव्याख्यास्यामः ॥

---

१ क. °या चेत्युप° । २ क. °रावच्छी° । ३ क. °नं वाऽऽहृ° । ख. °नं चाऽऽहृ° ।

वराहवसापिप्पलीलवणमज्जाघृततिलपिष्टसंयुक्तं सद्यःस्नेहः। वराहजमांसमूलकबदरदधियुक्तं सद्यःस्नेहः। पिप्पलीमरिचशृङ्गवेरचव्याजमोदस्थूलमत्स्यवसातैलैर्यवागूः सद्यःस्नेहः। स्थलकुक्कुटवराहमांससंयुक्ता कृशरा सद्यःस्नेहः। मेदोमेद्गुकीमत्स्यरससंयुक्तः पायसो वा सद्यःस्नेहः। पयोऽनुपानगुडतैलचूर्णसंसिद्धां कृशरां भोजयेत्सद्यःस्नेहः। सुसंस्कृतं वेसवारं भक्षितवतः फणिज्जकरससंयुक्तां सुरां पाययेत्सद्यःस्नेहः। दधिपयोयवकुलत्थबदरचूर्णसिद्धं फाणितगर्भं गुडसंयुक्तं सद्यःस्नेह इति ॥

यदा व्यायामयोजितस्वेदानां पर्वतारोहणादध्वगमनात्परिखिन्नदेहानां सशर्करं चाध्वगमनं मधु सेवमानानां स्थानप्रतिरुद्धानां दण्डप्राजनवृक्षलोष्टकाष्ठाभिघातैश्चातिमात्रविहितविच्युतभग्नशाखानां वाताद्गात्रस्तम्भापरिणमनचलनलङ्घनहरणीयस्तम्भनीयेषु व्यायामव्यवायसमुत्थेष्वेवमादिषु विकारेषु संभ्रमजनितस्वेदेषु गात्रगतेषु च विकारेषु प्रदेयोऽभ्यङ्गः सर्वगतः स्नेहोऽस्य मार्दवं जनयति, छविं प्रसादयति, लिक्षायूकाश्चोपहन्ति, रोमकूपप्रविष्टः स्नेहः स्निग्धोष्णस्वेदनमार्दवमुपजनयति, शिरास्नाय्वस्थिसंधिपेशीनां प्रसादमभिनिवर्तयति। चतुर्विधः स्नेहोऽभ्यङ्गेषु योज्यः। अथ शिशिरे सुभगकाले हिमपतनजातस्वेदाः संस्तब्धशरीरा जडीभूतकरचरणप्रदेशा यदा भवन्ति द्विरदाः, तदा तेषां तिलतैलाढककिण्वगैरिकदशपलं सामुद्रलवणपञ्चपलं च चूर्णीकृत्य दृषदि पेषयित्वा मन्दाग्निनाऽधिश्रित्य चैतत्कथितमभिज्ञायावतार्य शिरोवर्जं सर्वकायमभ्यञ्जयेत्। घृतेन शिरः। त्र्यहं चैवं प्रयोजयेत्। तेनास्य च्छविर्न परिपाट्यते, वातातपहिमपतनसहिष्णुर्भवति। न चापि वातपित्तनिमित्ता विकाराः संभवन्ति। यदा तु प्राजनाङ्कुशाभिघातैः शिरःकर्मकृतैः प्रलेपैः क्षारैर्वा नानाविधवेदनाः कदम्बपुष्पीविद्युन्मालिवल्मीकपिटकाः संभवन्तीत्येवमादयो विकारा नेत्रगताः शिरोगताश्च, तेषामुपशमननिमित्तमभ्यङ्गः सर्पिषा कार्यः। तेन घनाङ्कुशभर्तिचारान्सम्यग्वेत्ति, तथाऽक्षीणि रोहन्ति मूर्धजातवरमस्तककेशाश्चास्योपजायन्तेऽलंकाराश्चेतीत्यर्थं शिरोभ्यङ्गं दद्यात्। यदा तु प्रश्रु(स्नु)तकटप्रदराजिविभूषितस्यावकटमुखविशुद्धिस्तदा कटबस्तिविधानेन कटविशोधनं कार्यम्। उभयतः कटविशुद्धश्रो(स्रो)तोमुखस्य वारणस्य यथावेगोपगतं दानं सम्यक्प्रवर्तयति ॥

—:०:—

अत ऊर्ध्वं तस्य बस्तिदाननासिकागुणान्वक्ष्यामः॥

कर्णनयनग्रीवामन्याकटमुखदन्तवेष्टतालुजिह्वाक्षिशिरोदन्तोर्ध्वभागजा जत्रु-

ला विकाराः प्राजनाङ्कुशाभिघातजाश्च विकारा न संभवन्ति । वयःस्थापन-स्वरवर्णजननं रोमवर्णप्रसादच्छवीजननं धमनीशिरास्नाय्वस्थिमांससंधीनां च स्थिरीकरणं नस्यकर्मण्यस्य विधानम्, कर्मणोऽस्य वा विधानम्, गुणाश्च व्याख्याताः ॥

—:-:—

अत ऊर्ध्वं बस्तिगुणान्वक्ष्यामः ॥

यथावत्तस्य विधाऽपरां शर्कटिकाशाखावातभग्नविच्युतममथिताष्ठीव्यला-ङ्गूलवंशवक्ष्यस्थ्य(न्य)स्थिजघनकलाभागेषु सर्वाङ्गगतेषु वातविकारेषु प्रशस्तो बस्तिः ।

तस्य विधानं यथाविधबस्तिसिद्धौ वक्ष्यामः । उत्कृष्टक्षयभागेषु शय्याभा-गोपगतानां ये व्रणा रुधिरप्रस्राविणः, तोदभेदपरिकर्षणदाहपूरयसिका(?)-न्विताश्च कण्डूबहुलाः पिच्छिलपरिस्राविणः । तेषां प्रशमनार्थं यथागुणस्नेह-प्रविचारः पूर्वमेवोक्तो द्विव्रणीयेऽस्माभिरिति । अविदितपुरुषरक्षणार्थं, सर्प-कीटपिपीलिकारक्षणार्थं, दण्डाङ्कुशप्रतोदनरक्षणार्थं सायकप्रपतनरक्षणार्थं, सुमनोदुर्मनस्त्वप्रत्यवेक्षणार्थं च सर्वकालं मनःप्रह्लादनो दीपः कार्यः । तस्मा-न्नित्यं संनिहिततैलौषधविधानं वारणाय विधेयं भवति नित्यं भिषजा । यदाऽ-ण्डकोशो मदाभिभूतस्य तीक्ष्णोष्णभावान्मूत्रस्य सततप्रसेकात्पुष्पितो भवति, तदाऽस्य परिपोयते छविरभीक्ष्णम्, ततोऽस्य द्रोणे पलप्रमाणेन गैरिकचूर्ण-संयुक्तेन घृतकुडवेनाण्डकोशनिर्वापणार्थमभ्यङ्गं दद्यात् ।

———

अथाभ्यङ्गार्थं पत्रभङ्गीयं तैलं व्याख्यास्यामः ।

सोभाञ्जनकैरण्डाग्निमन्थतर्कारीसुरसानिर्गुण्डीकर्णिकारसीकचल्पर्ककुबेरा-क्षीणां प्रत्येकं पत्रभङ्गं जर्जरं समुपकल्प्य तेषां रसानां त्रीन्भागान्निष्पीडयेत् । तत्र देयं चतुर्भागं तिलतैलमनुपहतं महति कटाहे ताम्रमये कृष्णायसे वरे वरपाकं विपाचयेत् । वातसंपूर्णकोष्ठानां वाताभिभूतशरीराणां गात्ररोगेषु सर्वेषु विशेषेणाभ्यङ्गार्थं तैलमेतदग्रतः कार्यं भवति ॥

———

अथ बलातिबलातैलमनुव्याख्यास्यामः ।

बलातिबलापलशतमर्पां विंशतिप्रस्थे जर्जरीकृत्य सुप्रक्षालितं विपाचयेत् । यतश्चतुर्भागावशिष्टं नवास्थापितं सुसंवर्तितशरीरं निष्क्वाथ्यावतारयेत् ।

---

१ क. °सीसच° ।

तत्र गवां पयसश्चतुःप्रस्थे मधुकभद्रदारुणोऽर्धपलं पेषयित्वाऽधिश्रयेत् । प्रस्थान्पश्चात्र तैलं पश्चमालोक्य पाचयेत् । तदनुपदग्धं सिद्धमवतार्य बस्तिकर्मपानाभ्यञ्जनस्यकर्मसूपयोज्य यथार्थं सिद्धिर्भवति ।

—:०:—

अथ वज्रकतैलविधिं व्याख्यास्यामः ।

बलातिबलयोः पलशतं खण्डशः कल्पयित्वा विंशतिप्रस्थेऽपामधिश्रयेत्, चतुर्भागावशिष्टमवतार्य निष्काथं तत्राऽऽवपेत् । देवदारुमधुकरास्नाजीवकर्षभकाकोलीमुद्गपर्णीमाषपर्णीमेदामहामेदाछिन्नरुहाकर्कटशृङ्गीपयस्याकाकनाशा इत्येतेषामौषधानां कार्षिकान्भागान्कृत्वा पयोष्टगुणं निष्काथ्यानूपानां मांसानां पलशतप्रमाणं पश्चमं तैलप्रस्थं कृत्वाऽधिश्रयेत् । तद्यथार्थसिद्धमवतार्य सर्ववातजानां विकाराणां निबर्हणार्थं दद्यात् । एतेनैव निष्काथेन प्रतिवापौषधैश्च पयोजाङ्गलरसनिहितैः सिद्धं सर्पिः कृत्वा पित्तजानां विकाराणामुपशमनीयं बलावहं मंदसंजननं दद्यात् ।

—:०:—

अथ त्रिवृतविधिमनुव्याख्यास्यामः ।

द्विपश्चमूलं श्वदंष्ट्रा द्विदर्भं द्विगुच्छं द्विशैरेयकं वत्सादनीशतावरीकुलत्थयवबदरश्रीपर्णीमधूकानां पूर्वोद्दिष्टप्रमाणं निष्काथं कृत्वा सर्वमधुरप्रतीवापः । अनन्तावनकुटम्बटं द्राक्षासवलोभहरिवरसरलभद्रदारुव्याघ्रनखरास्नाकुष्ठतगरहरेणुकापिप्पलीशृङ्गवेरचव्यातमालपत्रनलिकोशीरमञ्जिष्ठादारुहरिद्राणां सर्पिस्तैलवसानां प्रस्थे प्रतिवापं कार्षकमौषधानां भागं कृत्वा चतुर्गुणेन पयसा संयोज्य विंशतिपलकं मांसप्रमाणं कृत्वा जाङ्गलानूपोदकानां रसं त्रिगुणं स्वजावमथितमवतार्य ततो नक्रमहिषवराहशिशुमारवसानामुपदानं कृत्वा यथार्थं कटाहेऽधिश्रयेत् । तं मन्दाग्निना सिद्धं यथाक्रममवतार्य सिद्धलक्षणसंपन्नं कनीयसं त्रिवृतमाचक्ष्महे । ततस्तद्वातसमुत्थानां शरीराणां च हस्तिनां नस्यकर्माभ्यङ्गयोजनोत्तरपानेषु हितं तद्यथार्थमेवंविधानामन्येषां च प्रयोजयेत् । इत्येवं त्रिवृतविधिराद्यः कनीयान्व्याख्यातः ॥

अथाशीतिव्यञ्जनस्य वायोर्निबर्हणं कोष्ठानुगतशरीरस्य च वायोर्विशेषतः प्रशमनं जलधरसलिलविसर्गादद्भिराप्यायितायां मेदिन्यां बस्तिनस्याभ्यङ्गाच्छपानादिषु सततमुपयुज्यमानं तेजोबलवीर्यसंपादनं चाऽऽयुषश्च प्रत्यानयनं रसशोणितमांसमेदोऽस्थिमज्जाशुक्रक्षयावसन्नानां च बलक्षीणमदक्षीणोत्कर्णकवातगतिहस्तग्रहदन्तरोगपादरोगगात्ररोगार्दितदेहानां वातस्कन्दबा-

ह्याभ्यन्तरायामर्दितशरीरजवगण्डकशीतकण्कमानां वा तथा विनयकर्मसंभवानां च गाढबन्धमबद्धानामुन्मथितममथितसंक्लिष्टनिहितदुःखार्थदुर्विरिक्तानां निर्भुग्ननिर्बद्धताभिहि(ह)तभग्नावनतविच्युत(?) एवं निर्वेष्टिति पिष्टीस्थितिविमथितानामागन्तूनां गात्ररोगाणामुपशमनार्थं त्रिवृतविधिर(म)त्र व्याख्यास्यामः। कृष्णश्वेतकषायवर्णानां तिलानां तैलमुत्पाद्य, अथातसीसर्षपैरण्डतैलान्युपादाय गोजाविमहिषीणां सर्पिश्च पुनर्महिषरुरुपृषतगोजाविखरोष्ट्रव्याघ्रसिंहद्वीपितरक्षुश्वाविच्छल्यकवराहशिशुमारनक्रपाठीनतिमिशमकरकच्छपचर्मिणामजगरसृगालवानराणां यथाप्रधानं यथालाभं वसाः संहृत्य, एतेषामेव च महिषादीनां सत्त्वानां मस्तिष्कं प्रत्येकभाजनस्थमुपकल्पयेत्। गोजाविमहिषाणां सुरभितृणनिषेविणां प्राणवतां प्रभूतयवसाहाराणां पयांस्युपहार्य महति कटाहे महास्थाल्यां वाऽधिश्रयेत्। पक्त्वाऽष्टभागावशिष्टं पयोऽवतार्य शीतीभूतं दधिवद्बलवद्भिः पुरुषैः कन्याभिर्वाऽवमथ्य क्षीरघृतमुत्पाद्य प्राज्यमेवं क्षीरघृतकरणविधिः। तथौदकानां मत्स्यनक्रशिशुमारपाठीनचर्मिपाटलाक्षश्वाविच्छल्यकरोहितकर्कटकेल्लिसत्कूर्माणां च निर्यूहं कटाहेऽधिश्रयेत्। पक्त्वाऽस्याष्टभागावशिष्टं प्रकल्पयेत्। तथा जाङ्गलानां लावकतित्तिरवर्तिककककुभक्रकरकपिञ्जलबर्हिणकुक्कुटानां निर्यूहान्कृत्वा तद्द्रव्यं संस्कृतानुपाद्यौदकानां च हंसकारण्डवचक्रवाककारनन्दीमुखाटावकबलाकामद्गुक्रौञ्चपूर्वादीनां यथालाभं स्वयातान्सुसंस्कृतान्स्वजावमथितान्रसानुपकल्पयेत्। यवबदरकुलत्थमधुकश्रीपर्णीसणबीजाढकीमहत्पञ्चमूलविदारिकन्दादिकं च वर्गं पूर्वोद्दिष्टेन प्रमाणेन कनीयसस्त्रिवृतस्य यथोद्दिष्टं प्रमाणं मन्दाग्निसिद्धं निष्क्वाथं नस्यावस्थायिनमुपकल्पयेत्। स्थानासनयोगाभ्यां द्विपानां देशकालपरिणामे सति*....॥

—:०:—

अथोचितक्रियास्वपहतवीर्या सिण्ण(?) महौषधगणमत्र व्याख्यास्यामः॥

जीवकर्षभकौ मुद्गपर्णीमेदाछिन्नरुहाक्षीरकाकोलीपयस्याकर्कटशृङ्गीकाकनासारास्नामहामेदापष्ठीमधुकानन्तासारिवासरलभद्रदारुहरिद्रवरुणनागपुष्पमञ्जिष्ठारक्तचन्दनोशीरकुष्ठतगरव्याघ्रनखशतपुष्पामांसीपर्णीहरिवेरकुङ्कुमकुटन्नटभद्रमुस्तासूक्ष्मैलास्थूलैलाखर्जूरद्राक्षापिप्पलीमूलचव्याजमोदतेजोवतीविडङ्गशृङ्गवेराणां यथाप्रमाणमनुविधाय दृषदि पेषयित्वा श्लक्ष्णमौषधगणमेकीभावमुपकल्प्य पयांसि सर्पिस्तैलवसामज्जा वा त्वेकीभावमुपकल्प्य मन्दाग्निसिद्धं मध्यमावरोत्तरपाकं यथाविधि साधयित्वा तेनैव च क्रमेण रसप्रायान्निर्यूहानु-

* 'अत्र कियान्पाठस्त्रुटितस्त्विप्याद्दर्शेषु' इति प्रतिभाति॥

मरधिश्रयेत् । एवं सहस्रपाकमुत्तमम्, शतपाकं मध्यमम्, अवरं दशपाकम्, त्रिवृतं साधयेदिति ।

तत्र श्लोकः—

एवं मया स्नेहविधिः प्रकल्पितः प्रमाणविद्भिर्विहितो यथार्थतः ॥
यथाविकारं च यथार्थतः क्रियां गजेषु कुर्याद्भिषजां वरस्तथा ॥ इति ।

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने श्रीपाठे चतुर्थे
उत्तरस्थाने स्नेहविधिकथनं नाम चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः ।

ऋषिं प्रश्नविदां श्रेष्ठमादित्यसमतेजसम् ॥
अङ्गराजो महाबुद्धिः पालकाप्यं महौजसम् ॥ १ ॥
सुखोपविष्टं वरदं कृतजप्यं कृताञ्जलिम् ॥
उपसंगृह्य चरणौ पप्रच्छ प्रयतो मुनिम् ॥ २ ॥
प्रजासु हितकामस्त्वं नित्यं धर्मचिकीर्षया ॥
रक्षणं च परो धर्मस्तत्र युक्तोऽहमञ्जसा ॥ ३ ॥
तन्मे बलममित्रघ्नं दन्तिनो दत्तवारणः ॥
तैरियं पृथिवी लब्धा समुद्रवसना मया ॥ ४ ॥
तेषाममितसत्त्वानां न किंचिदिह वर्तते ॥
भयमन्यत्र रोगेभ्यस्तथैषां भयमुत्तमम् ॥ ५ ॥
तेषां पुरस्तान्निखिला चिकित्सा कीर्तिता म(त्व)या ॥
मह्यं शुश्रूषवे सम्यग्भगवन्व्यक्तलक्षण ॥ ६ ॥
बस्तयो हि चिकित्सार्धं व्यापित्वात्सर्वमेव वा ॥
तेषां विधिं विशेषेण भगवन्प्रब्रवीतु मे ॥ ७ ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥
उवाच निखिलं त्वेवं विधिवत्सिद्धिदायकम् ॥ ८ ॥
गुणानुपद्रवांश्चैव कृत्याकृत्यविनिश्चयः ॥
येषु वा स्थापनं कार्यमनुवासनमेव च ॥ ९ ॥
केवलं चानुवास्या ये येषु वा स्थापनं हितम् ॥
तत्र द्रव्यप्रमाणानि स्नेहबस्तिनिरूहयोः ॥ १० ॥

प्रमाणं स्नेहकालश्च भेषजानां तथैव च ॥
विधिसंस्कारयोगश्च स्नेहपाकश्च तत्त्वतः ॥ ११ ॥
व्यापदः सिद्धयश्चैव परिहारस्तथैव च ॥
कार्याकार्यकरं ज्ञानं कृत्स्नमेवमुपदिश्यते ॥ १२ ॥
बस्तयो हि चिकित्सार्थं सम्यग्दत्ता विजानता ॥
रुजमाशु निगृह्णन्ति दोषाणामाशु शोधनात् ॥ १३ ॥
कोष्ठं न स्तभ्यते चैव दौर्बल्यं न च बाधते ॥
न च दोषाः प्रबाधन्ते दुष्टाश्चौषधपानजाः ॥ १४ ॥
अजीर्णे जीर्णमित्येवं न च शङ्का प्रबाधते ॥
अनुपानं च हरणं दोषाणां बस्तिना भवेत् ॥ १५ ॥
बृंहणं स्नेहनं बल्यं मनसश्च प्रसादनम् ॥
जववीर्योपपत्तिस्तु सहित्वं सर्वकर्मणाम् ॥ १६ ॥
बलेन्द्रियविवृद्धिस्तु तथा च स्मृतिमेधयोः ॥
उपलब्धोपलब्धिस्तु यथावत्परिकर्मणि ॥ १७ ॥
वलयोपान्त्यशैथिल्यं जरा वा न गजोत्तमम् ॥
मेदो न धर्षयत्याशु बस्तिभिः स्थिरतां गतम् ॥ १८ ॥
स यथा शीर्णपत्रोऽपि वृद्धवृक्षोऽथ कुञ्जरः ॥
समये वारिणा सिक्तो हरिताङ्कुरकोमलः ॥ १९ ॥
तरुणो जायते क्षिप्रं पुष्पवान्बलवानपि ॥
एवमाप्यायते हस्ती बस्तिना संप्रतर्पितः ॥ २० ॥
धात्विन्द्रियौजसा युक्तस्तथा वै बस्तिमान्भवेत् ॥
अपरे जघनं वंशो विशेषेण तु दन्तिनाम् ॥ २१ ॥
तेषां निग्रहणार्थाय बस्तिश्रेष्ठोऽभिजायते ॥
श्लेष्मजान्पित्तजांश्चैव साधयेत्साधुयोजितः ॥ २२ ॥
नास्त्यन्यत्तादृशं कर्म हस्तिनां बस्तिनः परम् ॥
आनद्धो मृत्तिकाजग्धः कृमिकोष्ठी तथैव च ॥ २३ ॥
एकाङ्गं बाधते यस्य सर्वाङ्गमपि वायुना ॥
रुद्धमूत्रपुरीषश्च क्षुनो मन्दाग्निस्तथैव च ॥ २४ ॥
सर्वत्र विहितो बस्तिर्दीपनो बलवर्धनः ॥
लाघवस्योपजननः समेषु विषमेषु वै ॥ २५ ॥

सर्वप्रदेशजाश्चोगान्सर्वशश्च निरस्यति ॥
चिरस्थितास्पशमयेदभ्यञ्जनविमर्दनैः ॥ २६ ॥
प्रदेहै रसपानैश्च स्वेदैर्वाऽपि पृथग्विधैः ॥
नस्यतो मुखतश्चैव स्नेहपानैर्यथाविधि ॥ २७ ॥
बस्तयः परमास्तेषां हिता रोगनिबर्हणाः ॥
यास्तु पूर्वं विनिर्दिष्टा कोष्ठे वै विंशतिः शिराः ॥ २८ ॥
बिसनालप्रतीकाशा दन्तिनः सर्वदेहगाः ॥
याश्च नाडीसमुत्थानाः कण्ठनाडीबहिःसृताः ॥ २९ ॥
ताभिः संचार्यते स्नेहः स्वं स्वं स्थानं तथा तथा ॥
यथा ग्रीष्मेऽथ मध्याह्ने ह्यादत्ते वारि भास्करः ॥ ३० ॥
तथा पानादिभिः स्नेहः पारंपर्येण जीर्यते ॥
स्नेहयेच्च दृढं स्नेहो रोगांश्च विनिवर्तयेत् ॥ ३१ ॥
न च पाककृतान्दोषानुत्पादयति कांश्चन ॥
पक्वाशयगतस्यास्य यद्वीर्यं तेजसेरितम् ॥ ३२ ॥
ततस्तज्जायते क्षिप्रमपानाख्येन वायुना ॥
ततस्तदचिरादेव समानः प्रतिपद्यते ॥ ३३ ॥
समानेन तु विक्षिप्तं व्यानं चाऽऽप्नोति तत्क्षणात् ॥
व्यानात्पुनरुदानं तु तथैव समवाप्नुते ॥ ३४ ॥
उदानानन्तरं चैव प्राणमाप्नोति तत्क्षणात् ॥
क्षिप्तं तत्प्राणविक्षिप्तं सर्वधातुषु लीयते ॥ ३५ ॥
रसादिषु यथायोगं कुरुते धातुतेजसाम् ॥
बलमारोग्यवर्णं च लघुत्वं चैव दन्तिनः ॥ ३६ ॥
समलं वाऽपि यत्किंचिद्यदपानो निरस्यति ॥
प्रथमः स्नेहबस्तिः स्याद्बस्तिवंक्षणमार्गयोः ॥ ३७ ॥
स्नेहनः शोधनश्चैव द्वितीयस्त्वग्निदीपनः ॥
तृतीयस्तु बलं कुर्याच्चतुर्थो रसबृंहणः ॥ ३८ ॥
बृंहयेत्पञ्चमो रक्तं षष्ठो मांसं विवर्धयेत् ॥
मेदोस्थिबृंहणो ज्ञेयः सप्तमः पुष्टिवर्धनः ॥ ३९ ॥
अष्टमश्च विशेषेण नवमश्चापि वर्धयेत् ॥
मज्जाशुक्रौ यथायोगमित्येते नव बस्तयः ॥ ४० ॥

नागानामिह निर्दिष्टा विस्तरेण यथाक्रमम् ॥
ऐषां दोषाः समुद्भूता मज्जाशुक्रसमाश्रयाः ॥ ४१ ॥
यथोक्तद्विगुणा देयास्तेषामेतेऽत्र बस्तयः ॥
यस्मादनुवसत्यन्नं जीर्णं चापि निरस्यति ॥ ४२ ॥
अनुवास इति ख्यातिं लभते तेन कर्मणा ॥
यस्मान्निरूहयत्याशु दोषान्पक्वाशयस्थितान् ॥ ४३ ॥
मलापहरणात्सद्यो निरूह इति कीर्तितः ॥
उत्तरं बस्तिमिच्छन्ति मेढ्रे यस्तु विधीयते ॥ ४४ ॥
एष कायप्रशुद्धो स्याच्छीघ्रं यो विनिवर्तते ॥
न चेन्निवर्तते काले भूयो दानं प्रशस्यते ॥ ४५ ॥
अनुवासो निरूहस्तु तथैवोत्तरबस्तिकः ॥
त्रिविधो वक्ष्यते बस्तिर्गुदमेढ्रसमाश्रितः ॥ ४६ ॥
तत्र बस्तिर्न दातव्यो विषदुष्टाय हस्तिने ॥
नित्यं रोगभयार्तेभ्यः पानार्तेभ्यस्तथैव च ॥ ४७ ॥
मूर्छापिपासादुष्टेभ्यः स्नेहपीताय दन्तिने ॥
प्राक्छर्दिमोहदुष्टेभ्यो ये च स्युः पादरोगिणः ॥ ४८ ॥
स्वभावाद्दुर्बलाग्निभ्यस्तथाऽतिस्थविराय च ॥
अत्यर्थं चातिबालाय बस्तिर्न स्यात्कथंचन ॥ ४९ ॥
बस्तिदानपरिक्लेशं कदाचिदिह ये गजाः ॥
न सहेयुरसात्म्यत्वान्न तेषां बस्तयः स्मृताः ॥ ५० ॥
येषां चापि प्रणिहितो नोर्जां किंचिदुपाहरेत् ॥
कुर्याद्वा महतीं पीडां न तेषां बस्तिरिष्यते ॥ ५१ ॥
न कफे स्नेहबस्तिः स्यान्मेदुरस्य तथा नृप ॥
रूक्षणीये(*न विधिना) पाण्डुरोगाश्च ये स्मृताः ॥ ५२ ॥
कुष्ठगुल्मप्रमेहाश्च तथा विद्रधयोऽपि च ॥
अन्येषां चैवमादीनां विदध्यान्नानुवासनम् ॥ ५३ ॥
अतस्तु विपरीताय बृंहणं येषु शस्यते ॥
धार्यन्ते ये च दोषेण न तेष्वास्थापनं स्मृतम् ॥ ५४ ॥
कुष्ठकृम्यतियुक्तेभ्यो मूर्छायां तमके(?) तथा ॥
क्षते क्षये च धातूनां पिपासार्ते तथैव च ॥ ५५ ॥

* कुण्डलिकान्तर्गता वर्णाः कपुस्तकानुसारेण लिखिताः, खगपुस्तकयोस्तु रिक्त एव प्रदेशः स्थापितः ।

१ क. येषां । २ क. °बस्तयः ॥ त्रि° ।

सर्वत्र बस्तिर्न भवेन्निरूहो चाथवेतरः ॥
सामान्यं च विशेषं च बुद्ध्या(दृष्ट्वा)तु नृपसत्तम ॥ ५६ ॥
मूलं चैवानुबद्धं च पृथक्च युगपत्स्थितम् ॥
व्याधीनामुपपश्येत्तु देशकालौ तथैव च ॥ ५७ ॥
राजंश्चतुर्भिर्युक्ताय पादैः साध्याय हस्तिने ॥
आरम्भेण यथोक्तेन विधिनाऽऽरम्भ इष्यते ॥ ५८ ॥
प्रशस्ते तिथिनक्षत्रे मुहूर्ते चापि पूजिते ॥
कृत्वाऽऽहुतिं सपुण्याहं स्वस्ति वाच्य द्विजोत्तमान् ॥ ५९ ॥
स्थानं सबाहुयन्त्रं च पुरस्तान्नतमिष्यते ॥
उन्नतं पृष्ठतः कार्यं पक्षयोश्च समं भवेत् ॥ ६० ॥
त्रिपदीं च क्रमं बेद्ध्वा गजपेचकसंमितः ॥
कार्यो माङ्गल्यवृद्धिश्च सुनिविष्टः सुसंहतः ॥ ६१ ॥
भिषक् तत्रोपविष्टस्तु पीडयेत्सुसमाहितः ॥
सुखारोहावरोहश्च बस्तिभूमाववस्थितः ॥ ६२ ॥
तत्रोपविष्टः सुमना लघुहस्तो जितेन्द्रियः ॥
भिषक् प्रपीडयेद्बस्तिं निरीक्ष्य च यथाविधि ॥ ६३ ॥
वांर्क्षं वा वैणवं वाऽपि श्लक्ष्णं च गुलिकामुखम् ॥
तिन्दुकस्याश्वकर्णस्य मधुकस्य धवस्य च ॥ ६४ ॥
भूर्जस्यन्दनयोश्चैव सारैर्नेत्राणि कारयेत् ॥
द्वावरत्नी भवेदोष्ठं स्वनुपूर्वसमाहितम् ॥ ६५ ॥
मध्यमं तु भवेन्नेत्रं द्विचत्वारिंशदङ्गुलम् ॥
षडङ्गुलं जघन्यं तु मध्यमात्परिहापयेत् ॥ ६६ ॥
षोडशाङ्गुलमेवास्य नाहो(हः) श्रेष्ठस्य मानतः ॥
उद्दिष्टमेतन्नेत्राणां प्रमाणं वक्ष्यते नृप ॥ ६७ ॥
ये प्रमाणाश्च युज्यन्ते ज्येष्ठमध्याधमा गजाः ॥
पेचकस्योपरिष्टाच्च त्र्यस्न्योऽधस्तात्तथैव च ॥ ६८ ॥
लाङ्गूलवंशमानेन नेत्रमायामतो भवेत् ॥
नेत्रमूले च कर्तव्या कर्णिका द्वादशाङ्गुला ॥ ६९ ॥

---

१ क. पायैः । २ क. बुद्ध्वा । ३ क. ख. घ. वार्क्ष्यं

बलाक्षो(?)रविकन्यार्थे [illegible] ॥
सर्वं प्रवेशयेन्नेत्रं गुदे नागस्य बुद्धिमान् ॥ ७० ॥
दृतिं सुमर्दितां कृत्वा तत्र नेत्रं निबद्धयेत् ॥
उत्तमाधममध्यानां श्रेष्ठमध्यमकन्यसैः ॥ ७१ ॥
नेत्रच्छिद्राणि कार्याणि सामान्यामलकीफलैः ॥
वल्यस्तु तिस्र एवाऽऽहुर्गुदे नागस्य भूपते ॥ ७२ ॥
उत्तमस्य भवन्त्येताः षोडशाङ्गुलविस्तृताः ॥
अष्टभागेन हीनाः स्युर्मध्यमस्य प्रमाणतः ॥ ७३ ॥
मध्यमा(:)सप्तमो भागो जघन्ये वलयः स्मृताः ॥
चतुरत्नीत्र्यरत्नीनां वलयो विद्धि संमिताः ॥ ७४ ॥
अङ्गुलानि दशाष्टौ च प्रमाणेन पृथक् पृथक् ॥
अष्टारत्नीषु विज्ञेयो वलयोऽष्टादशाङ्गुलाः (?) ॥ ७५ ॥
आदानी प्रथमा तासां द्वितीया तु प्रवाहिनी(णी) ॥
संकोचनी तृतीया च वलयस्तिस्र एव हि ॥ ७६ ॥
तेषां नेत्रप्रमाणानि वलीनामानि कारयेत् ॥
स्रोतःप्रमाणान्येतेषां नेत्राणामनुपूर्वशः ॥ ७७ ॥
परिणाहस्तु कर्तव्यः संविभज्य यथायथम् ॥
स्नेहे या मुखतो मात्रा सा देया त्वनुवासने ॥ ७८ ॥
यथावर्ष्मप्रमाणेन यथायोग्यविरोधि च ॥
स्थानं माङ्गल्यवार्क्षं च पुरस्तान्मतमिष्यते ॥ ७९ ॥
उन्नतं पृष्ठतः कार्यं पक्षयोश्च समं भवेत् ॥
तत्र स्थाने सुखं तिष्ठेद्वारणः सुखयन्त्रितः ॥ ८० ॥
पक्षयोश्च पुरस्ताच्च पुरुषैः स्वैरधिष्ठितः ॥
ततो विश्वासयन्तश्च भ्रमयन्तश्च तं गर्जम् ॥ ८१ ॥
परिस्पृशन्तश्च करैस्तिष्ठेयुः परिकर्मिणः ॥
यत्नं नेत्रकराभ्यामिः क्षान्तिभिः क्षमितस्य च ॥ ८२ ॥
तथा वासितवालश्च कर्तव्यः स्यादुपक्रमः ॥
सुवर्धितनखं हस्तं सर्पिषाऽभ्यज्य दक्षिणः ॥ ८३ ॥

---

१ क. °सप्तभागेन ज° । २ क. °त्नीरर° । ३ क. दक्षिणम् ।

पेचके च सूत्रं बध्याद्रेखेष्वनुपस्थितम् ॥
पूर्वमेवानुबद्ध्वा तु नेत्रबस्तिं समाहिताम् ॥ ८४ ॥
कदुष्णं स्नेहमासिच्य निर्वातमुपसंहरेत् ॥
नलेन दक्षिणेनास्य गुदस्य द्वारमर्पयेत् ॥ ८५ ॥
मूले प्रबद्धे नेत्रस्य निश्छिद्रेण च चर्मणा ॥
वामेन प्रतिगृह्णीयान्नेत्रमध्यं समाहितम् ॥ ८६ ॥
तदूर्ध्वमुखमुत्क्षिप्य गजायोपहरेद्भिषक् ॥
तदाऽग्र्यस्नेहसंयुक्तं स्नेहाभ्यक्तगुदस्य च ॥ ८७ ॥
प्रणिदध्यात्स्वयं वैद्यो गुदे नेत्रं समाहितम् ॥
अनुवंशं यथा माघुबस्तेश्चाबन्धनाद्भिषक् ॥ ८८ ॥
सुसमाहितसर्वाङ्गः शनैर्वैद्यः प्रवेशयेत् ॥
नात्युन्नतं न च नतं कदाचिदिह पूज्यते ॥ ८९ ॥
न च तिर्यग्गतं नेत्रं नाप्यूर्ध्वं नाप्यधोमुखम् ॥
कथंचित्प्रणयेद्धीरः सकृच्चैव प्रदापयेत् ॥ ९० ॥
ततो निष्कम्प्यते नेत्रं शेषमेवमपाहरेत् ॥
ततो वाक्शतमात्रं तु दत्ते तिष्ठेदतन्द्रितः ॥ ९१ ॥
अत ऊर्ध्वं भिषङ्नागं पदानां गमयेच्छतम् ॥
शनैरत्रासयञ्शस्तैर्वाग्भिश्च परिशंसयेत् ॥ ९२ ॥
मनः प्रह्लादयेत्तस्य विषयैः कालयोगिभिः ॥
पाणिना लम्बनेनैव वंशवीणास्वनेन वा ॥ ९३ ॥
दक्षास्तं गीतघोषैश्च रमयेयुरनेकपम् ॥
[1]यान्यान्कामयते भावांस्तांस्तांस्तस्य समाचरेत् ॥ ९४ ॥
न तस्य मनसः किञ्चिद्व्याघातमुपकल्पयेत् ॥
ततः प्रत्यानयेत्स्थाने सुस्थितः सुमनाः सुखी ॥ ९५ ॥
स्थितस्यैव समाकाङ्क्षेद्बस्तेः प्रतिनिवर्तनम् ॥
स्विन्नायोष्णाम्बुना पूर्वं हेमन्ते जलदागमे ॥ ९६ ॥
आप्लुताय जलं शीतं दद्याद्ग्रीष्म एव च ॥
शीत एवावगाहो वा शीतसात्म्यतया भवेत् ॥ ९७ ॥
[2]कल्पमेनं तु कुर्वीत पूर्वं निमित्तकं बुधः ॥
उचिताभोजनादेर्धं ततो भुक्तवतो लघु ॥ ९८ ॥

१ क. ख. ब. °रसर्प° । २ क. °दूर्ध्वं त° ।

पादभोगाविहीनाङ्ग(?)यथाव्याधि यथाबलम् ॥
रक्तशाल्योदनं स्निग्धं पयसा वा रसेन वा ॥ ९९ ॥
जाङ्गलेन विविक्तेन नात्यर्थमसिताय च ॥
कदुष्णं युक्तलवणं युग(क)स्नेहं गजे हितम् ॥ १०० ॥
शीतलं वा प्रदातव्यं यथासात्म्यमवेक्ष्य तु ॥
यवसोपस्कृते पूर्वं प्रदद्यांल्लघुभोजनम् ॥ १०१ ॥
प्रतिच्छन्नाय च पुनर्नृणां न लघु नाल्पशः ॥
कृताहाराय विधिवद्रा(द्र)जायाङ्गपते ततः ॥ १०२ ॥
सुप्रतिष्ठितभक्ताय कृतचङ्क्रमणाय च ॥
कृतमार्गाय विधिवत्प्रदद्याच्च यथाविधि ॥ १०३ ॥
प्रदत्ते भिषजा बस्तौ न शयीत न भक्षयेत् ॥
न पिबेदनु मातङ्गो न च चेष्टां समाचरेत् ॥ १०४ ॥
सुस्थितः स्वस्थसर्वाङ्गः सुमना नियतेन्द्रियः ॥
प्राग्दत्ते च मुहूर्तेऽस्मिन्सायं दत्ते तथैव च ॥ १०५ ॥
(*अत ऊर्ध्वं तृणं दद्यात्सायं चापा(प्या)श्रयं नयेत् ॥
सुखशय्यो भवेन्नागो मृदुशय्यस्तथैव च ॥ ६ ॥)
न चास्य मनसः किञ्चिद्व्याघातमुपकल्पयेत् ॥
याश्चाप्यनन्तराश्चेष्टा निर्वाणं पानमेव च ॥ ७ ॥
ताभिश्चैवात्र वर्तन्ते ताः सर्वाः समुपाचरेत् ॥
प्रत्यागते यथाकालं पुनस्तद्वत्प्रकल्पयेत् ॥ ८ ॥
दीप्ताग्नौ वातरोगे वा विधिमाश्रित्य पूर्ववत् ॥
तस्मिन्प्रत्यागते स्नेहे पुनरेवानुवासयेत् ॥ ९ ॥
येथा भवति सस्नेहस्तथा शाम्यति मारुतः ॥
निरूढं वा विरिक्तं वा सद्य एवानुवासयेत् ॥ ११० ॥
न स्यात्कदाचिन्निःस्नेहो रात्रौ वा यदि वा दिवा ॥
एष एव विधिर्दृष्टो गजानां वातरोगिणाम् ॥ ११ ॥
नात्र कार्यस्तु संदेहः सिद्धमेतद्भिषग्जितम् ॥
एष उक्तो विधिः सम्यगनुवासे मया नृप ॥ १२ ॥

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

१ क. °भागविहीनानां य° । २ क. स्नेहयुक्तं । ३ क. °णं वातमे° । ४ क. बस्तौ । ५ ख. घ. यदा ।

आस्थापनं तु वक्ष्यामि शृणु वैतन्नराधिप ॥
अनुवासनमात्राया द्विगुणा तस्य शस्यते ॥ १३ ॥
आस्थापनविधौ मात्रा चिरस्थानं न चेष्यते ॥
न च भुक्तवते देया मातङ्गाय पुनः पुनः ॥ १४ ॥
अनुबन्धाग्निरूहस्य प्रदानं बाधते द्विपम् ॥
एकं द्वितीयमेवं च तृतीयमपि योजयेत् ॥ ११५ ॥
यावद्वा साधु मन्येत समीक्ष्य गुरुलाघवम् ॥
वयो व्याधिमृतुं देशं सात्म्यकालौ बलाबलम् ॥ १६ ॥
सत्त्वं वाऽपि परीक्ष्ये(क्षे)त जातिं च मतिमान्भिषक् ॥
तस्या वर्तनकालस्तु मुहूर्तं प्रसमीक्ष्यते ॥ १७ ॥
भित्त्वा पुरीषसंघातं दोषमादाय चोल्बणम् ॥
तीक्ष्णोष्णस्नेहलवणैरन्वितस्तु विशेषतः ॥ १८ ॥
पूर्वो मध्योऽवकृष्टस्तु जघन्यो मधुरः स्मृतः ॥
अत्युष्णो नातितीक्ष्णश्च लवणश्च विशां पते ॥ १९ ॥
अकृत्वैव निवर्तेत कृतो मात्राधिकश्च यः ॥
समुत्क्लेदनकर्मा हि प्रथमः परिकीर्त्यते ॥ १२० ॥
मध्यमो दोषहरणो जघन्यस्तु प्रसादनः ॥
सद्योनुवासनं केचित्केचिदास्थापनं पुनः ॥ २१ ॥
ऋषयः संव्यवस्यन्ति पूर्वं गुणसमीक्षया ॥
आस्थापननिरस्ये तु पुरीषे निर्मले गुदे ॥ २२ ॥
अनुवास्य इति प्राहुर्हन्तुं चैवात्र मे शृणु ॥
पुरीषविहिते मार्गे योऽनुवासं प्रयच्छति ॥ २३ ॥
न तस्य साधकः स्नेहो भस्मनीवाऽऽहुतिर्हुता ॥
आस्थापनहृतो दोषः शुद्धकोष्ठस्य दन्तिनः ॥ २४ ॥
बस्तिमग्नो न भवति शुद्धो व्योम्नि यथा शशी ॥
अनुवासोपपन्नाय निरूहं यः प्रयच्छति ॥ १२५ ॥
ततो विरूक्ष्यते तज्ज्ञैः स्नेहस्तस्य न साधकः ॥
स्नेहस्वेदोपपन्नाय पुरीषे संश्रिते तथा ॥ २६ ॥
यथावन्मलदोषाणां क्लेदभावाः शुभावहाः ॥
अनुवासनमेव स्यादास्थापनमतः परम् ॥ २७ ॥

व्यक्तमात्रो भवेत्पूर्वो शाल्यो मध्यमदोषतः ॥
(*···· ···· ···· ····मध्यौषधस्तु दोषहा) ॥ २८ ॥
ततो लघुतरं कार्यं समीक्ष्य गुरुलाघवम् ॥
अनामंच्छति चाशुद्धे यथाकालं निरूहणम् ॥ २९ ॥
ततस्तेनैव विधिना पुनरन्यो विधीयते ॥
ततस्तीक्ष्णतरः किंचिदर्धमात्रान्वितः पुरा ॥ १३० ॥
विरेको वर्तयश्चापि बस्तिः प्रतिनिवर्तते ॥
तस्मान्निरूहसिद्ध्यर्थं स्मृतं चैवानुवासनम् ॥ ३१ ॥
निरूहस्य पुनर्देयः स्नेहबस्तिर्विशेषतः ॥
स्नेहक्षीरनिरूहाणामयुग्मा बस्तयस्तथा ॥ ३२ ॥
गजानां मात्रया दत्ता यस्य युग्मा भवन्ति ते ॥
कायाग्निदीपनाः सर्वे बस्तयः पक्षसंधिषु ॥ ३३ ॥
बलवर्णकराः पथ्याः सम्यगारोग्यसिद्धये ॥
संशोधनो हिमार्यस्य दोषाणां चानुलोमनः ॥ ३४ ॥
वारणानां निरूहस्तु प्रथमो मलशोधनः ॥
समाक्षिपति पित्तं च पक्वाशयगतस्तथा ॥ १३५ ॥
सकृच्छेषहरो ज्ञेयो द्वितीयस्तु नराधिप ॥
वातं जयति मूर्धन्यं तृतीयः कफवर्धनः[1] ॥ ३६ ॥
मृदूष्णलवणो मध्यः पादहीनः प्रमाणतः ॥
क्लेदनार्थं प्रदेयस्तु बस्तिरादाय संततः ॥ ३७ ॥
पटुतीक्ष्णोऽम्ललवणो मात्रया चाधिकस्तु सः ॥
देयो दोषहरो बस्तिः क्लान्तदोषाय हस्तिने ॥ ३८ ॥
तृतीयस्तु पुनर्देयो न्यूनो नापि न चाधिकः ॥
दोषान्संहरति मोक्षैः शमयत्युदरं च सः ॥ ३९ ॥
चतुर्थस्तु प्रदेयः स्याच्छर्करामधुसंयुतः ॥
भेषजैर्मधुरैश्चापि तैलैः कृष्णैः सवेतसैः ॥ १४० ॥
हृतदोषाय नागाय घृतक्षीरविमिश्रितः ॥
व्यापद्धीननिरूहस्य स(श)क्रद्वारसमुद्गतः ॥ ४१ ॥

---

* धनुश्चिह्नान्तर्गतः पाठो नास्ति कपुस्तके ।

---

१ क. °कफमर्दनः ।

कफान्तं वातपित्तान्तं कुक्षिशैथिल्यलाघवम् ॥
गात्रापरमृदुत्वं च व्याधेरपि विनिग्रहः ॥ ४२ ॥
लक्षणं तु निरूढस्य मूत्रशुद्धिकृदेव च ॥
लक्षणं दुर्निरूढस्य आनाहो रक्तमूत्रता ॥ ४३ ॥
विड्वातनिग्रहं शूलमाध्मानं व्याधिवर्धनम् ॥
निष्पुरीषस्य नागस्य निरूढस्यातियोगतः ॥ ४४ ॥
वायुर्गात्राणि कुक्षिं च शूलेनाऽऽवेष्टयेद्भृशम् ॥
तस्मान्निरूहयेत्सम्यक्सिद्धिकामो विचक्षणः ॥ १४५ ॥
अपकर्षति वासेभ्यः क्षारः सर्वं यथामलम् ॥
अपकर्षति दोषान्वै आस्थापनमनेकधा ॥ ४६ ॥
बल्यं वृष्यं बृंहणीयमिन्द्रियाणां प्रसादनम् ॥
जीवकृज्जीवनं मेध्यं गजस्याऽऽस्थापनं मतम् ॥ ४७ ॥
क्षुत्पीडितो मदाविष्टो बालो वृद्धो गदातुरः ॥
स्नातः पीतोदकश्चैव भुक्तवांस्तृषितश्च यः ॥ ४८ ॥
वितृष्णो जीर्णभक्तश्च दुर्मना यश्च वारणः ॥
भीरुश्चैवाप्यनास्थाप्यः श्वासी यश्च मतङ्गजः ॥ ४९ ॥
एतेषामनुपूर्वेण शास्त्रमार्गानुसारिणा ॥
चिकित्सकेन क्षीरेण देयाः स्युः क्षीरबस्तयः ॥ १५० ॥
मात्रा बस्तेर्विधिरतः क्षीरबस्तिश्च वक्ष्यते ॥
अशनादुत्तरं पितो यथा स्नेहोऽभियोगतः ॥ ५१ ॥
पूर्वकायस्य विहितः स्नेहनः शास्त्रदर्शनैः ॥
स्नेहनः सर्वतस्तद्वद्विज्ञेयो दोषनाशनः ॥ ५२ ॥
अनन्ययोगजानां तु मात्रा बस्तिः प्रशस्यते ॥
क्षीणधातुकृशा नागा वृद्धाः क्षीणबलाश्च ये ॥ ५३ ॥
पश्चात्सूपहताश्चापि मदक्षीणास्तथैव च ॥
एषामग्नेर्विवृद्ध्यर्थं ग्रीष्मे प्रावृषि वा हितः ॥ ५४ ॥
देयः प्रायोगिको बस्तिर्विशेषेण तु दन्तिनः ॥
पूर्वाह्णे स्नातपीताय भुक्ताय च विधानतः ॥ १५५ ॥
रसायनं परं नित्यं पूर्वोक्तविधियोजितम् ॥
अतः परं प्रवक्ष्यामि क्षीरबस्तिविधिं शुभम् ॥ ५६ ॥

विधिवत्कथितं क्षीरसुमनोः पञ्चमूलयोः ॥
कल्कैर्युक्तं तिलोशीरपद्मकोत्पलकन्दकैः ॥ ५७ ॥
रास्नाम्रपौष्करीकाभ्यां मुस्तकेन तथैव च ॥
मृद्वीकाशर्करामांसीमञ्जिष्ठामधुसंयुतैः ॥ ५८ ॥
मधुरैर्जीवनीयैश्च देयो बस्तिः समन्वितः ॥
विधिवत्पृथिवीपाल दन्तिनां बलवर्धनः ॥ ५९ ॥
पित्तरक्तविकारेषु ग्रीष्मे शरदि वा हितः॥
पाकलेषु बहिर्दाहे दाहे चान्तर्गते तथा ॥ १६० ॥
मूर्छाभ्रमे तथा श्वासे क्षीणे घर्मश्रमेषु च ॥
बस्तिर्हितोऽयं राजेन्द्र तथा वाऽप्यभितोऽपि च ॥ ६१ ॥
निरूढानां च नागानामारण्यानां तथैव च ॥
गजास्त्वभ्यन्तरस्वेदाः शीतसात्म्या विशेषतः ॥ ६२ ॥
(*तस्मात्प्रशस्यते त्वेष बस्तिरूष्मानिलापहः ॥
पयसः प्रथमो बस्तिर्हितस्तु रसरक्तयोः ॥ ६३ ॥
मांसास्थिमेदसां वृद्धौ द्वितीयः क्षारयोजितः ॥
आप्यायते शुक्रमज्जस्तृतीयः पयसैव तु ॥ ६४ ॥
निहन्ति दोषानुत्क्लिष्टान्सुमनो जठरस्य तु ॥
स्नेहबस्तिर्यदा शीघ्रं दत्तमात्रो निवर्तते ॥ १६५ ॥
न हीनगुणमाप्नोति स्नेहस्याऽऽशु निवर्तनात् ॥
तमेव दापयेत्स्नेहं पुनरेव भिषग्वरः ॥ ६६ ॥
महाबलास्तु मातङ्गा वातप्रायास्तु दन्तिनः ॥
प्रवहन्ति तदा स्नेहं शीघ्रं तेन निवर्तते ॥ ६७ ॥
तस्मान्न दोषो दत्ते तु द्वितीये नात्र संशयः ॥
इत्येष सर्वबस्तीनां विधिरुक्तो विशेषतः ॥ ६८ ॥
विपरीते तु जायन्ते व्यापदो विविधात्मिकाः ॥
नेत्रबस्तिकृताश्चैव भूयश्च भिषजा कृताः ॥ ६९ ॥
इमं तत्र प्रवक्ष्यामि निरूहकर्मणो विधिम् ॥
यथास्वं सर्वदोषाणां कषायाणि घृतं वसा ॥ १७० ॥
चतुष्पदानां मूत्राणि तैलं दधि सुरा मधु ॥
बदराम्लं च दुग्धं च धान्योदकतुषोदकम् ॥ ७१ ॥

---

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

फलानि लवणं चैव निरूहद्रव्यमिष्यते ॥
सुरयोष्णाम्बुना मूत्रैस्तैलेन लवणेन च ॥ ७२ ॥
स्ववर्गीयैस्तु संयुक्तैः श्लेष्माण्युष्णा हिता गजे ॥
धान्याम्लफलनिष्क्काथैः सकुलत्थयवैः शुभैः) ॥ ७३ ॥
स्ववर्गैश्चानिले पथ्याः स्निग्धा लवणमूर्छिताः ॥
पयोरसघृतैर्युक्ताः स्ववर्गीयैश्च शीतलाः ॥ ७४ ॥
काषायमधुरा पित्ते बस्तयः स्युः सशर्कराः ॥
अपामार्गस्य च फलं तथा जीमूतकस्य च ॥ १७५ ॥
मदनस्य च पिष्टं स्यादावापं सर्वबस्तिषु ॥
सर्षपाः सरला रास्ना कुष्ठं तेजोवती तथा ॥ ७६ ॥
पिप्पल्यः शतपुष्पा च मृद्वीका मधुकं मधु ॥
भद्रदारु तथैला च सैन्धवं चेति बस्तिषु ॥ ७७ ॥
निरूहस्य भवेद्देयः स्वावापः पटुसैन्धवः ॥
श्लक्ष्णकल्कैः समायुक्ताः सुपक्कथितभेषजाः ॥ ७८ ॥
सुस्निग्धलवणा व्यक्ताः खजावमथिता हिताः ॥
कषायभागाश्चत्वारः कुर्यात्स्नेहस्य पञ्चमम् ॥ ७९ ॥
अष्टमं भेषजानां तु लवणस्य तु षोडश ॥
पूर्वमेवं तु ये प्रोक्तास्तत्रौषधगणा मया ॥ १८० ॥
यथालाभं यथावच्च तांस्तानादाय शास्त्रवित् ॥
कषायाणि निरूहाणां कल्कचूर्णानि यानि च ॥ ८१ ॥
अनुवासे च तत्सर्वं वर्गं समधु योजयेत् ॥
श्यामा कुटन्नटं चैव त्रिफला चित्रकं तथा ॥ ८२ ॥
तथा दारुहरिद्रा च फलानि मदनस्य च ॥
जीमूतकानि दन्ती च द्रवन्ती सर्षपा तथा ॥ ८३ ॥
शृङ्गवेरं वचा चैव तगरं देवदारु च ॥
पिप्पली भद्रमुस्ता च द्विगुणं चैव सैन्धवम् ॥ ८४ ॥
बलां चतुर्गुणां कृत्वा श्लक्ष्णकल्कं प्रपेषयेत् ॥
मूत्रैर्गजखरोष्ट्राणां दध्यम्लैः सुरयाऽपि च ॥ १८५ ॥
१ धान्याम्लबदरी क्लेदतिलतैलैः समन्वितैः ॥
कटुको व्यक्तलवणः श्लेष्मघ्नो बस्तिरिष्यते ॥ ८६ ॥

---

१ क. यथास्वं च । २ क. °मनुयो° । ३ क. °काऽथ द° ।

स्थूलाश्च कुष्ठिनो ये च मेदुराः पाण्डुरोगिणः ॥
कर्षणा दोषहरणो देयस्तेषां यथा हितः ॥ ८७ ॥
दन्ती द्रवन्ती श्यामार्क कुटजं कृमिवेधनम् ॥
अपामार्गं हस्तिकर्णं जीमूतं सकुटन्नटम् ॥ ८८ ॥
शतपुष्पा च कुष्ठं च तगरं चतुरङ्गुलम् ॥
सप्तलां च गवाक्षीं च शङ्खिनी केषुकं तथा ॥ ८९ ॥
अजशृङ्ग्यजगन्धे च कपिलां तुलसीं तथा ॥
प्रकीर्यामुदकीर्यां च गवाक्षीं च समाहरेत् ॥ १९० ॥
वातिकेनेव विधिना बस्तिर्दत्तो न शीतलः ॥
संशोधनीयः श्रेष्ठः स्याद्ग्रन्थिते कुपितेषु च ॥ ९१ ॥
क्षीरवृक्ष्या च रोध्रं च पिण्डीरुककसेरुके ॥
अभीरुपत्रिका श्यामा धवं खदिरमेव च ॥ ९२ ॥
तुरन्तीं चाग्निमन्थं च नीपं कट्फलचेतसम् ॥
षष्ठी सुवर्णक्षीरी च वञ्जजम्बू सधातुकी ॥ ९३ ॥
तिलांश्च पद्मकोशीरमित्येतानि समाहरेत् ॥
पित्तकेनैव विधिना बस्तिर्दत्तस्तु शीतलः ॥ ९४ ॥
भवेच्छृ(त्सु)तपुरीषस्य वृद्धसंग्रहणो हितः ॥
पयस्यां च मृणालं च शृङ्गाटककसेरुकम् ॥ १९५ ॥
बलामतिबलां चैव स्वयंगुप्ताफलानि च ॥
विदारी मधुकं चैव मृद्वीका क्षीरमोरटम् ॥ ९६ ॥
यवगोधूमचूर्णानि तथा मधुकराणि च ॥
अविच्छन्नामतिच्छन्नामित्येतानि समाहरेत् ॥ ९७ ॥
पित्तकेनैव विधिना वाजीकरणमुच्यते ॥
अश्वगन्धाविदारीभ्यां युक्त एष पुनः पुनः ॥ ९८ ॥
बृंहणीयो भवेद्बस्तिरभ्यस्तस्तत्त्वबुद्धिना ॥
संशोधनीयो निष्क्वाथः सिद्धार्थकवचान्वितः ॥ ९९ ॥
उष्णः सतैलतीक्ष्णः स्यादानाहे बस्तिरुत्तमः ॥
सहोदुम्बरबीजैस्तु पंचकोलसमीकृतः ॥ २०० ॥
कोविदारस्य निम्बस्य नीपस्य च तथा पुनः ॥
कोष्ठकस्याथ निष्क्वाथो मूत्रयुक्तो न शीतलः ॥ २०१ ॥

१ क. °स्तिर्देयस्तु ।

सतैललवणो बस्तिः क्षीर इत्यभिनिश्चितः ॥
वृत्तो नातिद्रवः काथो वृक्षा ये पिच्छिलाः स्मृताः ॥ २ ॥
शमीवृक्षस्य शाल्मल्या धन्वनस्य तथैव च ॥
वृत्तो नातिद्रवः काथो वृक्षा ये पिच्छिलाः स्मृताः ॥ ३ ॥
श्लेष्मातक्या परूषस्या ऐरावत्यास्तथैव च ॥
गाङ्गेरुकाया इत्येष बस्तिस्तेषां तु पिच्छिलः ॥ ४ ॥
शशैणोरभ्रबस्तानां वराहस्याथ पक्षिणाम् ॥
रुधिरैर्महिषाणां च रक्तबस्तिर्विधीयते ॥ २०५ ॥
यश्च शोणितजो बस्तिः पिच्छिलो यश्च कीर्तितः ॥
एतौ संग्रहणीयत्वात्पूजितावतिसारिणाम् ॥ ६ ॥
सर्वांश्चैवौषधिगणानतीसारनिवर्तकान् ॥
एवं यथास्वं युञ्जीत यथायोगं समीक्षितुम् ॥ ७ ॥
पूर्वमेव यथोद्दिष्टा येऽस्माभिः स्नेहबस्तयः ॥
तेषां वक्ष्यामि सर्वेषां पुष्कलं साधने विधिम् ॥ ८ ॥
पादभागौषधिगणैः परिपक्वं समं द्रवम् ॥
चत्वारोंऽशा द्रवस्यास्य स्नेहांशः पञ्चमो भवेत् ॥ ९ ॥
बिल्वमात्रस्य कल्कस्य यत्र नास्ति महागणः ॥
महतीत्यौषधिगणैस्ततोऽर्धः संमितो भवेत् ॥ २१० ॥
तृतीयभागमर्धं वा समीक्ष्य गुरुलाघवम् ॥
एतत्सर्वं समानीय कृतं निर्गुणितं शुचिम् ॥ ११ ॥
मज्जाभिश्च वसाभिश्च क्षारैश्च सह साधितम् ॥
जाङ्गलैश्च रसैर्युक्तं जलैश्चापि विशेषतः ॥ १२ ॥
उदश्विद्दधिमण्डैश्च काथैश्चापि पृथग्विधौ ॥
पचेन्मृद्वग्निना किंचिद्बस्त्यर्थं मधुसंयुतम् ॥ १३ ॥
खरपाकं भवेत्काथमभ्यङ्गार्थं महीपते ॥
पानार्थं चापि कर्तव्यं मृदुरेव तु जानता ॥ १४ ॥
सम्यक्सिद्धं तु कर्तव्यं बस्तिकर्म निरूहयोः ॥
मुखतो नश्य(स्य)तश्चैव पायुतो मेढ्रतस्तथा ॥ २१५ ॥
कटतो मृक्षणार्थं च प्रदानं षड्विधं भवेत् ॥
तत्र बस्तिगुणास्तावत्पुरस्तात्परिकीर्तिताः ॥ १६ ॥

१ क. गणस्यास्य । २ ख. घ. °वेत्कार्यम°।

शेषानुदाहरिष्यामि गुणानुत्तरबस्तिषु ॥
राजंस्तत्र विकारेषु मेढ्रव्याधिषु येप्यते ॥ २७ ॥
बस्तेरुत्तरसंज्ञस्य संयोगः सिद्धिकारक(क्षम)नः ॥
मूत्रकृच्छ्रप्रमेहेषु मूत्रवातेषु चाधिकम् ॥ १८ ॥
मूत्रसङ्गे जठरके यथान्यायं महीपते ॥
वातकुण्डलिकायां च शोणितं यः प्रमेहति ॥ १९ ॥
एतेषु वै विकारेषु प्रशस्तो बस्तिरुत्तरः ॥
पुष्पनेत्रस्य बस्तेश्च प्रमाणं यद्द्रवस्य च ॥ २२० ॥
तदुत्तरं प्रवक्ष्यामि यथाशास्त्रं महीपते ॥
चतुर्दोषसमुत्थेषु संसृष्टेष्वितरेषु च ॥ २१ ॥
यथास्वमौषधैः सम्यक्स्नेहमात्रां तु साधयेत् ॥
यथोक्तं पूर्ववद्वाप्यं पयः पीतवतः शृतम् ॥ २२ ॥
बस्तेर्गमनमार्गार्थं यवागूं च घृतप्लुताम् ॥
मेढ्रप्रमाणमादाय नेत्रमुत्तरबस्तिकम् ॥ २३ ॥
वृत्तं श्रो(स्रो)तःप्रमाणेन श्लक्ष्णं कुर्यात्समीहितम् ॥
अनुवासनमात्रायास्तस्यांशं षोडशं भवेत् ॥ २४ ॥
स्नेहप्रमाणमेतत्स्यात्कार्यमुत्तरबस्तिषु ॥
पुरस्तादुच्छ्रिते स्थाने विधिवच्चाश्रिताय च ॥ २२५ ॥
ऋतुस्थिताय स्वस्थाय लघवे पूजिताय च ॥
अचालेय(?)भिषग्नेत्रं प्रणयेत्सुसमाहितम् ॥ २६ ॥
प्रमाणमार्गमेषण्या श्रो(स्रो)तोमार्गमनुव्रजेत् ॥
नाड्यां समूत्रि(?) संप्राप्य ततस्तत्र शनैः शनैः ॥ २७ ॥
पीडयेच्च यथा प्रोक्तमास्थापनविधौ यथा ॥
निष्कृष्य च ततो नेत्रं नाडी(*स्थान)मतः सृजेत् ॥ २८ ॥
आकाङ्क्षेत मुहूर्तं च बस्तेः प्रतिनिवर्तनम् ॥
सर्वश्चास्य विधिः कार्यो यथोक्तः पूर्वमेव हि ॥ २९ ॥
आदाने विनिवृत्तो च संस्कारक्रम एव च ॥
आनायाति यथाकालं वर्तिमनुविधापयेत् ॥ २३० ॥

---

* खघपुस्तकयोर्नोपलभ्यते ।

---

१ क. °कृच्छ्रे प्रमेहे च मूत्रवाते ततोऽधि° । २ क. °समाहित° ।

नाडीछिद्रप्रमाणेन दीर्घामष्टाङ्गुलं भिषक् ॥
बृहतीफलनिर्यासस्तथाऽपामार्गतण्डुलाः ॥ ३१ ॥
निर्गुण्ड्यारग्वधानां च तथा सहचरस्य च ॥
सुरसस्य च पत्राणि पिप्पल्या मरिचानि च ॥ ३२ ॥
आगारधूम इत्येषां वर्तिर्मूत्रप्रवर्तिनी ॥
ततस्तीक्ष्णतरां वर्तिमपानेऽन्यां प्रवेशयेत् ॥ ३३ ॥
लवणत्र्यूषणमयीमपानप्रतिपूरणीम् ॥
द्वादशाङ्गुलमात्रां तु दीर्घत्वेन प्रवेशयेत् ॥ ३४ ॥
स्वभ्यक्तस्य च (*नागस्य) पूर्वमेव यथाविधि ॥
निःसृतः स्रोतसो वाऽपि प्रदेया नु विशां पते ॥ २३५ ॥
उपास्य नु मुहूर्तं च तथैवान्यां प्रवेशयेत् ॥
आस्थापनीयवच्चापि सर्वेष्वेव विधिर्हितः ॥ ३६ ॥
बस्तिदानप्रमाणेन वक्ष्यन्ते परतस्ततः ॥
नेत्रबस्तिः कृतास्त्वेवं चतुष्पादकृतास्तथा ॥ ३७ ॥
षड्विधा व्यापदस्तासां योनिशुद्धिश्च वक्ष्यते ॥
अतिमात्रप्रवेशं च हीनमात्रं तथैव च ॥ ३८ ॥
तिर्यगूर्ध्वमधश्चापि नेत्रस्य क्षेपणे तथा ॥
पुनः पुनस्तथाऽत्यर्थं मृदु यच्चापि पीडितम् ॥ ३९ ॥
अतिमात्रं तथा हीनं व्यत्यासाद्भेषजस्य च ॥
कालातिनयनं चैव बन्धशैथिल्यमेव च ॥ ४० ॥
भिषग्दोषकृता ज्ञेयास्तासां दोषमतः शृणु ॥
तत्र नेत्रे विचलिते बलाक्षिप्ते ततस्ततः ॥ ४१ ॥
प्रतिनिष्पीडिते नेत्रे क्षण्यन्ते वलयोऽपि वा ॥
असंप्राप्तेऽथवा तिस्रो वलीनेत्रे च पीडिते ॥ ४२ ॥
प्रतिनिष्पीड्यते बस्तिर्वायुर्वेगेरितस्तथा ॥
गतेऽपि वा गुदमुखं पुरीषे प्रतिहन्यते ॥ ४३ ॥
दुर्बले बस्तिनेत्रे वा दुर्बले वाऽपि सिच्यति ॥
अतिमात्रप्रवृत्तेषु वेदना स्यात्पुरा गुदे ॥ ४४ ॥

* ख. घ. पुस्तकयोर्नोपलभ्यते ।

१ क. तु । २ ख. घ. सर्वस्त्वेव । ३ क. °धिर्मतः । ४ ख. घ. °तास्त्वेवं । ५ क. °थाऽभ्यर्थं । ६ क. क्षणान्ते ।

क्षणान्ते वलयस्तस्मात्तस्मान्नातिप्रवेशयेत् ॥
सवल्लीके कृते बस्तौ पीडिते वा पुनः पुनः ॥ ४५ ॥
कोष्ठे वायुप्रवेशः स्यात्तस्मान्नैवं समाचरेत् ॥
अंभ्यर्धे पीडिते बस्तौ नेत्रे वाऽपि प्रवेशिते ॥ ४६ ॥
पक्काशयातिसारी स्याद्वेदनार्तो महीपते ॥
ईषत्तु पीडिते बस्तौ विषमं च प्रवेशिते ॥ ४७ ॥
नेप्सितं देशमाप्नोति स्याच्च बस्तिर्न कारकः ॥
औषधानां विपर्यासे यथास्वं दोषवर्धनम् ॥ ४८ ॥
तस्य वा प्रशमो व्याधेरन्येषां जन्मभावतु(तः) ॥
हीनमात्रे तु भेषज्ये कार्यस्यासाधनं भवेत् ॥ ४९ ॥
अतिमात्रे तु मात्रं तु दोषस्य हरणं भवेत् ॥
तेन दौर्बल्यमाप्नोति संज्ञानाशोऽपि वा भवेत् ॥ २५० ॥
उपद्रवाणां चोत्पत्तिर्मरणं वा ततो भवेत् ॥
कालातिनयतोऽप्येवं नियतं दोषवर्धनम् ॥ ५१ ॥
अन्येषां वा विकाराणामुत्पत्तिस्तदुपेक्षणात् ॥
अग्रेऽतिकर्कशं स्थूलमसमं चैव यद्भवेत् ॥ ५२ ॥
तन्नेत्रं वेदनां घोरां हस्तिनामुपपादयेत् ॥
अधुना स्रोतसा तस्य चिरात्स्नेहः प्रसिच्यते ॥ ५३ ॥
अर्धदत्ते कथंचिच्च सहसाऽस्य निवर्तयेत् ॥
तत्र वेगविघातात्तु जायन्ते गुदमेढ्रयोः ॥ ५४ ॥
बस्तौ चोपद्रवाः कष्टास्तस्मादेतन्न शस्यते ॥
भिषगातुरयोश्चैव तथैव परिकर्मिणः ॥ २५५ ॥
यथोक्तमेतद्विज्ञेयमसिद्धौ लक्षणं नृप ॥
अनया(या) व्यापदा सिद्धौ सिद्धयश्च ततः परम् ॥ ५६ ॥
प्रवक्ष्यामि पृथक्त्वेन या युक्ताः पार्थिवा यतः ॥
तत्र वातेन पित्तेन श्लेष्मणा वाऽपि भूयसा ॥ ५७ ॥
पुरीषेणाथवाऽत्यल्पो बस्तिः स्नेहः कथंचन ॥
संयुक्तो गत एकत्वं न चैत्प्रतिनिवर्तते ॥ ५८ ॥
मृदुश्चाल्पश्च विच्छिन्नस्नेहो नैव निवर्तते ॥
असंशुद्धशरीरस्य मार्गदोषेण संवृतो ॥ ५९ ॥

बहु भुक्तवते बस्तिर्यत्रैव परिवर्तते ॥
दूरं बस्तेः प्रविष्टस्य स्नेहमात्रासमेन तु ॥ २६० ॥
समा विद्या न सा जातु पुनः प्रतिनिवर्तते ॥
निदानेषु यथा प्रोक्तं दोषाणां व्यञ्जनं मया ॥ ६१ ॥
तेन तेनान्वितो बस्तिर्यथास्वं स्यात्सुलक्षणः ॥
संसृष्टेन पुरीषेण बस्तौ कुक्षिर्विपद्यते ॥ ६२ ॥
निश्वासस्य च पूतित्वमाध्मानः शूलमेव च ॥
पक्वाशयगुरुत्वं च गात्रसादश्च जायते ॥ ६३ ॥
बस्तावेतत्पुरीषेण ग्रथिते भवति क्षणम् ॥
अन्नेन चैव संसृष्टे छर्दिर्मूर्छाऽङ्गगौरवम् ॥ ६४ ॥
आमाशयविशुद्धिश्च हिक्का श्वासस्तथैव च ॥
शूलं मानाविनन्दित्वं वायोरङ्गप्रवर्तनम् ॥ २६५ ॥
मुखप्रस्ता(स्रा)व इत्येवं लिङ्गमन्नेन संहते ॥
अत्युन्नतशरीरस्य पीडितोऽत बहुद्रवः ॥ ६६ ॥
अल्पाहारस्य भिषजा काये पूर्वं विशोधिते ॥
भूयश्चोच्छ्वासवेगेन संप्रक्तो बस्तिरुद्गतः ॥ ६७ ॥
सज्जमानोऽथवा नेत्रे मुखं वा प्रतिपद्यते ॥
'अभ्युन्नतशरीरस्य बस्तिर्वातसमीरितः ॥ ६८ ॥
बस्तिमेव प्रपद्येत ततः स्नेहः प्रवर्तते ॥
अल्पतैलविधानेन हृदयोपद्रवो भवेत् ॥ ६९ ॥
अल्पत्वान्मार्दवाच्चैव न दोषहरणं भवेत् ॥
दोषः संमूर्छितो वाऽपि कोष्ठ एव विलीयते ॥ २७० ॥
अल्पो वा हृदये दोषान्हीनमात्रैस्तु बस्तिभिः ॥
दाहं तृष्णां च मूर्छां च तीक्ष्णो बस्तिरुदीरयेत् ॥ ७१ ॥
कुर्याद्वाऽप्यतियोगेन जीवादानं न संशयः ॥
अजीर्णे बस्तिदानेन गुदे दोषः प्रवर्तते ॥ ७२ ॥
छर्दिर्मूर्छा च शूलं च गात्रसादश्च जायते ॥
उच्छ्वासस्याविशुद्धिश्च जृम्भणं परिवर्तनम् ॥ ७३ ॥
प्रवारणं परिस्रावो निस्तम्भो रोमहर्षणम् ॥
अशुभानि भवन्त्येवमजीर्णे यः प्रयच्छति ॥ ७४ ॥

तस्मान्नैतेषु कालेषु बस्तिर्वै प्रणयेद्भिषक् ॥
नातितीक्ष्णो न च मृदुर्नात्युष्णो नातिशीतलः ॥ २७५ ॥
मात्राधिको वा हीनो वा निरूहो न विधीयते ॥
सत्त्वसात्म्यं च यो व्याधिं देशं कालं यथाबलम् ॥ ७६ ॥
समीक्ष्य पीडयेद्बस्तिं यथोक्तं कुशलो भिषक् ॥
तत्र नेत्रस्य दोषेण बस्तिदोषेण वा पुनः ॥ ७७ ॥
भिषग्दोषेण चोत्सर्गे पुनर्दानं विधीयते ॥
पुरीषे चानिले वाऽपि प्रवृद्धे ग्रथितेऽपि वा ॥ ७८ ॥
तीक्ष्णाः संशोधनीयाश्च प्रशस्यन्तेऽस्य बस्तयः ॥
गुदे क्षतेषु नागस्य पैत्तिको विधिरिष्यते ॥ ७९ ॥
निदाने पित्तलिङ्गानां दर्शने पैत्तिको विधिः ॥
वातिको वातलिङ्गैश्च श्लैष्मिकः श्लैष्मिकेषु च ॥ २८० ॥
संनिपातेषु बोद्धव्यं यथास्वं दोषलक्षणम् ॥
संशक्ते तु यथा कुर्याद्यथोक्तं पूर्ववन्मया ॥ ८१ ॥
अपाने वक्ष्यते कार्यं तस्य वै पैत्तिको विधिः ॥
नेत्राभ्यां मुखतो वाऽपि बस्तिः स्नेहस्य दर्शनम् ॥ ८२ ॥
उत्क्षिप्य रोपयेद्देशं यत्र स्यादुन्मुखो गजः ॥
रज्ज्वाऽतिपीडया चास्य ग्रीवायामीषत्तन्द्रितः ॥ ८३ ॥
अधः प्रपीडितो बस्तिरुरोमार्गानुगो भवेत् ॥
ततः स शोधनीयः स्यात्परिषेकश्च शीतलः ॥ ८४ ॥
भ्रष्टलिण्डप्रमादश्च बस्तावूर्ध्वगते सति ॥
त्रिभिर्वातादिभिर्दोषैः पुरीषेणाथ वा पुनः ॥ २८५ ॥
अनागच्छति संरुद्धे तीक्ष्णः संशोधनः स्मृतः ॥
यवसेन तु संप्रष्टे भक्तग्रासं निवर्तते ॥ ८६ ॥
दूरं प्रवेशितो बस्तौ यश्च नायाति दारणः ॥
फलबिल्वकयोश्चापि निष्काथो बस्तिरिष्यते ॥ ८७ ॥
बदरकोलकुलत्थानां निष्काथस्तिल्वकस्य च ॥
श्यामात्रिवृत्तैलयुतः सुरया यो विधीयते ॥ ८८ ॥

१ क. क्षतेऽस्य । २ क. °वामादतादिति: ॥ ८३॥

प्रणिदध्याच्च विधिवत्समं त्रिवृतया सह ॥
तैलं विपक्वमित्येष बस्तिर्दूरं प्रवेशितः ॥ ८९ ॥
तस्मिन्दत्तो निरूहस्तु बस्तिस्तेन प्रवर्तते ॥
पुनरेवानुवास्याथ यथोक्तेन क्रमेण तु ॥ २९० ॥
त्रिफलारम्यकं स्नेहः शालिमूलं तथैव च ॥
चिरबिल्वश्च विज्ञेयः श्यामामूलं च सर्वतः ॥ ९१ ॥
हृदयोपद्रवे दद्यात्संशोधनमिदं भिषक् ॥
(*ततो बस्तिविधानं तु कार्यमाहुस्ततः परम् ॥ ९२ ॥
विसृष्टलवणस्तीक्ष्णः किंचिदुष्णतरस्ततः ॥
चतुर्थोऽशः प्रदातव्यस्तृतीयो वाऽर्धमेव च ॥ ९३ ॥
जीवादानेऽतियोगे च प्रदेया रक्तबस्तयः ॥
पिच्छिलाश्चापि देयाः स्युरेवमेवातिसारिणे ॥ ९४ ॥
भक्ते ग्रासावरोधे च च्छर्द्युद्गारे तथैव च ॥
शूलेन वातिको बस्तिराध्माने च विधीयते ॥ २९५ ॥
बस्तेश्च प्रणिधानं स्यात्ततस्तु परिकीर्त्यते ॥
पिच्छिला स्नेहबस्तिश्च पैत्तिकश्च विधीयते ॥ ९६ ॥
शिरसः पूरणे देयाः शोधनीयाश्च बस्तयः ॥
मूर्छायामुपचारस्तु शीत एव न संशयः ॥ ९७ ॥
वाजीकरणसंयुक्ताः शीता धातुक्षये हिताः ॥
कृशस्य बृंहणीयाश्च स्थूलस्य तु विशोधनाः ॥ ९८ ॥
प्रत्यनीकेन कर्तव्यं तस्य बस्तेश्चिकित्सितम् ॥
सर्वत्रैवं विजानीयादित्युद्देशः प्रकीर्तितः ॥ ९९ ॥
स्नेहनः सर्वपूर्वः स्याद्बलिनोऽथ विरेचनः ॥
आस्थापनं स्नेहबस्तिरित्येष क्रम इष्यते ॥ ३०० ॥
कृत्स्नेष्वर्थेष्वभिप्रायमतिदीप्ततराग्निना ॥
इन्द्रियाणां प्रसादश्च सर्वत्र रतिरेव च ॥ ३०१ ॥
सुखस्वप्नावबोधश्च सुखोत्थानिस्तथैव च ॥
रोचते चास्य यत्किंचिद्बलमावहते च यत् ॥ २ ॥

*धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

१ क. हृदयोपद्रवं विद्यात्संशोधनविधानतः । २ घ. °स्य तस्य चिकि° ।

वपुर्न सज्जते तेषु विहारमभिकाङ्क्षति ॥
तमश्च देहेऽप्यधिकं रजश्चाप्युपशाम्यति ॥ ३ ॥
सत्त्वमापूर्यते चास्य प्रसादं चाधिगच्छति ॥
प्रपद्यते क्रुतं शीघ्रं क्रुतं चानुसरेद्दृढम् ॥ ४ ॥
शीतोष्णानिलवर्षाणि सर्वाणि सहते भृशम् ॥
तेजस्वी च स्थिरश्चैव सुगन्धिश्चैव जायते ॥ १०९ ॥
सुखसंवेशनोत्थानो जवसंपन्न एव च ॥
मृदं च हर्षजं शीघ्रं वारणः प्रतिपद्यते ॥ ६ ॥
सम्यग्दत्तस्य विज्ञानमित्येतत्संप्रकीर्तितम् ॥
पृच्छतस्तव राजेन्द्र विस्तरेण यथाक्रमम् ॥ ७ ॥
प्रवेशमर्यादावाप(?)कर्णिका द्वादशाङ्गुला ॥
आयामोऽर्धपरीणाहः कर्णिकोत्तरतो भवेत् ॥ ८ ॥
एतदेव प्रमाणं स्यात्पुष्पनेत्रस्य धीमता ॥
आयामे त्वथ कर्तव्यं तथैव स्यात्सकर्णिका ॥ ९ ॥
पुष्पनेत्रं तु कर्तव्यं ताम्रकायोमयं शुभम् ॥
श्लक्ष्णमेवानुपूर्वं च बस्तिर्गव्यश्च पूज्यते ॥ ११० ॥
यावन्मन्द्रप्रवेशश्च बोद्धव्यश्च विजानता ॥
परिणाहश्च कर्तव्यो मूत्रमार्गप्रमाणतः ॥ ११ ॥
स्नेहमात्रा तु कर्तव्या षोडशांशा तु सा भवेत् ॥
सर्वमन्यद्धि कर्तव्यमनुवासनकर्मवत् ॥ १२ ॥
ततो वलाग्रः कर्तव्यो बन्धने षोडशाङ्गुलः ॥
बस्त्यर्थं च दृतिः कार्या ऐणेया वाऽप्यथाऽऽजका ॥ १३ ॥
स्नेहोपयवस्तांश्चास्य प्रमाणं तु यथार्थतः ॥
ज्येष्ठा त्रिभागाद्रुत्कृष्टं मध्यं नेत्रमतोऽधमम् ॥ १४ ॥
बस्तिर्नेत्रविधिस्त्वेष त्रिष्प्रमाणविभागतः ॥
दृतिं तत्सदृशीं कुर्यात्सुश्लिष्टां परमर्धिताम् ॥ ११९ ॥
नेत्रच्छिद्रे प्रवध्नीयाद्यथापूर्वं समाहितः ॥
उत्तमस्य तु नागस्य भवेत्पञ्चाढकं मतम् ॥ १६ ॥
मध्यमाय भवेद्देयं नित्यं तु चतुराढकम् ॥
अधमायाऽऽढकानि स्युर्वैचत्रीण्येव दापयेत् ॥ १७ ॥

---

१ घ. °स्ताऽमस्य ।

स्नेहप्रमाणमुद्दिष्टं यथावत्प्रविभागशः ॥
भूयोऽङ्गराजः पप्रच्छ कालकाप्यं महामुनिम् ॥ १८ ॥
अभुक्तं वा निरूहेत भुक्तं वा चानुवास्यते ॥
यदि तत्कस्य हेतोस्तु भगवन्प्रब्रवीतु मे ॥ १९ ॥
इत्युक्तस्तेन विनयात्तस्मै प्रोवाच तत्त्वतः ॥
अभुक्तवान्यदा नागः पूर्वमेवानुवास्यते ॥ २२० ॥
तदाऽस्याऽऽमाशयं स्नेहः शून्यकोष्ठस्य गच्छति ॥
आमाशयस्थे स्नेहे तु पश्चाद्भोजयते द्विपम् ॥ २२१ ॥
स्नेहेनाऽऽमाशयस्थे तु हृदयं तस्य पीड्यते ॥
संमूर्छितो विह्वलति तथाऽऽध्मानं नियच्छति ॥ २२ ॥
स भोजनविमिश्रस्तु नैवाधः प्रतिपीड्यते ॥
तेनाग्नेर्दुर्बलीभावः सहसैवास्य जायते ॥ २३ ॥
मन्दाग्निभावात्पित्तं च कफश्चास्य प्रकुप्यति ॥
तौ प्रदुष्टौ तु सहसा चाऽऽममार्गं निरुन्धतः ॥ २४ ॥
अन्तर्वाताभिभूतस्य स्नेहो नैव निवर्तते ॥
अनिवृत्तः स्थितः स्नेहो धमनीं तस्य दापयेत् ॥ २२५ ॥
अधःश्रो(स्रो)तःसु रुद्धेषु वायुश्चोर्ध्वं प्रधावति ॥
चक्षुः श्रोत्रं शिरश्चास्य घ्राणं चैव रुणद्धि तु ॥ २६ ॥
तस्माद्भुक्तवते बस्तिः स्नेहस्तस्य विधीयते ॥
अभुक्तस्य निरूहः स्यादतिरूहस्तु भुक्तवान् ॥ २७ ॥
यदा तु भुक्तवान्नागो निरूहेत विजानता ॥
बहूब्रोगास्तदा साप्यस्तन्निमित्तं नियच्छति ॥ २८ ॥
अत्यर्थं पाकलं तृष्णामतीसारमरोचकम् ॥
मूर्छां ग्लानिं मदं तन्द्रीं मरणं चापि गच्छति ॥ २९ ॥
उष्णस्तीक्ष्णश्च सहसा निरूहस्तु विशां पते ॥
पक्वाशयमपक्वं च भुक्तं तस्यापकर्षति ॥ ३० ॥
अभुक्तवति तस्मात्तु स्निग्धपूर्वोऽनुवासनैः ॥
उपपन्नो निरूहस्तु यथोक्तं कार्यसिद्धये ॥ ३१ ॥
अपवादांश्च बुध्येत यथोक्तानवधारयेत् ॥
ऊहापोहौ यथायुक्ति दृष्ट्वा कार्योऽऽतुराणि तु ॥ ३२ ॥

सप्तरात्रं तु राजेन्द्र कर्मोत्तममिति स्मृतम् ॥
द्वे मध्यमधमं त्वेकं विधेतत्संप्रकल्पयेत् ॥ ३३ ॥
उत्तमे वोत्तमं ज्ञेयं मध्यमे वाऽपि मध्यमम् ॥
अधमे त्वधमं नित्यं यथावर्ष्म यथाबलम् ॥ ३४ ॥
सप्ताहात्परतः स्नेहः सात्मीभावाच्च निर्गुणः ॥
तस्य विश्रम्य दातव्यं स्नेहं वा त्र्यहमेव वा ॥ ३५ ॥
कालस्तु दानाद्द्विगुणः परिहारो विधीयते ॥
बलवर्णसमाधौ च ततः सर्वं समाचरेत् ॥ ३६ ॥
व्यायामं भारहरणं गमनं सहसाऽध्वनि ॥
अतिस्थानं च शयनं युद्धव्यायाममेव च ॥ ३७ ॥
दुस्थानमथ दुःशय्यां तथाऽत्यशनमेव च ॥
असात्म्यभोजनं वाऽपि तथा भोजनमेव च ॥ ३८ ॥
अत्युष्णमतिशीतं च तथा वर्षानिलानपि ॥
शब्दादीनि च सर्वाणि प्रतिकूलानि यानि च ॥ ३९ ॥
बस्तौ दत्ते न सेवेत परिहारे तथैव च ॥
बलवर्णसमग्रो हि सहते विषमान्यपि ॥ ३४० ॥
एतत्सर्वं समाख्यातं यथोद्दिष्टं विशां पते ॥
बस्तिकर्मविधानं हि कृत्स्नं तुभ्यमरिंदम ॥ ४१ ॥

तत्र श्लोकः—

इमं विधिं यो निखिलेन कुर्याद्द्विधातुमापत्सु च यो न सीदति ॥
स भूमिपालेन विधातुमौषधं गजेषु कार्यो भिषजां वरस्तदा ॥ ४२ ॥

इति ॥

इति श्रीपालकाप्यविरचिते हस्त्यायुर्वेदमहाप्रवचने श्रीपाठे चतुर्थ उत्तरस्थाने बस्तिदानकथनं नाम पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः ।

अथ भगवन्तं पालकाप्यमाश्रमस्थमङ्गराजोऽभिवन्द्याब्रवीत् 'भगवन् कीदृशे भूमिभागे कस्यां दिशि हस्तिनः शाला कर्तव्या, किं प्रमाणम्, कीदृशी, किं संस्थानम्, व्याभागो द्वारं वा कस्यां दिशि हस्तिशालायाः कथं वा कस्मिन् भूतौ विधानमेतदिच्छामि वेदितुं तदशेषेण भगवन् व्याख्यातुमर्हसि' ॥

ततः प्रोवाच भगवान्पालकाप्यः शृणु राजन्स्थानविधिमुपदिश्यमानमशेषनागानाम् । तत्र शिवे रम्ये बहुद्रुमे भूमिभागे नातिदूरं नगरस्य स्थानं ग्रामं समाश्रितस्य(?) प्रागुत्तरस्यां दिशि चैत्यश्मशानदेवतायतनयक्षपिशाचराक्षसभूतायतनानि दूरतः परिहृत्य कृष्णश्वेतरक्तपीतपाण्डूनां भूमिवर्णानामन्यतमेन वर्णेनोपपन्नां भूमिं ज्ञात्वा सुस्निग्धभूमिभागे व(शा)लां वारणस्योपकल्पयेत् ।

हस्तचित्राश्वयुक्चित्राश्रवणानामन्यतमे नक्षत्रे, दशम्येकादशीद्वितीयातृतीयासप्तमीनामन्यतमे दिवसे, सावित्रबालाभिजितमैत्रराक्षसभूतानामन्यतमे मुहूर्ते, शान्तिं कृत्वा ततोऽक्षतोदकपूर्णकलशैः सचन्दनैः प्रोक्ष्य भूमिभागं हुत्वाऽग्निं ब्राह्मणांस्तर्पयित्वाऽन्नैश्च दक्षिणाभिश्च ततः पुण्याहघोषेण तां समां शालां मापयेत् ।

त्रिविधस्तु विस्तारः शालानामेष्टव्यो भवति यथाहस्तिप्रमाणेन । तत्रोत्तमस्य चतुर्विंशत्यरत्निविस्तारा, मध्यमस्य द्वाविंशत्यरत्निविस्तारा, जघन्यस्य विंशत्यरत्निविस्तारा । द्विगुणायतां प्राग्द्वारामुदग्द्वारां वा प्रकल्पयेच्छालाम् । तत्र षट्किष्कूत्सेधहस्तद्वयं किष्कूत्सेधां ज्येष्ठस्य, पञ्चकिष्कूत्सेधां मध्यमस्य, द्वेचतुःकिष्कूत्सेधां जघन्यस्य । विस्तरार्धमात्रः प्राग्जीवः कर्तव्यः । ततः शालशाकतिनसार्जुनानामन्यतमेन द्रव्येण सारवन्तमग्रन्थिकोटरममाद्रव(?)मुतक्षितमृजुं वृत्तं स्तम्भमनवबाधकरं हस्तिनां सगदोरसान्तं चतुरो हस्तान्नियानयेत् । सुपरिगृहीतं शङ्कुभिश्चतुरस्तात्पार्श्वतश्चाऽऽदशहस्ताऽनुत्सेधमस्य कुर्यात् । षट्पञ्चाशदङ्गुलपरिणाहमुत्तमस्य, चतुर्दशाङ्गुलपरिणाहं मध्यमस्य, द्वादशाङ्गुलहीनं जघन्यस्य । तस्याऽऽसनस्योपरि हस्तमात्रे गोस्तनं कारयेत् । अथास्य स्तम्भमूलेष्वश्लिष्टं पश्चात्प्रवणं सुश्लिष्टकरंकावेधनं (?) कुर्यात् । किंचिन्मध्ये निम्नोन्नतसंपुरस्ताद्विहस्तमात्रं हस्त(स्ति)विश्रामणार्थं कपिशीर्षं कुर्यात् । अवकुष्ठं च पृष्ठतोऽग्रपोमनं कर्तव्यम् । पदपर्यन्तश्च हस्तिशालायां सर्वतोर्धकोष्ठकः कार्यः सुलिप्तो मृत्तिकया । ज्याभाग(गं)पूर्वेणोत्तरेण वा कुर्याद्यथाहस्तिप्रमाणं किंचिन्मध्यभागे निम्नोन्नतं पार्श्वेषु मृदुना सूक्ष्मेण च पांशुनाऽवकीर्णम् । एवं द्वौ हस्तिनः स्थाने स्तम्भौ शय्याभागौ च विभज्य कारयेत् ।

ग्रीष्मकाले रात्रौ पुनरागतं कण्टकमुपनेये(नयेत्) प्रवातार्थम् । पुवं (एवं) दिवसक्ला(क्ला)न्तो वारणः सुखमाप्नोति । तानेवोदितसूर्ये कटकान्बन्धयेत्प्रच्छादनार्थं(त) येन पार्श्वेनातपस्यागमः । शेषाणि पार्श्वाणि विवृतानि कुर्यात्प्रवातार्थम् । प्रातरेवोपलेपयेच्छालाम् । निवृत्तस्य चास्य प्रवराप्रविष्टस्य मुहु-

मुहुः शीतकेन वारणा सेवयेत् । स्थाने हस्तिकाले पाथरात्रिकं कुर्यात् । नवान्कुम्भान्शीतवारिपूर्णान्स्तम्भस्यानुपरि आ(आ)बध्येद्वीर्वा । यवसाध्यापोकानि चोदकानि यवसानि नित्यं संनिहितानि कर्तव्यानि पल्लवानि च विचित्राणि कुंप(कुव)लानि च । सायं चैनं निर्वाणात्प्रत्यागतं बहिः सुखं मुहूर्तं स्थापयेत् । ग्रीष्मस्थानविधिरुक्तः ।

अथ वर्षास्वपि स्थानं कर्तव्यम् । यथा क्वचिदपि नोपक्लिद्यते तथा बहुविधैःस्थाभैर्जर्यवसैः सुविहितं कर्तव्यम् । प्रवृष्टे च देवे सर्वतः कटकैः संवृतं कुर्यात् । निवृष्टे पुनः कटकानपनयेत्प्रवातार्थम् । नित्यं संनिहितश्च धूमः कर्तव्यो दंशमशकादिग्रहणार्थम् ।

अथ हेमन्ते शीतवातनिग्रहार्थमथ(र्ध)कुड्योपगता दृढाः कटकाः कार्याः । निवातमेव रात्रौ कृत्वाऽतीतायां रजन्यामातपागममभिज्ञायापसारयेदातपप्रवेशार्थम् । ततो मन्दार्ककिरणैरेव तप्यमानः प्रह्लादमुपगच्छति शरीरे सुखमाप्नोति द्विरदपतिः सुखं च सलिलमवगाहयेत् । विचित्रैर्यवसैर्विविधैरपि हितमस्य स्थानं कुर्यादमुमिति ।

तत्र श्लोकौ—

वरं स्थानेषु विहितं यथोक्तं गुणसंपदा ।
कर्तव्यं वारणेन्द्राणां विधानं हितमिच्छता ॥ १ ॥
एवं सुविहिता यस्य राज्ञो राजन्गजोत्तमाः ॥
तस्य युद्धेषु विजयं प्रयच्छन्ति सुखानि च ॥ २ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने वृद्धोपदेश उत्तराभिधाने परिवारचतुर्थस्थाने शालाविधानं नाम षष्ठोऽध्यायः († प्रथमः) ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

अथ भगवन्तं प्रभातिमासयन्तं दिवसकरकरालवपुषमतितपसमनेकऋषिगणमध्योपविष्टं पप्रच्छ रोमपादः पालकाप्यं 'कथमतिचपलभावानां क्षीणबलमांसशोणितानां यान्त्र(तु)वशात्प्रमाणमनपेक्षहरणीयमक्षमीयमर्दनीयप्रवेनी-

---

* 'बहुविधैर्भूर्जैर्यवसैः' इति स्यात् । † 'प्रथमः' इति पाठस्तु पुस्तकद्वयेऽपि न अने कथं प्रक्षिप्तः ।

येषु हस्तियुद्धविमर्दोपगमा(ता)नां च गात्रविक्षोभदन्तप्रतिमानप्रवक्षसमुत्थाना नानाविधलिङ्गवेदना विकाराः संभवन्ति । तेषां नस्यविधानादृते न दोषोपशमन-मस्ति नागानां तन्मेऽखिलतो नस्यविधानं समुपदेष्टुमर्हसि भगवन्येषां व्याधीनां प्रशमनकरं येषां च वृद्धिमुपजनयति यथा येषां च नस्यकर्मानुविधीयते यथा यच्च स्नेहप्रमाणं यथा चाति(च)पल्लानां यत्र विधिरनुष्ठीयते यथावस्थितस्योर्ध्व-करवारणस्य कर्म विधीयते तदखिलतो भगवन्व्याख्यातुमर्हसि' ।

अथ भगवानुवाच पालकाप्योऽङ्गराजाय रोमपादाय वस्तुजषस्व(?) यदीरितं वाक्यमिष्टशब्दमव्याहतमपुनरुक्तं संस्कृतपदविचित्रार्थम्—नागानां नस्यकर्म-विधानमिदं भिषजा नित्यमशास्त्रज्ञेनाकर्मकुशलेनादृष्टयन्त्रेणादृष्टविधानेनोहापो-हाभ्यां विप्रयुक्तेन न चाविपश्चिता नस्यकर्म प्रदातुमित्येतन्मे विवक्षितम् । तद्य-थावदुपलम्भस्व शिरोरोगाक्षिरोगदन्तरोगकर्णरोगमुखरोगमन्याग्रहहस्तग्रहोत्क-र्णगात्ररोगग्रीवास्तंभप्रमाथितप्रतिहरश्च यथाबिन्दुस्थानप्रविभागगजानां नाना-विधलिङ्गवेदनाः परमदारुणविकारा भवन्ति । तद्यथाऽतिभृशं दारुणं भारयुद्ध-हतो हा(ह)रतो वा विभित(न्न)शरीरस्य श्लेष्माभिस्पन्दमुपगच्छति । स विस्य-न्दमानः कुणपगन्धित्वं स्रवति । तेनास्य कण्ठकपोलमस्तककर्णकटतालुस्रोतो-गतः श्लेष्मा प्रसिच्यते । तस्यातिप्रसेकात्सुषिरमार्गप्रचारेष्वेकीभावमुप-गच्छते । श्रो(स्रो)तस्सु वायुरनुप्रपन्नस्तोदनपरिसर्पणताडनादीँल्लिङ्गवि-शेषाञ्जनयति । तस्य प्रतिव्याधिविहितसमुत्थाननिदानविशेषानवेक्ष्य यदा तु भिषग्भेषजपरिचारकापवरैर्यथाविहितं भेषजमन्यथैव क्रियते तदा निःसृत-दोषस्य श्लेष्मणाऽपहृते कफक्षीणश्लेष्मणा कटुकाम्ललवणानां रसानां ह्युपसेवनं च क्रियते ततस्सूत्रप्रभूयिष्ठं वारणा भवन्ति । तेन दाहभूयिष्ठत्वमस्य भवति तस्य लिङ्गदर्शनं पश्चाद्वक्ष्यामः ॥

तत्र श्लोकः—

नस्यकर्म तु नागानां वर्जितं येषु नित्यशः ॥
तानहं कीर्तयिष्यामि यथावदनुपूर्वशः ॥ १ ॥

अकृतमुखद्वारस्य कामाशनपानेष्वप्रज्ञप्तस्याध्वक्लान्तस्य तृषित उष्णप्रभि-प्रदानक्लान्तशीतवातार्दितातियातपीतपानीयस्याकाले विषमस्थानगतस्य चल-स्तम्भस्थितस्य निशि चाप्रसुप्तस्य मृत्तिकाभ्यवहारिणस्तथा जीर्णपूर्वभक्तस्या-विरिक्तशिरसाऽतिविरिक्तशिरसः शिरोविरेचनैरेवं नस्यकर्म विगर्हितं भवति । तथा च नागानां नस्यकर्मासम्यगुपचारेण दत्तमिमान्व्याधीञ्जनयति पक्ष-

ग्रहोत्कर्णकमन्याग्रहशिरोरोमगात्ररोगाक्षिरोगानेवमादींश्च पूर्वेदेहिकान्विकारानिति ।

अथ दुर्विरिक्तलक्षणाननुव्याख्यास्यामः । अतिनिर्धूतदोषस्य संनिरुद्धमार्गप्रचारस्य कर्णशूलो भवत्यतिमात्रम् । तेन शूलेनाभिभूतस्य पर्यस्तु(स्तु)ता भवति । विधुनोति शिरोमात्रम् । ततोऽस्य शिरो धुन्वतो मुखोपरि शोफो भवति । ततोऽस्य नेत्रे परिस्रावः प्रवर्तते तीक्ष्णम् । तस्य परिस्रावाभिभूतनयनस्य दृष्टिराविला भवति ।

अथातिविरिक्तलक्षणमनुव्याख्यास्यामः ।

यदा हि भिषजाऽत्यम्लकटुकोष्णातिलवणमतिरिक्तं शिरोविरेचनं मध्यापन्नं वा दीयते तदा काष्ठाकालानां प्रमाणमतिसेवमानानां नागानामतिधूमपानोच्छ्वासाजर्जरीभूतशरीराणां प्रलेपमिवोष्णेनाभिष्यन्दी भवति श्लेष्मा । ततो यथोक्ता निवार्तलिङ्गा उत्पद्यन्ते तोदभेदपरिघर्षणादयः स्वल्पाङ्गविकारा भवन्ति । विशेषश्च शिरो विधुनोत्यभीक्ष्णम् । बृंहति, परिस्रुतकरश्च भवति, मुहुर्मुहुरतिदुर्मना द्विरदः ।

अथ सम्यग्विरक्तलक्षणमनुव्याख्यास्यामः । प्रहृष्टकरचरणकर्णवालनयनोऽन्नमुपसेवते स्वस्थः सर्वाङ्गकरसंचारशरीरो यथाकालं वातमूत्रपुरीषोत्सर्गं करोति बलवर्णप्रसादपरीतशरीरः सुमनाः शीतादिषु न विकारमापद्यते ॥

इति श्रीपालकाप्येन ऋषिणा दुर्विरिक्तातिविरिक्तसम्यग्विरिक्तलक्षणमुपदिष्टम् । नस्य विधिरन्यत्राभिहितोऽस्ति ।

अभग्नयोगमश्रान्तं वेदव्रतकृतश्रमम् ॥
त्रिदशैः पूजितं नित्यं पालकाप्यं महामुनिम्[१] ॥ १ ॥
रोमपादो महाराजः संशयं परिपृच्छति ॥
तृणसात्म्यास्तृणाहारास्तृणप्राणाश्च वारणाः ॥ २ ॥
तेषां देशमृतुं कालं तृणानां च रसारसम् ॥
वृक्षमङ्गाल्लँतागुल्मान्भगवन्प्रब्रवीहि मे ॥ ३ ॥
स पृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
निबोध मे महाराज प्रसन्नेनान्तरात्मना ॥ ४ ॥
पीतौषधिरसे काले आदित्यस्य प्रभस्तिभिः ॥ १
प्राणसंजननार्थं च ग्रीष्मे सर्वं प्रयोजयेत् ॥ ५ ॥

---

१ क. ध. महाप्राज्ञः ।

वर्षासु स्थलजं देयं जलजं च विवर्जयेत् ॥
हेमन्ते जाङ्गलं भूयः स्थलजं च महीपते ॥ ६ ॥
वसन्ते तु तृणं दद्यात्कषायकटुकं रसे ॥
ग्रीष्मे तृणं शेषमार्द्रं दापयेच्च गुडोदकम् ॥ ७ ॥
कुल्माषमोदकं चैव सानुपानं प्रदापयेत् ॥
प्रावृट्काले महाराज दापयेत्पिष्टमोदकम् ॥ ८ ॥
छविरोमप्रसादार्थं पञ्चमेऽहनि दापयेत् ॥
अनूपजानि शरदि प्रदद्याच्छाड्वलानि वै ॥ ९ ॥
हेमन्ते स्थलजं दद्यात्प्रसन्नां चाचिरस्थिताम् ॥
प्रदद्याद्यवसान्येव बुद्धिमाञ्शास्त्रनिश्चयात् ॥ १० ॥
ऋतुष्वेवं महीपाल योगसात्म्यैरदन्तिनम् ॥
ओषध्यः फलपाकान्तास्तासां सर्वगतो रसः ॥ ११ ॥
भवत्यजातवीर्याणामम्लः श्लेष्मविवर्धनः ॥
अजातकाण्डं तरुणं पत्रलं शस्यमुच्यते ॥ १२ ॥
श्रावणे तु तृणं मासे भाद्रपदे जातपर्वकम् ॥
ईषन्मधुरमम्लं च जायते प्राणवर्धनम् ॥ १३ ॥
गर्भमाश्वयुजे मासे सगर्भं मधुरं भवेत् ॥
विमुक्तमम्लभावेन जायते मांसवर्धनम् ॥ १४ ॥
कार्तिके तु तृणं मासे जातवीर्यरसं भवेत् ॥
मांसशोणितमज्जानां बृंहणं प्राणवर्धनम् ॥ १५ ॥
मार्गशीर्षे तृणं राजन्पक्वं परिणतं दृढम् ॥
शुक्रवृद्धिकरं राजञ्जायते प्राणवर्धनम् ॥ १६ ॥
परिशुष्कार्द्रपत्रं च *शीर्षं पुष्पं फलं तथा ॥
पौषमासे तृणं विद्यान्नागानां मेदसो हितम् ॥ १७ ॥
तुषारपाताभिहतं सूर्येणोपहतं भवेत् ॥
माघमासे तृणं प्रायः संशुष्कमुपजायते ॥ १८ ॥
तृणमल्परसं चापि न वा प्राणविवर्धनम् ॥
क्वचिदार्द्रं क्वचिच्छुष्कं फाल्गुने मासि जायते ॥ १९ ॥

---

* 'शीर्षपुष्पफलं' इति भवेत् ॥

---

१ ख. घ. चारिर° ।

चण्डवातहतं शुष्कमल्पवीर्यं च संभवेत् ॥
चैत्रे मासे महाराज नागानां च न रोचते ॥ २० ॥
भूमौ निपतितं शुष्कं विच्छिन्नं विरसं तृणम् ॥
मासे करीषप्रतिमं वैशाखे जायते भुवम् ॥ २१ ॥
दावाग्निदग्धे तु तृणे प्रायशो वृक्षभोजनाः ॥
न तृप्तिमधिगच्छन्ति ज्येष्ठे मासे मतङ्गजाः ॥ २२ ॥
कोमलं पल्लवं वल्लीसंजातमनुवृष्टिभिः ॥
कन्दमूलानि चाऽऽषाढे भक्षयन्ति मतङ्गजाः ॥ २३ ॥
तृणावस्था महाराज विज्ञातव्या विचक्षणैः ॥
सुरभि कुरुविन्दं वा प्रमोदाः श्वेतपत्रिकाः ॥ २४ ॥
मृदुशुण्ठी करीरं च तथा वानरपुच्छिका ॥
सौवस्तिका विचिटिका तथालोहितपत्रिका ॥ २५ ॥
रसादनी गिरितृणं तथा पर्णगुहा रसा ॥
एतानि मधुराण्याहुर्विपाके कटुकानि च ॥ २६ ॥
वातकोपीनि भूयिष्ठं श्लेष्मपित्तहराणि च ॥
गिरिकाक्षी वंशपत्री(?) नृत्यकन्दी तथैव च ॥ २७ ॥
(*इच्छागु गङ्कपत्री च तृणपल्लविकाऽपि च ॥)
अर्जुनश्चोपलं चैव दण्डशूकप्रमोदकाः ॥ २८ ॥
वृणपर्णामृतश्चैव तथा काकपरूषकाः ॥
एतानि मधुराण्याहुर्विपाके तु मनीषिणः ॥ २९ ॥
पित्तश्लेष्मानिलार्तेभ्यो वारणेभ्यः प्रदीयते ॥
आर्द्रपत्री मरुवकं जूर्णामर्थविमाञ्जिकम् ॥ ३० ॥
स्थलज्जं रक्तदण्डं च कुंपलांश्चैव पत्रिकाम् ॥
कङ्गुवरकलोणीककरेणुसुपचीतृणम् ॥ ३१ ॥
सुपर्णवारिवेष्टं च काशं कुशतृणं† तथा ॥
उलूखलं प्रतिरसं तथा पुच्छकमेव च ॥ ३२ ॥

---

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके । † कपुस्तके तु 'काशमथापि वा' इत्युत्तरमेकपृष्ठं रिक्तमेव रक्षित्वा द्वितीयपृष्ठप्रारम्भे 'तृणं तथा । उलूखलं' इत्याद्येव यथाश्रुतमुपलभ्यते ।

पुरुषं वरसोमं च तथैव चारुपत्रिकाम् ॥
सुतं च बिल्वजाश्चैव चिकिणी रक्तकुण्डकम् ॥ ३३ ॥
रूक्षाणि मधुराण्याहुर्विपाके कटुकानि च ॥
वातकोपीनि भूयिष्ठं श्लेष्मपित्तहराणि च ॥ ३४ ॥
एतज्जाङ्गलमुद्दिष्टं तृणजातमसंशयम् ॥
*आनूपजं प्रवक्ष्यामि रसदोषविपाकतः ॥ ३५ ॥
श्यामाकं जूर्णपादं च शिल्पिकं कारभीतृणम् ॥
तिलपर्णी मञ्जरिका महामृदुलिका तथा ॥ ३६ ॥
महाश्यामाकमेवाथ तथैव शकटातृणम् ॥
प्रशान्तिका मञ्जरिका इक्षुपर्णी नलस्तथा ॥ ३७ ॥
श्लक्ष्णाकरपरा चैव तथा परुषपत्रिका ॥
पिठकारालगुडकं कलायं शतपत्रिका ॥ ३८ ॥
मृतवीरकपत्री च तथा मेषविषाणिका ॥
गुच्छं तृणं श्लक्ष्णगुच्छं तथा चैवेक्षुचालिका ॥ ३९ ॥
कदलीमिक्षुरेरण्डनारिकेलं नलस्तथा ॥
खर्जूरीपिण्डकं चैवं† ………………… ॥ ४० ॥
……………………………… ॥
……………………………… ॥

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
अरिष्टानि गजेन्द्राणां भगवन्वक्तुमर्हसि ॥ १ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
'अरिष्टानि महाराज शृणु वक्ष्यामि यानि ते ॥ २ ॥
येषामालोकनान्मृत्युं भिषग्जानाति दन्तिनाम् ॥
दृढं यस्य विपद्येत गजस्यौषधिभाजनम् ॥ ३ ॥
न तस्मै क्रियते कृत्यमिति वृद्धानुशासनम् ॥
काठ्यादा यस्य विहगा व्याधितस्येह दन्तिनः ॥ ४ ॥

---

* 'अनूपजं' इति स्यात् । † इत उत्तरम् 'किंचित्त्रुटितमस्ति' इति खपुस्तके लिखितमुपलभ्यते ।

---

१ क. °ज्ञलम् । २ क. °कजम् ॥ ३५ ॥ ३ क. °हामञ्जरिका । ४ ख. घ. मृ····वीरक° । ५ ख. घ. °रेरं च ना° । ६ क. °ण्डकी चै° । ७ क. °व देया वै दन्तिनां सदा ।

उपर्युपरि गच्छन्ति बहुशः स न जीवति ॥
यस्याग्रहस्ते श्वयथुः पुष्करं नोपसेवते ॥ ५ ॥
तालु मन्ये गले चैव सोऽपि नागो न जीवति ॥
यस्यैकगात्रं हस्तश्च श्वयते म्लायते तथा ॥ ६ ॥
गच्छच्च रक्तं स्रोतोभ्यो न स जीवति तादृशः ॥
यो नागः स्रस्तहस्तः स्यादङ्गुलिश्चापि वेपते ॥ ७ ॥
अधः कायस्य यश्चापि न स जीवति वारणः ॥
वारणो जलमास्येन हस्तेनापि न रोचति (ते) ॥ ८ ॥
पीत्वा वमति भूयश्च न स जीवति (*तादृशः ॥
गच्छतस्तिष्ठतश्चापि यस्य गच्छति शोणितम् ॥ ९ ॥
करकर्णास्यमेढ्रेभ्यो दशाहं स न जीवति ॥)
यस्यैकगात्रं शूनस्य खनत्येव नखैः क्षितिम् ॥ १० ॥
वेदनार्तश्च भवति न स जीवति तादृशः ॥
सूयन्ते यस्य गात्राणि वलनं नैव दृश्यते ॥ ११ ॥
शिरोग्रीवामणिर्यस्य जृम्भमाणो न जीवति ॥
ह्रस्वमूत्रपुरीषश्च स्वल्पाहारो न जीवति ॥ १२ ॥
स्पष्टानि यस्य रोमाणि निपतन्ति महीतले ॥
करकर्णास्यवालेभ्यो दशाहं सोऽपि जीवति ॥ १३ ॥
गजः कुणपगन्धिर्यो वाति वातानुसारतः ॥
परमोदनकाङ्क्षी च न स जीवति कुंजरः ॥ १४ ॥
विरिक्तो यदि वैद्येन स्वयं वाप्यतिसारतः ॥
पुनराध्मायते यस्तु यथा प्रेतस्तथैव च ॥ १५ ॥
श्यामोष्ठश्च विवर्णदृक् श्यामतालुकमेहनः ॥
दुर्गन्धो विस्रगन्धिश्च त्रिरात्रं न स जीवति ॥ १६ ॥
गजो विशिष्टदृष्टिर्यो भवेत्संलुलितेक्षणः ॥
(†गजः संशुष्कवदनो न स जीवति तादृशः ॥ १७ ॥
ऊर्ध्वं तिर्यगधश्चैव भीतत्रान्यो मतङ्गजः ॥
विलोकयति सर्वत्र न स जीवति तादृशः ॥ १८ ॥

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ॥ † धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ।

१ ख. ग. शून्यस्य । २ ख. सूयते । घ. शूयते ।

कट्यौ मुखं च नेत्रे च यस्योन्मद्रति दन्तिनः ॥
न च रक्तं स्रवेच्चैव न स जीवति तादृशः ॥ १९ ॥
अनाहारस्तु यो नागः पुरीषं बहु चोत्सृजेत् ॥
सोऽपि प्रेतसमो ज्ञेयो न स जीवति वारणः) ॥ २० ॥
म्लानाक्षस्य नखा यस्य श्यामतां यान्ति दन्तिनः ॥
न स जीवति मातङ्गस्त्रिरात्रमिति मे मतिः ॥ २१ ॥
हस्तिनो यस्य लक्ष्येत पुण्डरीकपलाशवत् ॥
अग्रहस्तः प्रभाहीनो न स जीवति कुञ्जरः ॥ २२ ॥
निर्वाणादागतो नागो जघने लग्नमक्षिकः ॥
संनिषीदति गात्रैश्च च्छिद्रष्टा(च्छा)यो न जीवति ॥ २३ ॥
प्रत्यश्नाति च यो घासमुदकं चातिसार्यते ॥
प्रवाहमानो दुर्गन्धं न स जीवति तादृशः ॥ २४ ॥
(*शालाया यस्य निष्क्रान्ता(त्) बहिश्छायोपलक्ष्यते ॥
विशिरस्का स मातङ्गः सद्य एव विनश्यति ॥ २५ ॥
हरतः सलिलं यस्य घृतगन्धि प्रवाति तत् ॥
बस्तिसयनेपि(?)वासोऽपि त्रिरात्रं नाति वर्तते ॥ २६ ॥
हरितालसवर्णं तु जघनं यस्य हस्तिनः ॥
पीतकश्च करो यस्य न स जीवति तादृशः) ॥ २७ ॥
समन्तात्परिलीयन्ते कृष्णा यस्य तु मक्षिकाः ॥
शरीरे चातिलीयन्ते न स जीवति तादृशः ॥ २८ ॥
यस्य तद्द्विगुणा छाया वारणस्योपलक्ष्यते ॥
न स जीवति मातङ्गः षड्रात्र इति निश्चितः ॥ २९ ॥
यस्य निर्गच्छतः स्थानाद्व्याधितस्येह दन्तिनः ॥
ब्रूयात्तिष्ठेति पुरतः क्षुतं च स्यात्तदग्रतः ॥ ३० ॥
शकुनो वा भवेत्तादृङ्मृतं तु तमिहाऽऽदिशेत् ॥
कडंगरं तृणं वाऽपि यच्चान्यन्नागभोजनम् ॥ ३१ ॥
ग्रसित्वा तद्वमत्याशु न स जीवति तादृशः ॥
एकाङ्गं वर्धते यस्य न च खादितुमिच्छति ॥ ३२ ॥
स्थाने स्तम्भबली यः स्यान्न स जीवति तादृशः ॥
उत्पद्य च विनिर्गच्छेद्यो गत्वा पुनरेति च ॥ ३३ ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ।

कपोलपायुमन्यासु शोफः सोऽपि न जीवति ॥
समाभीको मेहनस्तु यस्य सू(श्व)यति लोहितः ॥ ३४ ॥
उरश्वासौ च सहसा विगत्य प्रतिपद्यते ॥
संगदे च यदा मासः स शोफस्तस्य दन्तिनः ॥ ३५ ॥
तदा तेन सशोफेन मासादूर्ध्वं न जीवति ॥
क्षीणशोणितमांसस्य श्वयेते यस्य हस्तिनः ॥ ३६ ॥
अक्षिण्यौ सहसा यस्य मासादूर्ध्वं न जीवति ॥
मन्ययोर्यस्य लक्षेत (लक्ष्येत) श्वयथुर्जलचञ्चलः ॥ ३७ ॥
दौर्मनस्यं च सहसा सोऽष्टरात्रं न जीवति ॥
शब्दं पृश्च न जानाति ताडितं नावबुध्यते ॥ ३८ ॥
न च वेदयते गन्धं न स जीवति तादृशः ॥
अकस्माद्यो भवेच्छूनः कृशोऽकस्माच्च जायते ॥ ३९ ॥
प्रकृतिश्चातिवर्तेत स सप्ताहं न जीवति ॥
एवमेतान्यरिष्टानि व्याख्यातानि यथायथम् ॥ ४० ॥
नागेषु च मनुष्येषु सदृशं मृगपक्षिषु ॥
प्रतिकर्मसु जानीयादेवं सर्वचिकित्सितम् ॥ ४१ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने चतुर्थ उत्तरस्थानेऽरिष्टज्ञान-
कथनं नाम नवमोऽध्यायः ॥ ९ ॥

अथ दशमोऽध्यायः ।

अथाङ्गाधिपतिः श्रीमान्रोमपादो महाद्युतिः ॥
पप्रच्छ पालकाप्यं हि गजानां दन्तकल्पनाम् ॥ १ ॥
दुर्जातानि विषाणानि दीर्घाणि विषमाणि तु ॥
कपाटद्वारपरिघप्राकारहरणादिभिः ॥ २ ॥
भज्यन्ते वाऽथ शीर्यन्ते मुञ्चन्ति सकलानि च ॥
रक्षणं तेषु निखिलं भगवन्वक्तुमर्हसि ॥ ३ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
विधिं शृणु महाराज मम सम्यक्प्रभाषतः ॥ ४ ॥

---

१ क. °स्थानेऽरिष्टज्ञानं समाप्तम् । ख. °स्थानेऽरिष्टज्ञानं संपूर्णम् ।

एषां तथाऽनेकपानां कालातिक्रान्तहेतुभिः ॥
अज्ञानाद्वा प्रमादाद्वा न कृता दन्तकल्पना ॥ ५ ॥
दार्ढ्यं महारिता चैव कल्पितेषु प्रशस्यते ॥
न चातिशकलं चापि न च दन्तः महीयते ॥ ६ ॥
आयसाभ्यां च कोशाभ्यां वज्रदन्तो दृढो भवेत् ॥
मुखं च गुप्तं भवति शोभते चापि वारणः ॥ ७ ॥
एतदर्थं गजेन्द्राणां क्रियते दन्तकल्पना ॥
बालवृद्धातुरक्षीणमत्तानां च न कल्पयेत् ॥ ८ ॥
वारणानां विषाणानि यदा सेना समुद्यता ॥
क्षीणे त्वमात्यव्यसनं व्याधिते व्याधितो भयम् ॥ ९ ॥
विवाले च कुमारस्य प्रभिन्नेऽग्निभयं भवेत् ॥
पुरोहितस्य व्यसनं वयोतीते मतङ्गजे ॥ १० ॥
तस्मान्न कारयेत्तेषां दन्तिनां दन्तकल्पनाम् ॥
सप्तमीं समतीतस्य न कुर्याद्दन्तकल्पनाम् ॥ ११ ॥
उद्योगे कल्पिते दन्ते सैन्योद्योगो न सिध्यति ॥
तथा ह्यायसबन्धेन न सिध्येद्दन्तकल्पना ॥ १२ ॥
(*तृणमाश्वयुजे मासे गर्जितं मधुरं हितम् ॥
विमुक्तमम्लभावाच्च जायते प्राणवर्धनम् ॥ १३ ॥
कार्तिके चातिफलदं जातवीर्यरसं तृणम् ॥
मांसशोणितमज्जानां वर्धनं प्राणवर्धनम्) ॥ १४ ॥
स्निग्धकालश्च भवति यात्राकालस्तथैव च ॥
अत्यर्थं कल्पनायां तु मासद्वयमुदाहृतम् ॥ १५ ॥
अस्मिन्नेव भवेत्काले नवानां परिशोधनम् ॥
कल्पमग्रविषाणी तु भूमौ निपतते यदि ॥ १६ ॥
व्याधिरुत्पद्यते चास्य († तस्मिन्नुत्पातदर्शने ॥
एतदर्थं महीपाल कराभ्यां परिगृह्यते ॥ १७ ॥
शान्तनार्थं तु नागस्य) प्रतिमानं निवेशयेत् ॥
तस्य प्रकृतिपूजार्थं निक्षिपेदक्षतोदके ॥ १८ ॥

---

* अयं धनुश्चिह्नान्तर्गतः पाठो नैतदध्यायोपयुक्तः, किंतु रसवीर्यविपाकाध्यायान्तर्गतं भवेत् ॥ † धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ॥

ऐरावणादयो राजन्कीर्तितास्ते दिशां गजाः ॥
तेभ्यः प्रसूतिर्नागानां पूजामर्हति पार्थिव ॥ १९ ॥
अशास्त्रविदमानज्ञो न कुर्याद्दन्तकल्पनाम् ॥
हिंसतेषु(?) प्रमाणेषु यदि श्र(स्र)वति शोणितम् ॥ २० ॥
तन्मुखेणोपसंगृह्य निक्षिपेदक्षतोदके ॥
प्रमाणादर्ति वृत्तेन न शुभं नाशुभं फलम् ॥ २१ ॥
अथ चेच्छास्त्रकुशलैर्मितैर्मानेन तत्त्वतः ॥
कल्पिते कल्पनास्थाने विधिना पर्युपासिते ॥ २२ ॥
अव्याधिते मासपक्षे यदि श्र(स्र)वति शोणितम् ॥
तदुत्पातादि विज्ञेयं पार्थिवस्य भयं भवेत् ॥ २३ ॥
तस्मिन्काले विनस्य(श्य)न्ति ये तत्र प्रवरा नराः ॥
नायका मन्त्रिमुख्याश्च पुरं राज्यं च पीड्यते ॥ २४ ॥
गृहीत्वा तस्य तद्रक्तं कृत्वा पश्चात्कुलं मुखे ॥
नीरञ्जनविधिं नागं रिपुराज्यं समुत्सृजेत् ॥ २५ ॥
एवं कृते कृताः सर्वा भवेत्तस्य प्रतिक्रियाः ॥
प्रमाणानि च वक्ष्यामि निरपायानि दन्तिनाम् ॥ २६ ॥
गिरिमिश्रनदीजानां सम्यक्शास्त्रविनिश्चयात् ॥
कुर्याच्चष्टे दन्तिनां तु चतुरष्टे तु कल्पनाम् ॥ २७ ॥
उभयोरन्तरे कार्या मिश्ररूपस्य भूमिप ॥
कृताऽन्यथा न नागस्य वृद्धिर्भवति दन्तयोः ॥ २८ ॥
अष्टार्धं मिश्ररूपस्य ततोऽर्धं गिरिचारिणः ॥
सप्तत्रिंशच्चपञ्चत्रिंशत्त्रिंशच्चैव यथाक्रमम् ॥ २९ ॥
नदीमिश्राद्रिचाराणामङ्गुलानि करीरिणाम् ॥
अतः परममीषां हि वक्ष्यन्ते दन्तजातयः ॥ ३० ॥
स्निग्धौ सरुधिरौ दन्तौ रूक्षौ रुधिरवर्जितौ ॥
मधुसंकाशवर्णौ च नैव रूक्षौ न चेतरौ ॥ ३१ ॥
न चातिमधुसंकाशौ नैव रूक्षौ न चेतरौ ॥
पीतावपि हि विज्ञेयौ दन्तजातिपरीक्षणे ॥ ३२ ॥
भस्मपाण्डुरवर्णौ तु नव्यास्थिसदृशावपि ॥
तौ रूक्षाविति विज्ञेयौ पीतौ स्निग्धौ मधुप्रभौ ॥ ३३ ॥

१ क. निरिञ्जनविधिं । ख. नरिञ्जनविधिं ।

तस्माद्विकृष्टां स्निग्धेषु विविक्तां गजदन्तयोः ॥
भिषजा मधुदन्तस्य कारयेद्दन्तकल्पनाम् ॥ ३४ ॥
दन्तजातिपरीक्षा च कल्पना समुदाहृता ॥
उत्सेधायाममायाता यस्य हस्तसमुच्चयाः ॥ ३५ ॥
तदष्टभागतो देयं दन्तयोरुभयोरपि ॥
मिश्रस्य नवभागश्च दशमो गिरिचारिणः ॥ ३६ ॥
मानसूत्रे स्थिता ह्येषा कल्पना समुदाहृता ॥
विद्वग्रादक्षिकूटाच्च नेत्रयोर्वा यदन्तरम् ॥ ३७ ॥
नेत्राभ्यां दन्तवेष्टौ च तयोर्यद्वा मुखान्तरम् ॥
एतत्प्रमाणं संगृह्य यदि स्यात्सर्वतः समम् ॥ ३८ ॥
प्रसार्य दन्ततः सूत्रं कल्पयेदधिकं ततः ॥
मुखमानविभक्तायां कल्पना समुदाहृता ॥ ३९ ॥
उत्सेधे सप्तकोऽरत्निरायामे नवको भवेत् ॥
दशकं परिणाहे तु कृत्वाऽरत्निसमुच्चयम् ॥ ४० ॥
एतदङ्गुलपर्वाग्रं मित्वा सूत्रेण तत्त्वतः ॥
सूत्रमष्टगुणं कृत्वा कल्पयेदधिकं ततः ॥ ४१ ॥
एषाऽष्टभागनिर्दिष्टा कल्पना समुदाहृता ॥
सप्ताङ्गुलं पार्वतेषु वारणेषु प्रदक्षिणम् ॥ ४२ ॥
ग्रामानीतेषु च पुनः कल्पनीया षडङ्गुलम् ॥
विषाणमूलतो मित्वा कल्पयेदधिकं ततः ॥ ४३ ॥
कर्णप्रमाणिका ह्येषा कल्पना समुदाहृता ॥
ह्रासयेदङ्गुलं तस्मान्मिश्ररूपस्य दन्तिनः ॥ ४४ ॥
प्रसार्य दन्ततः सूत्रं कल्पयेदधिकं ततः ॥
द्विःपरिक्षिपिका ह्येषा कल्पना समुदाहृता ॥ ४५ ॥
समप्रमाणो यो नागः समदन्तश्च यो भवेत् ॥
द्विःपरिक्षे विकारस्य कर्तव्या दन्तकल्पना ॥ ४६ ॥
इत्येतेषु प्रमाणेषु निरपायानि दन्तिनाम् ॥
त्र्यङ्गुलं द्व्यङ्गुलं वाऽपि च्छेदतः परिवर्जयेत् ॥ ४७ ॥
आरोग्याय च नागानां विजयाय महीपते ॥
या च पुष्टिकरी राज्ञः सा कार्या दन्तकल्पना ॥ ४८ ॥

---

१ क. विवक्तां । २ क. °श्रश्च नवभागस्य द° । ३ ख. ग. पार्वतीषु ।

दन्तिजातिपरीक्षा च मानसूत्रे स्थिता च या ॥
मुखमानविभक्ता च तथा चैवाष्टभागिका ॥ ४९ ॥
वर्णप्रमाणिका चैव क्षैक्षिरिषिपिकावदः(?) ॥ ५० ॥
षडेताः कल्पना राजञ्शास्त्रेऽस्मिन्समुदाहृताः ॥
उभयोर्दन्तयोर्वाऽपि मानं यत्राष्टभागिकम् ॥ ५१ ॥
सौष्ठव (कं) च भवेद्येन तेन मानेन कल्पयेत् ॥
येन येन तु मानेन किंचित्कार्येऽधिको भवेत् ॥ ५२ ॥
नागस्य दक्षिणो दन्तः कुशलैर्दन्तकल्पकैः ॥
रक्षणार्थं च दन्तानां शोभार्थं चैव हस्तिनाम् ॥ ५३ ॥
युद्धार्थं चैव संग्रामे प्रतिमोकांश्च कारयेत् ॥
दन्तांश्चापि महीपाल तुल्यानां वायसाननैः ॥ ५४ ॥
तस्मात्कङ्कमुखं चापि वायसानां मुखानपि ॥
मण्डलाग्रमुखान्वाऽपि दन्ताग्रकृतिकास्तथा ॥ ५५ ॥
ईषनाराचशक्तीनां नानामुखविभक्तयः ॥
तन्मुखाकृतयः कार्याः परसैन्यविमर्दने ॥ ५६ ॥
कार्यौ द्वितोलिकौ कोशावुत्तमस्य तु दन्तिनः ॥
अध्यर्धमानकौ वाऽपि कर्तव्यौ मध्यमस्य तु ॥ ५७ ॥
तदर्धमानौ कर्तव्यौ जघन्यस्य तु दन्तिनः ॥
प्रमृष्टतैलधौतस्य गुणयुक्तास्तथैव च ॥ ५८ ॥
कारयेत्प्रतिमोकांश्च कुशलैः शिल्पिभिस्तथा ॥
द्वात्रिंशदङ्गुलायामौ कर्तव्यावुत्तमस्य च ॥ ५९ ॥
अष्टविंशाङ्गुलौ मध्यौ मध्यमाख्यावरान्तिकौ ॥
परिणाहो नृपस्तेषां विषाणानां समो भवेत् ॥ ६० ॥
तथा मकरदंष्ट्रांश्च सिंहदंष्ट्रांश्च कारयेत् ॥
सौवर्णान्राजतांश्चापि तथा रीतिकया कृतान् ॥ ६१
कषापाङ्गारशुद्धेन सुशुष्केणाथ कारयेत् ॥
प्रवालमणिमुक्ताभिर्वज्रवैडूर्यभूषितान् ॥ ६२ ॥
तथैवाप्यारकूटेन शक्त्याऽत्र परिकारयेत् ॥
वैयःसंधिनिरेलज्ज(?)रनुपूर्वं समाहितान् ॥ ६३ ॥

---

१ क. तथा चाष्टविभागिका । २ क. कुक्षिराक्षेपकाचयः । ३ क. साष्टया
४ ख. घ. वयसैन्धसंधिनिरेलज्जै ।

यथार्हं गुणयुक्तेषु कारयेद्योगहस्तिषु ॥
प्रतिमोका विधातव्या यथाशास्त्रप्रमाणतः ॥ ६४ ॥
मधूच्छिष्टं च लाक्षां च सह सर्जरसेन च ॥
तेन क्वाथेन नागेभ्यः प्रतिमोकांश्च बन्धयेत् ॥
मैत्रे मुहूर्ते कर्तव्यः प्रशस्तेऽहनि पूजितैः ॥ ६५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने चतुर्थे उत्तरस्थाने दशमो दन्तकल्पनाध्यायः ॥ १० ॥

अथैकादशोऽध्यायः ।

अथ रसवीर्यविपाकाध्यायः ।

—:():—

रोमपादो महातेजाश्चम्पाया ईश्वरः स्मृतः ॥
पप्रच्छ स महात्मानं पालकाप्यं तपोधनम् ॥ १ ॥
रसाः कति समाख्याताः किं वीर्यं किं गुणो भवेत् ॥
विपाकश्च महाभाग एतदिच्छामि वेदितुम् ॥ २ ॥
के च सौम्या रसा ज्ञेयाः के चाग्नेयाः प्रकीर्तिताः ॥
के च वा सेव्यमाना(श्च) शमयन्ति रसा गुणैः ॥ ३ ॥
के पित्तं शमयेयुश्च श्लेष्माणं शमयन्ति के ॥
उदीरयन्ति के वातं श्लेष्माणं पित्तमेव च ॥ ४ ॥
अरोगो बलवांश्चापि रसैः कैर्वारणो भवेत् ॥
स्थिरत्वं जायते केन क्षारत्वं केन जायते ॥ ५ ॥
एतन्मे पृच्छतः सर्वं भगवन्वक्तुमर्हसि ॥
तस्य तद्वचनं श्रुत्वा पालकाप्यस्ततोऽब्रवीत् ॥ ६ ॥
शृणु मे सर्वमेवैतद्यथा प्रोक्तं नराधिप ॥
निश्चयादेक एवाऽऽह गौतमो(म) ऋषिसत्तमः ॥ ७ ॥
यस्मादम्बुमयं सर्वं जगत्स्थावरजङ्गमम् ॥
.... ॥ ८ ॥
*
अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
इक्षुदानं च नागानां श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

---

* रसवीर्यविपाकाध्याये त्रुटितं प्रतिभाति ।

एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
(*उत्तमे वारणे दद्याविक्षुपञ्चशतान(न्य)पि ॥ २ ॥
शतानि त्रीण्यथार्धं च दापयेन्मध्यमे गजे ॥
द्वे शते च तदर्धं च जघन्याय प्रदापयेत्) ॥ ३ ॥
ये गुणा इक्षुदानस्य ते[†] तान्वक्ष्यामि तत्त्वतः ॥
आरण्यानां तु नागानामिक्षुदानं प्रशस्यते ॥ ४ ॥
सर्वथैव च देयं च कालं देशं बलं प्रति ॥
दीर्घकालेन सिध्यन्ति प्रकृत्या शङ्किताश्च ये ॥ ५ ॥
ये चैव पित्तला नागास्तथैवोष्मक्षताश्च ये ॥
इक्षुदानेन सिध्यन्ति सर्पिषेक्षुरसेन वा ॥ ६ ॥
पुरोपा(या)नानुबन्धेन अत्यर्थायाम(स)सेवया ॥
कुप्यन्ति धातवः सर्वे संनिरोधेन दन्तिनाम् ॥ ७ ॥
कायस्तम्भे शिरस्तम्भे मन्यास्तम्भे मदक्षये ॥
ग्रासे प्रतिहते चैव शिरोरोगे च पैत्तिकाः ॥ ८ ॥
वैगुण्यकरणे चैव श्रुत्वाहतभयेऽपि च ॥
शोकाऽभिभूते सततं वधबन्धनपीडयोः[1] ॥ ९ ॥
श्रान्ते प्रस्विन्नसर्वाङ्गे त्रस्तकाये सुमर्दने ॥
इक्षुदानं प्रशंसन्ति सौमनस्यहिताय च ॥ १० ॥
मदक्षीणेषु नागेषु हिताः पथ्यास्तथैव च ॥
मेदसो वर्धनाश्चैव पित्तरक्तविनाशनाः ॥ ११ ॥
शुक्रवृद्धिकराश्चैव क्षीणधातुविवर्धनाः ॥
बृंहणा जङ्गलाः स्निग्धाः पित्तघ्नाः कफवर्धनाः ॥ १२ ॥
तुष्टिपुष्टिकराश्चैव च्छवीरोमप्रसादनाः ॥
मधुराश्चापि(वि)दाहाश्च श्रमदोषहराः[2] स्मृताः ॥ १३ ॥
तस्मिन्काले प्रदातव्यमिक्षुं कृत्याह(?) हस्तिने ॥
ग्रीष्मकाले तु नागानां त्र्यहं कण्ठस्य मोक्षणे ॥ १४ ॥
वर्षासु सप्तरात्रेण हेमन्ते दशमेऽहनि ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रचोदितः ॥ १५ ॥

---

* धनुश्चिह्नान्तरगतो भ्रष्टः पाठः कपुस्तकात् । † 'तांस्ते' इत्युचितम् ।

---

१ क. °पीडिते ॥ १७ ॥ २ क. अश्रदोषहराः ।

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचन उत्तरस्थान इक्षुदानविधि-
कथनं नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

अत ऊर्ध्वं नस्यकर्मविधिं व्याख्यास्यामः ।

अथ खलु प्रवरमध्यमावराणां नागानां सुसरोवृष्टिसिक्तसलिलभूमिभागामगरुधूपितां पुण्याहघोषेण निष्कल्मषीकृतां मनोज्ञां शालां भिषग्यथोपदिष्टमर्गलायन्त्रमुपकल्प्य सुप्रतिविहितपरिचारकस्य जघननिषण्णस्योर्ध्वग्रीवस्योर्ध्वतो हस्तं कृत्वाऽवसेचयेदशिथिलमनतिबद्धमतिपीडितमवलीकमूर्ध्वं धारयित्वाऽर्गलायन्त्रे विषाणयोर्नियमनं कृत्वा ततः सुप्रतिष्ठितकायं वारणं स्नापयित्वा भिषक्कर्मशालामधिरुह्य हस्तिहस्तश्रो(स्रो)तसि दक्षिणं पूर्वमभिषिच्य वस्त्रमयं मुडुकं शेषतः प्रमाणं सूत्रावनद्धं निर्गमयन्तं निर्वाहणार्थं पयसो[1]........... निधाय पाणिना च पीडयेदेकेनोद्घासयेत्, एकेन पादातिकायां क्षामणक्रियां कुर्यात्, दत्तमात्रे चास्य पयसि मुखप्रदेशं तालुभागं जिह्वां च गुडदिग्धेन पाणिना संस्पृशेत् । केवलांश्चास्य पाणितलेनोपहरेत् । इक्षुबिषमृणालशृङ्गाटककसेरुकाणामन्यतमं यवसोपगूढं दद्यात् । ग्रहकारणे वाऽस्य[2] निग्रहं कुर्यात् । ततः क्षीरं शर्करामधुरं कृत्वा हस्त्योरसोर्निदध्यात् । न चास्य कवलान्प्रसक्तान्दद्यात् । ऊर्ध्वग्रीवस्याधिकबलत्वं संपद्यते । तस्मादप्रसिक्तं नागं कवलैः संप्रयोजयेत् ।

एवं हि कवलान्भक्षयतः क्षीरमन्तः प्रपद्यते । यदा त्वेवं क्षमितः क्षीरमविसंवस्तु(?)मनुहरति, तदाऽस्य यथाक्रमेण विहितं नस्यं शुद्धिमुपजनयति । ततः पूर्वमिव[3] नस्तः प्रधमनं पिप्पलीमरिचनागरपृथ्वीकाविडङ्गश्वेतसर्षपसैन्धवतगराणां द्रोणं पञ्चपलिकं प्रमाणमेकैकस्यौषधस्य सूक्ष्मचूर्णं प्रधमनं दद्यात् । पञ्चपलिकमात्रं प्रधमनं प्रचूर्णं धमनवर्गं तदेव सुरसफणिज्जकपत्ररसं सुखोदकयुक्तमल्पस्नेहं विरेचनं दद्यात् । तदेव पूर्वोक्तं पिप्पल्याद्यष्टद्रव्यं प्रधमनवर्गम् । अथवा पिप्पलीमरिचशृङ्गवेरचन्दनागुरुसर्जरसश्रीवेष्टकगुग्गुल्वामलकपरिपेलवशैलेयकजटामांसीकालानुसार्याणां पलप्रमाणं द्रोणं कृत्वा यथोक्तेन धूपविधानेन हस्त्रं वासयित्वा धूपं दद्यात् । यदा कटश्रोतयोः षट्कलमष्टकलं वा प्रसक्तमेतेन प्रमाणेन कर्णयोर्धूपप्रसक्तमुपगच्छति तद्रूपमात्रां

१ क. °सो मध्ये नि° । २ क. ख. ततोऽस्य । ३ क. पूर्वमेव ।

कलाप्रमाणं निमेषधूपनं दद्यात् । यदा ज्ञानात्प्रमादाद्वा भिषगप्रमाणेन चिरकालं धूपयति, तदाऽस्य मुखशोषो भवति । न त्वत्यर्थं यवसकुवलं च पल्लवं च शुष्कोष्ठकण्ठहृदयतालूनामेतेषामतिधूपनाच्छोषितबलानां पयसोपसेचनं पुनः पुनः प्रसादनमाहुराचार्याः । नस्यकर्मप्रधानमेतेनैव विधिना विरिक्तार्धकायस्याभुक्तवतः पूर्वाह्णे मृदुस्नेहपाकमुपकल्पयेत् ॥

यथाऽव्याधिप्रमाणेनौषधद्रव्यैः क्षीरविपाकैः साधयित्वा द्वादशाङ्गुलायतेन षोडशाङ्गुलपरिणाहेन कोलस्रोतःप्रमाणेन चिरकालं बस्तिना पीडयेत् । तत्र स्नेहप्रमाणं द्रोणे प्रस्थप्रमाणं दद्यात् ।

षडङ्गुलानि विस्तारादुत्सेधाच्चतुरङ्गुलः ॥
प्रस्थः सर्वप्रमाणेषु स्वकैरङ्गुलपर्वभिः ॥

एतेनैव प्रमाणेन स्नेहविधिप्रमाणं विज्ञाय तस्यानुषेकं दद्यात्, क्षीरदाने यथापूर्वमभिहितम् । *हस्तक्षान्तिमस्य यथोक्तां सेवेत । एतेनैव विधानेन मासार्धमर्धमासं वा यावद्वा साधु मन्येत, तावद्देशकालबलनिश्चयं यथार्थतो विज्ञाय नस्यकर्म कुर्यात् । यथाकृतकर्माणं वारणं पयसा सर्पिषा वा यथानुभागप्रमाणं चतुर्भागमेव चारयित्वा भोजनं दद्यात् । भोजयित्वा मृदुवस्त्रेण प्रच्छादयित्वा सुखोदकानुपानं दद्यात् । अनुपानप्रयोजनं त्वन्नपाने द्रवीकृतोऽस्याऽऽहारोऽन्तर्भूतोभिन्नसंघातः सम्यक्पाकमुपगच्छति ॥

तत्र श्लोकौ—

या स्नेहमात्रा तु यथावदुक्ता गजप्रमाणे विहिता पुरस्तात् ॥
सा कोष्ठमागम्य रसत्वमेत्य बलं तु नागे जनयत्यभीक्ष्णम् ॥ १ ॥
अग्निं बलं वाऽपि हि वर्धयित्वा कण्ठोरसोः पार्श्वकटित्रिकाणाम् ॥
संघातवर्णौ मनसः प्रसादं दधाति नस्यं द्विरदेषु दत्तम् ॥ २ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचन उत्तरस्थाने नस्यदानं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

अथ चतुर्दशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
अञ्जनानां क्रियायोगो भगवन्वक्तुमर्हसि ॥ १ ॥

---

* 'हस्तिशान्ति' इति भवेत् ।

ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
शृणु मे निखिलं राजन्नञ्जनानामिमं विधिम् ॥ २ ॥
नखदन्तास्थिरोमाणि केशा वालास्तथैव च ॥
प्राणिनां खुरशृङ्गाणि लेखनायोपयोजयेत् ॥ ३ ॥
रोध्रादिद्रुमसाराश्च पाषाणा ये च केचन ॥
शङ्खदंष्ट्रा नखाः शुक्त्यो मणिर्मुक्ताश्च सर्वशः ॥ ४ ॥
वज्रप्रवाललवणं फलसाराश्च ये द्रुमाः ॥
मत्स्यकूर्मकपालानि यच्च किंचन संहतम् ॥ ५ ॥
तत्सर्वं संस्कृतं द्रव्यं तथाऽभ्रपटलान्यपि ॥
लेखनायोपयुज्यन्ते प्रधानं तत्र वक्ष्यते ॥ ६ ॥
सुवर्णं राजतं ताम्रं सीसं कालायसं त्रपुः ॥
मणिमुक्ताप्रवालाश्च गजमुक्ताश्च शृङ्गजाः ॥ ७ ॥
ससारगल्लस्फटिका वैडूर्यरुचकावपि ॥
अर्को विमलकश्चैव गोमेदाञ्जलपूलिकाः ॥ ८ ॥
सौगन्धिको लोहिताक्षस्तथा क्षीरपकश्च यः ॥
तथा हस्तिवराहाणां व्याघ्रसिंहनखावपि ॥ ९ ॥
पाठीनरोहितास्थीनि कपालं कमठस्य च ॥
शशमूर्धकपालानि गोपार्श्वौ महिषस्य च ॥ १० ॥
फलसारान्हरीतक्या बदर्याः किंशुकस्य वा ॥
आमलक्याः सखर्जूर्या द्रुमसाराः सचन्दनाः ॥ ११ ॥
समुद्रफेनः शङ्खश्च गर्दभस्य च पार्श्वकाः ॥
कुक्कुटाण्डकपालानि हंसस्य बर्हिणोरपि (?) ॥ १२ ॥
रजस्ताम्रायसं चैव निर्यासः खदिरस्य च ॥
पलाशमेषशृङ्ग्योष(श्च) निम्बस्य कुटजस्य च ॥ १३ ॥
पेषणार्थं प्रसन्नां वा मातुलुङ्गरसोऽपि वा ॥
एतद्रसाञ्जनं नाम श्रेष्ठं काचापकर्षणम् ॥ १४ ॥
पिप्पलीनां मषीं कृत्वा वस्त्रेण परिगालिताम् ॥
केशाः कूर्मपलाशानि सैन्धवं लशुनाञ्जनम् ॥ १५ ॥
एतानि समभागानि पीषयेच्छ्लक्ष्णचूर्णिताम् ॥
एतद्रसाञ्जनं नाम श्रेष्ठं काचापकर्षणम् ॥ १६ ॥

१ क. °मेदो जल° । २ क. °नि पेष° ।

(*कुक्कुटाण्डकपालानि शङ्खः कासीस(च) चन्दनम् ॥
पालकाप्योऽङ्गराजाय प्रोवाच लेखनाञ्जनम् ॥ १७ ॥
अर्कस्फटिकवैडूर्यहरितालं मनःशिला ॥)
कुक्कुटाण्डकपालानि हंसबर्हिणयोरपि ॥ १८ ॥
चन्दनं हरितालं च मुस्ता कालानुसारिवा ॥
मरिचानि च शुक्लानि लेखनीयं तदञ्जनम् ॥ १९ ॥
अनाविलं सुप्रसन्नं शुद्धं स्फटिकमानयेत् ॥
सुवर्णेनोपसृष्टं तु सौवर्णे राजते स्थितम् ॥ २० ॥
कुष्ठं हरिद्रा नलदं पिप्पल्यो मरिचानि च ॥
अञ्जयेद्द्विपमेतेन परमं हि तदौषधम् ॥ २१ ॥
वसन्ते यवशूकानि परिशुष्काण्युपाहरेत् ॥
तान्युषित्वा त्वजाक्षीरं रात्रीर्दश च पञ्च वा ॥ २२ ॥
तत उद्धृत्य शुष्काणि चूर्णं दृषदि कारयेत् ॥
कुक्कुटाण्डकपालैश्च हंसशङ्खमुखस्य च ॥ २३ ॥
अञ्जयेन्मधुना मिश्रं काचाकर्षणमञ्जनम् ॥
अमृतासंज्ञां भद्रां च नाकुली गन्धनाकुली ॥ २४ ॥
एतत्प्रसन्नया पिष्टं लेखनं श्रेष्ठमञ्जनम् ॥
शुण्ठ्या वा दधिमण्डश्च पिप्पल्यः सैन्धवस्तथा ॥ २५ ॥
किञ्जल्कं फाणितं किण्वं तथैव यवसक्तवः ॥
तण्डुलीयकमूलं च समभागं च कारयेत् ॥ २६ ॥
तैर्लिम्पेच्छ्लक्ष्णपाषाणं स्वेदयेच्चापि वेष्टितः ॥
अजाकरीषसुस्विन्नमजामूत्रेण पेषयेत् ॥ २७ ॥
एतच्चोरितकं सम्यगञ्जनं लेखनं भवेत् ॥
वसन्ते चैव पुष्पाणि सर्वाण्येव समाहरेत् ॥ २८ ॥
पेषयेत्तानि चैकत्र पिप्पलीलवणेन वा ॥
दृष्टः प्रसादनार्थाय एतच्छ्रेष्ठं हि भेषजम् ॥ २९ ॥
किंशुकस्य च पुष्पाणि मधुरं शर्करान्वितम् ॥
एतत्क्षौद्रेण संयुक्तं शीतलं परिषेचनम् ॥ ३० ॥

---

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ॥

त्रिफला सर्वरोगेषु आचार्यैरभिपूजिता ॥
मधुना सह युक्ता च शीतला परिषेचने ॥ ३१ ॥
त्रिफलायास्त्रयो भागास्त्रयस्त्रिकटुकस्य च ॥
सैन्धवाञ्जनलोहानामेकैको भाग इष्यते ॥ ३२ ॥
अजाक्षीरेण संपिष्टा कण्डूतिमिरनाशिनी ॥
त्रिफला च समैर्भागैः सैन्धवं च समं भवेत् ॥ ३३ ॥
मधुना च समायुक्तं कण्डूनाशनमञ्जनम् ॥
आटरूषकपत्राणि तथा मरुबकस्य च ॥ ३४ ॥
उलूखले क्षोदयित्वा निस्राव्य स्वरसं ततः ॥
तेन शीतकषायेण परिषेकोऽक्षिरोगिणाम् ॥ ३५ ॥
कर्तव्यः सिद्धिकामेन वारणानां सुखावहः ॥
निस्तुषामाविकल्कं गोमूत्रे परिषेचयेत् ॥ ३६ ॥
अर्धमासस्थितां शुष्कां श्लक्ष्णां दृषदि पेषयेत् ॥
उदुम्बरसमुद्रे तु संसृजेन्मधुसर्पिषः ॥ ३७ ॥
एतदञ्जनमिच्छन्ति दन्तिनां शुक्रनाशनम् ॥
चतुर्णां क्षीरवृक्षाणां त्वचस्तु समभागिकाः ॥ ३८ ॥
नवे कुम्भे सुविहिता त्रिरात्रमधिवासयेत् ॥
तत्परिश्रा(स्रा)व्य वस्त्रेण परिषेको विधीयते ॥ ३९ ॥
शिरोलेपश्च कर्तव्यो नेत्रपाकविनाशनः ॥
क्षीरवृक्षप्रवालांश्च निचुलं रोध्रमेव च ॥ ४० ॥
मांसी च समभागा तु क्षोदयित्वा विचक्षणः ॥
जलक्षीरसमायुक्तः परिषेको विधीयते ॥ ४१ ॥
नेत्ररोगहरो राजन्दन्तिनामिह पूजितः ॥
मृगवल्लीफलस्यापि कोशं कृत्वा विचक्षणः ॥ ४२ ॥
पूरयेन्नवनीतेन सुसुबन्धेन संपुटम् ॥
तत्र भोर्जपुटं दत्त्वा राजंस्तत्र समावृतः ॥ ४३ ॥
तोयपूर्णेन कुम्भेन स्थापयेत्तु विचक्षणः ॥
त्रिरात्रमुषि(षि)तं तस्मान्नेत्राभ्यङ्गो विधीयते ॥ ४४ ॥
प्रवालकीं सपटलां नालीं तु विनिहन्ति तु ॥
पिप्पल्यो मरिचं चैव सैन्धवं समनःशिला(ल)म् ॥ ४५ ॥

---

१ क. स्यात् । २ ख. ध. ससुबन्धेन ।

नक्तव्याघनखं पद्मं कासीसं रोचना मधु ॥
मणिप्रवालमुक्ता च शृङ्गं तु शंबरस्य तु ॥ ४६ ॥
वैडूर्यं शङ्खनाभिश्च लवणं रोमकं तथा ॥
एतानि समभागानि कारयेत्तु विचक्षणः ॥ ४७ ॥
वेसवारे समुद्रे तु सर्वमेतन्निधापयेत् ॥
अञ्जनं दशरात्राणि दन्तिनां चाक्षिरोगनुत् ॥ ४८ ॥
त्रिफलामधुसंयुक्तमञ्जनं सर्वरोगिणाम् ॥
सैंधवं त्रिफला चैव पिप्पली मरिचानि च ॥ ४९ ॥
समुद्रफेनं शङ्खं च शर्करां समनःशिलाम् ॥
अञ्जनानि समांशानि यष्टीमधुकमेव च ॥ ५० ॥
समानीय महाराज सलिलेन प्रपीषयेत् ॥
ततस्तु गुलिकां कृत्वा वारणं सम्यगञ्जयेत् ॥ ५१ ॥
सर्वांश्च वातजान्रोगान्कफपित्तकृतांस्तथा ॥
तिमिरं पटलं काचं मावरं च निहन्त्यपि ॥ ५२ ॥
विजया नाम गुलिका व्याख्याता नेत्ररोगिणाम् ॥
अञ्जितस्यानया स्थानं निवातं शीतलं हितम् ॥ ५३ ॥
निष्क्वाथं परिषेकार्थमिममस्य तु कारयेत् ॥
आटरूषकपत्राढ्यां नेत्रयोः परिषेचनम् ॥ ५४ ॥
इदमञ्जनं नागानां सर्वनेत्ररोगहरम् ॥

इति श्रीविजया गुटिका ।

ह्रीवेरकमुशीरं च कुष्ठमेला तथैव च ॥
रोध्रं प्रियङ्गुमञ्जिष्ठा हरितालं मनःशिला ॥ ५५ ॥
एतां वर्तिं भिषक्कुर्याच्छायायां परिशोषिताम् ॥
सलिलेनोपसंघृष्य चक्षुषी नित्यमञ्जयेत् ॥ ५६ ॥
एष(षा)पित्तं च दाहं च रक्तं च शमयत्यपि ॥

प्रपौण्डरीकं मधुकं यवाश्चाऽऽमलकानि च ॥ ५७ ॥
सुमनापल्लवान्येव समभागानि कारयेत् ॥
तथा दारुहरिद्रां च तत्सर्वं परिणामयेत् ॥ ५८ ॥

---

१ ख. घ. केसवरे ।

नेत्राणां श्रा(स्रा)विणामेषा श्रेष्ठा प्रोक्ता रसक्रिया ॥
अक्षिपाकं च कण्डूं च क्लेदं चैव प्रणाशयेत् ॥ ५९ ॥
यावदेव कषायं तु तावद्दद्याद्रसाञ्जनम् ॥
तच्छनैः साधयेद्वैद्यः सिद्धमेवावतारयेत् ॥ ६० ॥
शृतं ते(तु) नेत्रसंयुक्तं ताम्रपात्रे निधापयेत् ॥
प्रपौण्डरीकाद्या रसक्रिया कण्डूत्क्लेददाहपाकहरा ॥ ६१ ॥

—:(०):—

पटोलं पिचुमन्दं च सुरसाऽऽमलकीति वा ॥
हरिद्रा त्रिफला रोध्रं सुमनःपल्लवानि च ॥ ६२ ॥
करञ्जस्य च बीजानि पत्राणि सुरसस्य च ॥
मधुकं च गुडूची च तोयेन सह साधयेत् ॥ ६३ ॥
तत्कषायं परिश्रा(स्रा)व्य पुनरेतदधिश्रयेत् ॥
रसा(?)क्रियां सुनिर्वृत्तामथ तामवतारयेत् ॥ ६४ ॥
अञ्जयेदेतया नेत्रे गजस्य मधुमिश्रया ॥
कण्डूं व्यपनयेदेषा व्रणं द्रगुपरोहयेत् ॥ ६५ ॥
अर्कपुष्पाणि कासीसं तुत्थं लोहाञ्जनं तथा ॥
रसश्चैवाथ ताम्रस्य दध्नाऽऽम्लेन प्रपीषयेत् ॥ ६६ ॥
एतत्क्लेदे च पाके च परिश्रा(स्रा)वेऽथ शस्यते ॥
आमलक्याः शिरीषस्य शल्लकीकिरवाल्योः ॥ ६७ ॥
पात्राण्याहृत्य सर्वेषां कल्कमेकत्र कारयेत् ॥
तं कल्कं कारयित्वा तु च्छायायां परिशोषयेत् ॥ ६८ ॥
मनःशिलोपसंहृत्य शङ्खनाभिं तथैव च ॥
एतया दन्तिनां नित्यं तिमिरानञ्जयेद्भिषक् ॥ ६९ ॥
गुडश्च मधुकं चैव हरिद्रा सैन्धवं तथा ॥
वर्तिः क्षौद्रेण संयुक्ता नक्तान्धस्याञ्जने हिता ॥ ७० ॥
हरीतकीश्च संहृत्य शृङ्गवेरमयो रजः ॥
एतत्तु नाञ्जनं श्रेष्ठं तिमिरस्य प्रसादनम् ॥ ७१ ॥
उत्पलं मधुकं चैव गैरिकं रोध्रमञ्जनम् ॥
समभागानि संहृत्य पिष्ट्वा धात्रीरसेन तु ॥ ७२ ॥

---

१. ख. घ. अक्षपाकं ।

शिला तेन मनोज्ञ्या यं कल्कं साधयेत्ततः ॥
स्रोताञ्जनसमं कृत्वा चूर्णचूर्णं तु कारयेत् ॥ ७३ ॥
एतच्चूर्णाञ्जनं श्रेष्ठं शीतं पित्तप्रसादनम् ॥
पैत्तिकेष्वपि रोगेषु रक्तजेषु प्रशस्यते ॥ ७४ ॥
अरुणं वातिकं विद्यान्नीलं भवति पैत्तिकम् ॥
श्वेतं तु कफजं विद्यान्मृदुवर्णं कदम्बजम् ॥ ७५ ॥
जलबुद्बुदसंकाशं शुक्रमित्युपधारयेत् ॥
धातुप्रकोपजं यत्तु पटलं चैव कीर्तितम् ॥ ७६ ॥
प्रतिच्छन्नं तु यन्मध्ये ह्रस्वं भवति मण्डलम् ॥
चतुष्प्रकारं तच्चापि शुक्रमित्युपधारयेत् ॥ ७७ ॥
शिरोजालावृतं यच्च दीयते नयने तु यत् ॥
तदर्ममिति जानीयादसाध्यमिति वा पुनः ॥ ७८ ॥
इत्येते मारुतात्पित्ताच्छ्लेष्मणः शोणितात्तथा ॥
दन्तिनां नेत्रजा रोगा समुद्दिष्टा यथाक्रमम् ॥ ७९ ॥
एतेषां लक्षणं बुद्ध्वा व्यक्ताव्यक्तेन हेतुना ॥
निदानेन यथोक्तेन ततः कुर्याच्चिकित्सितम् ॥ ८० ॥
वातघ्नीं वातिके कुर्यात्पित्तघ्नीं पैत्तिके क्रिया(म्) ॥
अवशे(से)कं[1] यथाशास्त्रं घृतपानं तथैव च ॥ ८१ ॥
विधिवच्च परीषेकं तथैवाश्च्योतनानि च ॥
शिरसश्चापि सेकाय प्रतिपन्नानि यानि च ॥ ८२ ॥
रसक्रिया यथोक्ता च चूर्णाञ्जनानि[2] यानि च ॥
सर्वाणि तानि मेधावी दृष्ट्वा सम्यगुपाचरेत् ॥ ८३ ॥
व्याधिं देशं च कालं च गजस्य च बलाबलम् ॥
इमे तु खलु रोगेषु सर्वेष्वेव प्रकीर्तिताः ॥ ८४ ॥
लेख्या साधारणा योग्या साध्यानामनुपूर्वशः ॥
अभयां चैव पथ्यां च कासीसमथ पिप्पलीम् ॥ ८५ ॥
सैन्धवं बृहतीमूलं कल्कमेकत्र कारयेत् ॥
वारिणाऽच्छेन संसृज्य कृतं तं साधयेच्छनैः ॥ ८६ ॥
घनीभूतं यदा विद्यात्तदेनमवतारयेत् ॥
निधाय भाजने हृद्ये नेत्रे नागस्य वाऽञ्जयेत् ॥ ८७ ॥

१ क. अवशेषं । २ क. चूर्णान्यञ्जनकानि ।

पटलं शुक्रकाचौ च तथैवार्माणि यानि च ॥
क्षौद्रेण सह संयुक्तं हन्ति सर्वानुपद्रवान् ॥ ८८ ॥
मनःशिला ताम्रचूर्णं मधूकं बृहतीफलम् ॥
यावदेतानि सर्वाणि तावत्सैन्धवमाचरेत् ॥ ८९ ॥
अजाक्षीरेण तत्सर्वं श्लक्ष्णं दृषदि पीषयेत् ॥
तं कल्कं कारयेद्वर्तिं छायायां परिशोषयेत् ॥ ९० ॥
सलिलेनोपसंघृष्य चक्षुषी नित्यमञ्जयेत् ॥
लेखयेत्पटलं तत्तु शुष्काणि विविधानि च ॥ ९१ ॥
विभीतकपलाशानां भस्म शङ्खमयो रजः ॥
सैन्धवं च समांशानि सर्पिषा सह साधयेत् ॥ ९२ ॥
कपाले तानि लिप्तानि दाहयेद्गोमयाग्निना ॥
तां मषीं [1]पीषयेच्छ्लक्ष्णां क्षौद्रेण सह संसृजेत् ॥ ९३ ॥
पटले बुद्बुदे चैव गूढे कुर्यात्तदञ्जनम् ॥
लेख्या लेख्यास्तु ये चान्ये तथा रोगा पृथग्विधाः ॥ ९४ ॥
रक्तजेषु तु रोगेषु ताम्रं भवति लेखनम् ॥
त्रिभागमर्धशुक्लं वा रुधिरेणाप्लुतं तथा ॥ ९५ ॥
नेत्रराजीस्तु ताः प्राहुस्तिर्यगूर्ध्वप्रसारिताः ॥
तासां योगे भवेदस्रं दारुणं तीव्रवेदनम् ॥ ९६ ॥
पैत्तिकानां च रोगाणां समवायोपलक्षिते ॥
काचाक्षं पूर्वयुक्तानां रक्ताभिष्यन्दितेषु च ॥ ९७ ॥
अथवा रुधिरं यस्य यस्मात्स्रवति चक्षुषी ॥
रुधिरोदकपूर्णे वा रक्तस्रावीति तद्विदुः ॥ ९८ ॥
शिरसस्त्वभिघातेन चक्षुषी यस्य हस्तिनः ॥
संरम्भलोहिते स्यातां शृणु तस्य चिकित्सितम् ॥ ९९ ॥
अपसेकादि यत्किंचित्पैत्तिकानामुदाहृतम् ॥
विधिः [2]सर्वस्तु पूर्वोक्तो रक्तजानां विधिस्तथा ॥ १०० ॥

त्रिकटुत्रिफलासमुद्रफेनशङ्खनाभिहरिद्रादारुहरिद्राहरितालमनःशिलाकुक्कुटाण्डकपालानि स्वर्णगैरिककालानुसारिवालशुनं तुत्थमयं चूर्णं मृद्वीकाशाबरमञ्जिष्ठासमभागानि कृत्वाऽक्षिसर्वरोगशिरोरोगवेदनोपशमनीकायपुष्पपटलबुद्बुदमांसवृद्धिलोहितराजीश्च जयति ।

१ क. पीषयेत्सूक्ष्मां । २ क. सर्वस्य ।

इति नीलमेघा नाम गुटिका ।

यकृद्राजं तु संछिद्य पूर्वजैरेभिरौषधैः ।
मेदा चैव महामेदा जीवकर्षभकावपि ॥
काकोली क्षीरकाकोली मुद्गपर्णी तथैव च ।
माख(ष)पर्ण्यश्वगन्धे च सर्वं श्लक्ष्णं प्रपीषयेत् ॥
एभिर्यत्तत्समालोड्य परिष्वज्य समाहितम् ।
एरण्डपत्रैः संस्थाप्य गोमयेन प्रलेपयेत् ॥
बहिर्मृत्तिकयाऽऽलिप्य निर्धूमेऽग्नौ प्रदापयेत् ।
तत्सिद्धमभिविज्ञाय पीषयित्वा समाहितम् ॥
कदुष्णं रसमादाय नेत्रे नागस्य पूरयेत् ।
पूर्वस्निग्धस्य नेत्रस्य स्वेदं कुर्याद्विचक्षणः ॥
निर्वापणार्थं नेत्रस्य मन्थजेन तु सर्पिषा ।
सर्वांश्चेवाक्षिरोगांश्च हन्ति सत्यं न संशयः ॥

आज्यं पयो वा क्वथिताम्बुमिश्रमाज्यं पयो वाऽपि तुषारमिश्रम् ।
गवां पयश्चेक्षुरसेन युक्तं नारीपयः शर्करयाऽथ मिश्रम् ॥

परिषेचनार्थे नित्यं हितं ···· ···· ···· ···· ।
निष्पावमात्रो नागानां कल्कस्तीक्ष्णाञ्जनस्य तु ॥
तस्यार्धं मध्यमस्याथ मृदुनो द्विगुणो भवेत् ।
कल्काञ्जनात्पादहीनं ज्ञेयं चूर्णाञ्जनस्य तु ॥

सिद्धिं चिरोत्थं न कदापि याति नेत्रामयं स्वेदितमात्रवीर्यात् ।
वैद्यः सदेमान्नृप कुञ्जराणां प्रयोजयेद्योगवरांश्च सिद्धये ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचन उत्तरस्थाने
चतुर्दशोऽञ्जनाध्यायः ॥ १४ ॥

अथ पञ्चदशोऽध्यायः ।

पालकाप्यो मुनिश्रेष्ठो पद्भ्यापाब्रवीत्पुरा ॥
यथानुमानं नागानां तदिदं संप्रचक्ष्यते ॥ १ ॥
भूतानि कलयत्येष कलाभिर्वा विभज्यते ॥
एतत्कालस्य कालत्वं स तु संवत्सरः स्मृतः ॥ २ ॥

---

१ ख. श्रमं । २ क. °माजं प° । ३ क. सिद्धं । ४ क. °चक्षते ।

एवमेकविधः कालो द्विविधोऽयनभेदतः ॥
अयने द्वे समाख्याते दक्षिणोत्तरसंस्थिते ॥ ३ ॥
आदानं च विसर्गश्च संज्ञे द्वे कीर्तिते मया ॥
उत्तरायणमादानं विसर्गो दक्षिणायनम् ॥ ४ ॥
तत्र त्वादानमाग्नेयं विसर्गः सौम्य उच्यते ॥
शिशिरश्च वसन्तश्च ग्रीष्मश्चाऽऽदानमुच्यते ॥ ५ ॥
विसर्गे वर्ष(?)विज्ञेयः शरद्धेमन्त एव च ॥
विसर्गे वायवो या(वा)न्ति नात्यर्थं रूक्षदारुणः(णाः) ॥ ६ ॥
गुणैराप्यायते सोमश्चांशुभिः पूरयञ्जगत् ॥
शश्वदाप्याययत्येवं यद्बलं विसृजत्यलम् ॥ ७ ॥
प्रवृत्तौ च निवृत्तौ च ज्ञेयं पर्याययोगतः ॥
रसौ तत्राम्ललवणौ मधुरश्चापि इष्यते ॥ ८ ॥
स्निग्धत्वाच्चापि कालस्य सौम्यत्वाच्च निसर्गतः ॥
यथाक्रमं बलं तेजो जायते तत्र हस्तिनः ॥ ९ ॥
आदाने रूक्षपरुषा दारुणा वान्ति वायवः ॥
उत्तराभिमुखे सूर्ये चन्द्रसैन्यं विहन्यते ॥ १० ॥
विवस्वानंशुभिस्तीक्ष्णैर्जगत्स्नेहं प्रकर्षति ॥
तस्मादादानमाग्नेयमृषयः परिचक्षते ॥ ११ ॥
कालस्वभावमार्गस्य तथेश्वरपरिग्रहात् ॥
वाय्वर्कसोमा जगतो हेतुभूता न संशयः ॥ १२ ॥
कालं तु रसदोषाणां तथा देहबलस्य च ॥
प्रवृत्तौ च निवृत्तौ च ज्ञेयाः (?) पर्याययोगतः ॥ १३ ॥
यथाक्रमं रौक्ष्यवृत्तिरादानस्योपदिश्यते ॥
तस्माद्रूक्षा रसास्तत्र विवर्धन्ते क्रमात्त्रयः ॥ १४ ॥
तिक्तः कषायः कटुकश्चतुर्थो नास्ति कश्चन ॥
क्रमाद्दौर्बल्यमिच्छन्ति प्राणिनां रससेवनात् ॥ १५ ॥
रसश्चाम्लोऽथ लवणो मधुरश्च विवर्धते ॥
स्निग्धत्वाच्चापि कालस्य सौम्यत्वाच्च निसर्गतः ॥ १६ ॥

---

१ क. °द्रूक्षर° ।

यथाक्रमं बलं चैव योजन(य)न्त्यत्र हस्तिनाम् ॥
इत्युक्तो द्विविधः कालस्त्रिविधः *संप्रचक्षते ॥ १७ ॥
शीतोष्णवर्षलिङ्गस्तु चतुर्मासविभागतः ॥
षड्विधस्त्वेष भेदेन निखिलः *संप्रचक्षते ॥ १८ ॥
हेमन्तः शिशिरश्चैव वसन्तो ग्रीष्म एव च ॥
वर्षा शरच्च ऋतवः षडुक्ताः कालचिन्तकैः ॥ १९ ॥
हेमन्ते हिमतेजोभिरंशुभिर्भगवान्रविः ॥
न तापयति भूतानि न च कर्षयति प्रजाः ॥ २० ॥
खे नीचैश्चन्द्रमा याति किरणैर्योजयन्प्रजाः ॥
मृदुशीतश्च पवनो वाति कालस्वभावतः ॥ २१ ॥
तस्मात्तस्मिन्नृतौ यान्ति विवृद्धिं मधुरा रसाः ॥
बलवन्तस्तु तेनात्र नागास्तु रससेवनात् ॥ २२ ॥
पित्तं तेषां शमं याति रसत्यागात्समीरितम् ॥
चयं गच्छति च श्लेष्मा शोणितं च प्रसीदति ॥ २३ ॥
बलिनः शीतसंरोधात्तदैषां पावको बली ॥
द्रव्यमात्रागुरुसहो भवत्यवहितः पचन् ॥ २४ ॥
आयुक्ते त्वनलीभात्तु(?) स हिनस्ति शरीरजम् ॥
हेमन्ते त्वनिलः शीतः शीतकाले प्रकुप्यति ॥ २५ ॥
स गैरिकः सर्वसेकस्तस्मादस्मिन्नृतौ चरः ॥
स्थानानि च निवातानि निष्कर्दमजलानि च ॥ २६ ॥
शय्याभागाश्च मृदवः सकरीषास्तृता हिताः ॥
आतपासेवनं चात्र कौपं तोयं च शस्यते ॥ २७ ॥
स्थलजं जाङ्गलं चात्र हस्तिनां यवसं हितम् ॥
सकृदेवावगाहश्च कर्म चात्र विधीयते ॥ २८ ॥
शालीनां षष्टिकानां च द्विकालं मृदुभोजनम् ॥
भोजयेद्वारणं स्निग्धैर्युक्ताम्ललवणै रसैः ॥ २९ ॥
प्रसहानूपजलजैर्मांसयुक्तैर्यथाविधि ॥
वेसवारयुतैश्चात्र भोजनार्थं प्रशस्यते ॥ ३० ॥

---

* 'वक्ष्यते' इति तूचितम् ।

---

१ क. °त्यागस° । २ क. पतन् । ३ क. हस्तिनं ।

सुरा च प्रतिपानार्थं पञ्चभिर्लवणैर्युता ॥
सततं शस्यते चात्र शिरश्चरणम्रक्षणम् ॥ ३१ ॥
मषीयुक्तेन तैलेन शिरोभ्यङ्गश्च पूजितः ॥
पूर्वरात्राच्चतुर्भागं तथैवापररात्रिकम् ॥ ३२॥
प्रयत्नाच्चारयेन्नागं दिवसाल्पतया बुधः ॥
एवमायुर्बलं वीर्यं जवस्तेषां महीपते ॥ ३३ ॥
हेमन्ते यदुपाश्नन्ति वृक्षान्स्निग्धान्गुरून्गजाः ॥
आहारांस्तेन जीवन्ति तद्वर्षं नात्र संशयः ॥ ३४ ॥
शिशिरे हिमनीहारमारुतैर्भास्करांशवः ॥
सहिता न प्रकाशन्ते दिशश्च तमसाऽऽवृताः ॥ ३५ ॥
आदानयोगाद्रूक्षेऽतिशीतश्चापि प्रभञ्जनः ॥
वाति तिक्तो रसस्तस्मात्तस्मिन्काले विवर्धते ॥ ३६ ॥
दारुणत्वादृतौ तस्माद्रौक्ष्यं भवति दन्तिनः ॥
विधिस्तत्रापि सर्वोक्तः कर्तव्यः शिशिरे बुधैः ॥ ३७ ॥
शिशिरः किंचिदधिकः प्रोक्तो हेमन्तकालतः ॥
तस्माद्विशिष्यते तस्मिन्नृतौ तत्र प्रच(त्व)क्ष्यते ॥ ३८ ॥
तदा गजानां शालासु ज्वलयेत्तु हुताशनम् ॥
कम्बलावरणं चात्र शीतत्राणार्थमिष्यते ॥ ३९ ॥
तृणं पुलाकोपनाहस्तिक्षवश्चैव दन्तिनाम् ॥
ग्रासार्थं वृक्षभागांश्च शस्तं कोष्णं च भोजनम् ॥ ४० ॥
उष्णपिण्डः प्रदातव्यः कफवातहरः सदा ॥
आर्द्रकं मरिचं कृष्णा सैन्धवं च जवानिका ॥ ४१ ॥
शतपुष्पाऽजमोदा च सर्वाण्येकत्र चूर्णयेत् ॥
यावन्त्येतानि सर्वाणि तावन्मात्रो भवेद्गुडः ॥ ४२ ॥
हेमन्ते शिशिरे पिण्डः करिणां वह्निवर्धनः ॥
वातश्लेष्मप्रशमनो बलवर्णकरः परः ॥ ४३ ॥
मद्यानुपाने परमो रसायनविधिर्मतः ॥

(इति) ऋतुपिण्डः ।

प्रतिमानं प्रसन्ना च लवणं त्र्यूषणायुतः ॥ ४४ ॥

---

१ क. °रात्रक° ।

सर्वसेकश्च तैलेन विहितो गैरिकायुतः ॥
परिवाश्चाश्च मातङ्गा(ः) सकृदेवावगाहयेत् ॥ ४५ ॥
मेघमारुतवर्षोष्णशीतसंबृंहितास्तथा ॥
शिशिरान्ते कफोद्रेकः पानात्ययनयोगतः ॥ ४६ ॥
सूर्यस्तपति चात्यर्थं वर्धन्ते दिवसास्तथा ॥
मेदुराः सुकुमाराश्च गजास्तेजोधिका भृशम् ॥ ४७ ॥
स्वल्पसंतापतो ह्येषां तस्माद्विष्यन्दते कफः ॥
वसन्ते नातिशीतांशुः सविता शीतमम्बु च ॥ ४८ ॥
पवनो नातिशीतोष्णो मह्यां सर्वः प्रकाशते ॥
साधारणे तत्र काले गजानां वर्धते रसः ॥ ४९ ॥
श्लेष्मा प्रकोपमायाति सौमनस्यं च जायते ॥
धातुसौ(सा)म्यं च नागानां जायते कारणैरिमैः(?) ॥ ५० ॥
हरन्ति पांशुं विशदं शीतमुक्तास्तथा द्विपाः ॥
सलिलानि च पानेषु पिबन्ति च हरन्ति च ॥ ५१ ॥
सस्यसस्यवतीं भूमिं दृष्ट्वा पुष्यन्ति चाधिकम् ॥
सलिलेनाभिसिक्तं च रसवत्तरुणं *नृणाम् ॥ ५२ ॥
प्रचारेषूपयुञ्जानाः कामवन्तो मतङ्गजाः ॥
कोकिलाकुलनादैश्च भ्रमराणां च कूजितैः ॥ ५३ ॥
वातेन पुष्पचित्रेण सुखेनाऽऽहिततेजसा ॥
भवन्ति हस्तिनीकामा मन्यन्ते वनजं सुखम् ॥ ५४ ॥
तेषां सुखत्वात्कालस्य रम्यत्वाच्चाथ सर्वशः ॥
†मनस्तुषो(?)च धातूनां शा(सा)म्यं भवति हस्तिनाम् ॥ ५५ ॥
तदा हि यवगोधूमाः कलापाश्चणकास्तथा ॥
यवसार्धं प्रशस्यन्ते शाल्यन्नं चैव भोजनम् ॥ ५६ ॥
भेदकः प्रतिपानं च अवगाहोऽथ दन्तिनाम् ॥
वनान्तेषु प्रचारेषु पांशुघातश्च पूजितः ॥ ५७ ॥
संमृष्टान्युपलिप्तानि कुसुमैर्भूषितानि च ॥
स्थानान्यत्र प्रशंसन्ति सौमनस्यविवृद्धये ॥ ५८ ॥
आराध्यकर्मयोगांश्च नाति तत्र प्रयोजयेत् ॥
ग्रीष्मे मध्यमकाष्ठास्थो भृशं तीक्ष्णातपो रविः ॥ ५९ ॥

---

* 'तृणम्' इति स्यात् । † 'मनस्तुष्टौ' इति तूचितम् ॥

अपिबज्जगतः स्नेहमंशुभिः पवनस्तथा ॥
तीव्रो रूक्षः खरो याति परुषः शोषणात्मकः ॥ ६० ॥
रसस्तदा तु कटुकः काले योगो विवर्धते ॥
भवेत्तदा धातुशोषो दौर्बल्यं सर्वदेहिनाम् ॥ ६१ ॥
प्रभवत्यधिकं तृष्णा प्रचयं याति चानिलः ॥
सोमात्मकाः शीतसात्म्या मातङ्गाश्च विशेषतः ॥ ६२ ॥
निदाघकाले जायन्ते नागाः पित्तहता भृशम् ॥
तस्माद्विशेषतस्तेषां दौर्बल्यं चाभिवर्धते ॥ ६३ ॥
त्वग्दाहश्च क्षयस्तेषां गच्छतः श्लेष्ममेदसी ॥
दूष्यते रक्तपित्तं च धर्मयोगेन(ण) दन्तिनाम् ॥ ६४ ॥
जलाश्रयाश्रितं स्थानं तस्मिन्काले विधीयते ॥
घनच्छायं प्रभूतं च भूरितोयप्लुतं तथा ॥ ६५ ॥
त्रिश्चावगाहयेन्नागं ह्रदे शीते शिवोदके ॥
पूर्वाह्णे वाऽपराह्णे वा मध्याह्ने च विशेषतः ॥ ६६ ॥
हारयेत्कर्दमं शीतं त्वग्दाहविनिवृत्तये ॥
मध्याह्ने चापि शिक्यस्थाः स्रवेयुर्वारिपूरिताः ॥ ६७ ॥
वंशे घटाः शीततोया हृतयश्चैव दन्तिनाम् ॥
एवं दिनोपसेवा च रात्रौ तस्य प्रशस्यते ॥ ६८ ॥
शय्याभागाश्च शीताः स्युर्मृदुपांशुजलावृताः ॥
निवृत्तिरध्वनश्चास्य कर्मणश्चोपदिश्यते ॥ ६९ ॥
शिरोलेपस्तथा काये शतधौतेन सर्पिषा ॥
श्रो(स्रो)तःसिद्धिर्भवेत्तेन क्लेदनं चैव चक्षुषोः ॥ ७० ॥
औदकं यवसं चात्र हरितं च प्रदापयेत् ॥
क्षीरिणां चैव वृक्षाणां पल्लवांश्चैव दापयेत् ॥ ७१ ॥
कुल्माषाः पल्लवाश्चापि ससर्पिर्गुडमोदकाः ॥
प्रातराशः ससर्पिष्को गुन्द्रा*वसपयोगुडः ॥ ७२ ॥
रात्रौ च रक्तशाल्यादिभोजनं जाङ्गले रसैः ॥
पयः सर्पिर्विमिश्रं वा शीतमस्मै प्रदापयेत् ॥ ७३ ॥

* 'सव' इति भवेत् ॥

१ क. °लाशया° । २ क. °न्द्रावास° ।

पयःपानं च नागस्य घर्मकाले प्रशस्यते ॥
पयःपीतस्य वा ह्यस्तौ गजस्य रसभोजको ॥ ७४ ॥
प्रतिपानं गुडयुतं द्राक्षादुदकमिश्रितम् ॥
अविदाहि च यन्मद्यं विधिज्ञस्तत्प्रदापयेत् ॥ ७५ ॥
काले तस्मिन्निशा ह्रस्वा कष्टश्चात्र तु जागरः ॥
तस्मादस्मिनयोत्थानं नातिरात्रकृतं भवेत् ॥ ७६ ॥
कट्वम्लोष्णविदाहीनि भोजनान्यौषधानि च ॥
घर्मकाले न शस्यन्ते यवसं तच्च तद्विधम् ॥ ७७ ॥
भाराध्वकर्मयोगांश्च नैव तत्र समाचरेत् ॥
ग्रासाभिजननं बल्यं मनसश्च प्रसादनम् ॥ ७८ ॥
विधायोगं चतुर्भागं भुवल्लेषूपनाहिकम् ॥
दापयेद्ग्रीष्मकाले तु यथायोगं विभागतः ॥ ७९ ॥
मधुफाणितसंयुक्तं मद्यं यवसमेव च ॥
दुर्बलाश्चातियानाश्च क्षीणा ये च मतङ्गजाः ॥ ८० ॥
तेभ्यः प्रदापयेद्युक्तं हितं यत्पानभोजनम् ॥
वर्षासु घर्मकालोष्णतापिता मेदिनी भृशम् ॥ ८१ ॥
अभिवृष्टा जलधरैर्द्रवभावं नियच्छति ॥
सबाष्पतोयविष्यन्दं विरसं बहु मुञ्चति ॥ ८२ ॥
वृक्षौषधितृणानां तु वैरस्यं जायते तदा ॥
तदा ह्यम्लो रसो वृद्धिं याति पित्तं च चीयते ॥ ८३ ॥
विरसाम्लाविशेषत्वात्सलिलस्य तृणस्य च ॥
वारणानां तदा वह्निर्मृदुत्वमुपगच्छति ॥ ८४ ॥
वातादयोऽग्निहीनानां कुप्यन्त्यत्र स्वभावतः ॥
नदीतोयप्रविष्टानि यवसान्योदकानि च ॥ ८५ ॥
व्यायामातपसेवा च दन्तिनां नात्र शस्यते ॥
पाने स्वापः प्रशस्यन्ते कूपप्रस्रवणोद्भवाः ॥ ८६ ॥
यवगोधूमशाल्यन्नं भोजनं च सफाणितम् ॥
जाङ्गलानां तु मांसानां रसा यूषाश्च संस्कृताः ॥ ८७ ॥

---

१ क. समाहरेत् । २ क. °नाहनम् । ३ क. °प्रविष्टा° ।

भोजनार्थेऽन्नपानार्थे कार्याः कायाग्निदीपनाः ॥
*(विशेषोऽहनि शीते च वर्षवाताकुले भृशम् ॥ ८८ ॥
व्यक्ताम्लस्नेहलवणं भोज्यं स्यादनिलापहम् ॥
स्थलजं यवसं चैव द्विरदानां घनागमे ॥ ८९ ॥
स्थानानि विगतस्वेदनिष्यन्दानि च कारयेत् ॥
धूमश्च दंशनाशार्थं कार्यः स्थानेषु दन्तिनाम् ॥ ९० ॥
प्रसन्नां सगुडव्योषां सतैलां प्रतिपाययेत् ॥
नागानां जलदेशेषु प्रचारश्चात्र पूज्यते ॥ ९१ ॥
उदितेऽर्केऽवगाहश्च ग्रीष्मवत्तत्र कारयेत् ॥
वातादिदोषशान्त्यर्थं बलस्थैर्यार्थमेव च ॥ ९२ ॥
बस्तिकर्म च नागेभ्यो वर्षासु नियतं हितम् ॥
ऋतुरेष विशेषेण बहुकीटसरीसृपः ॥ ९३ ॥
तस्माद्यवसशुद्ध्यर्थं दीपं स्थानेषु कारयेत् ॥
शरद्यभ्रविनिर्मुक्तो भृशं तीक्ष्णातपो रविः ॥ ९४ ॥
संपचत्यौषधीः सर्वाः फलमन्तानि(?) यानि च ॥
तीक्ष्णातपत्वाच्च रवेर्भूमिपाकं नियच्छति ॥ ९५ ॥
प्रकुप्यति च नागानां सूर्यांशुपरितापितम् ॥
जगत्तु ताभिः शुभ्राभिराप्याययति चन्द्रमाः ॥ ९६ ॥
तस्मात्तत्रापि लवणो रसो वृद्धिं नियच्छति ॥
प्रकुप्यति च नागानां पित्तं शाम्यति चानिलः ॥ ९७ ॥
तत्रापि यवगोधूमाः(?) †शाल्यन्नानि प्रदापयेत् ॥
गुडसर्पिर्विमिश्राणि पित्तकोपहितानि च ॥ ९८ ॥
शशानां हरिणानां च रसैर्मधुरतिक्तकैः ॥)
विशेषार्थे तदा कार्यो दन्तिनां पित्तशान्तये ॥ ९९ ॥
स्नेहनार्थं च तं क्षीरं तदा मांसरसोऽपि वा ॥
शस्यकालौ भवेतां द्वौ वसन्तशरदावुभौ ॥ १०० ॥
पूर्वस्निग्धशरीराणां शस्यारम्भो विधीयते ॥
संजाराः षष्टिका व्रीहिशालयः कङ्गवोऽपि वा ॥ १ ॥
यावच्चाऽऽर्द्रफलास्तावद्धस्तिभ्यः पुष्टये हिताः ॥
पुष्पिताः फलिताश्चापि मुद्गमाषमकुष्ठकाः ॥ २ ॥

---

* धनुश्चिह्नान्तर्गतपाठः कघपुस्तकयोर्नास्ति । † 'गोधूमशाल्य' इति भवेत् ।

---

१ क. °वदार्द्र° ।

यवसार्थं प्रशस्यन्ते पावक कठिनं फलम् ।
गोधूमः कठिनफलो नित्यं देयो यवोऽपि च ॥ ३ ॥
पुष्पितो रक्तजननः फलितो मांसवर्धनः ॥
अनूपजलजं मांसं वसा मेदो घृतं तथा ॥ ४ ॥
माहिषं च दधि क्षीरं तैलोष्णे चावमर्दयेत् ॥
घृतं क्षीरं यवाः शालिमांसानि मधुराणि च ॥ १०५ ॥
अतो यस्मिन्प्रशस्तानि दन्तिनां जलदात्यये ॥
शर्करं (?) प्रतिपानार्थे लवणार्थे च सैन्धवम् ॥ ६ ॥
दिवा स्थानानि शीतानि रात्रौ चन्द्रांशवो हिताः ॥
ग्रीष्मवच्चावगाहश्च कार्यः शरदि दन्तिनाम् ॥ ७ ॥
सूर्यांशुपरितप्तानां चन्द्रेणाऽऽप्यायितानि च ॥
आगस्त्योदकयुक्तानि निर्विषाणि शुचीनि च ॥ ८ ॥
निर्मलानि निपानेषु जलान्यमृतवत्तदा ॥
पानावगाहे करिणां प्रशस्तानि विशेषतः* ॥ ९ ॥
(†भोजनार्थे प्रदातव्यं जाङ्गलानूपमिश्रितम्) ॥
पूर्वाह्णे वाऽपराह्णे वा द्वौ कालौ तत्र बुद्धिमान् ॥ ११० ॥
प्रचारयन्व्रजश्चागानरण्येषु विभागवित् ॥
काशपुष्पपटीं शुभ्रां तदावि(वि)त्रितनिम्नगाम् ॥ ११ ॥
परिपक्वतृणां चैव धरणीं तत्र शालिनाम् ॥
कमलोत्पलकह्लारजातां गन्धवहस्तदा ॥ १२ ॥
मारुतः सुखसंस्पर्शो वाति शीतांशुशीतलः ॥
विचित्राणि स्वादवन्ति तृणानि सलिलानि च ॥ १३ ॥
शरद्गुणैः सुमनसो भवन्ति करिणस्तदा ॥
काले तु प्रतिकुर्वीत हस्तिनां दन्तकल्पनाम् ॥ १४ ॥
स्वातिसंपातयोगे च काले नीराजनास्तदा ॥
राज्ञश्च यात्राकालोऽत्र शस्तः कर्मसु दन्तिनाम् ॥ ११५ ॥

---

* क–घपुस्तकयोस्तु—एतदुत्तरमेव 'विशेषोऽहनि' इत्यारभ्य 'रसैर्मधुरतिक्तकैः' इत्यन्तो धनुश्चिह्नान्तर्गतपाठ उपलभ्यते ॥

† धनुश्चिह्नान्तरगतः पाठो नास्ति ख–घपुस्तकयोः । तत्र 'भोजनार्थे' इत्येव 'रसैर्मधुरतिक्तकैः' इत्युत्तरमुपलभ्यते ॥

ऋतुसात्म्यमिदं प्रोक्तं चेष्टाहारव्यपाश्रयम् ॥
हिताहितविधानार्थे करिणां स्वच्छवृत्तकम् ॥ १६ ॥
चिकित्सायाः स्वच्छवृत्ति स नित्यं हि चिकित्सितम् ॥
संवेशोत्थानयोः सम्यगवगाहे च दन्तिनाम् ॥ १७ ॥
यथाकालं समुद्देशं पालकाप्योऽब्रवीत्पुनः ॥
पूर्वाह्णे वाऽपराह्णे वा सर्वर्तुषु च पार्थिव ॥ १८ ॥
अनेन विधिना नागमवगाहनमानयेत् ॥
गच्छन्तं हारयेत्पांशुं वीथीमार्गेष्वनेकपम् ॥ १९ ॥
पङ्कं वा हारयेदेनं वप्रं च प्रतिषेधयेत् ॥
अवगाह्य प्रवातं च कर्णादूने समे जले ॥ १२० ॥
विशेषमात्रे मातङ्गो तोये प्रतिनिषादयेत् ॥
ततः संपच्य तैलेन तत्रैनं प्रतिवर्षयेत् ॥ २१ ॥
अवसिच्यावसिच्याद्भिरथैनमनुवर्तयेत् ॥
उभाभ्यामनुवृत्तं च पक्षाभ्यां वा मतङ्गजम् ॥ २२ ॥
कर्णौ यावत्समेतानि पुनः समवगाहयेत् ॥
(*आरक्षितानि शिरसि प्रक्षाल्यास्य प्रपीड्य च ॥ २३ ॥
प्रकामे(मं) तापयित्वा तु निवृत्तं स्थानमानयेत् ॥
आगतस्य च नागस्य मत्तस्य च विशेषतः ॥ २४ ॥
निवार्णस्योपचारोऽयं सर्वेष्वृतुषु कीर्तितः ॥
ग्रीष्मे प्रागुदयान्नागमवगाहाय योजयेत् ॥ १२५ ॥
छायायां (च) द्विपौरुष्यां सीदन्तमवगाहयेत् ॥)
माध्यंदिने तु शालास्थं पाययेदुद्धृतोदकम् ॥ २६ ॥
इति ग्रीष्मविधिः प्रोक्तो वार्षिकः संप्रवक्ष्यते ॥
तस्याभ्युदितमात्रे तु सूर्ये वर्षासु बुद्धिमान् ॥ २७ ॥
निर्वापणाय नागानां कुर्यात्पूर्वाह्णिकं हितम् ॥
पुनर्निर्वृत्तिमात्राहं (?)[1]हितं वर्षासु हस्तिनाम् ॥ २८ ॥
ऋतुसंधिषु सर्वेषु मृत्तिकाया निवारणम् ॥
गोमूत्रं पाययेन्नागं हस्ते शङ्कुं च बन्धयेत् ॥ २९ ॥

---

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

---

१ क. हस्तिनामृतुसंधिषु ॥ हितं वर्षे च सर्वेषु ।

मृत्तिकाभक्षणाश्च*पक्वाद्रक्षा वर्षासु हस्तिनाम् ॥
अत ऊर्ध्वं प्रवक्ष्यामि हेमन्ते विधिमुत्तमम् ॥ ३० ॥
मन्दीभूते पुनः शीते युगमात्रगते रवौ ॥
धू(पौ)र्वाह्णिकोऽवगाहस्तु वारणानां हिमागमे ॥ ३१ ॥
त्रिभागशेषदिवसे त्वपराह्णेऽवगाहयेत् ॥
हेमन्ते वारणं तोये तथैव परिघर्षयेत् ॥ ३२ ॥
पूर्वाह्णे चाऽऽतपे †पांशुर्यथाकर्म हरेद्बुधः ॥
अवगाह्य च तोये तं क्षिप्रमुत्तारयेद्गजम् ॥ ३३ ॥
अत्यर्थं शिशिरे काले पौषे मासेऽथ वारणम् ॥
सिक्त्वैरिकतैलेन त्र्यहान्ते वाऽवगाहयेत् ॥ ३४ ॥
छविः प्रसन्ना भवति शीतं चैनं न बाधते ॥
व्रणाश्चाप्युपरोहन्ति यूका कण्डूश्च नश्यति ॥ १३५ ॥
इति सर्वेषु कालेषु निवार्णविधिरीरितः ॥
जलदोषांस्तु वक्ष्यामि यान्दृष्ट्वा परिवर्जयेत् ॥ ३६ ॥
पिच्छिलं कृमिशैवालपर्णपङ्कमलावृतम् ॥
विवर्णं विरसं स्पर्धं दुर्गन्धं वासितं जलम् ॥ ३७ ॥
मत्स्यगन्धि तु यत्तोयं भवेद्यच्चर्मगन्धि च ॥
सगन्धि क्षुण्णपानं च तानि तोयानि वर्जयेत् ॥ ३८ ॥
कृमिमिश्रजलान्याहुर्ग्रहणीदूषणानि च ॥
कौपमुद्भिदजं वाऽपि सारसं वा पिबेज्जलम् ॥ ३९ ॥
एवं सर्वास्ववस्थासु न विरुद्धं महीपते ॥
नैवं हि सलिलं व्याधिमुत्पादयति वारणे ॥ १४० ॥
महीद्रुमचराणां च मृतस्याऽऽशीविषस्य च ॥
निर्धावनं च वृक्षाणां यथावत्परिवर्जयेत् ॥ ४१ ॥
तोयं तु कटुकं नागो न पिबेद्वातकोपनम् ॥
अत्यर्थमधुरं यत्र श्लेष्माणमभिवर्धयेत् ॥ ४२ ॥
अम्लं पित्तं वर्धयति तो[1]यं नागस्य निन्दितम् ॥
तादृग्रूपं पयो पक्वाच्चादृशं च न सेवयेत् ॥ ४३ ॥

---

* यस्मादिति भवेत् । † 'पांशून्' इति स्यात् ।

---

१ क. तोयं । २ क. तोयं ।

कषायं लवणं चैव निर्मलं च हितं भवेत् ॥
निर्दोषाणामलाभे तु यथालाभं पिबेज्जलम् ॥ ४४ ॥
जलावरोधान्म्रियते संमोहं वा नियच्छति ॥
तस्मात्सर्वास्ववस्थासु पानीयं न निवारयेत् ॥ १४५ ॥
अवगाहविधिश्चैव जलदोषाश्च कीर्तिताः ॥
शयनोत्थानकाण्डानां वक्ष्यते विधिरुत्तमः ॥ ४६ ॥
भुक्तवन्तं प्रतिच्छन्नं यवसेन तु वारणम् ॥
ग्रीष्मे संवेशयेद्रात्रौ गते त्वष्टार्धनाडिके ॥ ४७ ॥
शेषे षड्नालिके वाऽपि द्विपक्षशयनं गजम् ॥
नरः प्रतिनयेत्स्थानमिति ग्रीष्मविधिः स्मृतः ॥ ४८ ॥
संवेशयेत्तु वर्षासु रात्रौ षड्नालिके गते ॥
यथोक्तेनैव विधिना भुक्तवन्तं त्वनेकपम् ॥ ४९ ॥
अष्टभागिकशेषायां स्थानं प्रति नयेद्गजम् ॥
इति संवेशनोत्थाने वर्षाकाले प्रकीर्तिते ॥ १५० ॥
हेमन्तकाले तु पुनर्यथोक्तमशितं गजम् ॥
संवेशयेद्गजं रात्रावतिक्रान्तेष्टनालिके ॥ ५१ ॥
उभाभ्यामपि पक्षाभ्यामनुवृत्तमनेकपम् ॥
पुनः प्रतिनयेत्स्थानं शेषे तु दशनालिके ॥ ५२ ॥
दिनानां दीर्घह्रस्वत्वं विज्ञाय क्रमशो भिषक् ॥
यथोक्तक्रमतस्तेषां वर्धयेद्वा स भोजनम् ॥ ५३ ॥
शयनोत्थानशालानामित्ययं कीर्तितो विधिः ॥
निर्वाणं शयनं चैव सर्वर्तुषु च कीर्तितः (?) ॥ ५४ ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचन उत्तरस्थान
ऋतुचर्याध्यायः पञ्चदशः ॥ १५ ॥

अथ षोडशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कार्याकार्यविधिं कृत्स्नं भगवन्वक्तुमर्हसि ॥ १ ॥
कस्मान्न दीयते तोयं भुक्तमात्राय दन्तिने ॥
कस्मात्त्वास्यात्कृता न स्यात्तथा कर्म विधीयते ॥ २ ॥

---

१ ख. °ड्नाडिके ।

उपस्थिते मदे वाऽपि प्रभिन्ने वाऽपि कुञ्जरे ॥
कस्मात्स्नेहो विरेको वा न देयस्तु महामुने ॥ ३ ॥
कस्मादुभयतः स्नेहो मुखतः पृष्ठतोऽपि च ॥
न प्रदीयेत युगपद्भागेभ्यो द्विजसत्तम ॥ ४ ॥
कस्माच्च भोजितायाऽऽज्यस्नेहबस्तिः प्रदीयते ॥
निरूहो भोजिते वाऽपि कस्माच्चैव प्रदीयते ॥ ५ ॥
कस्मात्पीतवते तोयं पश्चाद्भुक्तं प्रदीयते ॥
कस्माच्च शून्यकोष्ठाय स्नेहबस्तिर्न दीयते ॥ ६ ॥
प्रत्युद्गतस्य नागस्य कस्माच्छिण्डं न शोध्यते ॥
*(अरोग्ये(गे) व्याधिते नाथ समं कस्मान्न बाध्यते ॥ ७ ॥
कस्मान्न हस्तिवैद्येन चिकित्स्यः पुरुषः स्मृतः ॥
कस्मात्तु नरवैद्येन न चिकित्स्यो मतङ्गजः ॥ ८ ॥
कस्माद्दन्तनिवृत्ताय न देयो मोदको द्विज ॥
प्रतिपानं यथा तच्च यथायोगं प्रदीयते ॥ ९ ॥
कस्माच्च हस्तिशालायां नखरोम न कल्पयेत् ॥
कथं नीराजिताः सन्तो न निर्वाप्यास्तु कुञ्जराः ॥ १० ॥
कस्माच्चैव दिवास्वप्नं न प्रशंसन्ति दन्तिनाम् ॥
प्रतिपानौषधानां च ब्रूहि कालमशेषतः ॥ ११ ॥
स्नानस्य चापि यः कालो भक्तस्य यवसस्य च ॥
युक्त्या प्रतिनयं ब्रूहि यथा वाऽभिनयं मुने ॥ १२ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
कार्याकार्यविधिं सर्वं हेतुभिः संप्रदर्शयेत् ॥ १३ ॥
भोजयित्वाऽथ मातङ्गं मोहाद्यः पाययेज्जलम् ॥
विषमं पच्यते भुक्तं स भवत्युत्तरोदकः ॥ १४ ॥
न चात्र समानः सम्यग्भुक्तं चास्य न जीर्यते ॥
तस्मात्करिणे भुक्तवते पानीयं न विधीयते ॥ १५ ॥

* धनुश्चिह्नान्तरगतपाठः खपुस्तके पालकाप्योत्तरवाक्ये, पालकाप्योत्तरवाक्यं 'तस्मात्कर्मप्रयुक्ते तु' इत्यादिः 'व्याधितं परिवर्जयेत्' इत्यन्तः पाठोऽत्र राजप्रश्नवाक्य उपलभ्यते ॥

१ क. °स्थितम° ।

अजस्रं भक्षयन्त्येते शीतसात्म्या महाम्रयः ॥
यस्माद्भुक्तवतः स्नेहो दुःखं पच्येत विप्लुतः ॥ १६ ॥
तस्मादुदकपूर्वं तु सुखं भुक्तं न जीर्यते ॥
पूर्वं पानीयपीतस्य भक्तभुक्तस्य दन्तिनः ॥ १७ ॥
नस्यकर्म प्रयुङ्क्ते यस्तस्य तोयपरिप्लुतः ॥
मूर्छां वा नयति स्नेहो अ(ह्य)तीसारमरोचकम् ॥ १८ ॥
व्यापादं वा पुनर्घोरं मिथ्याकर्मप्रयोगतः ॥
तस्मादभुक्तवत्येव नस्यकर्म विधीयते ॥ १९ ॥
विधानं तस्य कात्स्न्र्येन *नस्यदानं प्रकीर्त्यते ॥
विश्लेषं संधयो यान्ति पथि व्यायामतोऽपि वा ॥ २० ॥
तस्मात्कर्मप्रयुक्ते तु न विरेको विधीयते ॥
तेजसो हि समावेशान्मदः संजायते गजे ॥ २१ ॥
तैजसं नस्यमप्युक्तमतस्तं नावचारयेत् ॥
यथा हि भवने दीप्ते सर्पिषा परिषेचनम् ॥ २२ ॥
भवेदाशु प्रदाहाय नियतं तस्य वेश्मनः ॥
एवमेव प्रभिन्नस्य कुञ्जरस्य महीपते ॥ २३ ॥
तैलावचारणाद्दोषो हेतुभिः संप्रदर्शितः ॥
यत एवं विकाराय ततः स्नेहो न युज्यते ॥ २४ ॥
तैलसर्पिर्विरेकाणां मत्तेनैवावचारणम् ॥
प्रभिन्नः सर्वसेकेन मूर्छां प्राप्नोति दारुणाम् ॥ २५ ॥
शिरोऽभितापं लभते दृष्टिश्चास्योपहन्यते ॥
तस्मात्प्रभिन्ने मातङ्गे नाभ्यङ्गस्तु विधीयते ॥ २६ ॥
न सर्पिषा न तैलेन नित्यमेव विधीयते ॥
अपाने मुखतश्चैव युगपद्यदि दीयते ॥ २७ ॥
स्नेहः स्नेहेन सङ्गस्य परिणामं न गच्छति ॥
आनाहो वाऽतिसारो वा मूर्छा वाऽस्योपजायते ॥ २८ ॥
यस्मात्तस्मादुभयतो न स्नेहो दीयते नृप ॥
अभुक्तवाभिरूक्षेत भुक्तवच्च निराकृतः ॥ २९ ॥

---

* 'नस्यदाने' इति भवेत् ।

भुक्तवांश्चानुवास्येत तस्मान्नाभुक्तवान्गजः ॥
बस्तिसिद्धो मया पूर्वमेतत्सिद्धमशेषतः ॥ ३० ॥
कीर्तितं क्रमयोगेण हेतुभिः स्पष्टलक्षणैः ॥
स्वकरीषे च वसतिः कार्या भवति दन्तिनाम् ॥ ३१ ॥
विवर्जयन्ति रक्षांसि ग्रहाः परिहरन्ति च ॥
अभिचारो न भवति मनो न प्रतिहन्यते ॥ ३२ ॥
व्याधयश्च प्रशाम्यन्ति नोद्विजन्ते च कुञ्जराः ॥
तस्मादस्तमिते सूर्ये रक्षार्थं मनुजाधिप ॥ ३३ ॥
प्रत्युद्गतानां नागानां न लिण्डमपकृष्यते ॥
व्याधितं चाप्यरोगं वा नैकस्थाने निवेशयेत् ॥ ३४ ॥
रोगसंलेपनभयाद्व्याधितं परिवर्जयेत् ॥
मनुष्यवैद्यो नागानां चिकित्सां न प्रयोजयेत् ॥ ३५ ॥
हस्तिवैद्यो मनुष्याणामतो हेतोर्नराधिप ॥
अन्नसात्म्या हि पुरुषास्तृणसात्म्या मतङ्गजाः ॥ ३६ ॥
मात्राप्रकृतिसात्म्यानां (*वैशेष्याच्चापि पार्थिव ॥
यस्माच्छास्त्राणि च पृथङ्नराणां दन्तिनामिह ॥ ३७ ॥
तस्मान्नागभिषङ्नागांश्चिकित्सेन्ना भिषङ्नरान् ॥
क्षीरमेदकमद्यानां) तथा सौवीरकस्य च ॥
अनिर्वृत्ता च नागानां प्रातः पानं विधीयते ॥ ३९ ॥
क्षीरादीनि महीपाल तोयं पीत्वा पिबेद्यदि ॥
कोपयन्ति कफं पश्चात् पीतान्येतानि दन्तिनः ॥ ४० ॥
श्लेष्मणा हृदयं तस्य कुञ्जरस्य प्रपीड्यते ॥
नाभिनन्दति चाऽऽहारं भुक्तं चापि न पच्यते ॥ ४१ ॥
कृमिकोष्ठी भवत्येवं मृत्तिकां चाभिनन्दति ॥
यस्मात्तस्माद्गजेभ्यस्तु प्रातः क्षीरादि दीयते ॥ ४२ ॥
ऐरावणादयो राजन्कीर्तिता ये दिशां गजाः ॥
तस्मात्प्रसूतिर्नागानां विद्धीमानिह वारणान् ॥ ४३ ॥
यस्माच्च देवहस्तिभ्यः प्रसूता वारणा नृप ॥
तस्माद्गजोपकरणं वारणानां महीपते ॥ ४४ ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ।

---

१ ख. घ. कथं ।

अशुचिर्न स्पृशेत्कश्चिन्न वा रोहेन्मतङ्गजम् ॥
शुचिना तु सुखं वृद्धिं पुष्टिं च लभते सदा ॥ ४५ ॥
अनेनैव विशेषेण वारणानां महीपते ॥
शालासु *मुखवालानां कल्पनं न विधीयते ॥ ४६ ॥
पीडा भवति नागानां तस्मात्तत्र न कल्पयेत् ॥
षण्मासांद्वर्धते रात्रिः षण्मासांत्परिहीयते ॥ ४७ ॥
क्षयं वृद्धिं विभज्याथ स्वापयेच्च मतङ्गजम् ॥
दिवास्वप्नस्तु नागानां दोषकोपाद्यतः पुनः ॥ ४८ ॥
प्रतिषिद्धो दिवास्वप्नस्तस्मात्तु नृपपुङ्गव ॥
द्वात्रिंशन्नाडिका रात्रिर्दिवसश्च समो यदा ॥ ४९ ॥
तदा त्रिंशतिमे चैव नालिकं (?) स्वापयेद्गजम् ॥
सेवतां तु दिवा स्वप्नमेषां श्लेष्मा प्रकुप्यति ॥ ५० ॥
शातार्त्तेर्तुक्ष (?) नागानामतः स्वप्नो दिवा हितः ॥
प्रतिपानौषधादीनि पूर्वाह्णे भोजनानि वै ॥ ५१ ॥
स्नातस्य भक्तं पूर्वाह्णे सायाह्ने च तथाऽपरम् ॥
कृतमङ्गलशौचाश्च कृतस्वस्त्ययनक्रियाः ॥ ५२ ॥
नीराजनविधौ नागाः फाल्गुनाषाढकार्तिकैः ॥
समास्तेषु यथा प्रोक्ता इति राज्ञो घनाः स्मृताः ॥ ५३ ॥
नीराजितानां स्नानं च गजानां न विधीयते ॥
अतो निर्वसतीकल्पस्तत्र पुण्यो विधिः स्मृतः ॥ ५४ ॥
शान्तिस्वस्त्ययनादीनि नित्यं कार्याणि हस्तिनाम् ॥
बालवृद्धातुराणां च क्षीणानां च विशेषतः ॥ ५५ ॥
कर्तव्यो हस्तिनां सम्यग्दयापूर्वमनुग्रहः ॥
रक्षिता वारणा राज्ञां भवन्ति विजयावहाः ॥ ५६ ॥
यावतः सुभृतान्कुर्याद्वारणान्सर्वकामतः ॥
तावतः पृथिवीपाल वारणान्ग्राहयेद्धितान् ॥ ५७ ॥

* 'नखवालानां' इत्येव युक्तम् । 'कस्माच्च हस्तिशालायां नखरोम न कल्पयेत्' इतिप्रश्नानुकूल्येनैवोत्तरस्य वक्तव्यत्वात् ।

१ क. °सान्वर्धं° । २ क. °सान्परि° । ३ क. यदि । ४ क. °तान्कृत्वा वार° ।

(* रक्षिता वारणा राज्ञो भवन्ति विजयावहाः) ॥
वहन्ति चैवं सुप्रीताः सततं पुरुषेश्वरान् ॥ ५८ ॥
इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचन उत्तरस्थाने
कार्याकार्यविधिर्नाम षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

देवराजप्रतीकाशः पप्रच्छाङ्गो नराधिपः ॥
पालकाप्यमुपासीनं वेदविद्याविशारदम् ॥ १ ॥
प्रदक्षिणमभिक्रम्य पादानतकृताञ्जलिः ॥
भोजनेऽप्यथवा घासे पाने वाऽथ गुणान्प्रति ॥ २ ॥
संशयं ब्रूहि तत्त्वेन भगवन्मे प्रसीदत ॥
एवमुक्तोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ ३ ॥
निखिलेनैव ते सर्वं व्याख्यास्याम्यनुपूर्वशः ॥
श्रूयतां मनुजाधीश यन्मां त्वं परिपृच्छसि ॥ ४ ॥
भोजनस्यानुपानस्य यथर्तुगुणसंपदः ॥
लवणं पाचयेद्भक्तमुदकं क्लेदयत्यपि ॥ ५ ॥
प्रीणनं प्राणजननं रसाम्लं शोषकृद्दधि ॥
क्षीरं जीवयति श्रीमन्मांसं बृंहयति द्विपम् ॥ ६ ॥
सर्पिस्तु स्नेहनं चायं (?) क्षौद्रं शोधनमुच्यते ॥
संस्कृतो दीपनं क्षीरं तैलं वातहरं भवेत् ॥ ७ ॥
संवर्धनश्च धातूनां मेदकः प्राणवर्धनः ॥
वसा वर्धयति प्राणान्मेदो बृंहणमेव च ॥ ८ ॥
मदिरा दीपयत्यग्निं श्रमघ्ना च नराधिप ॥
यवसेन विचित्रेण मृदुना हरितेन च ॥ ९ ॥
यथर्तु चोपयुक्तेन बलं तेजश्च वर्धते ॥
भोजनं गुणसंपन्नं यथोक्तं प्राणधारणम् ॥ १० ॥
बलसंजननं चैव धातूनां च विवर्धनम् ॥
भोजने स्वादने चैवमित्येते गुणसंग्रहाः ॥ ११ ॥

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

१ क. भवन्ति । २ क. वाऽस्य । ३ क. प्रसादतः । ४ क. संस्कृतोद्दीपनं ।

वारणानां यथाकालं पच्यन्ते मनुजाधिप ॥
ऋतुं वयः प्रमाणं च ग्रहण्याश्च बलाबलम् ॥ १२ ॥
देशं कालं च विज्ञाय ततः कुर्याच्चिकित्सितम् ॥
इत्येते विहिता राजन्नपानस्य वै गुणाः ॥ १३ ॥
पालकाप्येन मुनिना विनिश्चित्य यथातथम् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचन उत्तरस्थानेऽ-
न्नपानगुणाधिकारो नाम सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
सौवीरकस्तु यः प्रोक्तो जानीयां सति तत्कथम् ॥ १ ॥
कथं वा सेचनं तस्य पालकाप्यस्ततोऽब्रवीत् ॥
शिरस्नातोऽनुलिप्ताङ्गः शुक्लवासाः समाहितः ॥ २ ॥
पूजां प्रपूज्य देवेभ्यः स्वस्ति वाच्य द्विजानपि ॥
तदर्थं साधयेदम्लं विमलं शृञ्जनादिकम् ॥ ३ ॥
आढकानां चतुःषष्टि (?) पुराणघृतभाजने ॥
वचां विडङ्गं पिप्पल्यो मुद्राश्च मरिचानि च ॥ ४ ॥
शृङ्गवेरं मधुरसा पिप्पलीमूलमेव च ॥
उभे हरिद्रे कुष्ठं च मञ्जिष्ठा रोहिणी तथा ॥ ५ ॥
मधुकं लोध्रमित्येषामेकैकस्य विचक्षणः ॥
पलान्यर्धचतुर्थानि कुर्याद्वारपमत्र (?) वा ॥ ६ ॥
भल्लातकानां पञ्चाशदभयानां शतं तथा ॥
शालजम्बूपलाशस्य प्लक्षस्य वरणस्य च ॥ ७ ॥
करञ्जस्य मधूकस्य सर्जस्य कुटजस्य च ॥
खदिरस्याश्वकर्णस्य यवस्याऽऽम्रातकस्य च ॥ ८ ॥
विभीतकस्य निम्बस्य कृतमालस्य च त्वचः ॥
ग(गु)डूची कोविदारस्य सप्तपर्णस्य च त्वचः ॥ ९ ॥
उदुम्बरत्वचा सार्धं मुष्ककत्वक्तथैव च ॥
एकैकस्य त्वचो भागं पलानि दश कल्पयेत् ॥ १० ॥

एतन्मासस्थितं प्रातः पानमध्ये प्रदापयेत् ॥
अर्धाढकीयं द्रोणं तु प्रमाणं परिकल्पितम् ॥ ११ ॥
एवं भक्ते च नागेभ्यो दद्यात्तु कुशलो भिषक् ॥
कृमिकोष्ठे वातगुल्मे मन्दाग्नौ दन्तिनां तथा ॥ १२ ॥
दापयेदन्तरायामे रोगेषु कफजेषु च ॥
सम्यक्सौवीरको दत्तो विधिं विज्ञाय तत्त्वतः ॥ १३ ॥
व्याधिं च शमयत्याशु बलं धातुश्च वर्धते ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रणोदितः ॥ १४ ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचन उत्तरस्थाने सौवीरकपानविधिर्नामाष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कथं प्रयोगकालेषु नागेभ्यो दीयते कथम् ॥ १ ॥
कथं हि कृतकर्मभ्यः पोतेभ्यश्च कथं सुरा ॥
स्थूलेभ्यश्च कृशेभ्यश्च मत्तेभ्यश्च प्रदीयते ॥ २ ॥
का च मद्यस्य संज्ञा वै वृद्धेभ्यो दीयते कथम् ॥
का मात्रा के गुणाः पाने कथं योज्या च वारुणी ॥ ३ ॥
षडङ्गमतिपानं च कथं कस्माच्च दीयते ॥
एतन्मे भगवन्ब्रूहि पृच्छतस्तु महामुने ॥ ४ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
सुरापानगुणांश्चापि संयोगं कालमेव च ॥ ५ ॥
बह्वौषधां जातरसां परिपक्वां चिरस्थिताम् ॥
तीक्ष्णां सुरां क्षौद्रयुतां दापयेत्कृतकर्मणि ॥ ६ ॥
अध्वागते गुडसुरामथवा विशुद्धोदकाम् ॥
मधुफाणितसंयुक्तां कोष्ठनिर्वापणे हिताम् ॥ ७ ॥
तस्य कोष्ठं शोधयति प्रसादयति शोणितम् ॥
आमं तन्द्रां पिपासां च वारुणी चापकर्षति ॥ ८ ॥

---

१ क. °तन्मांस° । २ क. °रके देशे वि° ।

अपरेद्युश्च विश्रान्ते पुनः प्रातः पुरंजय ॥
चङ्क्रमितनिषण्णाय विनीते चैव हस्तिने ॥ ९ ॥
दद्यात्षडङ्गपानं तु बलवर्णकरं हितम् ॥
पिप्पली शृङ्गवेरं च मधु तैलं गुडं सुरा ॥ १० ॥
एकत्र मूर्छयित्वा च प्रतिपानं प्रदापयेत् ॥
तत्षडङ्गप्रतीपानमिति संज्ञा विधीयते ॥ ११ ॥
तेनास्य चीयते रक्तं बलं वर्णश्च जायते ॥
ये च प्रचलिता दोषा भवन्त्यध्वप्रयोजनात् ॥ १२ ॥
क्षुभ्यमानशरीरस्य वातपित्तकफादयः ॥
एतेन प्रतिपानेन यथास्थानं नराधिप ॥ १३ ॥
शमं गच्छन्ति नागस्य दोषाय न भवन्ति वा ॥
तत्षडङ्गप्रतीपानं विश्रान्ताय प्रदीयते ॥ १४ ॥
उत्पन्नगुणकां तीक्ष्णां वारुणीं जातवक्षसाम् ॥
सुरां दद्यात्प्रयोगेण तैलं चैव न दापयेत् ॥ १५ ॥
अनयाऽध्वानं च सहते न च मूर्छति वारणः ॥
तृष्णा च न भवत्येव अनया पृथिवीपते ॥ १६ ॥
आ दशभ्यस्तु वर्षेभ्यः पोतकेभ्यो नराधिप ॥
गोक्षीरं नवनीतं च सदा प्रातर्विधीयते ॥ १७ ॥
सर्पिषा चैव सेकः स्यात्सर्पिषा चैव भोजनम् ॥
नित्यमुत्कारिकां दद्याच्छालूकानि बिसानि च ॥ १८ ॥
एतत्तु दद्यात्पोतेभ्यो ये चान्ये मधुरा रसाः ॥
आप्यायन्ते तथा पोता वपुश्चैषां न हीयते ॥ १९ ॥
स्थूलस्य मृदुमांसस्य क्षुभ्यन्तेऽङ्गानि यस्य च ॥
न तस्मै मेदकं दद्यात्तं यं क्रामादभीक्ष्णशः (?) ॥ २० ॥
तत्र श्रान्तं तथा स्विन्नं न च संक्रामयेद्गजम् ॥
दद्यात्तैलोदकं पातुं योगवित्कुशलो भिषक् ॥ २१ ॥
कामं द्विपञ्चरात्रं च सोमवल्कयुतां सुराम् ॥
दद्यात्सगुडतैलं वा यथायोगं यथाविधि ॥ २२ ॥
छविः शोभा स्थिरा चास्य बलं चैव न हीयते ॥
विडङ्गमेदकौ चास्मै दद्याद्वा क्षीवमेदकौ ॥ २३ ॥

स्थूलस्य बलमांसस्य श्लेष्मणा चार्दितस्य वै ॥
कार्त्स्न्येन विधिरुक्तोऽयं यथावद्राजसत्तम ॥ २४ ॥
अतः परं प्रवक्ष्यामि विधिं विस्तरतोऽपरम् ॥
विद्धि प्रकारयोगा हि प्रतिपानस्य निश्चितम् ॥ २५ ॥
सुरा च मधुरा पूर्वा श्लेष्मघ्ना पित्तवर्धिनी ॥
तीक्ष्णत्वाज्जरयत्यन्नं दीपनीयतमा स्मृता ॥ २६ ॥
वातशूलेषु भूयिष्ठं *तस्य दोषाः प्रशस्यते ॥
अतस्तीक्ष्णतरां प्राहुः प्रसन्नां मनुजाधिप ॥ २७ ॥
उष्णवीर्यां तनुरसां तथा वह्निप्रदीपनाम् ॥
वातश्लेष्महरां चैव तथा वह्निविवर्धनीम् ॥ २८ ॥
बलं विज्ञाय नागेभ्यस्तदेनां संप्रदापयेत् ॥
भोजितानां च नागानामनुपानेषु पूजिते ॥ २९ ॥
अत्याशितं जरयति कण्ठमार्गविशोधनी ॥
सौमनस्यकरी हृद्या मनोवर्णप्रसादनी ॥ ३० ॥
वातलेष्वपि सुतरां मन्दाग्नौ च प्रशस्यते ॥
मन्दोद्धृता या सुतरां तरुणी साप्यतिस्थिरा ॥ ३१ ॥
अव्यक्तरसवीर्यत्वाच्च सा कर्मसु पूजिता ॥
वातपित्तप्रकोपी तु सीधुरुक्तो मनीषिभिः ॥ ३२ ॥
रूक्षश्च सकषायश्च विपाके कटुकस्तथा ॥
रूक्षत्वात्कटुतिक्तश्च श्लेष्माणमपकर्षति ॥ ३३ ॥
तथा रूक्षकषायत्वाद्रक्तपित्तहितोऽमरः ॥
एष पक्वरसः सीधुरपक्वरस एव च ॥ ३४ ॥
तत्तुल्यो रसवीर्येण गौरस्त्वम्लगुणाधिकः ॥
शार्करो भृशशीतत्वाद्दृष्टो वातविवर्धनः ॥ ३५ ॥
पित्तकोपी तु तीक्ष्णत्वाच्छ्लेष्माणं च निरस्यति ॥
अरिष्टो दीपनीयत्वात्सर्वेभ्योऽभ्यधिकैर्गुणैः ॥ ३६ ॥
सर्वदोषहरश्चैव नागानां मनुजाधिप ॥
उष्णवीर्यश्च रूक्षश्च विपाके कटुकश्च सः ॥ ३७ ॥

* 'तस्या दोषः' इति भवेत् ।

१ क. पित्तप्रवर्धनीम् ।

आस्वादतः स कटुकः स कषायरसः स्मृतः ॥
न वर्धयति नागानां कफपित्ते विशेषतः ॥ ३८ ॥
शाखावातं कोपयति स्नेहं मांसं च कर्षयेत् ॥
तस्मात्स्निग्धानि पानानि स्नेहयुक्तं च भोजनम् ॥ ३९ ॥
अरिष्टं पिबतो राजन्देयानि कुशलेन तु ॥
अल्पां तमनुपिष्टां तु माध्वीकं संप्रचक्षते ॥ ४० ॥
सुगन्धि च विशेषेण सुरसं चापि निर्दिशेत् ॥
कषायतिक्तरूक्षोष्णं प्रमोदि विशदं लघु ॥ ४१ ॥
कायाग्निदीपनं चैव मृद्वीकं मधु निर्दिशेत् ॥
मैरेयो मधुरः स्वादुस्तीक्ष्णो दीपनबृंहणः ॥ ४२ ॥
लघुर्विपाके कटुकः पित्तलो मारुतापहः ॥
असंप्राप्तं तथाऽम्लं च लवणं च विवर्जयेत् ॥ ४३ ॥
अग्निना दूषितं यच्च यच्च भाजनदूषितम् ॥
एतैर्दोषैः परीतानि मद्यानि प्रतिषेधयेत् ॥ ४४ ॥
करवीरोत्पलाम्भोजतुल्यगन्धेन यद्भवेत् ॥
तिलतैलसवर्णं स्याद्घृतमण्डनिभं च यत् ॥ ४५ ॥
आस्वादे तिक्तमधुरं प्रकृतिस्थं बलान्वितम् ॥
ईदृशं पाययेन्मद्यं सर्वदोषविनाशनम् ॥ ४६ ॥
पुनर्दोषान्प्रवक्ष्यामि दुष्टमद्यस्य तत्त्वतः ॥
विदाहमम्लिकां कुर्यादभिष्यन्दं हि नीलिकाम् ॥ ४७ ॥
त्वग्दोषान्पुष्पिता कुर्याद्घ्राणव्यक्तामरोचकम् ॥
सादोदावर्तगुल्मांश्च मरणं चाऽऽशु दन्तिनः ॥ ४८ ॥
उष्णेन चाभिसंतप्तादतः पित्तं प्रकोपयेत् ॥
अवसन्ना लेखनी स्यात्किण्वगन्धिर्न जीवति ॥ ४९ ॥
भक्तदुष्टा तथाऽऽध्मानं रसवन्त्वा कफोद्भवम् ॥
एवमेते सुरादोषा मया सम्यगुदाहृताः ॥ ५० ॥
एभिर्दोषैर्विमुक्तानि मद्यानि प्रतिपाययेत् ॥
इति मद्यस्य नृपते गुणा दोषा मयेरिताः ॥ ५१ ॥

अत ऊर्ध्वं प्रवक्ष्यामि प्रतिपानं षडर्तुकम् ॥
सर्वं वा लवणं दद्याद्धेमन्ते सुरसां सुराम् ॥ ५२ ॥

जातीव प्रसन्नां वा सीधुं वाऽपि चिरस्थिताम् ॥
दापयेल्लवणैः सार्धं नागानां शिशिरागमे ॥ ५३ ॥
माध्वीकं वा प्रसन्नां वा सीधुं वा त्र्यूषणान्वितम् ॥
दद्याद्वसन्ते नागेभ्यो मुनिप्यन्नं यथाविधि ॥ ५४ ॥
सरकः सगुडो ग्रीष्मे प्रदातव्यो विजानता ॥
माध्वीको वा जलयुतः प्रतिपानं वा सशर्करम् ॥ ५५ ॥
मध्वासवमरिष्टं वा सक्षौद्रं दापयेद्भिषक् ॥
वर्षासु सगुडं वाऽपि तैलं वा मदिरान्वितम् ॥ ५६ ॥
मध्वासवः शार्करो वा सजलः शर्करायुतः ॥
पयो दधि शरदागमे करिभ्यो नृपसत्तम ॥ ५७ ॥
प्रायशः पैष्टिकं मद्यं वातिकानां प्रशस्यते ॥
माध्वीकं मधुगौडो वा कफपित्ताधिकास्तु ये ॥ ५८ ॥
गुडान्विताऽनिलहरा हिता रक्तजयाय च ॥
बृंहणी दीपनी हृद्या वृष्या बल्या मनस्करी ॥ ५९ ॥
सद्यःश्रमहरा चैव वारणानां नराधिप ॥
वातश्लेष्मकृमिहरा सुरा तैलसमन्विता ॥ ६० ॥
दीपयत्यन्यथा पित्तं विधिना वर्तिता सुरा ॥
पित्तघ्नी विधिवद्युक्ता कोष्ठदोषनिबर्हणी ॥ ६१ ॥
सपञ्चलवणा हृद्या सर्वदोषापकर्षणी ॥
क्षुभितावर्धवंशानां प्रवातश्रमवक्षसाम् ॥ ६२ ॥
मदिरा दन्तिनां पथ्या लाक्षया सह योजिता ॥
संधानार्थं शरीरस्य धातुसाम्यार्थमेव च ॥ ६३ ॥
रक्तषोडशभागेन तुल्यां लाक्षां प्रदापयेत् ॥

—:0:—

अत ऊर्ध्वं प्रवक्ष्यामि कृशानां बृंहणे विधिम् ॥ ६४ ॥
कर्मणा ये परिक्षीणा वधबन्धेन वा पुनः ॥
हीनया विधया वाऽपि प्रभिन्ना भिन्निताश्च ये ॥ ६५ ॥
क्षीणशोणितमांसाश्च कृशकायाश्च दन्तिनः ॥
सशर्करं पयो दद्यात्ततः कुल्माषमेदकम् ॥ ६६ ॥
निर्यूषं कारयेत्सम्यक्कुलत्थानामथाऽऽढके ॥
त्रिंशद्विंशत्पलानि स्युः किण्वस्य च गुडस्य च ॥ ६७ ॥

एतत्प्रतिनये दद्यादेकरात्रं स्थितं भिषक् ॥
कुल्माषभेदकं दद्याद्रक्तस्नेहेन मूर्च्छितम् ॥ ६८ ॥
कुल्माषभेदकात्सद्यः शोणितं तु प्रजायते ॥
कच्छुकाशाल्मलींश्चापि खर्जूरांश्चापि मस्तकम् ॥ ६९ ॥
शाकवृक्षयवांश्चापि ये चान्ये मधुरा द्रुमाः ॥
छेदयेत्कुंपलार्थाय तैरेवं बृंहयेद्गजम् ॥ ७० ॥
हरितैश्चापि यवसैर्विचित्रैर्मृदुभिर्हितम् ॥
बृंहयेद्बृंहणकरैर्न च तीक्ष्णैरुपाचरेत् ॥ ७१ ॥
अवेक्षते सदा नागान्बन्धूनिव सदा भिषक् ॥
सुरोपयोगकुशलो भेदकेषु च शास्त्रवित् ॥ ७२ ॥
भृशं संतप्तदेहा ये बलात्कृशतराश्च ये ॥
अत्यन्तरूक्षकायाश्च रक्तपित्तातुराश्च ये ॥ ७३ ॥
बहुप्राणपरीताश्च पयसोऽभिद्रुतास्तथा ॥
नवग्रहैर्ये तेषां तु सुरापानं न शस्यते ॥ ७४ ॥
विपन्नं चातिवृत्तं च मद्यं भेदकमेव च ॥
वारणेभ्यो न दातव्यमतिमात्रं च यद्भवेत् ॥ ७५ ॥
नेष्टं च क्षीरपीताय मद्यपीताय वा पयः ॥
विरुद्धा वोदरहितमुभयं विद्धि दन्तिने ॥ ७६ ॥

इति श्रीपालकाप्ये गजायुर्वेदे महाप्रवचन उत्तरस्थाने सुराप्रतिपानविधिर्नामैकोनविंशोऽध्यायः ॥ १९ ॥

अथ विंशोऽध्यायः ।

अथाङ्गपतिरमरसदृशवरुणधनपतिसत्त्वे गुरुविक्रमप्रशान्तशत्रुहारकेयूरमुकुटमणिप्रभाभिरुद्द्योतितपादपङ्कजं क्रतुसमृद्धं पावकप्रभाभिरिव विराजमानमभिवाद्य विनयात्पप्रच्छ पालकाप्यम्, भगवंन् ये त्विमे स्वयूथसुखसंवृद्धा हस्तिनः पर्वतनदीनदसरःप्रस्रवणदरीगिरिनिकुञ्जेषु विनतपुष्पभारशाखेष्वभिरताः क्वचिद्ग्रहणमुपगच्छन्ति, तान्दाम्यमानान्सोद्वेगान्गुरुबन्धाङ्कुशवाग्दण्डप्राजनैरभिहन्यमानान्दृष्ट्वा महत्कारुण्यमुत्पद्यते मनसः । तेषां ग्राम्यव्याधिसंतप्तदेहानां चिकित्सितमुपदेष्टुमर्हसि ॥

---

१ ख. घ. वा वादहि° ।

अथ विनयादवनतशिरसमभिसमीक्ष्योवाच पालकाप्यो महामुनिः—शृणु राजन्गुग्गुलुद्रव्यमनेकगुणसंपन्नममृतोपमं रसायनभूतमित्येषां चिकित्सार्थमुत्पादितं भगवता पशुपतिना। तस्योपयोगमुपदेक्ष्यामः। स्तम्भादौ वातिकेषु विकारेषु तथा बालपाकलमसुप्तमृदुग्रहकुक्कुटमहापाकलोत्कर्णवातानाहविषमेहशिरोरोगहृदयशूलगात्रस्तम्भस्कन्दमूर्छापाण्डुरोगहस्तग्रहवातगतिगुल्माभिषन्न(ण्ण)मूत्रावघानाहमेहोदरशोषिणां कृमिकोष्ठिलीरवसाऽभ्यन्यापदादीनां वातकफादीनां विकाराणामन्येषां च प्रशस्तम्। तत्र प्रशस्तदेशजातमनुपहतवीर्यमचिरस्थितमशुष्कमनिर्दग्धमनन्यद्रव्यसंयुक्तमृत्तिकाङ्गारवर्जितमभिसंवीक्ष्याञ्जनरुचकभृङ्गराजप्रतीकाशं महिषाक्षं चोपकल्प्य पलद्वयात्प्रभृति विंशतिपलिकमरांशं कृत्वा ततस्तं महति कटाहे दृढे कुम्भेष्वा(वा) सूयते गोमूत्रत्रिफलाप्रसन्नामैरेयाणामन्यतमेन द्रव्येण यदि तदिवाकरकिरणसंतप्तं संजातफेनबुद्बुदं भवति, तदा बलवद्भिः पुंभिः कन्यकाभिर्वा दृषदि पेषयित्वाऽञ्जनमिव श्लक्ष्णं ततः सुमनसमभिसमीक्ष्य वारणं प्राक्सूर्योदयाद्वेणुभिः सुपरिगृहीतमारोग्यार्थं तु पूर्वोक्तैरेव द्रव्यैर्यथायोगमवलोक्य पाययेच्छारीरमानसदुःखकोपशोकभयदर्पहर्षैर्विमुक्तं युक्त्या विरिक्तं बुभुक्षितं सुस्थितसर्वाङ्गं गजम्।

अथवा द्विपञ्चमूलत्रिफलाकाथपिष्टं पुनः प्रकाथ्य शीतीभूतं जीर्णाहाराय दद्यात्। क्षीरं प्रतिपानाय दद्यात्। स्वापयेदेकपक्षतः। यवसकवलकुवलजा(या)नां प्रतिषेधः। अथ प्रथमायां मध्याह्नवेलायां यवचतुर्गुणं संयुक्तेन्दुनीलफलहरितेन यवसेन कण्ठशोधनार्थं प्रतिच्छाद्य गोजाविर्माहिषीणां पयः शृतमर्धभागावशिष्टमवतार्य शर्कराचूर्णसंसृष्टं पाययेत्। तेनास्य जीर्णौषधस्य कोष्ठदाहशान्तिर्भवति। ततो जीर्णौषधं वारणमभिज्ञाय पुनः प्रच्छाद्य कवलैः स्वच्छन्दसुखप्रचारं चेनं नदीनदसरःपर्यन्तेषूदकपूर्णेष्ववगाहयेत्। विधानार्थं पुराणषष्टिकानामोदनं मुद्गयूषेण घृतस्निग्धेन सायमेककालं भोजयेत्। शय्याभागोऽस्य खरोष्ट्राणामेकतमेन पुरीषेणाऽऽतपशुष्केण स्वकरीषेण वा शय्याविधिविधानमसंबाधं कुर्यात्।

तत्र श्लोकाः—

एष एव विधिः कार्य आ समाप्तेर्यथाविधि ॥
अन्यथा क्रियते मोहात्ततो व्यापत्तिमर्हसि ॥ १ ॥
दीनो म्लानमुखस्तस्य वेपथुः श्वयथुः क्लमः ॥
कदाचिदुष्णं भजते कदाचिच्छीतमेव च ॥ २ ॥

भवेद्धृत्कर्णसंतापी तृष्णया चातिपीडितः ॥
पुरीषं रक्तसंमृष्टमेकैकं कुरुते ध्रुवम् ॥ ३ ॥
राजद्वेषी भवेच्चास्य रक्तमेहित्वमेव च ॥
रसैश्चतुर्भिः संयुक्तो लवणाम्लविवर्जितः ॥ ४ ॥
तिक्तः कषायो मधुरस्त्रिदोषघ्नः कटुः स्मृतः ॥
माधुर्याच्छमयेद्वायुं कषायत्वाच्च पित्तहा ॥ ५ ॥
तिक्तत्वाच्छ्लेष्मशमनः स्निग्धत्वाद्बलवर्धनः ॥
कटुत्वाद्दीपनो राजन्कृमिघ्नश्चापि कीर्तितः ॥ ६ ॥
*स्नेहः पर्युषितानां च बृंहणार्थं हितः सदा ॥
कर्षणः केवलः शस्तः स्थूलानां मूत्रकृत्ततः[1] ॥ ७ ॥
असकृद्दोषशमनो मङ्गल्यः पुष्टिवर्धनः ॥
पाययेन्मासमेकं तु गुग्गुलुद्रव्यमुत्तमम् ॥ ८ ॥
कायाग्निबलसात्म्यानि वर्ष्म चावेक्ष्य तत्त्ववित् ॥
विधानं स्वच्छवृत्तस्य षडृतून्क्रमशः शृणु ॥ ९ ॥
दीयते निष्परीहारं गजेभ्यः सर्वदा यथा ॥
शस्यते तैलसहितं दद्यान्मद्यानुपानिकम् ॥ १० ॥
क्षीरानुपानिकं राजन्दद्याच्छरदि सर्पिषाम् ॥
हेमन्ते शिशिरे चैव कटुतैलसमाहितम् ॥ ११ ॥
दद्याद्वसन्ते तैलेन सुरायुक्तेन भूपते ॥
ग्रीष्मे घृतसमायुक्तं सिताखण्डानुपानिकम् ॥ १२ ॥
एवं कण्ठविशुद्ध्यर्थं सर्वेष्वृतुषु शस्यते ॥
यस्य दोषस्य शमनं यद्द्रव्यं समुदाहृतम् ॥ १३ ॥
तद्द्रव्ययुक्तो देयो वा तच्छान्त्यै गुग्गुलोर्नृप ॥
वातादौ गुग्गुलोः कुर्यात्तैलव्यापि चिकित्सितम् ॥ १४ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने वृद्धपाठे गुग्गुलुविधिर्नाम विंशोऽध्यायः ॥ २० ॥

---

* ख—घपुस्तकयोस्तु ' स्नेहयु·····तानां ' इत्येवं समुपलभ्यते ।

1 क. मूत्रकृच्छ्रतः ।

अथैकविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
के गुणाः क्षीरदानस्य वारणानां विशेषतः ॥ १ ॥
केभ्यो देयमदेयं वा पयः कतिविधं भवेत् ॥
एवमुक्तोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ २ ॥
मधुरं शीतवीर्यं च विपाके मधुरं पयः ॥
स्निग्धमत्यर्थवृष्यं च तेजोबलविवर्धनम् ॥ ३ ॥
चक्षुष्यं बृंहणीयं च जीवनीयं रसायनम् ॥
कफाग्निवर्धनं चैव प्राणाह्लादरुचिप्रदम् ॥ ४ ॥
जरायुजानां सत्त्वानां जन्मप्रभृति पार्थिव ॥
सात्मीभूतं पयस्तस्मात्पयस्तु श्रेष्ठमुच्यते ॥ ५ ॥
तस्याष्टौ योनयः प्रोक्ताः गौः करेणुर्हया खरी ॥
महिषी करभी चैव च्छगला चाविकेति च ॥ ६ ॥
तत्र गव्यं पयः श्रेष्ठं दन्तिनां नयकोविद ॥
सृष्टमूत्रपुरीषत्वात्प्रष्ठयोनितयाऽपि च ॥ ७ ॥
कारेणवं पयः शीतमत्यर्थं गौरवान्वितम् ॥
कषायानुरसं पथ्यं कलभानां व्यवायि च ॥ ८ ॥
श्लेष्मलं वाडवं बल्यं नातिपित्तहरं स्मृतम् ॥
गार्दभं तु पयोद्रिक्तं कफघ्नं वातकोपनम् ॥ ९ ॥
बहुमूत्रपुरीषं स्यात्पयोऽभिष्यन्दि माहिषम् ॥
कारभं लवणं सोष्णं दीपनं लघु रूक्षकम् ॥ १० ॥
तत्रापि च गुणश्रेष्ठं प्राहुश्छागं पयो बुधाः ॥
अजानामल्पकायत्वात्कटुतिक्तनिषेवणात् ॥ ११ ॥
नात्यम्बुपानाद्व्यायामात्सर्वव्याधिहरं पयः ॥
अल्पस्नेहं तु विज्ञेयं वातघ्नं ह्याविकं पयः ॥ १२ ॥
वृद्धा बालास्तथा भग्नाः श्रान्ता ये चापि दुर्बलाः ॥
विहिताहरणीयैश्च संनिपातेन चापि ये ॥ १३ ॥
रक्तपित्तश्रमात्क्षीणा क्षीणा ये चापि वारणाः ॥
केवलं घृतयुक्तं वा क्षीरं तेभ्यः प्रदापयेत् ॥ १४ ॥

---

१ ख. घ. °योगुणाः ॥ अ° ।

पीतोदकाय च पयो न देयं स्यात्कदाचन ॥
न चातिस्नेहपीताय मद्यपीताय चैव हि ॥ १५ ॥
श्लेष्मरोगाभिभूताय गजायाजीर्णकाय च ॥
तद्धि कुष्ठकिलासानां दद्रुः सपिटकोद्गमाः ॥ १६ ॥
एवंविधानि जनयेत्कण्डूः पालित्यमेव च ॥
पयः कुभाजनगतं पक्वाम्लरसदूषितम् ॥ १७ ॥
शरद्धेमन्तवर्षासु शिशिरे चैव वारणः ॥
पयः पुष्टानसा.........अध्वकर्मसु योजयेत् ॥
भवन्ति सं(मु)हितगदा निरातङ्काश्च वारणाः ॥ १८ ॥
इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने क्षीरदानविधिरध्याय एकविंशः ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
कृतजापमृषिश्रेष्ठं विनयेन कृताञ्जलिः ॥ १ ॥
पृष्टं मे निखिलं किंचिद्व्याकरोतु महातपाः ॥
ग्रीष्मस्य चान्तिमे पक्षे वर्षाणामागमे तथा ॥ २ ॥
दिवसे वाऽपि संपूर्णे आषाढे द्विजसत्तम ॥
ऐरावतसमो यस्तु संभूतः स कथं मुने ॥ ३ ॥
देवता का भवेत्तस्य सुतो वा कस्य सत्तमः ॥
केन वा कारणेनैव मर्त्यलोके महामुने ॥ ४ ॥
वर्षासु सततं वाऽपि पूज्यते च नराधिपैः ॥
एवमुक्तो मुनिश्रेष्ठः प्रोवाचेह जनाधिपम् ॥ ५ ॥
शृणु राजन्कथां दिव्यां पुण्यां प्रव्याहृतां मया ॥
श्रोतुमर्हसि भद्रं ते यथावदिति निश्चितम् ॥ ६ ॥
पुरा कृतयुगे राजन्देवानां दानवैः सह ॥
संग्रामे दारुणे राजन्निवृत्ते तारकामये ॥ ७ ॥
प्रहृष्टमनसः सर्वे देवा वृत्रभृदादयः ॥
दिग्वारणान्पूजयित्वा तत्तत्कामान्महाबलान् ॥ ८ ॥

---

१ क. °ण्डूः खालि° । २ क. °ष्टान्द्रसीकुर्यादुष्णक° । ३ क. घ. संप्लुत° ।

ससृजुः सपदि स्वान्स्वान्पूजयित्वा यथाक्रमम् ॥
अथ रुद्रो महातेजास्त्वैरावणगजं सुतम् ॥ ९ ॥
मेघं नाम महासत्त्वं महावीर्यं महाबलम् ॥
कैलासपर्वताकारं वायुवेगसमं जवे ॥ १० ॥
कुन्देन्दुकुमुदप्रख्यं सर्वव्यञ्जनपूजितम् ॥
शुभलक्षणसंपन्नमसृजत्पुत्रमंष्टमम् ॥ ११ ॥
परितुष्टेन मनसा साक्षाद्भूतपतिर्भवः ॥
उवाच मेघं वरय वरं यन्मनसेप्सितम् ॥ १२ ॥
ब्रवीमि देवतश्रेष्ठ दीयतां मे वरः प्रभो ॥
आषाढ्यां क्रियते पूजा तत्र या देवदानवैः ॥ १३ ॥
यक्षराक्षसगन्धर्वैस्तथा दैत्यैश्च किंनरैः ॥
पिशाचैः पन्नगैश्चापि सर्वैर्भूतैः समानुषैः ॥ १४ ॥
यथोत्साहातिशयान्नित्यं लिङ्गस्य तेजसा ॥
मम या हि महारुद्र तुभ्यं पूजां समाप्नुयात् ॥ १५ ॥
एवमुक्तस्तु भगवान्प्रोवाचेदं गजोत्तमम् ॥
एवमेव हि दिङ्नाग सर्वं ते च भविष्यति ॥ १६ ॥
श्रीगजो नाम विख्यातस्त्विह लोके भविष्यति ॥
अर्चयिष्यन्ति ते सर्वे नराः संभूय सर्वशः ॥ १७ ॥
इत्युत्पत्तिः समाख्याता श्रीगजस्य महात्मनः ॥
तेनैषा क्रियते पूजा द्विरदानां तु नित्यशः ॥ १८ ॥
इम(द)मन्यत्प्रवक्ष्यामि कल्पमस्य नराधिप ॥
चतुर्णां क्षीरवृक्षाणां द्रव्यमन्यतमं बुधैः ॥ १९ ॥
उपोष्य ग्राहयेद्वैद्यो बलिं होमं च कारयेत् ॥
पुण्याहघोषेण ततः स्वस्ति वाच्य द्विजोत्तमान् ॥ २० ॥
पञ्चारत्निप्रमाणं स्यादग्रन्थिकमकोटरम् ॥
श्लक्ष्णं चैवानुपूर्वं च साधुतक्षाववर्तितम् ॥ २१ ॥
आयामात्तस्य च भवेत्कर्णिका वा दशाङ्गुला ॥
विंशत्यङ्गुलमानाद्दात्कार्या स्यात्सुसमाहिता ॥ २२ ॥

---

१ क. °णसुतं गजम् । २ क. महावीर्यं महासत्त्वं महाबलम् । ३ क. °वाचेदं च वरय व° । ४ क. सदा ।

वला गवाक्षबलिनमग्निव्यञ्जनकं तथा ॥
विदलं याज्ञिकं भाण्डं तथैवाशनकण्टकम् ॥ २३ ॥
सचन्दनाश्च कलशाश्चतस्रोदककुम्भिकाः ॥
सामान्ययज्ञवत्सर्वं शेषं द्रव्यमुपाहरेत् ॥ २४ ॥
ततो वैद्यः शुचिर्भूत्वा नमस्कृत्य महेश्वरम् ॥
सनत्कुमारं देवं च श्रीगजं च महाबलम् ॥ २५ ॥
सर्वान्देवान्नमस्कृत्य दिशश्चाष्टौ समाहितः ॥
सर्वानृषिगणांश्चैव तथा नक्षत्रमण्डलम् ॥ २६ ॥
समुद्रानापगाः सर्वाः समहोरगराक्षसाः ॥
पर्वतान्सर्वभूतानि जङ्गमाजङ्गमं च यत् ॥ २७ ॥
ऐरावताद्याश्च तथा विरूपाता ये दिशां गजाः ॥
उपोष्य संविशेद्रात्रौ वासोभिरहतैर्भिषक् ॥ २८ ॥
सेनान्यं च नमस्कृत्य शुचिर्भूत्वा कृताञ्जलिः ॥
कुशास्तरणसंवीते स्थण्डिले प्रयतः शुचिः ॥ २९ ॥
श्वोभूते पुनरुत्थाय स्नातो भूत्वा समाहितः ॥
तथोक्त्वाऽथ गजेन्द्रस्य नमस्कृत्याभिरोहयेत् ॥ ३० ॥
सच्छत्रवालव्यजनमाल्यदामोपशोभितम् ॥
नन्दितूर्येण महता वाद्यमानेन शोभितम् ॥ ३१ ॥
(*सालंकरणकेयूरहेमजालविभूषितम्) ॥
नानाकारैस्तथा वस्त्रैः समन्तात्परिवेष्टितम् ॥ ३२ ॥
चन्दनागुरुमिश्रैश्च सर्वगन्धैरलंकृतम् ॥
स्त्रीरूपवेषैः पुरुषैः परिचर्योपशोभितम् ॥ ३३ ॥
जल्पद्भिर्निष्ठुरं वाक्यं प्रहसद्भिस्तथैव च ॥
चतुष्पथे वीथिमार्गे चत्वरेषु त्रिकेषु च ॥ ३४ ॥
राजमार्गेषु च भृशं घोषयन्तस्ततस्ततः ॥
त्वयि तुष्यन्ति(?) ते देवा राजानोऽपि जयैषिणः ॥ ३५ ॥
सेनापतिरमात्याश्च ये चान्ये तद्विधा जनाः ॥
पूजयन्ति यथान्यायं ये चैव गजजीविनः ॥ ३६ ॥

---

* कपुस्तके त्रुटितोऽयं पाठः ।

---

१ क. °होदररा° ।

अतोऽन्यथा प्रकुर्वाणाः सराष्ट्रबलवाहनाः ॥
राजानोऽपि विनश्यन्ति देवतातिक्रमेण वै ॥ ३७ ॥
प्रयुञ्जते च ये तस्मै सम्यक्पूजां नराधिप ॥
सपुत्रदारा वर्धन्ते सराष्ट्रबलवाहनाः ॥ ३८ ॥
आज्ञां महेश्वरस्येमां प्रतिगृह्णन्ति ये नृपाः ॥
संग्रामे समभ्यन्ते ते भवन्ति विदारणाः ॥ ३९ ॥
काले बीजानि रोहन्ति सम्यग्वर्षति वासवः ॥
न भवत्यत्र मरको व्याधिहानिस्तथैव च ॥ ४० ॥
निरामयं च भुञ्जीत राज्ञा कृत्स्ना वसुंधरा ॥
रत्नाकरवती देवी सशैलवनकानना ॥ ४१ ॥
अरोगा बलवन्तश्च जयन्त्येते मतङ्गजाः ॥
गजोपजीविनः सर्वे कामभोगैः समन्विताः ॥ ४२ ॥
पुत्रैश्च पशुभिश्चैव जीवन्ति च शतं समाः ॥
अरोगा बलवन्तश्च जायन्ते वै प्रजा भृशम् ॥ ४३ ॥
पुत्रार्थी लभते पुत्रान्धनार्थी लभते धनम् ॥
यांश्च प्रार्थयते कामान्सर्वांस्तान्प्राप्नुयान्नरः ॥ ४४ ॥
एवं वृत्तं महाराज शंभोर्भक्त्याऽन्वितं विभो ॥
श्रीगजस्य प्रतिकृतं त्रिषु लोकेषु पूजितम् ॥ ४५ ॥
मयाऽऽख्याता महाबाहो विस्तरेण यथाक्रमम् ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने परिवारचतुर्थस्थाने द्वाविंशः श्रीगजसंभवाध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
सर्वं द्रव्यगतं प्रश्नं क्रमेण मुनिसत्तमः(म्) ॥ १ ॥
सर्पिस्तैलं वसा मज्जा क्षीरं मूत्रं तथा दधि ॥
किमर्थं दीयते विप्र क्षौद्रं किमिति दीयते ॥ २ ॥
लवणोदकतैलं वा मेदकं वा सुसंस्कृतम् ॥
किमर्थं भोजनं वाऽपि किमर्थं वाऽनुवास्यते ॥ ३ ॥

किमर्थं सर्वसेकश्च शिरोभ्यङ्गस्तथैव च ॥
गैरिकेण समायुक्तः ससेकश्चापि कं पुनः ॥ ४ ॥
गात्रसेकः किमर्थं च किमर्थं तैलशोधनम् ॥
तथा तैलकषाये वा किमर्थं दीयते पुनः ॥ ५ ॥
दीपतैलं किमर्थं वा किमर्थं रसभोजनम् ॥
एतन्मे सर्वमाचक्ष्व यथावदनुपूर्वशः ॥ ६ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शृणु सर्वं महाराज यदर्थं दीयते घृतम् ॥ ७ ॥
*स्तंज्य(?)गात्रपरो[1] ये च (†ये च पर्यश्रुलोचनाः ॥
क्षीणशोणितमांसाश्च स्तब्धाङ्गाश्चापि ये गजाः ॥ ८ ॥
कर्मभिर्विहता ये च) भारैर्गुरुभिरर्दिताः ॥
मदक्षीणाश्च ये नागा वृद्धा रूक्षास्तथैव च ॥ ९ ॥
ये कृशाश्चावसन्नाश्च लुप्ताङ्गाश्च विशेषतः ॥
युद्धाध्वगमने क्लिष्टा ये च नागा महीपते ॥ १० ॥
व्याधिभिः प्रतिपन्नाश्च नागा ये चापि दुर्बलाः ॥
घृतं तेभ्यः प्रदातव्यं व्याधिता ये च पित्तलाः ॥ ११ ॥
घृतं हि मधुरं शीतं मेदःश्लेष्मविवर्धनम् ॥
सृष्टमूत्रपुरीषं च बृंहणं बलवर्धनम् ॥ १२ ॥
ये च वातप्रकोपेन(ण) श्लेष्मणा च मतङ्गजाः ॥
उपसृष्टा महाराज तेभ्यस्तैलं प्रदापयेत् ॥ १३ ॥
उष्णाभितापि कटुकं त्वच्यं बलविवर्धनम् ॥
पित्तलं च तथा तैलं कफानिलनिबर्हणम् ॥ १४ ॥
यस्तु कर्माभिनीतस्य धेनुकासु च निःसृतः ॥
मदक्षीणस्तथा स्रचो(?) वयसा चापि विच्युतः ॥ १५ ॥
तस्मै मज्जा प्रदातव्या महाराज वसाऽपि च ॥
पृथक्प्राह स योगैश्च ततः संपद्यते सुखम् ॥ १६ ॥
मधुरश्चोष्णवीर्यश्च विपाके कटुकः स्मृतः ॥
सर्वैरेतैर्गुणैर्युक्तो ज्ञेयो मज्जा वसाऽपि च ॥ १७ ॥

---

* 'स्तब्धः' इति भवेत् । † धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

---

१ क. स्रज्यगात्र° । २ क. °राऽग्रे च ।

एतदर्थं भवेदेषां वसा मज्जा च दन्तिनाम् ॥
स्नेहश्चतुर्विधो ज्ञेयो बलार्थं दीयते पुनः ॥ १८ ॥
उपस्थाने च संपाते वर्तमाने च बन्धने ॥
परस्परविमर्दे च कर्मणा चातिपीडिते ॥ १९ ॥
अध्वनोल्लङ्घनाद्वाऽपि गात्राणां विचयेन वा ॥
अवपातेन बन्धैर्वा दूरं वाऽऽसन्नवर्तनात् ॥ २० ॥
विश्लिष्टं मारुताद्भग्नं भग्नं यस्य च विच्युतम् ॥
पानार्थं प्रोच्यते तस्मै युक्तं स्नेहं चतुर्विधैः ॥ २१ ॥
यो हि सर्वाङ्गरोगी स्यादुरुपक्षहतोऽपि वा ॥
सर्वस्नेहसमायुक्तो महास्नेहः प्रशस्यते ॥ २२ ॥
इति स्नेहगुणाः प्रोक्ताः क्षीरस्यापि गुणाञ्शृणु ॥
अपृ(प)सृष्टा मदक्षीणा वयोतिताः क्षताश्च ये ॥ २३ ॥
कर्मप्रवद्धा मत्ताश्च दुर्बलाभिहि(ह)ताश्च ये ॥
दग्धाश्च कवलैस्तीक्ष्णैः शोणितोपहताश्च ये ॥ २४ ॥
पित्तोपसृष्टाश्च गजास्तेभ्यः क्षीरं प्रदापयेत् ॥
शमयत्यजि(ति)तापं च दीप्ताग्निश्चोपजायते ॥ २५ ॥
सम्यग्वातं च जयति च्छविश्चास्य प्रसीदति ॥
जीवनं बृंहणं हृद्यं सात्म्यं बलविवर्धनम् ॥ २६ ॥
मधुरं शीतवीर्यं च तेजःसामर्थ्यवर्धनम् ॥
आरोग्यजननं चैव तस्मात्क्षीरं प्रदापयेत् ॥ २७ ॥
क्षीरस्यैते गुणाः प्रोक्ता मूत्रस्यापि गुणाञ्शृणु ॥
दद्रूं कण्डूं(?) च उष्णं च जायन्ते यस्य दन्तिनः ॥ २८ ॥
मृत्तिकाबद्धकोष्ठाश्च श्लैष्मिकाश्च मतङ्गजाः ॥
कृमिकोष्ठातुरा ये च तेषां मूत्रं सदा हितम् ॥ २९ ॥
वातघ्नं चोष्णवीर्यं च तिक्तं क्षारान्वितं तथा ॥
प्रभिन्नवर्चः कटुकं विपाके मूत्रमुच्यते ॥ ३० ॥
मूत्रस्यैते गुणाः प्रोक्ताः शृणु मद्यगुणांश्च नः ॥
मारुतोपहतो यश्च यश्च वाऽऽध्मायतेऽधिकम् ॥ ३१ ॥
मूत्रसङ्गातुरो यश्च यश्च खादति मृत्तिकाम् ॥
अध्वनाऽपि च युक्तो यः कर्मणा यश्च पीडितः ॥ ३२ ॥

---

१ क. अधुना°।

स्वच्छवृत्तस्य नागस्य प्रतिपानं सदा हितम् ॥
तेभ्यो देया सुरा नित्यं संस्कृताऽसंस्कृता भवेत् ॥ ३३ ॥
तथा वातानुलोम्यं च दीप्ताग्निश्चोपजायते ॥
श्रमश्च व्यपगच्छेत्तं मनस्वी चोपजायते ॥ ३४ ॥
उष्णवीर्या च तीक्ष्णा च विपाकेऽम्ला स्वभावतः ॥
कथयन्ति सुराज्ञास्तां केचित्पञ्चरसान्विताम् ॥ ३५ ॥
तस्मान्नित्यं सुरा देया वारणेभ्यश्चिकित्सकैः ॥
येषां श्लेष्मा च पित्तं च मारुतश्चापि कुप्यति ॥ ३६ ॥
पूर्वोक्तेन प्रमाणेन दधि तेभ्यः प्रदापयेत् ॥
अम्लं चैवाम्लपाकं च विपाके गुरु वोच्यते ॥ ३७ ॥
कफयोनेस्तथा क्लेदे पित्तयोनेस्तथैव च ॥
छर्द्याति(?)वातिसारेषु विषदुष्टेषु हस्तिषु ॥ ३८ ॥
कफमांसप्रवृद्धेषु दापयेत्संततं मधु ॥
(† कर्शनं शीतवीर्यं च रूक्षं गुरु लघु स्मृतम् ॥ ३९ ॥
शोधनं लेखनं चैव कफपित्तहरं मधु ॥)
सर्वौषधिसमायुक्तं कषायं शीतलं तथा ॥ ४० ॥
श्लक्ष्णं सुगन्धि स्निग्धं च सद्यः प्राणविवर्धनम् ॥
मधुरं जीवनं चैव वृष्यं बलकरं तथा ॥ ४१ ॥
विपाककटुकं चैव संधानं कृमिनाशनम् ॥
अचिन्त्यवीर्यं गुणतः सर्वरोगप्रणाशनम् ॥ ४२ ॥
प्रशस्तमृषिभिर्नित्यं गुणैरेतैर्युतं मधु ॥
*व्रणं शोधयेत्कायं मारुतं चानुलोमयेत् ॥ ५३ ॥
दीप्ताग्निश्च भवेन्नागः सुमनाश्चैव जायते ॥
वातमूत्रपुरीषं च यथाकालं प्रमुञ्चति ॥ ४४ ॥
आमं विपच्यते वाऽस्य छविश्चास्य प्रसादयेत् ॥
हृद्रोगो न भवेत्तस्य मृत्तिकां च न खादति ॥ ४५ ॥
आध्माति न च मातङ्गो घनं लिण्डं च मुञ्चति ॥
अतिदानेऽपि राजेन्द्र रक्तपित्तं प्रकुप्यति ॥ ४६ ॥

* इतः पूर्वम्—'सम्यग्वातं च जयति च्छविश्चास्य प्रसीदति ॥ जीवनं बृंहणं हृद्यम्' इत्यधिकं कपुस्तके । † धनुराकारमध्यस्थः पाठो नास्ति कपुस्तके ।

विलोलं चैव यवसं तस्य कोपे न खादति ॥
अतिसार्यति सोऽत्यर्थं मूर्छा चास्योपजायते ॥ ४७ ॥
अतिदाने त्विमे दोषा निदानं चापि मे शृणु ॥
विजृम्भते विनमति स्तब्धश्चैवावतिष्ठति(ते) ॥ ४८ ॥
मुहुर्मुहुर्निश्वस(सि)ति जघनेन निषीदति ॥
प्रमेलयेत्स्तम्भंगतो यवसं नाभिनन्दति ॥ ४९ ॥
भवत्यग्निविहीनश्च यवसं नाभिपच्यते ॥
तस्माद्यथाप्रमाणं तु लवणं संप्रदापयेत् ॥ ५० ॥
अदानमतिदानं च न कदाचित्समाचरेत् ॥
वातघ्नं चोष्णवीर्यं च पित्तलं कर्षणं तथा ॥ ५१ ॥
श्लेष्मकृमिहरं चैव लवणं प्रोच्यते बुधैः ॥
आमाशयसमुत्थेषु महारोगेषु साधनम् ॥ ५२ ॥
कीर्तयिष्याम्यहं वर्गं वातश्लेष्मनिबर्हणम् ॥
बलां मधुरसां चैव मूर्वां तेजोवतीमपि ॥ ५३ ॥
पूतिकं सर्षपा हिङ्गु गण्डीरं जीवकं तथा ॥
हरीतकीविडङ्गानि करजं सारिवामपि ॥ ५४ ॥
पिचुमन्दं हरिद्रे द्वे पञ्चभिर्लवणैः सह ॥
कृत्वा सूक्ष्माणि चूर्णानि बदरामलकैः सह ॥ ५५ ॥
चतुर्गुणं पुनर्दद्यात्सामुद्रलवणं भिषक् ॥
द्रव्याणामर्धपलिकान्भागान्कुर्याद्विचक्षणः ॥ ५६ ॥
अभिषाणास्तथा वद्धा गजा ये पिष्ठमेहिनः ॥
मृत्तिकाविहि(ह)ताश्चैव कृमिकोष्ठास्तथैव च ॥ ५७ ॥
हृद्रोगी गुल्मिता ये च श्लेष्मानिलहताश्च ये ॥
वातमूर्छार्दिता ये च गजा रोगार्दिताश्च ये ॥ ५८ ॥
एवं तेभ्यः प्रदातव्यं सुरया गोमयेन वा ॥
कायाग्निबलमाधत्ते व्याधीनां च निबर्हणम् ॥ ५९ ॥
इत्यर्थमेतत्कटुकं लवणं दीयते पुनः ॥
दकतैलस्य सामर्थ्यं निबोध मनुजाधिप ॥
निमित्तं दकतैलेन सदा कुप्यन्ति दन्तिनः ॥ ६० ॥

इति कटुकलवणसंज्ञिकयोगा हस्तिनां चतुर्विंशतिद्रव्यकर्मसामान्यतो व्याधीनां निबर्हणे विशेषेण यथोक्तानां चैत्ययोगस्य व्याख्यानम् ।

मुखशोषः श्रमस्तृष्णा मूर्छा वाऽस्योपशाम्यति ॥
प्रसन्नतनुरोमाणि बृहत्कायश्च जायते ॥ ६१ ॥
क्षीणशोणितमांसेभ्यो मत्तेभ्यश्च विशेषतः ॥
कर्मभिः पीडितेभ्यश्च मेदकान्दापयेद्भिषक् ॥ ६२ ॥
प्रस्विन्नं चैव कुल्माषं घृतं किण्वं गुडं तथा ॥
भोजयेत्सर्वमालोड्य वारणं मदवृद्धये ॥ ६३ ॥
गोधूमानथ सुस्विन्नान्घृतं किण्वं तथैव च ॥
भोजयेल्लवणीकृत्य द्वितीयो मेदकः स्मृतः ॥ ६४ ॥
प्रसृष्टवर्चो मधुराः सगोधूमा यवाः स्मृताः ॥
विपाकमधुराश्चैव वातपित्तनिबर्हणाः ॥ ६५ ॥
कषायतिक्ताश्च रसा गुरवश्च प्रकीर्तिताः ॥
गोधूमाः स्निग्धमधुरा वातघ्नास्तु यवैः सह ॥ ६६ ॥
यवास्तु पथ्या विज्ञेया नातिशुक्रबलप्रदाः ॥
यस्माद्बलं वर्धयते मांसं मेदोऽस्थिशोणितं ॥ ६७ ॥
तस्मान्मेदक इत्युक्तो भोजने च—ते विधिः[2] ॥
यश्च कर्मप्रवृद्धस्तु मदक्षीणश्च वारणः ॥ ६८ ॥
धेनुकासु च यः क्षीणो यः कृशो दुर्बलश्च यः ॥
स्वस्थवृत्ते च नागस्य भोजनं पूज्यते सदा ॥ ६९ ॥
आहारो धारयेत्प्राणान्प्रीणयेदिन्द्रियाणि च ॥
तस्मात्स्नेहसमायुक्तं युक्त्या च लवणीकृतम् ॥ ७० ॥
भोजनं भोजयेन्नागं रसयुक्तिसमन्वितम् ॥
सुगन्धिरम्लः स्निग्धश्च सद्यः प्राणविवर्धनः ॥ ७१ ॥
वाराहः कुक्कुटो वाऽपि ऐणेयो वा रसो हितः ॥
भक्तस्तैलार्धयुक्तेन कृमिकोष्ठी न जायते ॥ ७२ ॥
हृदयं न च लिप्येत मृत्तिकां च न खादति ॥
शिरोरोगाक्षिरोगेषु हस्तकर्णग्रहे भ्रमे ॥ ७३ ॥
युक्त्या स्नेहानुपानं च दद्याद्भक्तवतः सदा ॥
ग्रीवायामा(मं)सयोश्चाऽपि शिरसः स्रोतसोरपि ॥ ७४ ॥
भवेदुत्तरपानेन बलवानिन्द्रियेषु च ॥
गात्रापरविकारेषु धेनुकासु च निःश्रु(स्रु)तः ॥ ७५ ॥

१ क. °पाके म° । २ क. °ने चोच्यते वि° ।

पार्श्वपृष्ठकटिस्तम्भे वध्यावस्यावपीडनम् ॥
विषमं वा प्रभिन्नस्य व्यवस्थितमदस्य च ॥ ७६ ॥
घृतमण्डेन नागस्य छिद्रप्रक्षालनं हितम् ॥
धेनुकासु प्रसक्तेन मूत्रं यस्य सवेदनम् ॥ ७७ ॥
रक्तं च सहसा यस्य मेढ्रादच्छं प्रवर्तते ॥
मूत्रकृच्छ्रप्रमेहेषु वातगुल्मे तथैव च ॥ ७८ ॥
दद्यात्तस्योत्तरं बस्तिघृतेनैव चिकित्सकः ॥
अष्टादशाङ्गुलं चास्य नेत्रं ताम्रायसं भवेत् ॥ ७९ ॥
कोरण्टपुष्पवृन्ताग्रं प्रवेशे चतुरङ्गुलम् ॥
स्नेहेष्वेतेषु सर्वेषु दधि क्षौद्रं पयस्तथा ॥ ८० ॥
विमृश्य कुशलो वैद्यो भेषजानि प्रदापयेत् ॥
सर्वसेके तु सामर्थ्यं निबोध मनुजाधिप ॥ ८१ ॥
प्रसादयति रोमाणि शीतं चैव न बाधते ॥
वधबन्धसमुत्थाना ये व्रणास्तस्य हस्तिनः ॥ ८२ ॥
आगन्तवो वा दृश्यन्ते शरीरस्था महीपते ॥
ते मृदुत्वं प्रपद्यन्ते श्वयथुश्चास्य शाम्यति ॥ ८३ ॥
हन्युस्ते च कषांस्तस्य सर्वसेकेन दन्तिनः ॥
हेमन्ते सर्वसेकस्तु भवेद्गैरिकसंयुतः ॥ ८४ ॥
तदाऽस्य द्विगुणं योगं तिलतैलेन कारयेत् ॥
खरत्वं गात्ररोगस्तु सर्वसेकेन शाम्यति ॥ ८५ ॥
मृदुत्वं जायते चास्य शिरास्नाय्वस्थिमर्मणाम्[1] ॥
ततः किण्वगुडं माषाँल्लवणं गैरिकं तथा ॥ ८६ ॥
अतसीचूर्णभागं च संभृतं स्थापयेत्त्र्यहम् ॥
प्रत्युद्गतं स्थानगतं पूर्वाह्णे सेचयेद्गजम् ॥ ८७ ॥
तेन सेकस्त्रिरात्रं स्यात्ततस्तं परिकर्षयेत् ॥
पौषे प्रथमतः सिञ्चेन्माघे सिञ्चेदनन्तरम् ॥ ८८ ॥
फाल्गुने सिद्धतैलेन चैत्रे पङ्कं समुद्धरेत् ॥
एतेन क्रमयोगेण च्छविर्नागस्य जायते ॥ ८९ ॥
शीतमुष्णं च सहते मृदुगात्रश्च जायते ॥
गात्रसेके च सामर्थ्यं निबोध मनुजाधिप ॥ ९० ॥

---

१ क. शिरःस्ना° ।

स्थाने सततबद्धानां प्रयुक्तानां तथाऽध्वनः ॥
उष्णशीते तथा वाते सङ्गं संजायते भृशम् ॥ ९१ ॥
व्यूहेनेवोपनीतेन वेष्टिते चालिते तथा ॥
स्नेहेन त्रिवृतेनैव तेषामभ्यङ्ग (?) दृष्यते ॥ ९२ ॥
मार्दवं चैव गात्राणां क्षिप्रं भवति पार्थिव ॥
शिरोभ्यङ्गाच मातङ्गश्चक्षुषा साधु पश्यति ॥ ९३ ॥
शब्दं च सम्यग्जानीते व्रणश्चास्य न जायते ॥
अभिघातश्च नश्येत्तु क्षतं क्षिप्रं प्ररोहति ॥ ९४ ॥
केशाः शिरसि जायन्ते वायुः श्लेष्मा च नश्यति ॥
उत्कृष्टक्षयभागेषु जायते दन्तिनां व्रणः ॥ ९५ ॥
अनास्तीर्णासु शय्यासु म्रक्षणं तस्य दापयेत् ॥
तस्य तैलकषायं च देयं प्रक्षालनं क्षते ॥ ९६ ॥
त्रिफलाचूर्णसंयुक्तं स्थानं नित्यं चिकित्सकैः ॥
न श्र(स्र)वन्ति न भिद्यन्ते न क्षीयन्ते स्फुटन्ति च ॥ ९७ ॥
दुष्टास्तैलकषायेण प्रयोगेषु स्थिरास्तलाः ॥
सुखमाक्रमते भूमिं समेषु विषमेषु च ॥ ९८ ॥
अध्वनो गमने नित्यं छविश्चास्य न हीयते ॥
दीपतैलं यदर्थं तु दीयते शृणु तच्च मे ॥ ९९ ॥
शय्यायां तु स दृष्टायां सुखं स्वपिति वारणः ॥
आलानबन्धमोक्षाश्च दृश्यन्ते निशि सर्वतः ॥ १०० ॥
एते दीपेन शाम्यन्ति तस्माद्दीपं प्रदापयेत् ॥
श्रोतःशुद्धिं च शोभां च बलं पुष्टिं तथैव च ॥
निवृत्तिं चक्षुषश्चापि सदा कुर्याद्घृताञ्जनम् ॥ १०१ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने परिवारचतुर्थस्थाने किमर्थकीनामाध्यायस्त्रयोविंशः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
आनुपूर्वेण नागानां यदा स्नेहः प्रदीयते ॥ १ ॥

कथं स्निग्धं विजानीयादस्निग्धं वा मतङ्गजम् ॥
अतिस्निग्धं कथं विद्याद्वितं ब्रूहि तु मे विभो ॥ २ ॥
यदा तु नागः स्निह्येत अरोगो यदि वाऽऽतुरः ॥
स्वेदनैर्विविधैः स्निग्धैर्भिषग्भिः शास्त्रनिश्चितैः ॥ ३ ॥
मुनिः स्विन्नस्य नागस्य लक्षणं वक्तुमर्हति ॥
कथं विरिक्तं जानीयाद्दुर्विरिक्तं च वारणम् ॥ ४ ॥
सम्यङ्निरूहितं चापि तथा चाप्यनिरूहितम् ॥
एतद्वेदितुमिच्छामि भगवन्संशयो हि मे ॥ ५ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
यदा भिन्नपुरीषः स्यादनुलोमश्च मारुतः ॥ ६ ॥
सस्नेहं च पुरीषं स्यात्तदा स्निग्धं प्रचक्षते ॥
पुरीषमल्पं कठिनं भुक्तं चास्य प्रजीर्यते ॥ ७ ॥
अस्निग्धमेवं जानीयादथ हृष्टेन मानसे ॥
यस्य गात्राणि सीदन्ति शकृद्भिन्नं च मुञ्चति ॥ ८ ॥
संलिप्तहृदयश्चैव यवसं नाभिनन्दति ॥
परिशुष्कमुखो दीनः पानीये कुरुते मतिम् ॥ ९ ॥
इत्येतैर्लक्षणैर्विद्यादतिस्निग्धं मतङ्गजम् ॥
मृदुगात्रो यदा नागः सविवर्णच्छविर्भवेत् ॥ १० ॥
स्विद्यमानस्त्वगातापी (?) स्वच्छगात्रश्च जायते ॥
लक्षणैरेवमेतैस्तु स्विद्यमानमनेकपम् ॥ ११ ॥
सुस्विन्नमिति जानीयाद्दीप्ताग्निमनुपद्रवम् ॥
यदा तु स्विद्यमानस्य स्विन्नस्य तु यथाबलम् ॥ १२ ॥
अतिस्वेदं प्रयुञ्जीत अज्ञानादल्पमेधसः ॥
अतिस्विन्नस्य नागस्य अक्ष्णोरश्रु प्रवर्तते ॥ १३ ॥
वेपथुस्तृषा च दाहश्च मूर्छा चास्योपजायते ॥
परिशुष्कमुखो दीनो न शय्यामभिनन्दति ॥ १४ ॥
गात्रेण गात्रं * संघृष्य (?) न च तिष्ठति वारणः ॥
पांशुप्रमाथं सलिलमवगाहं च काङ्क्षति ॥ १५ ॥
अतिस्विन्नस्य नागस्य लक्षणं समुदाहृतम् ॥
स्विन्नस्य तु यथाव्याधिः प्रशान्तिमुपगच्छति ॥ १६ ॥

---

* 'संघृष्य' इति भवेत् ।

सम्यक्स्विन्नविपर्यासे दुःस्विन्नमिति निर्दिशेत् ॥
अतिरिक्तविरिक्ते च दुर्विरिक्ते च वारणः ॥ १७ ॥
लक्षणं वक्ष्यते राजंस्तन्निबोध यथातथम् ॥
वातमूत्रे प्रचलतः करीषं चातिवर्तते ॥ १८ ॥
दोषाः सह करीषेण प्रच्यवन्ते नराधिप ॥
पश्चाच्छ्लेष्मैव शुद्धस्तु अतिरिक्तस्य लक्षणम् ॥ १९ ॥
शूलं पार्श्वे सहृदये स्थाने न लभते सुखम् ॥
दृश्यतेऽत्र करीषस्य चन्द्रकाण्यसृजोक्षितम् ॥ २० ॥
दुर्बलो दुर्मनाः क्षामः परिशुष्कमुखो भृशम् ॥
अतियोगे विरिक्तं तु विद्यादेभिः सुलक्षणैः ॥ २१ ॥
अल्पदोषस्य महती मात्रा यस्य प्रदीयते ॥
सा तस्य दोषं निर्हृत्य परिताप्य यथाशयम् ॥ २२ ॥
अथवा जीवमादत्ते वारणस्य महीपते ॥
इत्येतल्लक्षणं विद्यादतिरिक्तस्य लक्षणम् ॥ २३ ॥
दुर्विरिक्ते गजे सिद्धिं प्रवक्ष्यामि महीपते ॥
शीतमस्मै तु कवलं दद्यान्नागाय योगवित् ॥ २४ ॥
सुखोदकेन पानार्थे परिषेकं च दापयेत् ॥
भोजनादिविधिं कुर्यादानाहेषु यथास्मृतम् ॥ २५ ॥
अस्निग्धस्य तु नागस्य चिकित्सां शृणु पार्थिव ॥
स्नेहपाने यथा प्रोक्तो विधिः स्नेहं समाचरेत् ॥ २६ ॥
अस्विन्नस्य तु नागस्य चिकित्सा तत्प्रवक्ष्यते ॥
यदुक्तं पित्तमूर्छायां तत्पूर्वं संप्रदी(दा)पयेत् ॥ २७ ॥
अस्विन्ने च यथायोगं पुनः स्वेदं समाचरेत् ॥
सम्यग्घीनातिरिक्तानां निरूहाणां महीपते ॥
बस्तिसिद्धौ विधिः कृत्स्नो निखिलेषु प्रकीर्तितः ॥ २८ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने चतुर्थस्थाने परिचारकहेतुज्ञानं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

---

१ क. सांप्रतम्। २ क. °दीयते ॥ २७ ॥

अथ पञ्चविंशोऽध्यायः ।

चम्पायां हस्तिशालायां शिष्यैः परिवृत्तं मुनिम् ॥
पालकाप्यमुवाचाङ्गः प्रणम्य प्राञ्जलिर्नृपः ॥ १ ॥
बहिः प्राणा हि पच्यन्ते दन्तवेष्टेषु दन्तिनाम् ॥
गजा हया नराश्चैव सर्वेऽथ मृगपक्षिणः ॥ २ ॥
आधारो हि महाब्रह्मञ्शरीरस्य हि धारणात् ॥
तस्योपयोगात्सर्वेषां प्राणो वर्धति (?) देहिनाम् ॥ ३ ॥
तत्र तावद्गजानां मे संशयं वक्तुमर्हसि ॥
बलेष्वभ्यधिका नागास्तेष्वायत्तो जयो हि मे ॥ ४ ॥
न तेषां विहितं किंचिद्गजानां यद्धितं भवेत् ॥
कस्मिन्नृतौ वा किं देयं किं मात्रं कीदृशं च यत् ॥ ५ ॥
पल्लवं कुम्पलं बल्यः सर्वं चापि कुडङ्गरम् ॥
आदत्ते यवसं चैव विस्तरेण ब्रवीहि मे ॥ ६ ॥
ततः प्रोवाच भगवानङ्गाय परिपृच्छते ॥
यवसानि विचित्राणि कुम्पलं पल्लवानि च ॥ ७ ॥
आग्नेयं तु तथा सौम्यं द्विविधं यवसं स्मृतम् ॥
उदकं स्थलजं चापि द्विविधं जाङ्गलं च यत् ॥ ८ ॥
द्विविधश्च विपाकोऽस्य मधुरः कटुकस्तथा ॥
सौम्यं च मधुरं विद्यादाग्नेयं कटुकं भवेत् ॥ ९ ॥
आहारं त्रिविधं विद्याद्गजेषु मनुजाधिप ॥
भक्ष्यं भोज्यं च पेयं च रसैः षड्भिः पृथक्पृथक् ॥ १० ॥
मधुराम्लकटुस्तिक्तः कषायो लवणस्तथा ॥
कफमारुतपित्तानां रसेष्वेतान्[1]········ ॥ ११ ॥
[2]······द्विविधं चैतद्विहितं सर्वमेव तत् ॥
तेषां विभागः प्रोक्तस्ते शरीरविचये मया ॥ १२ ॥
तत्र तु त्रिविधो देशो ज्ञेयस्त्रिविधलक्षणः ॥
अनूपो जाङ्गलश्चैव तथा साधारणोऽपि च ॥ १३ ॥
बहुगुल्मलतावंशशैलो व[3]···तृणोदकः ॥
बहुानक्षोभतो यस्तु अनूप इति स स्मृतः ॥ १४ ॥

१ क. °तान्विनिर्दिशेत् ॥ ११ ॥ २ क. क्षणं द्वि° । ३ क. बहुतृ° ।

तत्राध्वन्या महास्थूला मृदुमांसा महोदराः ॥
बहुवातकफाश्चैव अल्पपित्ताश्च वारणाः ॥ १५ ॥
ह्रस्वखण्ड(*तृणप्रायो अल्पतृणनगद्रुमः ॥
पर्याकाशसमश्चैव स देशो जाङ्गलो मतः ॥ १६ ॥
तत्र क्लेशसहाः शूराः कठिनाङ्गाः स्थिरेक्षणाः ॥
ह्रस्वखण्ड)विषाणाश्च वारणा मनुजाधिप ॥ १७ ॥
वातपित्तप्रकोपाश्च भवन्त्यल्पकफा गजाः ॥
एवमालोक्य देशं तु ततः कुर्यात्क्रियापथम् ॥
गजानामौषधं नित्यं यथादेशविभागतः ॥ १८ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने चतुर्थस्थाने
त्रिविधिनामाऽध्यायः पञ्चविंशः ॥ २५ ॥

अथ षड्विंशोऽध्यायः ।

अथ रोमपादोऽङ्गराजो भगवन्तं पालकाप्यमभिवाद्याभिगम्य पप्रच्छ 'भगवन्दम्यमानानां नागानां स्थानमुपपन्नानामतिकर्मणि चातिप्रयुक्तानां क्रमेण वर्ष्मसु प्रविचितं विधाय यवसाद्युपयुञ्जानाः पुष्टिमुपगच्छन्ति । केचिद्व्याधिभिरभिभूताः । तत्र को हेतुर्यथा वने बलिनोऽरोगास्तु भवन्ति । तथा मे भगवन्व्याख्यातुमर्हसि' इति ।

तच्छ्रुत्वा भगवान्पालकाप्योऽब्रवीत्—अङ्गराज तत्र सर्वेषां हस्तिनां शरीरे समास्त्रयो दोषा वातपित्तश्लेष्माणो भवन्ति । तेषां च प्रशमननिमित्तं षड्रसा भवन्ति । भक्ष्यभोज्यलेह्यपेयचतुर्विधाव्यवहार्यविषमप्रकृतेः केचिद्दुर्वर्णाश्च भवन्ति । केचिद्बन्धव्याधित्वमापन्ना भवन्ति । तेषां यथाप्रकृतिसत्त्वबलोत्साहवयोग्रहाण्यवेक्ष्य रसानां पथ्यापथ्यप्रमाणं व्याख्यास्यामः । इह खलु भो नागानां वयोरूपविशेषा भवन्ति वातपित्तश्लेष्मभ्यः समस्तव्यस्तेभ्यः । तत्रास्य निमित्तमुपदिश्यते सा तस्य प्रकृतिस्तद्रूपविशेषः । समास्तु तेषां प्रकृतयो भवन्ति तत्संप्रयोगेना(न)रूपसत्त्वबलादयः । अथ यस्य नागस्य समास्त्रयो दोषा भवन्ति । मध्यमे....[1]प्रकृतिमान्समत्वप्रयोगमेवाभिरामं सबलादिषूत्तमत्वं

---

* धनुश्चिह्नान्तरगतः पाठो नास्ति कपुस्तके ।

---

१ क. °ममध्यप्र° ।

प्राप्नोति । तस्मात्रिविधाः शरीरदोषा भवन्ति वातपित्तश्लेष्मणामन्योन्यविषमप्रयोगजनसामान्या(?)च कुञ्जराणाम् ।

तत्र श्लोकः—

दोषाधिको भवेद्व्याधिः सामान्या प्रकृतिर्भवेत् ।
तस्मात्प्रकृतयो न स्युर्दोषाधिक्येन दन्तिनाम् ॥

अथ यो हस्ती वातप्रकृतिस्तस्येमानि सत्त्वशरीरायूंषि लिङ्गानि वेदितव्यानि । यस्य हस्तिनः श्लेष्मस्यान्ते वर्षासु पित्ते प्रचीयमाने वातधातुर्बलवान्*............... । लेलिह्यमानेष्वरण्येषु प्रक्षीयमाणयवसेषु क्षीणोदकतृणाशयेषु †...................... यवसोदकदिवसकरकिरणाभितापनाद्दान*विसरे काले †नागास्त्वक्मूलपल्लवाहारैरल्पप्राणा भवन्त्यल्पशुक्राः । तथा दिवसकरकिरणाभिहतानामोषधीनामीषज्जलधरसंछन्नानामुपयोगात्प्रण(न)ष्टग्रहनक्षत्रान्धकारमेघस्तनितनिर्घोषैर्विप्रसारङ्कविरूढं नृत्यच्छिखिकुलमीषत्कुसुमितवनखण्डाद्यारामशीतपरुषपवनाकम्पनादम्लमधुराः सर्वौषध्यः कटुतिक्तरसप्राया भवन्ति । तासां तरुणबलादीनां चोपयोगाद्वातो बलवान्भवति, तदा संजातकामः करी धेनुकां येदि[1] समायाति तदा जाते प्रकृत्या वातिकस्तस्य लक्षणानि सत्त्वशरीरबलवर्णतो भवन्ति । तद्यथाऽनवस्थितसत्त्वशरीरः, स्पन्दनो भीरुश्चपलो लघुसंचारपनो नाध्वासमर्थः परिशुष्कस्रोताः स्थूललण्डनखानुचरणस्तब्धः परुषच्छविस्तब्धरोमाऽसुस्वश्चलचित्तोविषमज्योतिर्वि*षमानसः प्रस.......... मूत्रपुरीषस्तीव्रकामो धेनुकासु रूढदन्तवदन....यनो योऽल्परोमा ले..............लो परिभिन्नतलनखः सर्वकर्मसु विषमो विरूपाक्षो बहुबहु............ प्रशुद्धारयुक्तोऽलस्थाते च नित्यमनवस्थितचित्तश्चिरग्राह्यः सततोत्सुकः क्षुत्पिपासासहः प्रत्यर्थेवेघर्तीव(†भारसहो विवृतान्धि(स्थि)शिरास्नायुविद्धाङ्गः स वातप्रकृतिः । तस्योपचारं वक्ष्यामि.............. प्रभूततैललवणमांस)रसवत्प्रतीपानम् । यवसकवलकुवलयानि वातहितानि । सर्वदा मधुराम्ललवणरसोपयोगश्च प्रशस्तः ।

मधुरैर्लवणैरम्लैः स्नेहमांसरसान्वितैः ।
वातिको....वहार्यः स्याद'.........बलवान्गजः ॥

* आदर्शपुस्तकेषु त्रुटिचिह्नं न दृश्यते । † आदर्शेषु त्रुटिचिह्नं नास्ति ।
* 'दानावसरे' इति भवेत् । †नागास्त्वग्मूल इति भवेत् ।
* 'विषमासनः' इति भवेत् । † धनुर्द्वयान्तरगतः पाठो नास्ति कपुस्तके ।

१ क. यदा ।

कषाये कटुतिक्तानां तथा च लघुरूक्षयोः ।
उपयोगादातुरः स्यादरोगोऽपि मतङ्गजः ॥
तस्मात्प्रकृतितत्त्वज्ञः प्रकृत्याऽनुगुणान्भिषक् ।
इत्या(त्य)न्नरस्या(सा)न्प्रविशेदारोग्यबलवृद्धये ॥

अथ यो गजः पित्तप्रकृतिस्तस्येमान्येव लिङ्गानि वेदितव्यानि—अथ खलु प्रावृडन्ते सलिलतृषितः सुरभिशिशिरेषु सलिलामृतं विसृक्षु वा वारिधरेषु घर्मबाहुल्याद्दुःस्थानशयनस्य जलौघसंनिरुद्धविचारमार्गत्वादव्यायामस्याग्निदौर्बल्यमुपजायते । ततः पित्तमुपचीयते । घनसंवृतदिवसकराकरणत्वात्सुकुमारीकृते जीवनप्रनष्टे वियदिन्द्रायुधबलाहके निर्मदपरभृतशिखिकुले प्रच्छन्ने नभसि तारागणदिग्वलये प्रफुल्लपद्मोत्पलकुमुदकल्हारसुगन्धिजलाशये क्रौञ्चकारण्डवचक्रवाकसारसानुगीतसरोदके प्रफुल्लवानीरासनसप्तपर्णबन्धुजीवे शरत्काले द्विरदः संसृष्टशुक्रसंचयो दिवा रात्रौ वा +.. ॥

कषायमधुराः शीता घर्मकाले क्रियाः स्मृताः ।
उष्णाम्ललवणाः स्निग्धाः शीतकाले विनिश्चिताः ॥
कटुतीक्ष्णोष्णरूक्षाश्च काले साधारणे हिताः ।
सर्वेष्वेव तु रोगेषु मनसः संप्रसादनम् ॥
गीतवादित्रनिर्घोषैर्वेणुवीणास्वनैस्तथा ।
मनोन्य(ज्ञ)मधुराहारैस्तथा स्वच्छन्दचेष्टितैः ॥
श्लेष्मणा गुरुगात्रो हि स्तब्धत्वं मातरिश्वनः ।
पित्तेन परिदाहोऽयं सर्वैर्वा पीडितोऽस्म्यलम् ॥
अस्मिन्द्रव्येऽभिलाषं मे दुःखत्यङ्गमिदं मम ।
तृषितो ह्यवितृप्तोऽस्मि क्षुधितोऽस्मीति वा पुनः ॥
वदतां हि क्रियाः सर्वाः सुखदुःखनिबन्धनाः ।
आयुर्वेदधरैर्दक्षैरेकैकाङ्गव्यवस्थितैः ॥
नराणां त्वततो व्याधिरुपलभ्येत वा न वा ।
वधबन्धपरिक्लेशं प्राप्नुवन्त्यपतिदारुणम् ॥
पानभोजनमप्येषां बलादेव प्रदीयते ।
देहि भूयो ममाऽऽलम्ब......श्चायं समोऽधिकः ॥

+ त्रुटिचिह्नमादर्शत्रयेऽपि नोपलभ्यते ।

१ क. विद्युदिन्द्रा° ।

इतीभानामवदतां दुःखादुःखमनुस्वपम् ।
एवं व्याधिपरिज्ञानं कुर्यात्तस्मिन्निरूपणम् ॥
यत्नतो विविधाकारे...... दानेरुपलभ्यते ।
यत्नतो व्याधिरूपाणि शास्त्रतत्त्वविभागतः ॥
दुष्टदोषे परिज्ञानं यथावत्परिकीर्तितम् ।
हस्तिनां हितकार्येण पालकाप्येन धीमता ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने चतुर्थस्थाने पथ्यापथ्यविचाराध्यायः षड्विंशः ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

अथातः करीषाध्यायं व्याख्यास्यामः ।

इति ह स्माऽऽह भगवान्पालकाप्यः—'अथ खलु भो यदा हस्तिनां वातपित्तकफरुधिरसंनिपातैः पीड्यन्ते। मृत्तिकानाहदोषैर्वातपित्तकफव्याधिनिग्रहार्थमिमानि पुरीषाणि देयान्यष्टाविति । तत्र गोमहिष्यजाविगजवाजिगर्दभोष्ट्राणां करीषाणि ।

गव्यं करीषं गुल्मार्शकृमिकोष्ठविशोधनम् ।, वातानुलोमनं पित्तलमानाहमृज्जगधवातगुल्मविषदुष्टेभ्यः सह मूत्रेण दद्यात् ।

अथ माहिषं करीषमुष्णवीर्यं तीक्ष्णं पादरोगार्दितेभ्यो नागेभ्यः शुद्धमेव दद्यात् ।

आजं करीषं तीक्ष्णमुष्णवीर्यं कृमिकोष्ठविशोधनं वातानुलोमनं मृत्तिकाभिलाषिपाण्डुरोगिभ्यः प्रसन्नायुक्तं दद्यात् । वाजिकरीषमुष्णवीर्यं तिक्तं कृमिकोष्ठहरं श्लेष्मविनाशनं मृत्तिकाभिलाषिपाण्डुरोगिभ्यो लवणयुक्तं दद्यात् ।

इभकरीषमुष्णवीर्यं त्वक्प्रलेपनार्थं दद्यात् ।

आविकमुष्णवीर्यं कृमिकोष्ठविशोधनं मृत्तिकाभिलाषिपाण्डुरोगिभ्यो दद्यात्।

औष्ट्रं श्लेष्महरं छविःप्रसादार्थं मृत्तिकाभिलाषिणे दद्यात् ।

गार्दभं करीषमुष्णवीर्यं मृत्तिकाभिलाषिपाण्डुरोगिभ्यो लवणयुक्तं दद्यात् । इति करीषाण्यष्टौ गुणदोषतो व्याख्यातानि ॥

अतःपरं मूत्रगुणान्व्याख्यास्यामः—

तत्र गवां मूत्रमुष्णवीर्यं मृत्तिकाभिलाषिभ्यो दद्यात् ।

माहिषं तीक्ष्णमाजं चोष्णवीर्यं मृत्तिकाभिलाषिणे दद्यात् ।

अथ गजमूत्रं तिक्तमुष्णवीर्यं मृद्दोषाय दद्यात् ।
गार्दभमुष्णवीर्यं वातश्लेष्महरं मृत्तिकाभिलाषिणे दद्यात् ।
औष्ट्रमतितीक्ष्णं कृमिकोष्ठविशोधनार्थं दद्यात् ।

तत्र श्लोकः—

स्निग्धानां वारणानां च दातव्यमिति निश्चयः ।
सर्वदा प्रतिपानार्थं रूक्षाणां न प्रशस्यते ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने परिचारचतुर्थस्थाने
करीषमूत्राध्यायः सप्तविंशः ॥ २७ ॥

अथाष्टाविंशोऽध्यायः ।

अथ हुताग्निहोत्रं पालकाप्यं रोमपादो विनयात्पप्रच्छ ' भगवन्यदेतद्द्रव्यं रसोननामामृतमिहोपदिष्टं तस्योत्पत्तिनिरुक्तानिष्टगन्धतां रसवीर्यविपाक उपयुक्तं यथानन्यान्पाने व्याधीन्निहन्ति, अशेषेण तन्मे व्याख्यातुमर्हसि' ॥

तत्र प्रोवाच भगवाञ्श्रीपालकाप्यः—इह खलु भोः सुपर्णः पुरा जननीहेतोराहरदमृतं विहायस्पतिवेगेन प्रलीनस्तस्यामृतभाजनात्संक्षोभात्ततो बिन्दुनिष्पातादनिष्टभूमावनिष्टगन्धमम्लरसोनमूलं लघुशीघ्रविपाकि तीक्ष्णरसमिति तस्माद्रसोनं रसोत्तमममृतसंभवं ब्रुवन्त्याचार्याः ।

तद्रसोनं मूले कषायरसं, बीजे मधुररसं, पत्रे तिक्तरसं, पत्राग्रे कटुरसं, नाले लवणरसं, संधानजननं मलविशोधनमसृक्प्रसादनमग्निदीपनं तीक्ष्णोष्णकटुकषायत्वाच्छ्लेष्मनिबर्हणम् । स्निग्धोष्णत्वादनिलापहं माधुर्याद्रक्तपित्तप्रशमनम् । गुरुत्वाद्बलमुपकुरुते । पैहिल्यात् (?) स्नेहमाधुर्यगुरुत्वादिभिर्गुणैः संनिपातमवकर्षति । विचित्ररसवीर्यगुणविपाकतो रसाद्रनम्(?) । तस्माद्दुरुगमनविहतभग्नास्थिमर्पि(थि)तविच्युतमोटितजर्जरीकृतानामकामाशनपाननिश्चितानां च घृतयुक्तं रसोनं देयम् । अन्नपानक्षीरफाणितसंयुक्तं दद्यात् । तथा रसरुधिरमांसमेदोऽस्थिमज्जाशुक्रक्षयिभ्योऽन्ये प्रमदक्षीणानामन्येषु च सर्वरोगेष्वरोगाणां बलमांसविवृद्ध्यर्थं रसोनं दद्यात् । मृगमहिषवराहरोहितमत्स्यानां ताम्रचूडबर्हिणलावतित्तिराणां च सूपशोषितेन रसोनं दद्यात् । वेसवारेण सघृतेन शाल्योदनं च भोजयित्वा रसान्रसोनं देयम् । तेनास्य बृंहितशरीरस्य रसरुधिरमांसमेदोऽस्थिमज्जाशुक्राण्युत्साहबलवृद्धिर्भवति । क्षीरघृतसंयुक्तं वि····पोतेभ्यो बलमांसविवृद्ध्यर्थं दद्यात् । यदा तु वर्षासु वातभूयिष्ठा

वारणा भवन्ति । मृद्वक्षणावुत्कर्णकवातगतिवाताानाहस्कन्दपाण्डुरोगगलग्रह-हस्तग्रहगुल्महृदयशूलगात्रापरसगदाभिन्यास्तम्भेषु च गजे तिलयुक्तं दद्यात् । अनुपानं च प्रसन्नां फाणितयुक्तां दद्यात् । यदा तु हेमन्तशिशिरवसन्तेषु भूयिष्ठश्लेष्माणो भवन्ति । मन्यास्तम्भश्लेष्माशिरोरोगाभिष्यण्णगलरोगकृमिकोष्ठपिटकातीसारव्रणदद्रूकण्डूश्वयथुविकारिणां त्रिफलात्रिकटुकविडङ्गचूर्ण-संसृष्टं लशुनं दद्यात् । अनुपानं च सुखोष्णोदकमजाक्षीरमरिचचूर्णसंसृष्टं दद्यात् । यदा तु शरद्ग्रीष्मकालयो रक्तपित्तबाहुल्यं वारणानां भवति धर्म-दाहश्च विषमदमत्तगमनखिन्नदेहेभ्यश्च मृद्वीकाशर्कराचूर्णसंसृष्टं लशुनं दद्यात् । अनुपानं च मृद्वीकाशर्कराचूर्णसंयुक्तं क्षीरं दद्यात् । जीर्णे च जाङ्गलयवरसानि जूर्णीपाटपोटगलकुशकासपत्राणि च दापयेत् । अनन्तरं च शिशिरसलिले पानार्थमपनयेत् । भोजनं पूर्वोद्दिष्टं दद्यात् । विंशतिपलिकमरत्निं कृत्वा विधां ह्रासयित्वा तत्तु भक्ततुल्यं स्नेहं दद्यात् । अथवा तैलेन सर्पिषा वा सुक्षुण्णं मृदुस्थितं विधार्थयुक्तं शुद्धं वा दद्यात् । हरितं मृदु विचित्रं यवसं फाणितो-पनाहं दद्यात् । तीक्ष्णतिलोष्टज्यवृष्टिशीतवाग्दंदादिभ्यः (?) सर्वकालं रक्षणं कुर्यात् । कमलकह्लारबहुविषकुसुमविप्रकीर्णां भूमिभागां मनोज्ञामगुरु-धूपितां होमपूजां सर्वतःसुलिप्तां शालां कारयेत् । शय्याभागं चास्य मृदुपांशुलसुखशयनं च करीषास्तृतं कारयेत् । अनेन क्रमयोगेन(ण) लशुनस्योप-योगात्षण्मासाद्वर्षं वा वारणो दीप्ताग्निर्जवनः स्थिरो बलवान्समधातुररोगो लघुगात्रविहारश्च भवति । यावच्चोपयोगकालाद्द्विगुणपरिहारस्तावत्क्षीरं यवागूं मधुफाणितसंयुक्तां दद्यात् । तदनन्तरं च क्षीरपानं भक्ष्यभोज्यपेयलेह्यानि च मधुराम्ललवणकटुकषायाणि शाल्योदनं किंचिदम्लरसं दद्यात् । यथावर्ष्म-प्रमाणमात्रायोगाधिकमजीर्णं वा प्रकृतिऋतुकालदेशसात्म्यादिविपर्ययो वा लशुनमज्ञानात्प्रयच्छन्ति, तदाऽस्य कोष्ठे लशुनव्यापन्नमिमान्व्याधीञ्जनयति । आनद्धकुक्षिहृदये पीडास्थाने च सुखं लभते । यवसकवलकुवलयपानान्नभोज-नादीन्नाभिनन्दति । पर्यश्रुमीलितनयनो ध्यानशीलो निद्रालुः पाण्डुरोगी रक्तमेही च कृच्छ्रमेही च भवति । तस्यैवं लशुनव्यापन्नकोष्ठस्य स्नेहव्यापन्न-चिकित्सितं कुर्यात् ॥

तत्र श्लोकाः—

कषायकटुतिक्ताद्या मूलनालादिजा रसाः ।
बीजमेवानुगच्छन्ति तापिताः सूर्यरश्मिभिः ॥

हीनक्रिया न सिध्यन्ति व्याधयो विविधा गजे ।
तस्मात्कुर्वीत शास्त्रोक्तं विधिं सम्यक्चिकित्सकः ॥
भक्ष्ययोगप्रमाणज्ञो मात्रायोगविशारदः ।
औषधानां विभागज्ञः स राजन्कर्तुमर्हति ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधानपरिचारचतुर्थस्थाने लशुनकल्पाध्यायोऽष्टाविंशः ॥ २८ ॥

अथैकोनत्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
लवणे योगमाख्याहि हितं यत्करिणां भवेत् ॥ १ ॥
रोमपादमिति ज्ञात्वा पालकाप्यस्ततोऽब्रवीत् ॥
लवणं संप्रवक्ष्यामि सर्वरोगप्रणाशनम् ॥ २ ॥
बिल्वाग्निमन्थस्योनाककाश्मर्यमथ पाटला ॥
पाषाणभेदकं रोध्रमपामार्गस्त्रिकण्टकम् ॥ ३ ॥
उभे हरिद्रे पाठा च तथैव च हरीतकी ॥
रोमकं च विडं चैव सामुद्रं सैन्धवं तथा ॥ ४ ॥
पिप्पली शृङ्गवेरं च मरिचानि च दापयेत् ॥
चव्यामतिविषां हिङ्गुविभीतकफलानि च ॥ ५ ॥
कुलीरशृङ्गी च तथा त्वचं निम्बकदम्बयोः ॥
मातुलिङ्गं च कालां च विडङ्गामलकी तथा ॥ ६ ॥
पूतिगन्धं च मुस्तां च काकमाची तथैव च ॥
हपुषा श्वेतया सर्वं मूर्वां तेजोवतीमपि ॥ ७ ॥
अम्बष्ठां तिन्तिडीकं च कण्डशः परिकल्पयेत् ॥
भागाः षष्टिपला ह्येते सूक्ष्मचूर्णीकृताः पृथक् ॥ ८ ॥
द्वात्रिंशत्को हिङ्गुभागो मूत्रेण सह योजयेत् ॥
पक्वं च तद्यथा सर्वं सम्यक्पिण्डीकृतं भवेत् ॥ ९ ॥
गोमूत्रमथ दद्यात्तु दधि मस्तु भिषग्वरः ॥
अथ तत्संवृतं सर्वं स्वनुगुप्तं निधापयेत् ॥ १० ॥
तिष्ये चैव विपक्वं स्यात्स्वस्ति वाच्य द्विजांस्ततः ॥
निवास्य पञ्चरात्रं तु वैद्यशास्त्रविशारदः ॥ ११ ॥

दद्यात्तु कृमिकोष्ठिभ्यः क्षीणानामग्निदीप्तये च ॥
मदक्षीणाय नागाय तथा वै मिश्रवर्चसे ॥ १२ ॥
एष्यपश्च मूत्रजं दान्तं विषयं वाऽपि कृमिजम् ॥
अजीर्णमसकृद्भुक्तमाद्यं च प्रयोजयेत् ॥ १३ ॥
गजानामथवाऽश्वानां महिषाणां गवामपि ॥
नरादीनामथान्येषां सत्त्वानां सर्वदा हितम् ॥
एवमेतत्प्रयोक्तव्यं भिषजा सिद्धिमिच्छता ॥ १४ ॥
इत्येतदङ्गाय विशेषतो वै प्रोक्तं मया सर्वमिदं हिताय ॥
संजीवनं चाग्निविवर्धनं च हितं गजानां लवणं यथावत् ॥ १५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे चतुर्थ उत्तरस्थाने लवणयोगोऽध्याय एकोनत्रिंशः ॥ २९ ॥

अथ त्रिंशोऽध्यायः ।

पालकाप्यमुवाचाङ्गो रोमपादो महायशाः ॥
गुणा ये पांशुदानस्य प्रमाणस्य च ये गुणाः ॥ १ ॥
केषामदेयो देयो वा वारणानामुदाहृतः ॥
येषु कालेषु वा दत्तो गुणोपेतः स्मृतः सदा ॥ २ ॥
अथ पृष्टं यथोद्दिष्टं प्रोवाच मुनिसत्तमः ॥
निखिलेनाङ्गराजाय यथाशास्त्रविनिश्चयः ॥ ३ ॥
आरण्यो दम्यमानश्च दान्तश्चैव मतङ्गजः ॥
पुराणश्चेति विज्ञेयाश्चत्वारोऽमी विनिश्चयात् ॥ ४ ॥
आरण्यस्तु स विज्ञेयः स्कन्धहारेण (?) संयुतः ॥
वाक्यादङ्कुशदण्डाभ्यां संज्ञां *यो ऽतीव बुध्यते ॥ ५ ॥
दम्यमानः स विज्ञेयो दम्यते यो मतङ्गजः ॥
संग्रहैर्विप्रयुक्तश्च बधबन्धैश्च वारणः ॥ ६ ॥
वाक्यादङ्कुशतोत्रैश्च क्रियां यः प्रतिपद्यते ॥
स दान्त इति मातङ्गो नृपकारैरुदाहृतम् ॥ ७ ॥

---

* 'यो नैव' इति भवेत् ।

---

१ क. सदा स्मृतः ।

मुनिबद्धमदो दान्तो बलशौर्यसमन्वितः ॥
प्रभावितो यो यत्रासौ स पुराणो मतङ्गजः ॥ ८ ॥
वातारण्यं हन्तु तथा प्रमाथं पांशुमेव च ॥
धारयेत्सर्वदा नागं संज्ञानिग्रहकारणात् ॥ ९ ॥
दम्यमानस्य नागस्य क्रिया विश्रम्भकारणात् ॥
नागं दान्तं यथायोगमभिनिश्चित्य शास्त्रवित् ॥ १० ॥
कालाकालं प्रमाणं च पांशुं चैवाभिहारयेत् ॥
नवस्यैव पुराणस्य पांशुर्न प्रतिषिध्यते ॥ ११ ॥
कर्मान्तरे च दातव्यः प्रमाथः पांशुरेव च ॥
स पातात्प्रयतव्यश्च स भवेत्परिकर्मभिः ॥ १२ ॥
वर्षासु ग्रीष्मकालेषु प्रमाथाहरणं भवेत् ॥
एकेन बहुभिर्वाऽपि दोषैर्दुष्टस्य हस्तिनः ॥ १३ ॥
पांशुं चैव प्रमाथं च सततं प्रतिषेधयेत् ॥
मनसो हर्षजननः प्रमाथः पांशुरेव च ॥ १४ ॥
मनसः प्रभवश्चैव ....मनीषिभिः ॥
अथातः पांशुदानस्य वक्ष्यते गुणसंग्रहः ॥ १५ ॥
अथ श्रद्धां च कुरुते तथाऽऽहाराश्रमं भवेत् ॥
पांशुर्मत्तस्य नागस्य मनःसौख्यविवर्धनः ॥ १६ ॥
पांशुर्बलस्य जननो................विवर्धनः ॥
पांशुरुष्णाभितप्तस्य जयसौख्यविवर्धनः ॥ १७ ॥
पांशुदानगुणोपेतो रसधातुर्विवर्धते ॥
रसतः शोणितं मांसं मेदोऽस्थीनि च दन्तिनाम् ॥ १८ ॥
क्रमान्मज्जा च शुक्रं च वर्धन्ते तेन धावतः ॥
पांशुदानगुणा ह्येते यथावत्समुदाहृताः ॥ १९ ॥
एवमेतत्प्रमाथस्य शृणु चान्यान्गुणानिमान् ॥
मलपङ्कापनयनं कण्डूविनयनानि च ॥ २० ॥
लिक्षायूकाप्रशान्त्यर्थं व्रणानां तु हिताय वै ॥
केचित्प्रमाथं पांशुं च उक्तेन.........प्रदापयेत् ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रचोदितः ॥ २१ ॥

इति श्रीपालकाप्ये चतुर्थस्थाने पांशुदानं नाम त्रिंशोऽध्यायः ॥ ३० ॥

---

१ क. °व कथितश्च म°। २ क. °नो रेतसश्च वि°। ३ क. उक्तेनैव।

अथैकत्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां रोमपादः प्रतापवान् ॥
उवाच पालकाप्यं तु विनयेन कृताञ्जलिः ॥ १ ॥
सप्तधातूद्भवा यास्तु संग्रहे संप्रकीर्तिताः ॥
मदावस्था मुनिश्रेष्ठ तत्र मे संशयो महान् ॥ २ ॥
कतमं धातुमाश्रित्य प्रथमा संप्रवर्तते ॥
द्वितीया कतरं प्राप्य तृतीया च महामुने ॥ ३ ॥
(*चतुर्थी पञ्चमी चापि षष्ठी चैवापि सप्तमी ॥
कं कं धातुं समाश्रित्य प्रवर्तेत महामुने) ॥ ४ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
रसाद्रक्ताच्च मांसाच्च मेदसोऽस्थ्नस्तथैव च ॥ ५ ॥
मज्ज्ञः शुक्राच्च राजेन्द्र मदावस्था प्रवर्तते ॥
यदा छविः प्रसन्ना स्यान्निश्वासः सुरभिस्तथा ॥ ६ ॥
सुमनाश्च भवेन्नागस्तथा रसगता नृप ॥
मदावस्थामिमां तां तु जानीयात्प्रथमां †बुधैः ॥ ७ ॥
एवमेव गुणाश्चास्य मुहुर्बृंहति च द्विपः ॥
आस्यं रक्तं च भवति ...... वमर्येतिवै भृशम् (?) ॥ ८ ॥
तस्यावस्था द्वितीया स्याद्रक्ता सार्द्रकपोलिका ॥
उज्जृम्भणपरश्चैव बृहन्नागः पुनः पुनः ॥ ९ ॥
स्रवेदल्पं च कोशेन न च रक्तमदो भवेत् ॥
साऽथोऽवस्था निबद्धा स्यात्तृतीया मांससंभवा ॥ १० ॥
यदा च वर्धते क्रोधः स्याज्जृम्भणपरस्तथा ॥
नेत्रे च पृथुले स्यातां युद्धे शूरश्च जायते ॥ ११ ॥
गन्धे पटुत्वमायाति लाघवं चास्य वर्धते ॥
वेगेऽप्युत्तमतां याति का....श्च भवत्यपि ॥ १२ ॥
चतुरङ्गबलं हर्षादभिद्रवति निर्भयः ॥
स्वाधीनश्च भवेद्धातुः वधेऽपि गजवाजिनाम् ॥ १३ ॥

---

* चतुर्द्वयान्तरगतो नास्ति पाठः कपुस्तके । † 'बुधः' इत्युचितम् ।

---

१ क. °ति बलिमिश्च ।

गजानां नृपमध्ये च तथा वाजिसमाजिषु ॥
विवादेष्वपि नागानां नान्यक्रीडोपसंभ्रमे ॥ १४ ॥
अन्तरापणभूम्यां च बालक्रीडाविहारयोः ॥
उद्वहेद्राजमात्रांश्च मदे मेदोद्भवे गजः ॥ १५ ॥
सवश्याङ्गुल्त्वचापिण्यां(?) चतुर्थ्यां नियतं गजः ॥
यदा त्वस्थीनि संप्राप्तो मदो भवति दन्तिनः ॥ १६ ॥
तदा भवेत्क्रोधपरः सर्वेषामेव भूमिप ॥
रथमश्वं नरं वाऽपि हस्तिनं वा विशेषतः ॥ १७ ॥
अन्यं वा किंचिदासाद्य सर्वं प्राणैर्वियोजयेत् ॥
अतिक्रामति मर्यादां वार्यमाणः प्रयत्नतः ॥ १८ ॥
किंचित्ससंज्ञो भवति निःसंज्ञश्च पुनर्द्विपः ॥
तां क्रोधनीं मदावस्थां जानीयात्तस्य दन्तिनः ॥ १९ ॥
अथ प्राप्ते तु मज्जानं तस्या वक्ष्यामि लक्षणम् ॥
स्थानस्थो योऽपि गच्छन्वा जले मध्ये स्थितोऽपि वा ॥ २० ॥
स च नोत्सहते गन्तुं क्रोधेन कलुषीकृतः ॥
स्थानानि हस्तिनां याति बद्धानां क्रोधमूर्छितः ॥ २१ ॥
मदादीनवसंधाय श्रुत्वा घण्टास्वनं तथा ॥
अटित्वा सुप्रदेशान्वै स्थानमेवोपतिष्ठति ॥ २२ ॥
एतां षष्ठीं मदावस्थां जानीयादतिवाहिनीम् ॥
अथ शुक्रमनुप्राप्ते मदे रूपं निबोध मे ॥ २३ ॥
अन्धो[1] न पश्यत्यपि च न शृणोति न बुध्यते ॥
रात्रौ दिवा च स्रवति रोषश्चापि प्रजायते ॥ २४ ॥
गन्धमस्या न तिष्ठति न चात्र प्रतिहस्तिनः ॥
निराहारस्य[2] चाप्यस्य न भवेत्प्राणतः क्षयः ॥ २५ ॥
मन्यन्ते केचिदाचार्या रिष्टमेवेति हस्तिनाम् ॥
अवस्थां सप्तमीं प्राप्य नैव जीवति वारणः ॥ २६ ॥
संभिन्ना मदमर्यादा मदकाष्ठा परा नृप ॥
स कृत्वा सुचिरं नागो मदविच्छर्दिमुत्तमाम् ॥ २७ ॥
क्षीणतोये यथा मेघो विच्छायाति(?)नृपोत्तम ॥
तथा क्षीणमदो नागः प्रशान्तिमुपगच्छति[3] ॥ २८ ॥

---

१ क. अंधो न यत्प° । २ ख. निरुहारस्य । ३ क. निर्गच्छति ।

तत्रावि[1]……तुं वक्ष्यामि यथा से मू(मि)[2]यते गजः ॥
अथ वायुः कफश्चैव पित्तं रुधिरमेव च ॥ २९ ॥
कुप्यन्ति सहिताः सर्वे स च कोपः सुदारुणम्(:) ॥
ते तु शुक्रमनुप्राप्ता वातपित्तकफास्त्रयः ॥ ३० ॥
शोणितं चापि ते सर्वे विनाशयन्ति वारणम् ॥
अस्थिप्राप्ते क्षयं याति मज्जाप्राप्ते तथैव च ॥ ३१ ॥
न तु शुक्रगते राजञ्जीवति द्विरदः क्वचित् ॥
सा सप्तमी मदावस्था स्वमूर्त्या दिव्यसंभवा ॥ ३२ ॥
प्रभिन्ना वारणेन्द्रस्य सहसा देहमाविशेत् ॥
न तां धारयितुं शक्ताः प्रतिदेहे मतङ्गजाः ॥ ३३ ॥
विशेच्छाया यथा देहं सर्वेषामेव देहिनाम् ॥
देहं तथा दिवमदो हस्तिनं प्रविशेन्नृप ॥ ३४ ॥
गजमत्तविशेषेण घर्षयत्यपि सर्वशः ॥
आति……तः समाम्यश्च[3] वर्धन्तेऽस्थीनि दन्तिनः ॥ ३५ ॥
मेदो मांसं च रक्तं च पित्तं श्लेष्मा च मारुतः ॥
उदीर्यन्ते प्रहर्षेण मेदस्तेनास्य जायते ॥ ३६ ॥
दशां तृतीयां संप्राप्ता ये माद्यन्ति मतङ्गजाः ॥
असंजातमदास्ते ते मदास्तेषु विपद्यते ॥ ३७ ॥
संप्राप्ता विंशतिं ये च मदं बध्नन्ति दन्तिनः ॥
तांश्च ग्राहयेद्राजा द्विरदान्मिश्रविंशकान् ॥ ३८ ॥
यः पञ्चाशतमाश्रित्य मदावस्थां(स्था) प्रवर्तते ॥
तत्र तत्र हि सा प्रोक्ता तव प्रीत्या मयाऽनघ ॥
इत्यब्रवीत्पालकाप्यो राज्ञाऽङ्गेन प्रणोदितः ॥ ३९ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचन उत्तराभिधानपरिवा-
रचतुर्थस्थाने मदावस्थानामाऽध्याय एकत्रिंशः ॥ ३१ ॥

अथ द्वात्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
प्राह हस्त्युदितः पूर्वं तं मे व्याख्यातुमर्हसि ॥ १ ॥

---

१ क. °विधिं तु व° । २ संभ्रयते । ३ ख. °मत्त वि° ।

ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥
द्वौ ग्राहौ कीर्तितौ राजन्नागस्तन्तुक एव च ॥ २ ॥
तयोर्नागसमुत्पत्तिस्थानं रूपं च मे शृणु ॥
नागसत्त्वं महाराज गजं गृह्णात्यरिंदम ॥ ३ ॥
नागसत्त्वपरिज्ञानमिदं प्रोक्तं मनीषिभिः ॥
श्वसनः स्निग्धनीलाभः पश्चार्धतनुरायतः ॥ ४ ॥
नीलच्छविर्दीर्घहनुर्निद्रालुः सूक्ष्मनिःस्वनः ॥
सकल्माषायतकरस्ताम्रजिह्वायतच्छविः ॥ ५ ॥
उदग्रः स्थूलहस्तश्च पिङ्गरक्तान्तलोचनः ॥
वारिजानां सगन्धो यो यवगण्डाप्रियश्च सः ॥ ६ ॥
पीनस्कन्धोऽल्पकर्णश्च चित्रपक्षोऽल्पपेचकः ॥
स्वप्नशीलस्तथाऽत्यर्थं स्वरे क्रूरे विशङ्कते ॥ ७ ॥
वृष्टिवाताशनिज्योत्स्नाधूमं चापि पिबेत्सदा ॥
नागसत्त्वः परिज्ञेयो नागस्य तरलो जयः ॥ ८ ॥
नागजातस्य नागस्य नित्यं नागजलाशयात् ॥
भयं भवति कालेन ततो नागत्वमिच्छति ॥ ९ ॥
नागपाशपरिक्षिप्तमवश्यं वशमागतम् ॥
तदा नागं हरत्याशु प्रत्यर्थं न तु विक्रमात् ॥ १० ॥
मणिरत्नोज्ज्वलशिरःस्वस्तिकाङ्कविभूषितः ॥
घोरो विद्युच्चलज्जिह्वस्तीक्ष्णदंष्ट्रो महाविषः ॥ ११ ॥
अनुगच्छति गच्छन्तं सुदीप्तो भाभिरव्ययः ॥
कषायमणिभिर्युक्तो ह्यमोघो ह्यजरामरः ॥ १२ ॥
तस्माद्भद्रेषु देशेषु नागानामालयेषु च ॥
(*दीप्ततोयासु वापीषु कूपेष्वारण्यकेषु च ॥ १३ ॥
सरस्सु च निभीयेषु(?) गिरिप्रस्रवणेषु च ॥)
नीलगम्भीरतोयासु सावर्तासु नदीषु च ॥ १४ ॥
उत्पलं कुमुदं वाऽपि पद्मं कोकनदं तथा ॥
विवर्णं दृश्यते यत्र तत्र वाच्यो द्विमस्तकः ॥ १५ ॥
नैव क्रीडेद्द्विजस्तेषु नागजातो विशेषतः ॥
स्थानेष्वेतेषु नियतं नागानामालयो भवेत् ॥ १६ ॥

---

* धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

चतुर्दश्याममावास्यां कृष्णाष्टम्यां तथैव च ॥
पञ्चम्यां चैव मुदिता नागाः क्रीडन्ति ते सदा ॥ १७ ॥
तस्मात्तेषु विशेषेण नागतीर्थं विवर्जयेत् ॥
अवश्यमवगाहस्तु कार्यः कार्यवशाद्यदि ॥
ग(गा)रुडेन विधानेन रक्षां कृत्वाऽवतारयेत् ॥ १८ ॥
हेमजैर्विविधैर्मन्त्रैर्द्विजोक्तैश्च विशेषतः ॥
भुजगेभ्यः समुद्दिश्य प्रयतश्च बलिं हरेत् ॥ १९ ॥
इति नागसत्त्वमृत्युर्नागानां तु प्रकीर्तितः ॥
एवं श्रुत्वाऽङ्गपतिः पुनः प्रष्टुमथाब्रवीत् ॥ २० ॥
भवन्ति(?) तन्तुकस्यापि श्रोतुमिच्छामि तत्त्वतः ॥
उत्पत्तिं च प्रभावं च प्रभवं चैव कीदृशम् ॥ २१ ॥
सूत्राणां सूत्रकश्चैव किमर्थमभिधीयते ॥
नागसंज्ञाकृतं चास्य ग्राहत्वं वा महामुने ॥ २२ ॥
कः प्रजानामभावाय को धर्मानानुवर्तते ॥
गजप्राणा हि दस्युभ्यः प्रजारक्षाश्च पार्थिवाः ॥ २३ ॥
महान्तोऽपि हि संघाता बलिनो बलवत्तराः ॥
नालमेकस्य करिणः सत्त्वस्यान्वर्थवेदिनः ॥ २४ ॥
दैत्यदानवसंघाताः प्राप्य दिग्वारणाश्रणे ॥
क्षयं नीत्वा सुरवरैः ससैन्यबलवाहनाः ॥ २५ ॥
प्राकारभूताः सपदि वारणाः शत्रुवारणाः ॥
जयन्ति परसैन्यानि प्रसह्य बलवत्तया ॥ २६ ॥
यथा ते नाभिभूयन्ते मुच्यन्ते ग्राहतो हिताः ॥
रहस्यमत्र यद्ब्रह्मन्नप्यार्जं(?)मिह तद्वद ॥ २७ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
कदाचिदपि संमर्दात्संक्रुद्धस्य महात्मनः ॥ २८ ॥
सर्वलक्षणयुक्तस्य गजस्यैरावणस्य वै ॥
मदवेगपरिभ्रष्टाः पतितास्तु महीतले ॥ २९ ॥
बिन्दवस्तेऽश्रुभिः श्लिष्टाः पवनेन समीरिताः ॥
शक्रगोपसवर्णाभा जनयन्त्यजरामरम् ॥ ३० ॥

---

१ ख. घ. °तिः मुनिप्रष्टुम° ।

गोक्षीरहिमसंकाशं वेगतन्तुकमव्ययम् ॥
मदेन मदसंकाशमत्यर्थबलओजसम् ॥ ३१ ॥
महामेघनिकाशानां गजानां विनिपातनम् ॥
नदीषु नीलतोयासु पद्मोत्पुलल्लतासु च ॥ ३२ ॥
सुनिगूढासु रम्यासु नित्यं तिष्ठन्ति तन्तुकाः ॥
सलिलस्य तु यो देशः सेव्यते नापि पक्षिणा ॥ ३३ ॥
सजीवाः सकृदावर्ता दृश्यन्ते यत्र निम्नगाः ॥
विवर्णं वा जलं यत्र शब्दं (?) चापि न लक्ष्यते ॥ ३४ ॥
अत्युष्णं चातिशीतं च तन्तुकं तत्र निर्दिशेत् ॥
यस्माद्गृह्णात्यतो ग्राहः सूत्राभः सूत्रतन्तुवत् ॥ ३५ ॥
तन्तुवद्वर्धते यस्मात्तस्मात्तन्तुकमुच्यते ॥
अवध्यत्वादमोघस्तु दारुणः सलिलाशयात् ॥ ३६ ॥
नागराजमदोत्पन्नास्तेन नागा इति स्मृताः ॥
न तस्य दृश्यते वक्त्रं न लाङ्गूलं न चोदरम् ॥ ३७ ॥
लूतीकाजालवत्सूक्ष्मः सर्वतो वाऽपि लक्ष्यते ॥
तदर्थं तस्य बलिनो विनियोगगतस्य च ॥ ३८ ॥
मदोत्पन्नस्य सहसा विनयातिमदस्य च ॥
भोगप्राप्तस्य करिणः प्राणवत्परिवेपते ॥ ३९ ॥
नागस्य तन्तुको हन्ति स्पृशन्नेव बलान्नृप ॥
अदृष्टकायस्य जले तन्तुकस्य यदृच्छया ॥ ४० ॥
न वध्यो दृश्यते यस्मात्सर्वथा भोगमाचरेत् ॥
नाग्निना न च शस्त्रेण नौकाभिर्न बलेन च ॥ ४१ ॥
न शक्यः शङ्खशब्दैश्च तस्य मोक्षो विशां पते ॥
गृहीतशस्त्रान्पुरुषानग्निहस्तांस्तथाऽपरान् ॥ ४२ ॥
छिद्यते नातिशस्त्रेण दह्यते दहनेन च ॥
दृष्ट्वा श्रुत्वाऽथ भो राजन्बहुशः परिवर्धते ॥ ४३ ॥
तस्मादेवं न कुर्वीत तन्तुकेनार्दिते गजे ॥
स गजेन्द्रमदोत्पन्नो येन शाम्यति तच्छृणु ॥ ४४ ॥
मेषशृङ्गेण चोत्थाप्य कूर्मपृष्ठे निपात्य च ॥
आदित्यकिरणैः स्पृष्टस्तुषार इव शाम्यति ॥ ४५ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने वृद्धपाठे चतुर्थ उत्तरस्थाने नागतन्तुकग्राहाध्यायो द्वात्रिंशत्तमः ॥ ३२ ॥

अथ त्रयस्त्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
हितार्थमब्रवीद्वाक्यं गजार्थं तत्त्वदर्शनः ॥ १ ॥
भगवञ्श्रूयते मृत्युर्गजानां जलजो गजः ॥
तत्र वेदितुमिच्छामि भगवन्संशयो हि मे ॥ २ ॥
एवं पृष्टोऽङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥
शृणु राजञ्जले यादृग्यस्मिंस्तिष्ठेज्जलद्विपः ॥ ३ ॥
अगाधमतिसंस्निग्धं जलं यत्र सफेनिलम् ॥
सबुद्बुदं सनिर्घोषं पक्षिभिर्यत्र सेव्यते ॥ ४ ॥
असौम्यं दर्शने यत्र तस्मिंस्तिष्ठेज्जलद्विपः ॥
वदनं वारणस्येव दन्ताङ्किकरमस्तकाः ॥ ५ ॥
पादाश्चास्य समास्तस्य अष्टनाभिनखास्तथा ॥
स्थलापतो महावंशः पृष्ठकर्णो महोदरः ॥ ६ ॥
छविश्च कण्टकाकीर्णा मुखं दंष्ट्राकुलं महत् ॥
शेषं च मकरस्येव स ज्ञेयो जलवारणः ॥ ७ ॥
श्रुत्वाऽस्य गर्जितं सद्यः पीत्वा च तज्जलं गजाः ॥
आयुःसत्त्वबलोपेता वयस्था नीरुजाः स्मृताः ॥ ८ ॥
यस्मान्म्रियन्ते तस्मात्तं देशं क्लेशेन वर्जयेत् ॥
अष्टम्यां च चतुर्दश्याममावास्यां च धार्मिकः ॥ ९ ॥
नदीपद्मविधानेन बलिं कुर्यात्प्रयत्नतः ॥
महीपालाद्भयं विद्वान्सम्यग्ब्राह्मणसत्तमः ॥ १० ॥
पानेऽवगाहे मातङ्गो यदि तद्गोचरो भवेत् ॥
मृत्पिण्ड इव निर्वीर्यो विलयं यात्यसौ गजाद् ॥ ११ ॥
उच्यतेऽत्र क्रिया येन मुक्तो नागो भवेत्सुखी ॥
यैः भिषग्जलमातङ्गाद्भयेत्तं नरोत्तम ॥ १२ ॥

सम्यक्संपूजयेद्राजा वैद्यं वस्त्राभ्रभूषणैः ॥
*इत्यब्रवीत्पालकाप्यो राज्ञाङ्गेन प्रणोदितः ॥ १२ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने उत्तराभिधानपरिवारचतुर्थे स्थाने जलहस्तिलक्षणं नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

अथ चतुस्त्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
जलौकालाबुशृङ्गाद्यैर्यदुक्तं रक्तमोक्षणम् ॥ १ ॥
तदशेषेण भगवन्सम्यगाख्यातुमर्हसि ॥
ततः प्रोवाच भगवान्पालकाप्यो महामुनिः ॥ २ ॥
जलौकानां विधानं तु यथाशास्त्रमुपायतः ॥
शोणितस्थापनार्थाय यथोक्तान्यौषधानि च ॥ ३ ॥
द्वादशैव जलौकानां जातयः परिकीर्तिताः ॥
षडत्र सविषा ज्ञेया निर्विषास्तु षडेव हि ॥ ४ ॥
पुष्करेषु प्रजायन्ते मधुराम्लं हि तज्जलम् ॥
अवन्तिविषये चान्या वत्सं(?) भूमीचरन्ति च ॥ ५ ॥
कलिङ्गेष्वपरान्ते च मध्यदेशे तथा परः ॥
कुशपुष्करसोनेषु जायन्ते ऊषरेषु च ॥ ६ ॥
पाञ्चाले यवने चैव सह्ये पाण्ड्ये तथैव च ॥
एते देशाः समाख्यातास्तव राजन्यथाक्रमम् ॥ ७ ॥
षडत्र सविषा उक्तास्तासां वक्ष्यामि लक्षणम् ॥
कृष्णाञ्जननिभा या च कृष्णवक्त्रा च या भवेत् ॥ ८ ॥
मस्तकश्चातिविःपीनो (?) विज्ञेया विषमाहिताः ॥
दीर्घायता यथा वल्ली विज्ञेया कर्बुरा नृप ॥ ९ ॥
मण्डूककुक्षिर्भवति स्वल्पेन पिसि(शि)तेन च ॥
तृतीया बलवा नाम विमुखी पापलक्षणा ॥ १० ॥
भवेत्सुसमुखी पार्श्वा तथा रोमशमस्तका ॥
मुखं च कृष्णं भवति ....लामतिः ॥ ११ ॥

---

* 'प्रत्यन्तरोल्लिखितं सूक्तिरत्नाकरात्' इति त्रिष्वप्यादर्शपुस्तकेषु संदर्भमध्य एवेतः प्राक्समुपलभ्यते ॥

इन्द्रायुधनिभप्ररूया ऊर्ध्वराजीमुखा च या ॥
यस्मिन्वसति तोये च साऽतिभास्करवर्चसा ॥ १२ ॥
....असाध्यां तां विनिर्दिशेत् ॥
इन्द्रायुधनि...... ......म्ना शृणु सामुद्रिका अपि ॥ १३ ॥
पित्तला भवति सक...... .... ॥
या पुष्पाञ्चितसर्वाङ्गी विज्ञेया पञ्चमी तु सा ॥ १४ ॥
गोविन्दना भवेत्षष्ठी शृणु तस्यापि लक्षणम् ॥
भवेद्रोहृष ....रस्या नरेश्वर ॥ १५ ॥
कायश्च वृत्तो भवति सविषा तु विनिन्दिता ॥
षडेताः सविषा ज्ञेया निर्विषास्तु निबोध मे ॥ १६ ॥
पिङ्गला प्रथमा ज्ञेया बहु मुञ्चति शोणितम् ॥
हरिद्वर्णा प्रशस्ता च प्रशस्तां तां विनिर्दिशेत् ॥ १७ ॥
शङ्कुवक्त्रा द्वितीया च मृतगन्धमुखी भवेत् ॥
कायश्च वृत्तो भवति विद्यात्तामपि निर्विषाम् ॥ १८ ॥
कोटीकाभा भवेदन्या स्निग्धवर्णा च या भवेत् ॥
मूषिकाभा चतुर्थी च......पतो वर्णतश्च या ॥ १९ ॥
स्पृष्टा भवति दुर्गन्धा पुण्डरीकमुखीं शृणु ॥
पुण्डरीकपलाशाभं मुखं यस्माद्विजायते ॥ २० ॥
एषाऽपि निर्विषा राजञ्शृणु शावरिकामपि ॥
मनःशिलाभा रुचिरा व्याविद्धा वा प्रदृश्यते ॥ २१ ॥
कश्चिन्मृद्वी च भवति कपिशां तां विनिर्दिशेत् ॥
हरिता पत्रवर्णाभा त्वकुमष्टादशाकुला ॥ २२ ॥
....केचित्तत्र न संशयः ॥
न तां मनुष्यः सहते गजानामुत्तमा हि सा ॥ २३ ॥
इत्येता निर्विषाश्चैव व्याख्याताश्च जलौकसः ॥
जातीस्तासां प्रवक्ष्यामि यथावदनुपूर्वशः ॥ २४ ॥
पाण्डुदेशे तथा सह्ये जाताश्च यवनेषु याः ॥
एता विशेषतः श्रेष्ठास्त्ववकाशाश्च सर्वशः ॥ २५ ॥
एता महाशनाः मोक्ता विशिष्टाः सर्वकर्मसु ॥
नवपञ्चाशया ह्येताः संकीर्णे न चरन्ति तु ॥ २६ ॥

स्थूलमध्याल्पकायाश्च परिक्लिन्ना तु या भवेत् ॥
अध्य(ध्या)यता तु या राजञ्जलौकास्तां विनिर्दिशेत् ॥ २७ ॥
मृत्तिकां शालिपिष्टां च माषचूर्णमथापि वा ॥
विरूक्षयेज्जलौकार्थमर्दयेत्सनुजास्तु या ॥ २८ ॥
शुक्लेन चापि वस्त्रेण सर्वतः परिवेष्टयेत् ॥
निबद्धाः सर्वतः कृष्णा मुखमूलमपावृणोत् ॥ २९ ॥
ततः शरावमध्ये च काञ्चने वाऽथ भाजने ॥
तत्रैतां निक्षिपेदाशु वस्त्रमासाद्य तत्त्वतः ॥ ३० ॥
जलैर्निर्वापयित्वा तु जलौकास्ता भिषग्वरः ॥
क्षीरेण श्वयथुं लिम्पेदथवा शोणितोक्षिताम् ॥ ३१ ॥
दद्याच्छस्त्रपदं चापि तस्मिन्ग्रहणहेतुकः ॥
जलौकाभिर्गृहीते तु शोणिते तस्य हस्तिनः ॥ ३२ ॥
कृते दोषापहरणे शोणितं न विदह्यते ॥
कृत्वाऽश्वखुरसंकाशं मुखं निवसति .... ॥ ३३ ॥
........................यित्वा तु तदा गृह्णात्यसंशयम् ॥
आदंशस्तुद्यते यस्तु कण्डूमांश्चैव जायते ॥ ३४ ॥
शुद्धवारि ....नाक्षिप्रं तमवगाहयेत् ॥
दंशं शोणितगन्धेन या तु नैव विमुञ्चति ॥ ३५ ॥
ततः सैन्धवचूर्णेन प्रतिसार्य जलायुकाम् ॥
हस्तेन तां ग्राहयित्वा ततो निष्पीडयेद्व्रजम् ॥ ३६ ॥
ये च वर्णाः समाख्याताः शोणितस्य पृथक्पृथक् ॥
तान्वर्णान्वा निरीक्षेत निःसृते शोणिते भिषक् ॥ ३७ ॥
इन्द्रगोपकवर्णं तु शुद्धं स्याद्यदि चेतरम् ॥
तस्मात्तं निःसृतं कुर्याद्रक्तमाशु विजानता ॥ ३८ ॥
न ह्यदृष्टे प्रकोपे च .... ॥
ईषज्जातं तु रुधिरं न व्याधिरतिवर्तते ॥ ३९ ॥
दोषावेशं च शमयेच्छीतलैर्मधुरैस्तथा ॥
............पूर्वमम्लाभिः कीर्तितास्ते जलौकसः ॥ ४० ॥
यदि वा कुशलो वैद्यः सविषामवतारयेत् ॥
विकारस्तत्र कार्त्स्न्येन यथावदुपदेक्ष्यते ॥ ४१ ॥

१ °येज्जलम् । २ क °षावशेषं श° ।

[illegible] ॥
चूर्णो [illegible] ॥ ४८ ॥
भेषजं [illegible] ॥
अनेन विधिना वैद्यो यः क्रियां कुरुते सदा ॥
अप्रमत्तश्च [illegible] स *[illegible] पुष्टिमावहेत् ॥ ४९ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने परिवारचतुर्थस्थाने जलौकाध्यायश्चतुस्त्रिंशः ॥ ३४ ॥

अथ पञ्चत्रिंशोऽध्यायः ।

पालकाप्यमुपासीनं पप्रच्छाङ्गो महायशाः ॥
उपसर्गो हि नागानां कथं भवति दारुणः ॥ १ ॥
कथमाशु विपद्यन्ते बहवो वारणा मुने ॥
साध्यैरपि मरैर्युक्ता रिष्टैरपि विना क्षता(ः) ॥ २ ॥
श्रेष्ठो वा म्रियते सद्यः कथमेको मतङ्गजः ॥
महाकायेषु मरणं सद्य एव यथा मुने ॥ ३ ॥
एतन्मे पृच्छतो ब्रूहि सर्वमेतन्महामुने ॥
स पृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ ४ ॥
शृणु राजन्यथातथ्यं यन्मां त्वं पृष्टवानसि ॥
यदाऽऽक्रम्य मृगशिरस्तिष्ठत्यन्यतमो ग्रहः ॥ ५ ॥
राज्ञो वा जन्मनक्षत्रं ग्रहः कश्चित्प्रबाधते ॥
यस्मिन्देशे पशुपतिर्विष्णुश्चापि न पूज्यते ॥ ६ ॥
दैवतानि च सर्वाणि भूतानि विविधानि च ॥
उपसर्गस्तदा राजञ्जायते प्राणनाशनः ॥ ७ ॥
यदा च गजशालासु न मांसरुधिरो [illegible] ॥
[illegible]च्छिद्रेषु सर्वेषु भूतानां न निवेद्यते ॥ ८ ॥
शान्तिर्न क्रियते यत्र सर्वपापप्रशान्तये ॥
भूतानि तत्र [illegible] हि ॥ ९ ॥

---

* 'राज्ञः' इति दूषितम् ॥

---

१ क. °दंशो यस्तु चात्र ।

पाकलो च महाघोरो रौद्रो वैष्णव एव च ॥
द्वौ तौ च घोरावत्यर्थं रूपिणौ गजनाशनौ ॥ १० ॥
तयोरन्यतमो मोहाद्यदा विशति पाकलः ॥
हुताशनार्चिसप्रभैर्व्याविद्धैरूर्ध्वमूर्धजैः ॥ ११ ॥
लम्बभ्रूर्वक्त्रमांसश्च महाकर्णो महाभुजः ॥
सिन्दूरसदृशाभैश्च वदनैर्जिह्मलोचनः ॥ १२ ॥
शुकपत्रसवर्णाभैः श्मश्रुभिर्व्यायताननः ॥
दंष्ट्रायुगेन(ण) तीक्ष्णेन करालेनेन्दुवर्चसा ॥ १३ ॥
अश्वमुखो नीलकण्ठः पृथूरस्को महाशिराः ॥
महाजानुः शुष्कजङ्घः पृथुपादो बृहन्नखः ॥ १४ ॥
कपालमालाभरणः शूलधृग्विश्वतोमुखः ॥
तथा खट्वाङ्गपाणिश्च नानाप्रहरणायुधः ॥ १५ ॥
व्याघ्रचर्मावृतश्चर्म वितत्याऽऽर्द्रं गजोद्भवम् ॥
मुक्ताट्टहासो विनदन्विविधान्भैरवान्रवान् ॥ १६ ॥
दीप्तमुक्तालयञ्शूलमुद्वमन्मांसशोणितम् ॥
विचित्रानेकरूपश्च युगाग्निरिव दुःसहः ॥ १७ ॥
बिभ्राणश्चैव शिरसा मृतं गजकलेवरम् ॥
बहुबाहुमुखः पांशुरदृश्योऽन्यैश्च देहिभिः ॥ १८ ॥
केवलं वारणैर्दृश्यो घोरः प्राणविनाशनः ॥
रूपेणानेन चरति पाकलः सर्वकोपजः ॥ १९ ॥
वैष्णवोऽप्यतसीपुष्पश्यामस्ताम्रायतेक्षणः ॥
विद्युल्लोलबृहज्जिह्वो विकटो वामनाकृतिः ॥ २० ॥
चलस्फिग्लम्बजठरः पिङ्गकुञ्चितमूर्धजः ॥
दारितास्यो महाहस्तश्चिपिटोऽतिमहाभुजः ॥ २१ ॥
वाराहमुखदंष्ट्रश्च नरसिंहाकृतिः पुनः ॥
दंष्ट्रान्तरविलग्नैश्च मानुषैश्च कलेवरैः ॥ २२ ॥
वारणास्थिमयं दाममभिरुह्य महद्द्रुवत् ॥
क्रीडमानो विवृत्ताक्षो मृतैर्गजकलेवरैः ॥ २३ ॥
शिवाक्रव्यादगोमायुप्रभृत्यनुगतः सदा ॥
नेत्राभ्यां वदनाच्चैव मुहुर्ज्वालां समुत्सृजन् ॥ २४ ॥

सशिरस्कं महाचर्म कृत्वा गजमयं ध्वजम् ॥
हरिच्छ्मश्रुमुखैर्घोरैर्दीर्घै रोमभिराचितः ॥ २५ ॥
व्याविद्धवक्त्राग्निलवैर्जीवितं दन्तिनां हरन् ॥
वैष्णवैश्चापरैरग्निहैर्युतो वै घोरदर्शनैः ॥ २६ ॥
ज्वररूपी स्वयं मृत्युः सद्यो गजविनाशनः ॥
स तेन रूपेण यदा गजान्विशति पाकलः ॥ २७ ॥
दृष्ट्वा वा तादृशं रूपं पाकलस्य भयानकम् ॥
वातः श्लेष्मा च पित्तं च दन्तिनो रक्तमेव च ॥ २८ ॥
सर्वं भयेन देहस्थं भयाधिक्यात्प्रकुप्यति ॥
यदा मुखेन चाऽऽगत्य जघनेनावतिष्ठते ॥ २९ ॥
गजदेहं च सहसा यदा विशति पाकलः ॥
गजस्योभयतो वाऽपि धातवो भयपीडिताः ॥ ३० ॥
भिन्दन्ति हृदयं देहात्ततो नागो न जीवति ॥
यदा मुखेन चाऽऽगम्य मुखेनैव निवर्तते ॥ ३१ ॥
(*जघनेन यदाऽऽगम्य जघनेन निवर्तते ॥
तदा जीवयते नागः सिद्धिस्तत्र विनिश्चिता ॥ ३२ ॥
बलिकामो यदा वाऽपि गजं गृह्णाति पाकलः ॥)
तदा जीवयते नागः सिद्धिस्तत्र विनिश्चिता ॥ ३३ ॥
एतत्पाकलविज्ञानं चरतः शृणु लक्षणम् ॥
गजदेहं समाविश्य कामरूपी च कामगः ॥ ३४ ॥
वसाशोणितमांसानि वातपित्तकफांस्तथा ॥
दूषयित्वा तु कर्माणि कृन्तत्यन्तर्गतो ज्वरः ॥ ३५ ॥
क्रुद्धः स्वामी गृहस्येव गृहमध्यगताञ्जनान् ॥
हेतुना येन मातङ्गा ज्वरं पश्यन्ति रूपिणम् ॥ ३६ ॥
प्रवक्ष्याम्यत ऊर्ध्वं च अग्निशापकृतं भयम् ॥
प्रविष्टोऽग्निर्यदा वासं शमीगर्भस्थितो गजे ॥ ३७ ॥
त्रिदशानां समाख्यातस्तत्र तामग्निरुक्तवान् ॥
मूका भूत्वा ज्वरं घोरं दृष्ट्वा पाकलरूपिणम् ॥ ३८ ॥
न वै सेत्स्यथ वः शक्तिं ज्वरार्ताश्च मरिष्यथ ॥
हेतुनाऽनेन भीतास्ते ज्वरं दृष्ट्वा द्रवन्ति तु ॥ ३९ ॥

---

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ॥

व्याधिं दृष्ट्वैव हरिणास्ततोद्विग्ना विचेतसः ॥
अश्रूणि मूत्रं लालां च सकृन्मुत्रन्ति चासकृत् ॥ ४० ॥
विमुच्य आरवं घोरं वेपमाना ज्वरातुराः ॥
मदान्धा इव मातङ्गा गच्छन्ति विषमेष्वपि ॥ ४१ ॥
प्रपतन्ति भयाच्चापि म्रियन्ते मारयन्ति च ॥
दिव्ययोगं समास्थाय ज्वरे योऽनुपसर्पति ॥ ४२ ॥
पुनर्नष्टः पुनः सृष्टः प्रहृष्टः पार्श्वतोऽग्रतः ॥
भूमावाकाशसंस्थश्च घोरा माया विदृश्यते ॥ ४३ ॥
एवं क्रूरो वैष्णवस्तु सर्वभूतवशंकरः ॥
यदा स्पृशति मातङ्गं तदा शय्यां विनाशयेत् ॥ ४४ ॥
चतुर्थे च महाराज पाकलो गजमाविशेत् ॥
गृह्णात्याकलयत्यन्नः(न्नं) स्पृशत्युच्छ्वासयत्यपि ॥ ४४ ॥
गृहीतो म्रियते सद्यो महापातं नयत्यपि ॥
दर्शयेत्सर्वरूपाणि क्रमेणानुमितो गजः ॥ ४६ ॥
संस्पृष्टश्छायया त्यक्तश्चिराद्रूपाणि दर्शयेत् ॥
...... सहसा भूत्वा सद्यः स्वस्थो भवेत्पुनः ॥ ४७ ॥
तमुच्छ्वासितमित्याहुः पाकलेन मतङ्गजम् ॥
बृंहते हस्तिरूपाणि हस्तं निष्पिष्य भूतले ॥ ४८ ॥
द्रुतं च पथि गच्छन्ति वीक्ष्य(क्ष)माणाः समन्ततः ॥
प्रस्तब्धकर्णलाङ्गूलाः सर्वतोद्विग्नचेतसः ॥ ४९ ॥
न च स्थानेषु तिष्ठन्ति निर्वाणं न भवन्ति च ॥
ज्वरस्तत्रोपसर्गाय चरतीत्यभिलक्षयेत् ॥ ५० ॥
व...न्स कुञ्जरान्हन्ति श्रेष्ठं वाऽपि मतङ्गजम् ॥
तत्र क्रियां प्रकुर्याच्च शोभार्थी भिषजां वरः ॥ ५१ ॥
पूजयेद्यततो रुद्रं विष्णुं सर्वांश्च देवताः ॥
रात्रौ भूतबलिश्चापि कर्तव्यो मांसशोणितैः ॥ ५२ ॥
सर्वासु राजशालासु चत्वरेष्ववटेषु च ॥
नगरात्स महामात्रान्निनयेद्द्वारणान्बहिः ॥ ५३ ॥
दिशि प्राच्यामुदीच्यां वा स्थानं जनमनोहरम् ॥
मनोरमतरान्देशानपरान्दन्तिनां ततः ॥ ५४ ॥

---

१ °नुगतो ।

प्रचार्य वारणानाजन्वृक्षमक्ततृणाशनान् ॥
अधिष्ठिता महामात्रैरेकाहारैः सुसंवृतैः ॥ ५५ ॥
सप्ताहमेवं संचार्य जपहोमपरायणैः ॥
पुरोहितस्तु कुर्वीत शान्तिं पापप्रणाशिनीम् ॥ ५६ ॥
तर्पयित्वा द्विजानन्नैर्दक्षिणाभिश्च पूजयेत् ॥
वासयेत्सहवत्सेषु वृषभाधिष्ठितास्तु गाः ॥ ५७ ॥
संस्नाप्यालंकृतं कृत्वा सर्वसंभारसंभृताः ॥
प्रवेश्या वारणा राजन्हस्त्यारोहैर्विशारदैः ॥ ५८ ॥
वेद्यैरहतवासोभिः सह व्याहृतिशोभिभिः ॥
आलानीयास्ततस्तम्भे बन्धेनानेन वारणाः ॥ ५९ ॥
यथा शतक्रतुः पूर्वं दृश्यते गर्भदारितः ॥
भूयःस्वात्मा यथा वत्स पुनः प्रविश स्वं गृहम् ॥ ६० ॥
भरद्वाजो मरुद्भिश्च हृतो भूप उदाहृतः ॥
तथा पुनः स्वशालायां क्षेमं वा लभ संभृतः ॥ ६१ ॥
प्रविशंस्तु निरुद्धस्तु स्तम्भे तिष्ठ शरच्छतम् ॥
अरोगो बलवान्भूयो राज्ञश्च विजयावहः ॥ ६२ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेद उत्तराभिधाने परिवारचतुर्थस्थाने महाप्रवचने वृद्धोपदेशे उपसर्गनिरूपणं नाम पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

अथ षट्त्रिंशोऽध्यायः ।

अङ्गो हि राजा चम्पायां पालकाप्यं स्म पृच्छति ॥
चतुर्मासीषु सर्वासु कथं नीराजयेद्गजान् ॥ १ ॥
लोहाभिहाराश्वयुजे कथं यज्ञो विधीयते ॥
को विधिः कोऽत्र नियमः को यज्ञः का च देवता ॥ २ ॥
प्रब्रूहि पृच्छतस्तन्मे यथावन्मुनिसत्तम ॥
स पृष्टस्त्वङ्गराजेन पालकाप्यस्ततोऽब्रवीत् ॥ ३ ॥
इदं शृणु महाराज यन्मां त्वं परिपृच्छसि ॥
लोहाभिहाराश्वयुजे योजयन्मासमयोजयेत् ॥ ४ ॥

जयाय नृपतेर्यस्माद्यज्ञं यत्नेन कारयेत् ॥
अयं हि प्रथमो यज्ञो नागानां संप्रवर्तते ॥ ५ ॥
सोऽयं संवत्सरे साध्यो यज्ञे नात्र विधीयते(?) ॥
तदा लोहित्यशिखरे संन्नाहश्चाऽऽयुधानि च ॥ ६ ॥
तदा नीराजनाकालं वाहकाले प्रयोजयेत् ॥
नीराजना वाऽऽश्वयुजे गजानां संप्रचक्षते ॥ ७ ॥
रोगाणां तु निवृत्त्यर्थं तथा रक्षांसि पन्नगाः ॥
पिशाचा गुह्यकाश्चैव गन्धर्वा यक्षराक्षसाः ॥ ८ ॥
दानवाश्चैव सर्वेऽपि कौमाराश्चापि ये ग्रहाः ॥
ये घोरा राजयक्ष्माणो रुद्ररौद्राश्च देवताः ॥ ९ ॥
उपसर्गाश्च पापाश्च पीडा नक्षत्रजा च या ॥
बलिं वा भोक्तुकामाश्च (*हन्तुकामास्तथा परे ॥ १० ॥
तथा क्रीडितुकामाश्च) घोररूपा महाग्रहाः ॥
देवोपघाता ये चान्ये तत्र शान्तिं व्रजन्ति ते ॥ ११ ॥
एतदर्थं महीपाल गजनीराजना स्मृता ॥
कार्तिकी प्रथमा राजन्द्वितीया फाल्गुनी तथा ॥ १२ ॥
आषाढी तु तृतीया स्यात्तिस्रो नीराजनाः स्मृताः ॥
चातुर्मासी भवेत्कार्या गजानां हितमिच्छता ॥ १३ ॥
तत्र यागं प्रवक्ष्यामि तन्मे शृणु नराधिप ॥
अश्वयुक्श्रवणं चित्राहस्ताश्विन्यः पुनर्वसुः ॥ १४ ॥
एष नक्षत्रयोगस्तु प्रशस्तो गजकर्मसु ॥
तिथिं तृतीयामिच्छन्ति तथा चैवात्र पञ्चमीम् ॥ १५ ॥
.... सप्तमीं चैव तथा चैकादशीमपि ॥
सावित्रं विजयो मैत्रो ध्रुवश्चाभिजितस्तथा ॥ १६ ॥
एते मुहूर्ता पञ्च स्युः कर्मारम्भेषु हस्तिनाम् ॥
अथ पुण्याहघोषेण मुहूर्ता ये प्रकीर्तिताः ॥ १७ ॥
तेषामन्यतमे कुर्याद्विद्वान्यज्ञविधिं शुभम् ॥
यथार्हं देवतानां च भूतानां च बलिं हरेत् ॥ १८ ॥
उल्लापिकाश्च लाजाश्च धान्यं दधि घृतं मधु ॥
पायसं मत्स्यकुल्माषलोहिताद्यं गुडौदनम् ॥ १९ ॥

---

*धनुश्चिह्नद्वयान्तःस्थो नास्ति पाठः कपुस्तके ।

गजाश्च सर्वमाल्यानां कल्पास्तण्डुलाम्बुतम् ॥
सुमतिष्ठं भूमिपीठं सर्वमाल्यानुलेपनम् ॥ २० ॥
दीर्घाग्रान्हरितो दर्भान्विमाषां चैव भोजनम् ॥
निवं शवं च विधिवद्वलेनुपरमाहरेत् ॥ २१ ॥
मञ्जनं तगरोशीरमियङ्गुं चैव योगवित् ॥
कुक्कुटं च वराहं च द्विखुरं च समाहरेत् ॥ २२ ॥
द्वे सूर्पे च तथा स्यातां द्वौ स्यातां व्यञ्जनौ तथा ॥
द्वे चापि पिटकौ(के) स्यातामष्टौ पटलकानि च ॥ २३ ॥
सर्वरत्नौषधीश्चापि धूपनं व्यञ्जनानि च ॥
रक्षाविधानं कुर्वीत गजानां स्वस्तिवाचनम् ॥ २४ ॥
तन्दुलाः स्वस्तिकाः पूता नवान्नं पायसं मधु ॥
पलाशाश्चापि समिधः शिग्रुकोदुम्बरास्तथा ॥ २५ ॥
अच्छिन्नाग्राः कुशाश्चैव दीर्घाग्रा हरितास्तथा ॥
गर्भागमे च कर्तव्या शान्तिः संव्यालयेऽपि च ॥ २६ ॥
पुरोहितो दक्षिणे च जुहुयाद्धव्यवाहनम् ॥
उत्तराग्निं च जुहुयाद्वैद्यः शुचिरलंकृतः ॥ २७ ॥
अहतक्षौमवसनः शुचिर्भूत्वा कृताञ्जलिः ॥
अष्टौ देवान्नमस्कृत्य गजानां स्वस्तिवाचने ॥ २८ ॥
प्रजापतिं च विष्णुं च सर्षभं च शचीपतिम् ॥
रुद्रं च बलदेवं च वरुणं धनदं तथा ॥ २९ ॥
सेनापतिं नमस्यामि गजानां स्वामिनं प्रभुम् ॥
सर्वजयप्रियं यज्ञं यज्ञभूमिं प्रकल्पयेत् ॥ ३० ॥
..........रतो वाऽपि ब्राह्मणानुमते शिवे ॥
प्रागुदक्प्रणये(वणे) देशे स्निग्धो....मिधिना शिवे ॥ ३१ ॥
प्रदक्षिणो....दके सर्वत्र सुपरिक्रमे ॥
निवर्तमानच्छायायां मुहूर्ते पूजिते तथा ॥ ३२ ॥
गोमयेनावलिप्याथ यज्ञभूमिं निवेशयेत् ॥
तस्या स्थानान्तरं तत्र कुर्यादष्टावरत्निपः ॥ ३३ ॥
तोरणे प्राङ्मुखे वाऽपि शतपात्ति च कारयेत् ॥
प्रागुदक्प्रवणे देशे शय्यामार्गं च कारयेत् ॥ ३४ ॥

चतुरस्रे सूपलिप्ते दक्षिणे उन्नते शुभे ॥
उत्सेधवच्च सुशुक्लमीशात्प्राग्यायतः शुभम् ॥ ३५ ॥
सुदृढं स्थापयस्तम्भं चतुरस्रं समाहितं ॥
उत्सेधेन दशारत्निं दशारत्न्युत्तरे भवेत् ॥ ३६ ॥
तस्याग्रे क्षौमकं बद्ध्वा शितयासी तथा स्मृता ॥
गोमयेनोपलिप्ताय पूर्वमेव सदाचितः ॥ ३७ ॥
हिंसा न जनयेत्तत्र तथा जनजनाविधिः ॥[1]
नोद्यानदेवोपहतान्नार्धशुष्का दृढात्मनः ॥ ३८ ॥
अनुगम्य नवान्वृक्षानृजुवृत्तान्शुभस्थितान् ॥
उत्सेधाद्द्वादशारत्नीन्कारयेत्तु विचक्षणः ॥ ३९ ॥
चन्दनैश्च यथोक्तैश्च स्नापयेदनुपर्वसु ॥
युग्मानि तस्य नागस्य कारयेदहतानि तु ॥ ४० ॥
हरिद्रापिष्टमादाय कुर्यात्पञ्चाङ्गुलानथ ॥
मङ्गलानि च सर्वाणि कारयेत विचक्षणः ॥ ४१ ॥
रोचनायाः प्रियङ्ग्वा च सम्यङ्नागं समालभेत् ॥
अद्भिश्चालंकृतं घृष्टं कुशाभिः समविस्तरेत् ॥
शोभितं वेणुपन्तीभिर्निबद्धः पञ्चरज्जुभिः ॥ ४२ ॥
आरोग्याय च नागानां नृपस्य विजयाय च ॥
मध्ये च स्वस्तिकं कुर्यात्प्रशस्तांश्छत्रकुञ्जरान् ॥ ४३ ॥
अवकीर्णाय जलैश्च यज्ञभूमिं समन्ततः ॥
कुशोदुम्बरशाखाभिरच्छिद्राग्राभिरेव च ॥ ४४ ॥
प्रागग्राभिरुदग्राभिर्जातवेदः परिस्तरम् ॥
सचन्दनाम्बवान्कुम्भान्पूरयित्वाऽथ वारिणा ॥ ४५ ॥
स्थापयित्वा यथाभागं यागं समवकल्पयेत् ॥
सर्वमेव च संयुक्तमनुपूर्वं च निक्षिपेत् ॥ ४६ ॥
ततो मैत्रे मुहूर्ते च बोधयेज्जातवेदसम् ॥
काष्ठैः पलाशकैश्चापि संयुक्तोदुम्बरैस्तथा ॥ ४७ ॥
ज्योतिः संजनयेत्तत्र पावकं जुहुयात्ततः ॥
गृहीत्वोदकपात्रं च प्रोक्षयेद्धव्यवाहनम् ॥ ४८ ॥

---

१ क. °थावजननावधिः ।

अदिते नमस्तेऽनुमते नमस्ते देवसवितुर्नमस्ते ॥
उत्तिष्ठाग्रे विबुध्यस्व स्वधीतं चरितं मया ॥ ४९ ॥
विबोधयन्त्यम्सरसो वहवस्ताश्च ब्राह्मणाः ॥
पापं च मम पृच्छस्व प्रसन्नो हव्यवाहनः ॥ ५० ॥
स्रु(स्रु)वेणाऽऽज्यं गृहीत्वाऽथ शान्तिर्भवतु हस्तिनाम्, स्वाहा ॥
समिधे स्वाहा, भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा, भूर्भुवःस्वः स्वाहेति॥५१॥
वृद्धौ बोधय भूतानि ब्राह्मणं वाऽमितौजसम् ॥
सहस्राक्षं भूपतिं च कुबेरं वरुणं यमम् ॥ ५२ ॥
विष्णुं चैव महात्मानं तथा नारदपर्वतौ ॥
उद्दालं काश्यपं कालं मरीचिं भृगुमेव च ॥ ५३ ॥
ऋषिमुख्यान्*मिष्यामि सर्वानेव कृताञ्जलिः ॥
आशिं चास्याऽऽहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥ ५४ ॥
भवन्त्परोगाश्च गजाः समृद्धिं तद्धि याजकाः ॥
द्विरदानां प्रयच्छन्तु बलारोग्ययशांसि च स्वाहा ॥ ५५ ॥
यक्षा भूतानि गन्धर्वा ओषध्यश्च दिशां गजाः ॥
आदित्या मरुतश्चैव अश्विनौ च तथा ग्रहाः ॥ ५६ ॥
गजानां संप्रयच्छन्तु वर्णारोग्ययशांसि च ॥
ऐरावतं पुष्पदन्तं कुमुदं वामनं तथा ॥ ५७ ॥
पुण्डरीकं नीलवर्णं सार्वभौमं सुतेजसम् ॥
सुप्रतीकं च नागौ द्वौ पर्वमालिनमेव च ॥ ५८ ॥
महागजास्तथैवान्ये तान्नमस्मे (?) कृताञ्जलिः ॥
आशिं चास्याऽऽहुतिं चैव भूयः स्वस्ति गजे पुनः ॥ ५९ ॥
भवन्त्वरोगाश्च गजाः समृद्धिं यान्तु याजकाः ॥
प्रयच्छन्तु च नागानां वर्णारोग्यशांसि च ॥ ६० ॥
अङ्गिरोजमदग्नी च वसिष्ठं पुलहं क्रतुम् ॥
दीर्घं परिचरं चैव पुलस्त्यं च्यवनं तथा ॥ ६१ ॥
देव्यः सद्यः स्थितास्त्वापस्तथा पर्वतमालिनम् ॥
हिमवत्प्रमुखांश्चापि तथैव कुलपर्वतान् ॥ ६२ ॥

---

* 'नमस्यामि' इति भवेत् ।

तथैक सर्वतोऽनन्तानभिष्यामि कृताञ्जलिः ॥
दिशो दश च ये नागाः संघुःकाममधिष्ठिताः ॥ ६३ ॥
भूमिधरान्भुजङ्गांश्च तानभिष्ये कृताञ्जलिः ॥
आशिं चास्याऽऽहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥ ६४ ॥
भवन्त्वरोगाश्च गजाः समृद्धि यान्तु याजकाः ॥
प्रयच्छन्तु च नागानां वर्णारोग्ययशांसि च स्वाहा ॥ ६५ ॥
सरितश्च नमस्कृत्य चतुरश्च महोदधीन् ॥
गङ्गां च यमुनां चैव नर्मदां च महानदीम् ॥ ६६ ॥
गोदावरीं भीमरथीं कृष्णां वेणां च निम्नगाम् ॥
विपाशां च वितस्तां च चन्द्रभागामिलावतीम् ॥ ६७ ॥
तापीं च मनसस्तापीं कौशिकीं गण्डकीमपि ॥
कुर्वन्तु स्वस्ति नागानां निर्वाणं च रणे तथा ॥ ६८ ॥
आपगाः सरितश्च स्युर्देशेषु नगरेषु च ॥
आशिं चास्याऽऽहुतिस्तेषां भूयः स्वस्ति गजे पुनः ॥ ६९ ॥
भवन्त्वरोगाश्च गजाः समृद्धिं यान्तु याजकाः ॥
प्रयच्छन्तु च नागानां वर्णारोग्ययशांसि च स्वाहा ॥ ७० ॥
भूमी(मि)धरानभिमतान्महातेजान्महाबलान् ॥
वन्दे वन्द्यान्महाभागाञ्शुचिर्भूत्वा कृताञ्जलिः ॥ ७१ ॥
अनन्तं प्रथमं वन्दे सर्वलोकाभिपूजितम् ॥ ७२ ॥
कर्कोटकं धूमशिखं वासुकिं च महाबलम् ॥
कालिकं चात्र वन्दित्वा बलमुत्पलमेव च ॥ ७३ ॥
हरिं च विद्युज्जिह्वं च कम्बलाश्वतरावुभौ ॥
उभयं च तथाऽऽदित्यं जिह्वां चोपरि लेढि च ॥ ७४ ॥
प्रपतन्तः..... ....श्चापि लाङ्गूलेन निषेवते ॥
अणुर्नागो महानागः पञ्चशीर्षो महाबलः ॥ ७५ ॥
नागो मणिग्रहश्चैव ये चापि धरणीधराः ॥
कुर्वन्तु स्वस्ति नागानां निर्वाणं ते रणे तथा ॥ ७६ ॥
अन्तर्भूमौ च ये नागा ये चापि दिशि गोचराः ॥
आशिं चास्याऽऽहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥ ७७ ॥

---

१ क. °न्तः करैश्चापि।

भवन्त्वरोगाश्च गजाः समृद्धिं यान्तु याजकाः ॥
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च स्वाहा ॥ ७८ ॥
उत्तरेण जयेद्वेद्यः सो(से)नान्यमभिकीर्त्य च ॥
सेनापतिं शक्तिधरं गजानां स्वामिनं प्रभुम् ॥ ७९ ॥
षष्ठीप्रियं क्रौञ्चरिपुं षण्मुखं द्वादशेक्षणम् ॥
रक्तमाल्याम्बरधरं घण्टाबर्हिणकुक्कुटान् ॥ ८० ॥
त्र्यम्बकं द्वादशभुजं कार्तिकेयं दुरासदम् ॥
रक्तप्रतिसरामाल्यः पताकावस्त्रचन्दनैः ॥ ८१ ॥
अर्चयेद्गुडसंपावपायसस्वस्तिकादिभिः ॥
तेषां प्रवर्तयेच्चापि समृद्धे जातवेदसि ॥ ८२ ॥
आशिं चास्याऽऽहुतिं तस्य भूयः स्वस्ति गजे पुनः ॥
भवन्त्वरोगाश्च गजाः समृद्धिं यान्तु याजकाः ॥ ८३ ॥
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च स्वाहा ॥
पूर्वदक्षिणतो यां च दक्षिणां च दिशं तथा ॥ ८४ ॥
तथाच नैर्ऋतीं वन्दे पश्चिमां च दिशं तथा ॥
वायव्यां चोत्तरां चैव तथा पूर्वो·········गाम् ॥ ८५ ॥
ततोर्ध्वं विदिशं वन्दे अदितिं देवमातरम् ॥
अधश्च ये दिशश्चैव तान्नमस्ये कृताञ्जलिः ॥ ८६ ॥
आशिं चास्याऽऽहुतिं तेषां भूयः स्वस्ति गजे पुनः ॥
भवन्त्वरोगाश्च गजाः समृद्धिं यान्तु याजकाः ॥ ८७ ॥
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च ॥
स्वस्तिकापूपसंपावमधुआलान्घृतं दधि ॥ ८८ ॥
हिरण्यं च सुवर्णं च वासांस्यभिनवानि च ॥
क्षीरेयं च सुरां चैव वाचैषा वरवारुणी ॥ ८९ ॥
गुडमोदनमांस्यं च मत्स्यान्कुल्माष एव च ॥
सर्वमेतदुपन्यस्तं ग्रहाणामग्रतोमिमार्गं ॥ ९० ॥
पुष्टिं ददतु ग्रहाः सर्वे इदं भुक्त्वा ददस्व च ॥
प्रयच्छस्व च नागानां वर्णारोग्ययशांसि च स्वाहा ॥ ९१ ॥

---

* 'लाजान्' इति भवेत् ॥

---

१ क. ख. ग्रहणा° ।

व्यपोहस्व च पापानि इह राज्यं शतं समाः ॥
त्वया विसृष्टाः करिणो मनुष्याणां च संगताः ॥ ९२ ॥
अविसृष्टं त्वया नापि भोक्तुमर्हति कश्चन ॥
अपूतिमांसं सा रक्षमुपघ्रापरिवर्जितम् ॥ ९३ ॥
अनारूढं हि मनुजैस्त्वममारुह्य कुञ्जरम् ॥
गृहाण च यथावत्त्वं सेनान्ये भद्रमस्तु ते ॥ ९४ ॥
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च स्वाहा ॥
आदायुधं ताम्रचूडं शतपत्रं मनोरमम् ॥ ९५ ॥
विचित्रपत्रं रक्ताक्षं कुक्कुटं दर्शयामि ते ॥
कुक्कुटं मे गृहाण त्वं सेनान्ये भद्रमस्तु ते ॥ ९६ ॥
संप्रयच्छन्तु नागानां वर्णारोग्ययशांसि च ॥
दंष्ट्राधरं चतुष्पादं पृथिव्यामुग्रदर्शनम् ॥ ९७ ॥
करेणुगात्रं रक्ताक्षं वराहं दर्शयामि ते ॥
वराहं तु गृहाण त्वं सेनान्ये भद्रमस्तु ते ॥ ९८ ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च स्वाहा ॥
प्रभूतवर्णं लाङ्गूलं सर्वाङ्गसुसमाहितम् ॥ ९९ ॥
धौतमामलकैः पूतैश्छागं संदर्शयामि ते ॥
छागमेतं गृहाण त्वं सेनान्ये भद्रमस्तु ते ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च स्वाहा ॥ १०० ॥
सहस्रमूलाव(द)नतं देवराजविलेपनम् ॥
प्रवरं सर्वमूलानामुशीरं दर्शयामि ते ॥ १ ॥
उशीरं मे गृहाण त्वं सेनान्ये भद्रमस्तु ते ॥ २ ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च स्वाहा ॥
वैराजजां त्विमां मालां सहस्राक्षेण धारिताम् ॥ ३ ॥
संभूतां पर्वतश्रेष्ठे आहृतां गन्धमादनात् ॥
नारायणकृतावासां बलदेवप्रियां शुभाम् ॥ ४ ॥
गृहाण मालां प्रवरां सेनान्ये भद्रमस्तु ते ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च स्वाहा ॥ १०५ ॥
इमाममृतसंभूतां देवतानां मनोहराम् ॥
प्रीतिसंजननीं देवीं भूतनागनिषेविताम् ॥ ६ ॥

सर्वेषु च प्रवाहेषु क्षेत्रनीराजनासु च ॥
नागानां च प्रवेशेषु[1] मङ्गल्या वारुणी स्मृता ॥ ७ ॥
सुरां सुगन्धां सुरसां निशाचरमनोरमाम् ॥
पूजितां देवमनुजैः प्रसन्नां दर्शयामि ते ॥ ८ ॥
वारुणीं मे गृहाण त्वं सेनान्ये भद्रमस्तु ते ॥
संप्रयच्छस्व नागानां वर्णारोग्ययशांसि च स्वाहा ॥ ९ ॥
इमे शङ्खा मृदङ्गाश्च कांस्यवाद्यानि यानि च ॥
वीणा सपाणिपणवो(वा) नार्यः परिषदं गताः ॥ ११० ॥
आहूता मङ्गलार्थं वै गायन्ते मधुरस्वराः ॥
इहैकरात्रं दिवसं विजयाय नृपस्य च ॥ ११ ॥
विविधानि च रूपाणि सम्यग्बुद्ध्वा हुताशनैः ॥
कू(क्री)यमाने(णे) निमित्तज्ञो लक्षयित्वा विनिर्दिशेत् ॥ १२ ॥
कू(क्री)यमाणं क्षयं याति योऽग्निश्चिटचिटायते ॥
छिद्रार्थं पुरुषश्चापि वस्त्रगन्धस्तथैव च ॥ १३ ॥
अनेकवर्णो भवति अभ्रकाकृतिसंस्थितः ॥
होतृदाही[2] च यो वह्निर्द्विजानां क्षयमादिशेत् ॥ १४ ॥
(*कूजमानस्फुलिङ्गाद्योऽक्षयं राज्ये विरूपवान् ॥
धूमवान्न(न)श्मवान्नाथ चर्मगन्धसमश्च यः ॥ ११५ ॥
गोमुखाकृतिसंस्थानो गवां स क्षयमादिशेत् ॥)
अव्यक्तवर्णो दुर्गन्धिर्विप्रकीर्णशिखोऽनलः ॥ १६ ॥
क्षिप्रं विनाशयेद्राष्ट्रं साम्राज्यं सपुरोहितम् ॥
राज्ञीमरणमेवापि वसागन्धसमोऽनलः ॥ १७ ॥
हीनस्वनश्च दीप्ताग्निः कुणपस्येव दह्यते ॥
संबन्धस्याच्छिन्नशिखो हतमाख्याति पार्थिवम् ॥ १८ ॥
श्यामः पापकृतिश्चापि वायसप्रतिनिश्चयः ॥
राज्ञः कोशविनाशाय युवराजवधाय च ॥ १९ ॥
एतद्धि कुरुते वह्निरविधूमाकृतिश्चयः ॥
करे चोरसि दाही च होतृदाही च यद्भवेत् ॥ १२० ॥

* धनुश्चिह्नान्तरगतो नास्ति पाठः कपुस्तके ।

१ क. प्रदेशेषु । २ क. होतृदाहे ।

तत्रार्थहानिं जानीयात्तस्मिन्नुत्पातदर्शने ॥
करीषधूमसंकाश इन्द्रायुधसमद्युतिः ॥ २१ ॥
हस्तिनां संक्षयं क्षिप्रं तद्विधो वह्निरादिशेत् ॥
कक्यः कपिसंस्थानमथ धर्मसमन्धिकः ॥ २२ ॥
भयनाशं तदाऽऽख्याति हूयमानो हुताशनः ॥
हरिद्रारिद्रवर्णाभो वेपमानो यदाऽनलः ॥ २३ ॥
निगडाकृतिसंस्थानस्तत्र शङ्खानिलाकृतिः ॥
पाशाकृतिनिभश्चापि राज्ञो निधनमादिशेत् ॥ २४ ॥
विच्छिन्नद्रवतूर्याणामाकेतारुदितस्वरः ॥
वामनो यस्य गन्धौघधूमः प्रतिनिवर्तते ॥ १२५ ॥
मत्स्यशोणितगन्धस्तु तुल्यौ(?) मज्जश्च यो भवेत् ॥
राज्ञस्तत्र वधं दद्याच्छास्त्रप्रोक्तैरिमैर्भिषक् ॥ २६ ॥
अशुभान्येवमादीनि निमित्तानि च भूपते ॥
प्रासादादिभिरुत्राभिः स्त्रीपदकलशाकृतिः ॥ २७ ॥
प्रदक्षिणावर्तशिखोऽससरखोदधिस्वनः ॥
शङ्खप्रभवमेघानां मेघदुन्दुभिनिस्वनः ॥ २८ ॥
सुवर्णरजतप्रख्यक्षीरपायसगन्धवान् ॥
शस्त्राणां कवचानां च ध्वजानां च महीपते ॥ २९ ॥
भास्वते तेजसाऽत्यर्थं संग्रामे जयमादिशेत् ॥
प्रहृष्टमनसश्चैव शुक्लाम्बरधरानपि ॥ १३० ॥
ईरयेयुः शुभान्भावांस्तज्ज्ञेयं जयलक्षणम् ॥
यदा त्वशुभोऽप्रसन्नो''''द्धव्यवाहनम् ॥ ३१ ॥
महाभयं विजानीयात्तस्मिन्नुत्पातदर्शने ॥
सृजन्मूत्रपुरीषो वै निद्राम(?)न्दुर्मना गजः ॥ ३२ ॥
व्याधितात्तेन भूपश्च निर्दिशेच्छास्त्रकोविदः ॥
असंभ्रान्तमना यस्तु निर्गच्छेत्तत्र वारणः ॥ ३३ ॥
यात्रासिद्धिं विजानीयाद्भूपतेर्जयलक्षणम् ॥
'………''''प्रकृति''''पार्श्वतो वा मतङ्गजः ॥ ३४ ॥

---

१ क. °धूपसं° । २ क. °कृतीरु° । ३ क. तुल्यौ । ४ क. यात्रास्थितं । ५ क. पृष्ठतः प्रकृतिर्यश्च पार्श्वतो ।

नवोदकाभिवृष्टायाः पृथिव्या गन्धवद्भवेत् ॥
(*नृपस्य विजयं विद्याछीघोत्थानो विधूमवः ॥ १३५ ॥
अनिर्गते राजेनाग ···· ···· ···· ····रणाद्यदि ॥
पशुर्मनुष्यो वत्सो वा चापि वा पुरुषर्षभः ॥ ३६ ॥
विद्याद्गजानां स भयं सारोहपरिकर्मणाम् ॥
पुरोहितविनाशाय तं निमित्तं विनिर्दिशेत् ॥ ३७ ॥
शान्त्यर्थं तस्य पापस्य विधिमन्यं समाचरेत् ॥)
ऐरावतं समारुह्य यथेन्द्रेण पुराजितः ॥ ३८ ॥
जयत्वं पार्थिवाञ्शत्रूंस्त्वामारुह्य यथा रणे ॥
यदि दक्षिणगन्धस्य शस्तं चंक्रमणं भवेत् ॥ ३९ ॥
नागराजस्य नृपतेर्भूलाभं तत्र निर्दिशेत् ॥
शत्रुहानिं विजानीयाद्वामक्रान्ते विपर्ययः ॥ १४० ॥
छत्रध्वजपताकानामुल्कानां दर्शनं तथा ॥
भेदेन कलशानां च सत्पोत्राणां च छेदने ॥ ४१ ॥
धात्रीघातो विजानीयात्तस्मिन्नुत्पातदर्शने ॥
तोरणाद्द्वारमाप्नोति यदि नागो निवर्तते ॥ ४२ ॥
क्रोधाभिभूतः स गजो विनश्यति न संशयः ॥
श्रद्धया तु हविःशेषे पिण्डे भुक्ते यदा गजः ॥ ४३ ॥
महासुभिक्षं जानीयादुर्भिक्षं छर्दनाद्भवेत् ॥
महद्भयं तत्र भवेत्तस्मिन्नुत्पातदर्शने ॥ ४४ ॥
समः स्निग्धोऽनुनादी च गम्भीरः पण्डितस्तथा ॥
वारणाय यदा शब्दस्तद्भवेज्जयलक्षणम् ॥ १४५ ॥
भिन्नोऽल्पशब्दो रूक्षश्च भेरीजर्जरनिस्वनः ॥
वादित्राणां यदा शब्दस्तदा न जयकल्पते(?) ॥ ४६ ॥
विस्वरं रवते भूमिः कम्पते स्फटते तथा ॥
नीराज्यमाने नागेन्द्रे भर्तारं त्वन्यमिच्छति ॥ ४७ ॥
निमित्तान्येवमादीनि शुभान्येव निवेदयेत् ॥
एतेष्वपि च कर्तव्यं शान्तिकर्म निवेशयेत् ॥ ४८ ॥

---

* धनुर्द्वयान्तरगतो नास्ति॰ पाठः कपुस्तके ॥

---

१ क॰ समाप्ति॰ ।

आयुर्वेदस्त्विहाध्याये वारणानां समाप्यते ॥
चतुर्थे चोत्तरं स्थानं परिचाराभिसंज्ञितम् ॥ ४९ ॥
यस्त्विमं निखिलं वैद्यः शास्त्रं वेत्ति ससंग्रहम् ॥
यथावत्सपरीवारं प्रापणे न स मुह्यति ॥ १५० ॥
तस्य राज्ञो गजा नित्यं हस्ते देया जिगीषुणा ॥
स च योग्यः क्रियां कर्तुं वारणानां भिषग्वरः ॥ ५१ ॥

शुभविधिमनुसृत्य यश्चिकित्सां
निपुणमतिर्नियतं करोति वैद्यः ॥
स भवति सततं नृपेण पूज्यः
कृतमति(?) विबुधः समीक्ष्य नागान् ॥ ५२ ॥

इति राजकुलप्रदिशं चिकित्सा-
मृषिऋषभः स चकार पालकाप्यः ॥
तनुरुहचरणाय पृच्छते मां
सुरपतितोयधनेश्वरोपमाय ॥ १५३ ॥

इति श्रीपालकाप्ये हस्त्यायुर्वेदे महाप्रवचने वृद्धोपदेशे
उत्तराभिधाने परिवारचतुर्थस्थाने षट्त्रिंशो
गजशान्त्यध्यायः ॥ ३६ ॥

परिसमाप्तेयं पालकाप्यविरचिता हस्त्यायुर्वेदसंहिता ।